443

निर्णय दीपक:

Nirnaya Deepaka		Title
Acak Dvivedi		Author
		Editor
1575 Samvet		Year, Vols.
		Publisher
443		Remarks

नं.५

1143

॥ निर्णयदीपक ॥ ॐ

वि०टी० ॥श्रीगणेशाय नमः॥ ॥हेरंबः सर्वकार्यार्थसिद्धिदः सर्वदास्तु नः॥ सिद्धिबुद्धियुतः सोऽस्तु मम
१ यन्निर्मितकर्मणि॥१॥ देवः श्रीब्राह्मजन्मा गणपतिरखिलान्नागरानायबुद्धीन्लक्ष्मसि
न्ममस्तो जगति नुनयतोयत्नकृत्वस्तिताम्बु॥ येषां संसग्रह्य त्वा परमविधिपुतां पंचयत्ना
न्विताया धन्यास्विचारमुक्तान विरमतियतो नित्यच्चपकीकाराचित्॥२॥ षट्कर्मधर्मनिरतैः
पिवातितैपैयत्तक्रियाकृन्नालिनिस्कविचारगर्भैः॥ धर्म्यैर्द्विजैश्च शरणागतसाधुवृत्तै
रास्थापितं पुरवरं हि निवेनहृद्॥ विद्याहृदाधर्महृदा नानृतहृदि येनरा॥ वसंति यत्र ते
नैतद्वुधा हृद्युरं विदुः॥४॥ आचार्यतामुपगताय चतुर्मुखाय यन्नामुः स्वयं सकरसक्त वि १
वाहयोनः॥ तैगाजागजानहृदनपवर्णिसंव्यतारात्त्रीर्थास्पदं नगरमेतदलंमिसा॥५॥ ना
स्मान्निर्तनु नागरतोवेदार्थवादः कदाजेपायत्नमदन्नयैरिति विद्योब्रह्मर्षिभिर्निर्गतं॥
दुर्वासावसतिस्म नाकनिजये व्यासोपिकाशी पुरोगस्त्रियस्तौ समुद्ररेत्रिगनीलेका रु

नात्मालयः॥ अतः सन्मानमर्हंति सर्वेभ्यो नागरानतु॥ यतोत्र सर्पिराज विंनिदेवाचिभि
र्दिवेषिभिरुपासितः॥७॥ येनागरान्न वलयेप्रसिद्धाः स्वः स्वः क्वमार्गाचिरणोप्रगल्भाः॥ द्व
व्यग्रहाना सक्कुवेरशोनाहर्मद्विपश्चलनिवाकटोरा॥८॥ तेषु त्र्यक्षीरन्नूहेकामडोडल्प्र
निधोन्नमा॥ तस्माधारिंगदेवोन्नह्रुरायाधर्मवर्द्धनः॥९॥ अनंतनामासमभून्नंदगजो
योध्यापेयहेदमनेन वाडवान॥ अनंतभक्त्या निजजन्मसार्थकं कृतापयाश्रीश्वरधाम
निर्मलं॥१०॥ लक्ष्मीधरास्तनुरनंदनंतोदानंददायाम्नु विन्नसुराणां॥ यस्मिन् द्विजे श्री
श्रमरस्वतीव कृद्धवमावेनसदोषतुस्ते॥११॥ लक्ष्मीधरादात्मजनुर्नंद्विजोत्तो गोविंद
नामानुविविश्रुतोय॥ वेदार्थविद्वैदिककर्मवित्तोद्विजन्मनैरर्चितपादपद्मः॥१२॥ त
स्यात्मजोनन्नतनुवछराजेवचैस्वि निर्विस्लनवं त्वाराजः॥ योधर्मवत्माश्रियवन्सराजः
सर्वार्थविज्ञानविधौ स राज॥१३॥ श्रीवत्सराजादचजद्विवेदीजनुर्दधद्विप्रजनाभि

रेणु॥श्रीनागराणांश्रीतिसागरराणांकरोतिकिंविछुनकर्मसिद्धै॥१४॥श्रीरामन्महारु
द्रन्वेविधानेकऋग्वेदविद्यासमानारिकंयत॥तस्मात्तुजेनिर्णयदीपकाख्यग्रंथेयवचोमोह
हरंकरोमि॥१५॥ग्रंथेमुनीनांवचनानितानियुक्त्याविचारादिधिकार्यवंति॥यथायथाद
र्शितलग्नम्नूत्यान्नयातयातिर्मलताधिकास्यात॥१६॥येनामकेचिदिदनग्रयथपेसवृ
त्तानानंतियेकिमपितावप्रतिनैषयत्न॥जयस्यतेनुममकोपिसमानधर्माजोप्यपति
रवृधिविपुलाचपृथ्वी॥१७॥जनकंस्वंप्रणम्याथगुरुंमद्दविनायकं॥तिथ्यादेनिर्णयं
ब्रूतेश्वलोनागरवाडव॥१८॥द्विवेदीविदुषांप्रधानतमनयंश्रीवत्सराजोद्विजस्तस्यतु
स्तकेलद्विजोक्तिरजसामेवाःछतीयाचरलः॥तिनायंक्रियतेप्रियायविदुषांसन्निर्ण
यकांक्षिणांग्रंथोनिर्णयदीपकोधिकसताश्रीहद्दएर्वपुरे॥१९॥तिथ्यादिकंचोदना
तश्चाद्धदानादिकर्मसु॥अंगत्वेनेष्यतेतस्मान्निर्णतिव्यत्नमर्हति॥२०॥आदिन्नवे २

तेकालेनक्षत्रादिश्चनिर्णयोनामपरस्परविरोधायप्रतिपादकानांवाक्यानामेकार्थस्था
पनं॥चोदनाविधिवाक्यंप्रवर्त्तकनिवर्त्तकरूपेणाविधिर्द्विविधः॥प्रवर्त्तकोयथोदयेस्त्रि
तायितस्यस्कदधाम्नहन्तिचोदकं॥अंत्तेचविविधंदधास्तंततिस्तेनवर्द्धतः॥प्रवर्त्त
कोयथादर्श॥१॥निवर्त्तकोयथा॥अमावास्यानगछेत्नापकालामपिस्त्रियं॥तच्छिद्य
तेत्रहक्षांम्रनाधादन्तंपरस्यच॥तयासायंप्रातरग्निहोत्रंजुहुयात॥संध्यायानन्तं
नीतन —— ववेदिति॥२॥वंतावदएवंविधिविषयत्वेनकर्मणःप्रधानता॥तस्मिन्क
र्मणिगुणानस्यतिथ्यादरेधिकरणत्वेनान्वयइति॥अतएवगार्ग्येणोक्तं॥तिथिनक्ष
त्रकालादिसाधनंपुण्यपापयोः॥प्रधानगुणभावेनस्वातंत्र्येणतेक्षमाइति॥यत्ति
पौनत्रनक्षत्रेकालेवापत्रयथया॥विधिहितेवानिषिद्धंवापालापेस्मिदिवब्रजेत॥
अपालयतपुनर्मोहादपाविन्मेपरंब्रजेत॥वक्ष्यमाणाद्दद्विक्कासादिभेदेनतियेन

नि·दि· कल्पकारस्त्वमात्रांकानित्यस्य कालाकस्याप्यनेकप्रकारत्वं दर्शयति ॥ उपाधिभेदादेको
३ पि सच कालोप्यनेकधा ॥ उपाधयो निमेषाद्यास्त्रसिद्धा एव लोकतः ॥ गार्ग्यः ॥ अक्षिपक्ष्म
परिक्षेपो निमेषः परिकीर्तितः ॥ द्वौ निमेषौ त्रुटिर्नाम द्वे त्रुटी च लवः स्मृतः ॥ द्वौ ल
वौ क्षणस्तैरेकः काष्ठा पञ्चक्षणात्मका ॥ त्रिंशत्काष्ठा कला प्रोक्ता कलास्त्रिंशन्मुहू
र्तकः ते पञ्चदश वासरः ॥ एवं रात्रिरपि पञ्चदशमुहूर्ता ॥ तथा च रत्नमालायां ॥ दिनस्य
यः पञ्चदशो विभागो रात्रेस्तथा तद्धि मुहूर्तमानं ॥ मुहूर्तशब्दोत्र न नागपरः ॥ एवं चाह्नः
पञ्चदश भागाः इति वचनार्थः ॥ ततश्च यदा त्रिंशद्घटिकात्मको दिवसस्तदा घटीद्वयं
मुहूर्तः ॥ यदा त्रिंशद्घटिकापरिमाणान्न्यूनो दिवसः ॥ तदा मुहूर्तोपि घटिद्वयपरि ३
माणान्न्यूनः ॥ यदा त्रिंशद्घटिकादधिको दिवसस्तदा मुहूर्तोप्यधिक इत्यनुसंधेयं ॥
मत्स्यपुराणेपि ॥ अह्नो मुहूर्ता विख्याता दश पञ्च च सर्वदा ॥ मुहूर्तनामान्याह नारदः ॥

रौद्रश्चैव तथा मैत्रस्तथा सारभटः स्मृतः ॥ सावित्रश्चाजपेतश्च गांधर्वः कुतपः स्मृतः ॥ रौ
हिणश्च विसर्वितश्च विजयो नैर्ऋतस्तथा ॥ महेंद्रो वरुणश्चैव भगः पंचदशाः स्मृताः ॥ ए
वं मुहूर्तरूपकालविभागकथनेन वासरविभागाः पंचदशा धेन्यपर्यायादुक्ता भवति ॥ केचन
दिवसं पंचधा विभक्तमाहुः ॥ तदुक्तं ॥ मुहूर्तत्रितयं प्रातस्तावदेव तु संगवः ॥ मध्या
ह्नस्त्रिमुहूर्तः स्यादपराह्णः पितामहाः ॥ सायाह्नस्त्रिमुहूर्तः स्यात्सर्वधर्मबहिष्कृ
तः ॥ चतुर्धापि केचन ॥ पूर्वाह्णः प्रहरं सार्धं मध्याह्नः प्रहरं तथा ॥ आतृतीयादपराह्णः
सायाह्नश्च ततः परमिति ॥ त्रिधा विभागेप्यातातपः ॥ पूर्वाह्णो मध्याह्नोऽपराह्ण इति ॥ श्रु
तिरपि ॥ पूर्वाह्णो वै देवानां मध्यंदिनो मनुष्याणामपराह्णः पितॄणामिति ॥ दिवस
स्य द्विधा विभागे स्कंदपुराणे ॥ आवर्तनात्तु पूर्वाह्णो ह्यपराह्णस्ततः परः ॥ आवर्तनं च
मणेस्तु यस्य पूर्वभागात्पश्चाद्भागगमनं ॥ अथवा आवर्तनं मध्याह्नः ॥ तस्मात्पूर्वं पू

ह्णाः पश्चाद् अपराह्ण इति ॥ तत्र पूर्वाह्णो वैश्वेदेवा अपराह्णः पितर इति शातपथे ॥ द्विधा त्रि
धा विभागादि प्रयोजनं स्वस्वमय एव वक्ष्यते ॥ एतत्कर्मणां योगे केलेनिरूपिते तस्मिन्काले यस्यां
तिथौ यत्कर्म विहितं तस्मिन्काले तत्तिथौ सत्यां कृतं कर्म फलदं नत्वतीतायां तस्मात्तिथ्यो नि
रूपणपूर्वकं निर्णेतव्या इति ॥ निरूपणं यथा ॥ पूर्वोक्तैः षष्टिघटिकात्मकैस्त्रिंशन्मु
हूर्तैरहोरात्रं ॥ ब्रह्मसिद्धांते ॥ कलाः षोडशचंद्रस्य तत्रैका नानुरोपरे ॥ चंद्रस्यान्याः
कलाः सर्वा अमायामनुरवौ स्थिताः ॥ अहोरात्रेण चैकैका कला सूर्यान्निर्यक्वलवेत् ॥ नि
र्गतासु यदा सर्वाः पौर्णमासी तदा भवेत् ॥ रवौ पुनर्विशेदेवं प्रत्यहं च तिथयः क्रमात् ॥
एतद्देवाक्रोमिलेन ॥ यः परो विकर्षः सूर्याचंद्रमसोः सा पौर्णमासी ॥ यः परः सन्निकर्षः ४
स मावास्येति ॥ तथा चकाजदव्या ॥ रवींदुयोगविरहो कमाद्रश्मि पूर्णिमा ॥ कलाप्र
वेशनिर्गमाते स्तिथयो निष्पद्यते ॥ तथाहि ॥ प्रथमे एका कला प्रवेशः प्रतिपत् ॥ द्वितीय

कला प्रवेशो द्वितीया एवं कलानयासर्वकला प्रवेशो मावास्येति ॥ एवं निर्गमेपि सर्वक
लानिर्गमे पौर्णमासीति कल्पनीयं ॥ कला प्रवेशो कृष्णपक्षः ॥ कला निर्गमे शुक्लपक्ष
इति च ॥ त्रिंशन्मुहूर्तात्मकेन पंचदशाहोरात्रेण पक्षः शुक्लप्रतिपदादिः पौर्णमासीप
र्यंतस्तिथिगणः शुक्लः पक्षः ॥ कृष्णप्रतिपदादिरमावास्यापर्यंतस्तिथिगणः कृष्ण
पक्षः ॥ इति द्वौ पक्षौ मासः ॥ द्वादशमासो वर्षमिति ॥ तिथिर्निरूपिता ॥ यद्यप्यादार
भ्य पुनः सूर्यादि पर्यंत प्रवृत्तानां तिथीनां तिथीनां निर्णयाभावेपि नत्तत्तिथौ विहित
कर्मफलनो कृष्णाष्टमीनामष्टमीनामपवर्गो न तिथीनां कर्मस्वत्रदेयो भवेति ॥ तदा स्मृ
ति स्मृत्यादि विहिते स्मृति स्मृत्यादि विहिते श्राद्धादि कर्मकाले तिथिनातस्तिथयो
निर्णेतव्या इति ॥ कालादर्शे ॥ क्रमाद्वृद्धिस्तीर्थानां स्यादधर्माधिमतीत्त्वणां ॥ गोभिलो
पि ॥ एवं वेदपस्तिथ्यादि हिंसान्नि विधं तिथिलक्षणं ॥ धर्माधिर्मवशा दे वंतिथिस्त्रेधा विव

नि॰दि॰ न्ति॥ खर्वसमता॥ द्वयोर्वृद्धौ॥ ह्रासान्न्यूनता॥ हृद्गा गार्ग्यः॥ निमित्तकालमादाय वृत्तिर्विधि
५ निषेधयोः॥ विधिः पूज्यस्तिथौ तत्र निषेधः कालमात्रके॥ तिथीनां पूज्यतानाम कर्मा
नुष्ठानतो मता॥ निषेधस्तु निवृत्यर्थं कालमात्रमपेक्षते स्मृतिः॥ स्नाने चाभ्यंगने
चैव दन्तधावनमैथुने॥ जनने मरणे चैव तत्कालव्यापिनी तिथिः॥ एकं च यत्तिथौ य
स्य कर्मणि विधिः निषेधश्च विहितः॥ तत्तिथौ सत्यां तस्य विधिनिषेधौ प्रवर्त्तत इत्य
र्थो भवति॥ यदा तु मध्याह्नादि विहिते काले व्रतश्राद्धादौ कर्मणि विहिता तिथिः दि
नद्वयेपि कालाव्यापिनी दिनद्वयेपि सल्पं स्वस्वल्पं काले स्पृशति॥ एकस्मिन्दिने
स्वल्पं त्व एकस्मिन् दिने अधिकं स्पृशति॥ तथा कालव्यापिनी अव्यापिनी वा ५
वर्द्धते ह्रसते समा वा भवति॥ तथा का तिथिः पूज्येति परशुराम प्रश्न आह॥ क्षयः
गा या तिथौ पूर्वा वृद्धिगा या परा स्मृता॥ समायामपि सैव स्यादेतदीश्वरभाषितं

अन्तरा वेगो निवः॥ एवं वेदिपरत्वादिना त्रिविधं तिथिलक्षणं॥ खर्वदर्पौ परौ पूज्यौ हिंसा
स्यात्पूर्वकालिकी॥ यदा तिथिः कर्मकाले समा अधिका वा भवति तदा परा एव ग्राह्या॥ ख
र्वदर्पौ परौ पूज्यौ विनिश्चयनात्॥ यदा परदिने न्यूना तदा पूर्वा हिंसा स्यात्पूर्वकालिकेति॥
बौधायनोपि॥ वर्द्धमानस्य तु दयात्पूज्यते तिथिः॥ यदा पक्षः क्षयं याति तदा स्यादापराह्णि
की॥ उदयास्थिता या त्वं ह्रसे क्षये आपराह्णिकी पूर्वा इत्यर्थः॥ यदा एकस्मिन्दिने तिथिर्द्वय
सौ एकस्मिन्लग्न्या॥ तदा विप्रतिषिद्धसमावायेन्नपरा सधर्मत्वमिति न्यायेनोदयसौख्या
त्॥ उक्तं च॥ कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः॥ तया कर्माणि कुर्वीत ह्रा
सवृद्धी न कारणं॥ यदा दिनद्वयेपि कालव्यापिनी तदा पूर्वा॥ तदुक्तं॥ तिथ्यादौ तु भवेद्यावा
न्ह्रासो वृद्धिः परेऽहनि॥ तावान्नन्नाद्यः स पूर्वेद्युरदृष्टोपि स्वकर्मणि॥ तथा चलद्वत्तः ति
थिः वारा रतिथिरेव साधनं तिथिप्रमाणां तिथिप्रमाणं तिथिरेव कारणं॥ विधिवाक्य

सहस्रेभ्यः कालव्याप्तिर्बलीयसीति॥ उपवासी घ्नंति मित्रमाणं तिथिप्रमाणं तिथिरेव का
रणं॥ विधिद्विन्नतती थिषु पूर्वविद्धोत्तरविद्धाविद्धाधिकाविद्धादीनेत्यादिभेदान्नतत्तिथिनि
र्णये निरूपयिष्यंते॥ तत्रापि वेधः कीदृश इति किंचिदुच्यते॥ तिथयः प्रतिपन्मुखा पक्ष
योरुभयोरपि॥ पूर्वयापरया तिथ्या विद्धास्युस्त्रिमुहूर्तकैः॥ तथाद्वैपैवानसि॥ पक्षद्वये
पि तिथयस्तिथिं पूर्वमिथोत्तरां॥ त्रिभिर्मुहूर्तैर्विध्यंति सामान्योयं विधिः स्मृतः॥ अयं सा
मान्यवेधः परविद्धपूर्वविद्धतिथिविहितोपवासविषयः॥ बृहस्पतिः॥ एकादश्यष्टमी षष्ठी
पौर्णमासी चतुर्दशी॥ अमावास्या तृतीया च ता उपोष्याः परान्विताः॥ निगमे॥ पक्षद्वयेपि
अमावास्या कृष्णपक्षे त्रयोदशी॥ एताः परयुताः पूज्याः पराः पूर्वेण संयुताः॥ उपवासव्य ६
तिरिक्ते कर्मणि उत्तरतिथिविषमो विशेषवेधः॥ स्कंदपुराणे॥ नागो द्वादशनाडीभिर्दि
पंचदशभिस्तथा॥ भूतोष्टादशनाडीभिर्दूषयत्युत्तरां तिथिं॥ अयं निषेधो नैकभक्त

दिविषयः॥ तस्य कर्मकालव्यापिन्यां विधानात्॥ मुहूर्तवेधोप्युपवासविषयद्युपकत्वान्नो
पवासविषयः॥ अतः पंचम्या द्वादशघटिकाविद्धायां षष्ठ्यां स्कंदादिदेवताविषयं जना
दिकं न कार्यं॥ दिक्पंचदशनाडीविद्धायामेकादश्यां विष्णुबलित्रमतिक्रमं न कार्यं॥ च
तुर्दशपाष्टादशनाडीविद्धायां अमावास्यायां श्राद्धं न कार्यं॥ इच्छा व्याख्यातं ग्रंथांतरे॥ तथाच
विष्णुपुराणे स्मृत्यंतरे॥ उदिते दैवतं भानौ पित्र्यं चास्तंगते रवौ॥ द्वित्रिमुहूर्तमस्तं या
सा तिथिर्हव्यकव्ययोः॥ इदं वचनमस्तमयेन्त्यमुहूर्तव्यापिन्यां श्राद्धपरं न घटते किंतु
श्राद्धस्य परं॥ श्राद्धपरत्वे कुतपादिकालव्याप्ततिथिश्राद्धविधायकानां स्मृतिपुराण
वाक्यानामप्रामाण्यं स्यात्॥ वाराहपुराणे॥ यां तिथिं समनुप्राप्य उदयं याति भास्करः॥ सा
तिथिः सकला ज्ञेया स्नानदानजपादिषु॥ यां तिथिं समनुप्राप्य अस्तं याति दिवाकरः॥
सा तिथिः सकला ज्ञेया दानाध्ययनकर्मसु॥ विष्णुधर्मोत्तरे॥ या तिथिस्तदहोरात्रं यस्या

मस्फुदितो रविः॥ तथा कर्माणि कुर्वीत ह्रासवृद्धी न कारणं॥ प्रतिपत्स्वदहोरात्रं स्नानसं
ध्यानिमास्कारं॥ इत्यादिवचनानि ह्रासवृद्धि अनादरेणैव उपवासादिव्रतविषयेपर विद्धते
षिव्रतषु उदयतिथेः पूज्यतापराणि॥ पूर्वविद्धतिथिर्व्रतेषु॥ अस्तमयतिथेः पूज्यतापरा
णि॥ ह्रासवृद्धोः स्नानादिकादिविषयं॥ स्नानादिकादि नियुर्दिनद्वये कालाव्यापित्वे दोषे
नु॥ तिथ्यक्षये दोषवेधा वा ह्रास इत्यनेनोक्तं॥ वृद्धो तु मासाब्दं द्वौ यथा पूर्वेमि मस्यानुमति
स्तु च॥ तिथिवृद्धौ तथा पूर्वा तिथिः प्रोक्ता मलिम्लुचा॥ द्वितीया दोषसंयुक्ता मलीया कुरु
ते तु यः॥ स याति नरकं घोरं कालसूत्रमयंकरं॥ तत्तीयैकादश्योदय उपवासादि उपवास
दिव्रते पूर्वविद्धा निषिद्धा॥ द्वितीयदिने उदयानंतरं तत्र वर्तते तत्र निगमेवाक्यं॥ एकादशी
तृतीया च षष्ठी चैव त्रयोदशी॥ पूर्वविद्धा तु कर्तव्या यदि न स्यात्परेहनि॥ षष्ठी मुक्ता॥ त्रयोद
शी कृष्णा॥ परदिने घटिकादिसद्भावे परा एव॥ एतदुक्तं विष्णुपुराणे॥ व्रतोपवास

विषये घटिकैका यदा न वेत॥ सा तिथिः सकला ज्ञेया पित्र्ये चापराह्णिकी॥ स्मृत्यर्थसा
रे॥ अविज्ञानानामनावेनुपयोदधिफलानि वा॥ सकृदेवात्मश्रीयादुपवासस्तु भवेत॥ इ
तः चतुर्विंश दनग्रंथे निर्णयदीपके॥ नाम राणां प्रयोसादितिथिसामान्यनिर्णयः॥ अथैकभ
क्तव्रतादीनामेगमेतत्तामुतिथिषु साधारणो निर्णयः प्रस्तूयते॥ मध्याह्नादुपरि नियमेन
भोजनमेकभक्तं॥ तच्च मध्याह्नव्यापिन्यां कर्तव्यं॥ मध्याह्नव्यापिनी यास्यादेकभक्ते तु त
त्तिथिरिति वचनात॥ बौधायनोपि॥ उदयेत्पवासस्य नक्तस्यास्तमये तिथिः॥ मध्याह्न
व्यापिनी ग्राह्या एकभक्ते तु सा तिथिरिति॥ पंचधाविभक्तस्याह्नस्तृतीयो भागो मध्याह्नः॥
विभागः प्रागुक्तः॥ एकभक्ते यद्यपि च ये द्वाघटिका मारभ्याष्टदश्यां या बहुटिकात्मको
मध्याह्नस्तथाप्युक्तरस्मिन् घटिकात्रये एकभक्तं कार्यं॥ अल्पक्षस्तु धा विभाग पक्षेपि
मध्याह्नोत्तरभागो कार्यं॥ अन्यथा॥ दिनार्द्धसमये तीते भुज्यते नियमेन यत॥ एकभ

क्तमिति गौणकालस्याद्दिवैवहीतिवचनविरोधात्॥ यदा पूर्वदिनद्वये मध्याह्नव्यापि
नीतदा वक्ष्यमाणेन युग्मवाक्येन निर्णयः॥ यदाह मोक्षेत्रा॥ व्याप्तौ तिकर्मकालं व्याप्ति तिथि
र्दिनद्वये युग्मवाक्येन निर्णयस्तात्पूर्वापराप्रिच॥ अथवा युग्मवाक्यस्योपवासविष
यत्वेनोपेक्षणात् एकभक्तादिव्रते खर्वदर्पसियाहिंसेन पूर्वोदाहृतेन वचनेन निर्णयः॥
यदा मध्याह्नात्परभागव्येकभक्ततिथिः प्रवर्त्तते न पूर्वभागे तदा तत्रैकभक्ते क्रियमाणे म
ध्याह्नव्यापिनीत्वस्यानर्थक्यं स्यात्॥ तद्दोषपरिजिहीर्षया मध्याह्नशब्देनैकदेशलक्ष
णायोपरितनभागो लक्ष्यते मध्याह्नस्य॥ ग्रामो दग्धः पटो दग्ध इतिवत्॥ एकभक्तस्य तत्रै
वविधानात्॥ तथा च॥ कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः॥ तया कर्माणि कुर्वी
त ह्रासवृद्धी न कारणमिति॥ यदा तु दिनद्वयेप्येकभक्ततिथिः कर्मकालं न व्याप्नोति॥
तदा॥ परेह्नि घटिकान्यूनास्तयोर्वाप्याधिका भवेत्॥ तदेकभक्ष्या पूर्वस्मिन्ह्रास ६

वृद्धी प्रकल्पयेदिति कात्यायनवचनविचारेण कर्मकालव्यापित्वं संपादनीयं॥ तथा परदि
नेन्यूनार्धपूर्वेत्र प्रकल्पयेत्॥ वृद्धावर्द्धमिति॥ तिथिश्चात्र द्विधा स्यात्पूर्वकालिकी॥ दिन
द्वये स्वस्वस्वकर्मकालं स्पृशति तदोत्तरा॥ खर्वदर्पो परो पूज्याविति वचनात्॥ अथ मे
कभक्तादिकर्मतिथिषु कर्मकालव्यापिनी पुत्र उपवासव्यतिरिक्तासु साधारणो न्यायोनु
सर्तव्यः॥ उपवासव्रतांगत्वेन विहिते कभक्तादिव्रतसु उपवासतिथौ कार्या॥ तदुक्तं सुम
तुना॥ तिथिर्यथोपवासे स्यादेकभक्तेपि सा तथा॥ प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते
सदेति॥ उपवासासमर्थस्य तदनुकल्पत्वेन एकभक्तादिकं दर्शितं कूर्मपुराणे॥ यथा॥
एकभक्तेन नक्तेन क्षीणवृद्धातुरः क्षिपेत्॥ इति एकभक्ततिथिनिर्णयः॥ अथ नक्तव्रत
तिथिनिर्णयः॥ अह्वारत्नानम यद्वा यदिनियमेन रात्रिभोजनं नक्तं॥ तत्र प्रदोषव्यापिन्या
तिथ्या कर्तव्यं॥ तदुक्तं वत्सेन॥ प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदा॥ दैएकादशी॥

नि·सि·
९

विनासर्वभुक्तेकृच्छ्रेससमास्मृताः॥प्रदोषपरिमाणंस्कंदपुराणेप्रोक्तं॥त्रिमुहूर्तंप्रदोषस्या
द्रवावस्तंगतेसतिइति॥दिवारात्रिमुहूर्तव्याप्त्यप्रदोषव्यापिन्यांनक्तंकार्यमितिकूर्मपुरा
णात्॥प्रदोषव्यापिनीयत्रत्रिमुहूर्तादिवायदि॥तदनक्तंव्रतंकुर्यात्स्वाध्यायस्यनिषेधवदि
ति॥स्कंदपुराणेपि॥दिवारात्रिव्रतेष्वेकमेवतियोगतः॥तस्यामुभयव्यापिन्यांकुर्यान्न
क्तव्रतंव्रतः॥उभयव्यापिन्यांदिवाप्रदोषव्यापिन्यामित्यर्थः॥अथयदानक्ततिथिःपूर्वपरयोर
भ्रोप्रदोषव्यापिनिस्यात्तदापरतिथौनक्तव्रतंकार्यं॥तदाहजाबालिः॥यदिस्यादुभयोस्ति
थ्योःप्रदोषव्यापिनीतिथिः॥तत्रोत्तरत्रनक्तंस्यादुभयत्रापिसायतः॥उभयत्रदिवारात्रौसा
तिथिर्यतोविषयतइत्यर्थः॥अत्रैवविशेषः॥यदानक्ततिथिःपूर्वदिनेप्रदोषव्यापिनीतदा १
पूर्वादिनद्वयेप्रदोषव्यापिनीतदापरदा॥द्वितीयदिनेप्रदोषाद्वस्पर्शिनीचेत्तदापिपरा
॥तदुक्तं॥पूर्वविद्धैवप्रदोषव्याप्तौपूर्वा॥पूर्वपराह्णयोःतथात्वेपिपराग्राह्या॥प्रदोषैदे

षिसंगता॥अथयदानक्ततिथिःपूर्वदिनेप्रदोषमधिकंस्पृशतिपरदिनेस्वल्पं॥तदोत्तरे
वारात्रिव्रतत्वान्नक्तव्रतस्य॥दिवारात्रिव्याप्ततिथौनक्तव्रतमित्युक्तत्वात्कर्तव्यमितिका
लादर्शः॥जाबालिरपि॥अतस्मात्तिथयःपुण्याःकर्मानुष्ठानतोदिवा॥नक्तव्रतेषुसर्व
त्ररात्रियोग॥प्रशस्यते॥अतस्तदुभयप्रदोषव्यापित्वाभावेपियदाप्रदोषेदेवपूजाभो
जनपर्याप्तातिथिर्दृश्यतेतदातिथिप्रदोषयोरेकदात्रसंभवेतत्रैवनक्तमित्युक्तं॥ननुप्र
प्रदोषार्द्धव्यापिन्या॥ततोन्यूनायांवानक्तव्रतेक्रियमाणेउदयास्ताकर्त्रीसंध्या॥घटिका
त्रयमुच्यते॥सायंसंध्यात्रिघटिकाअस्तादुपरिभास्वतइतिस्कंदपुराणेघटिकात्रयंव्र
त॥नक्तव्रतेरौमानिकर्माणिसंध्यायांपरिवर्जयेत्॥आहारंमैथुनंनिद्रांस्वाध्यायंपंचचतुर्थ
मित॥षट्घटिकात्मकेप्रदोषेपूर्वघटिकात्रयेभोजननिषेधात्कथंतत्रभोजनंस्यादि
तिकश्चित्तन्न॥यात्रमुच्यते॥नक्षत्रदर्शनान्नक्तमापस्तम्बस्मरतस्थितं॥तत्पराजनीते २

यातत्र धर्मान्परित्यजेत्॥ इति स्मृत्यंतरवचनेनास्तमयादूर्ध्वं नक्षत्रदर्शनावधिर्मुख्यः संध्या
कालउक्तमिति दितं॥ तदपेक्षया घटिकात्रयात्मकः पारिभाषिक इति॥ सतु दैवादकृतसंध्या
यास्तं नदीनां घटीकात्रयपर्यंतिकर्तव्यतात्पर्यार्थः॥ संध्यागर्जितादिना विहितानध्याय
दिपरोवा॥ आतारकोदयात्संध्येति याज्ञवल्क्य॥ ऋवचनं॥ जपन्नासीत सावित्रीं प्रत्य
गातारकोदयात्॥ संध्या प्राक्प्रा॥ नक्षत्रदर्शनान्नक्तमहं मन्ये गणाधिप॥ मुहूर्तोनं दि
नं नक्तं प्रवदंति मनीषिण॥ अत्र नक्षत्रदर्शनादिनियदादित्योगे पंचमी तदा नक्षत्रदर्श
नादूर्ध्वमित्यर्थः॥ यदाल्यल्बापि पंचमी तदा नक्षत्रदर्शनं प्राप्येत्यर्थः॥ फलतस्तु कएवार्थः
संपद्यते नक्षत्रदर्शनिमतीति॥ किंच॥ भवतु वा घटिकात्रयात्मकं संध्याकाले भोजननिषे
ध॥ से तस्य पुरुषार्थत्वात्॥ व्रतार्थेन नक्षत्रदर्शनं भोजनविधिना बाध्यते॥ यथा पुरु
षार्थो हिंसाप्रतिषेधः क्रत्वर्थेनाग्नीषोमीयपशुहिंसाविधिना तद्वत्॥ अर्थयदातु पर

भक्तासे दिनद्वये पि प्रदोषव्यापिनी न लभ्यते॥ तदा स्कंदपुराणोक्तं दिनांते कृतम् मुहूर्तेन
क्तं तिथिमध्ये नक्तं कर्तव्यं॥ प्रदोषव्यापिनी नस्याद्दिवा नक्तं विधीयते॥ आत्मनो द्विगुण
छायेमंदीभवति भास्करे॥ तन्नक्तं नक्तमित्याहुर्न नक्तं निशि भोजनं॥ एवं ज्ञात्वा ततो वि
द्वान् सायाह्ने तु भुंजिक्रिया॥ कुर्यान्नक्तव्रतीनक्तफलं भवति निश्चितमिति॥ सौरन
क्तं तु प्रदोषव्यापिन्यां तिथौ दिवा कार्यं तदुक्तं कूर्मपुराणे॥ नरस्य द्विगुणछायामतिक्र
मे यदा रविः॥ तदा सौरं चरेन्नक्तं न नक्तं निशि भोजनमिति॥ नक्तव्रतनिर्णय॥ अथा
याचितं॥ नाम न विद्यते याचितं यस्मिन्नन्यव्यवहरणे तदयाचितं॥ भक्ष्यभोज्यलेह्यपेयो
चोष्यपेयाणि पंचैवान्यव्यवहार्याणि॥ याचितं हि प्रार्थितमन्यतो लब्धमुच्यते॥ तद्विरुद्धम
याचितं॥ तदप्रार्थितमन्यत एव लब्धं॥ अयाचितव्रतेऽन्यतो लब्धमयाचितमन्नं भोक्तव्य
मेव॥ अन्यं वदिष्यामीति प्रातः संकल्पयात्॥ तदेतन्याचितमकृद्वये व्यापिन्यां तिथौ याम॥

येनीतस्यामेकभक्तवदनुष्ठेयं॥तस्याप्येकभक्तरूपत्वात्॥अयाचितत्वे तत्रस्यम
नेन्यतोवाचनयालब्धमयाचितंतेनसहनक्तंकृत्वानुष्ठ्यते॥अन्यथास्यवहरिष्यामीमीति
प्रातःसंकल्पविरोधात्स्यात्॥प्रातःसंकल्पनतु॥प्रातराराभ्यमतिमान्नक्तमल्लिकाव्र
तादिकमितिदक्षवचनात्॥इतिदिग्दतिनिनामास्तिननिर्णयः॥अथनक्षत्रोपवासेविशे
षोविष्णुधर्मे॥उपोषितव्यंनक्षत्रंयस्मिन्नस्तमितारवि॥युज्यतेयत्रवातारानिशीथेश
शिनासह॥अत्रनिशीथेतिसामान्येनोक्तावपिसुमंतुवचनानुरोधादर्धरात्रादधएवे
तिनिश्चियते॥तथाहि॥यत्रार्धरात्राद्वक्तिनक्षत्रंप्राप्यतेतिथौ॥तत्रर्क्षव्रतंकुर्यादति ११
तेपारणंतयिति॥स्कंदपुराणेतु॥तत्रैवोपवासेदृक्षेपत्तिर्याद्धोमवेत्॥अंतेतु
पारणंनक्तंचैवनक्ततयाविधं॥नक्तैकभक्तयोरपिव्रतेत्यज्यतेपारणमिति॥नक्षत्रो
पवासनिर्णय॥कृत्मेचजद्विवेदेनग्रंथेनिर्णयदीपके॥एकभक्तादिकंत्रेधेव

तेजातस्यनिर्णयः॥अथपित्र्यविचापराह्णिकीतिवचनात्पितृश्राद्धादेनैवमवतीति
अमावास्यादिसवतिथिश्राद्धसाधारणंकिंचिदुच्यते॥स्मृतिस्मृतिपुराणेषुदिवसविभा
गोद्विधात्रिधाचतुर्धापंचधाचोक्तः॥कर्मकालपरित्यागमत्कुतपाख्यक्रमः॥सर्वेष्वपिप
क्षेषुसूर्यस्यास्तमयकालसमीपवर्तमानत्रिमुहूर्तात्मकःसायंकालःसर्वधर्मबहिष्कृ
तइतिसर्वसंमतं॥सर्वधर्मबहिष्कृतत्वाविशेषेपिश्राद्धविषयनिषेधविशेषदर्शयति
मनु॥रात्रौश्राद्धंनकुर्वीतराक्षसीकीर्तिताहिसा॥संध्ययोरुभयोश्चैवसूर्येचैवाचिरोदिते
त्रानानय॥रात्रौश्राद्धंनकुर्वीतराहोरन्यत्रदर्शनात्॥सूर्योदयमुहूर्तेचसंध्ययोरुभयो
स्तथा॥चतुर्थेप्रहरेयःश्राद्धंतुसमाचरेत्॥वृथाश्राद्धंसमाप्नोतिदाताचनरकंव्रजेत्॥
वायुपुराणे॥त्रिमुहूर्तस्तुसायाह्नस्तत्रश्राद्धंविवर्जयेत्॥उपसंध्यंतकुर्वीतापिलघुजा
वेत॥सकालःआसुरःप्रोक्तःश्राद्धंतत्रविवर्जयेत्॥इत्यादीनिसायंकालेश्राद्ध

प्रतिषेधवाक्यानि ॥ अथ सामस्त्येन श्राद्धविधायकवाक्यानि मदनरत्ने यदाह देवलः ॥ पूर्वाह्णे दैवि
कं श्राद्धमपराह्णे तु पैतृकं ॥ एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकं ॥ हारितः ॥ अपराह्णः
पितॄणां तु याऽपराह्णानुयायिनी ॥ सा ग्राह्या पितृकार्ये तु न पूर्वाह्णानुयायिनी ॥ तथा ॥ यस्याम
स्तं रवियाति पितरस्तामुपासते ॥ तिथिं तेभ्यो यतो दत्तस्त्वपराह्णः स्वयंभुवा ॥ उदिते दैवतं
भानौ पित्र्यं वास्तंगते रवौ ॥ त्रिकं मुहूर्त्तमक्षोभ्या सा तिथिर्हव्यकव्ययोः ॥ इत्यादीन्यपराह्ण
श्राद्धविधिपराणि वाक्यानि ॥ अक्षोभ्ये द्विधा त्रिधा त्रिधाविभागपक्षेऽस्तमयपर्यंतमपराह्ण
इति तत्पर्यंतं श्राद्धविधायकानि ॥ विहितं प्रतिषिद्धं च कल्पितं न वृत्तीति न्यायात् ॥ तिथिल
क्षणस्य श्राद्धांगस्य तु तत्र विद्यमानत्वेनास्तमयपर्यंतं श्राद्धं स्यादिति चेन्न ॥ उत्सर्गापवाद १२
न्यायेन सावकाशनिरवकाशयोर्निरवकाशो विधिर्बलवानिति न्यायेन वा सायं
कालव्यतिरिक्तेऽपराह्णे सावकाशानां विधायकवाक्यानां सायंकालमात्रे वर्त्तमानेन नि

षेधवाक्यैर्बाधः ॥ तत्सायंवर्जमपराह्णे श्राद्धं स्यात् ॥ अथवा सायंकाले श्राद्धनिषेधात् ग
गायावसतीति वृत् ॥ सामीप्यलक्षणया सायंकालसंनिहितः श्राद्धकालोऽपराह्णो लक्ष्यते
अथवा ॥ कुतुपरौहिणकाले विहितस्य श्राद्धस्य सायंरात्र्यादिषु प्राप्त्यभावादेवं श्राद्धाकर
णे सिद्धे कथंचित् विहितमुख्यकुतपरौहिणकालासंभवे प्रतिषिद्धकालवर्जं कालांत
रेऽपि श्राद्धं स्यादिति ज्ञापनाय प्रतिषिद्धवचनानि ॥ कुहूमुहूर्त्तः कुतपाद्यास्मुहूर्त्तं चतु
ष्टयं ॥ मुहूर्त्तपंचकं ह्येतत्स्वधाभवनमिष्यते ॥ एवं सति मुहूर्त्तपंचदशात्मके दिवसे मध्यो
मुहूर्त्तः कुतप इति तेनाधस्तनेषु सप्तसु मुहूर्त्तेषु वृद्धिश्राद्धं नैमित्तिकश्राद्धव्यतिरि
क्तानाममावास्याप्रत्याब्दिकादिश्राद्धानामविधानात् सत्सु संनिहितेषु मुहूर्त्तत्रया
त्मके सायाह्ने निषेधाच्च कुतपादिमुहूर्त्तपंचकं श्राद्धकाल इति ॥ तत्रापि मुहूर्त्तद्वयं वा
श्रातिपुराणयोस्तु च पिंडपितृयज्ञपिंडान्वाहार्यकौ च श्राद्धमपरासंकुतपादिमुहूर्त्तत्रि

यश्राद्धस्य मुख्यः कालः तत्रापि श्राद्धतिथिसत्त्वविचारेणाश्राद्धतिथौ सायं श्राद्धं कर्त्तव्यमिति
तत्र वचनं॥ यो यस्य विहितः कालः कर्मणस्तदुपक्रमे॥ विद्यमाना भवेदङ्गं नोदितोपक्र
मेण तु॥ अमावास्याप्रभृति सर्वतिथिश्राद्धसाधारणोऽयं निर्णय इति॥ यत्तु केचिद्दर्शकं येन नि:
यस्यास्तं सविता याति पितरस्तामुपासते॥ अपरेऽस्तमयवेलामात्रापि या तिथिः॥ सैव प्र
त्याब्दिकं ग्राह्येति॥ सा तिथिस्तादहोरात्रं यस्यामस्तमियाद्रविः त्यादिवाक्येषु अस्तमय
कालमात्र अहोरात्रोपासनादिवाक्यवणात् सायंकाले वर्त्तमाना या तिथिः परिपूर्ण
त्वं मत्विधाय तस्मिन्नेव दिने कुतपादिकाले श्राद्धतिथ्यभावे पि श्राद्धं कर्त्तव्यमिति व्याख्या
तं॥ तच्छ्राद्धतिथेरभावे श्राद्धविधानेनेतरेव यंक्रत्नृभिः सर्वेष्वेषु तिथिः कर्मकालव्याप्ति
अव्याप्तिवेत्यादि॥ तथा कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिरित्यादिसविचा
रितत्वेषामेवासंगतं स्यात्॥ तस्मात्तैरेव श्राद्धतिथिः कर्मकालं व्याप्यास्तमयकाले १३

प्रवर्त्तमाना ग्राह्या तत्रेत्येवं वचनार्थो व्याख्यायमाने॥ सर्वमनवद्यमिति सिद्धं॥ अमाव
स्याश्राद्धनिर्णये तु वारनक्षत्रादियोगेनामावास्यायाः प्राशस्त्यविशेषः किंचिदुच्यते॥ म
हाभारते॥ सोमवारयुतो दर्शः सूर्यग्रहणसन्निभः॥ स्नानं दानं तथा श्राद्धं सर्वं तत्रा
क्षयं भवेत्॥ तथा च वारवः॥ अमावास्या तु सोमेन सप्तमी भानुना सह॥ चतुर्थी भूमिपु
त्रेण सोमपुत्रेण चाष्टमी॥ चतस्रस्तिथयस्त्वेताः सूर्यग्रहणसन्निभाः॥ अमावास्या विशा
खा अनुराधा स्वाति पूर्वा तदापि तर्पणमात्र आर्षिकालं निविदध्यात्॥ तदुक्तं विष्णुपुरा
णे॥ अमावास्या यदा मैत्रीविशाखास्वातियोगिनी॥ श्राद्धे पितृगणास्तृप्तिं संप्राप्नोत्यष्ट
वार्षिकी॥ तथा॥ आदित्यरौद्रपुष्यर्क्षैर्युक्ता दर्शो यदा भवेत्॥ श्राद्धदः प्रीतिमाद्यात्पि
तृणां द्वादशवार्षिकी॥ आदित्यं पुनर्वसु॥ रौद्रमार्द्रा॥ तथा तस्मिन्नेव पुराणे॥ वासवर्क्षे
नैकपदर्क्षे पितृणां तृप्तिमिच्छता॥ वारुणे वाप्यमावास्या देवानामपि दुर्लभा॥ वासव

धनिष्ठा॥अजैकपादं पूर्वाभिद्रपदं वारुणं शतभिषक पूर्वाभिद्रपदं त्वा सामा घामा माघ्द्दोनर।
योगसाहस्रिकीत्तृप्तिपितॄणामुपकल्पयेत्॥माघस्यामावास्यामा विष्णुपुराणे॥तत्रैवक्वेद्रूपद
सुपूर्वः कालो यदा तत्र। क्रियते पितृभ्यः॥श्राद्धं परं तृप्तिमवाप्नुवंति युगान्सहस्रं पितरश्वते
ते॥महाभारते॥काले धनिष्ठा यदि नाम तस्मिन्भवेत्तु भूपाल तदा पितृभ्यः॥दत्तं जलान्नं
प्रददाति तृप्तिं वर्षस्मिंनंति भुपाल तदा पितृभ्यः॥दत्तं जलान्नं प्रददाति तृप्तिं वर्षायुतं तत्कु
लजैर्मनुष्यैः॥तस्मिन्नकाले माघस्य द्वैतिया॥माघे सितेपंचदशी कदाचित् उपैति योगं य
दि वारुणेन॥ऋक्षेण कालः स परः पितॄणां न ह्यल्पपुण्यैरुपलभ्यते सावित्ति॥अथव्यति
पातयोग॥रविवारयुक्ते दर्शे यदा श्रवणाश्विधनिष्ठार्द्रानागदैवत्याए तन्नक्षत्राणां मध्ये
एकस्मात्तदा व्यतीपातो योगः॥तदुक्तं भारते॥श्रवणाश्विधनिष्ठार्द्रानागदैवतमाप
तेत॥रविवारयुतायां तु व्यतीपातः समुच्यते॥नागदैवतं अश्लेषा योगो यंस्माघाती

पातःख्यातार्कग्रहसन्निभः॥अथार्द्धोदययोग॥अर्कश्रुतिव्यतीपातैर्युक्तामापैरवमापौ
रवमाघयोः॥असावर्द्धोदयो योगः कोटिसूर्यग्रहसंनिभः॥दिवैवयोग।रात्रौ नचरात्रौ
कदाचन॥महाभारतेपि॥अमार्कपातश्रवणैर्युक्ताचेत्पौषमाघयो अर्द्धोदय।सावि
तेयः कोटिसूर्यग्रहैःसम॥इत्यमावास्याविशेषकरणं॥अथामावास्यास्वरूपमुच्यते
अमाभिधायां कलायां सूर्याचंद्रमसौ सह वसत इत्यमावास्या तदुक्तं॥अमानामरवेर्म
द्रकलालोकेप्रतिष्ठिता॥यस्मात्सोमो वासत्यस्यामभावातत स्मृता॥गोभिलोपि॥सू
र्याचंद्रमसोः परमः संनिकर्षः॥सामावास्येति॥यावत्कांविमग्निहोत्रं जुहुयांदित्यत्रसायं
प्रातःकालसंकोचनीदृशीनेन दर्शश्राद्धेपि सर्वेदर्शः श्राद्धकालःकालविशेषोवेलोक्तं
कपकालविशेषहर्त्नतीयविसरविभागप्रयोजनान्याचष्टे विभागश्चात्राकेइति॥पंच
धाविभागप्रयोजनंस्मृति॥स्पष्टंवाक्ति॥सायाह्ने संगवे श्राद्धं छारदे संगवादधःम

ध्याह्ने परतोऽश्नीयान्नोपवासो रवेर्ग्रहे॥ स्मृतिरपि पंचधा विभक्तवासरोपक्रमे॥ तस्मादुभ
ध्यंदिन एवादधीतेत्याधानार्थत्वादिति॥ तदाह बौधायनः॥ उदयेत्प्रवासस्य नक्षत्रा
स्तमये तिथिः मध्याह्नव्यापिनी ग्राह्या एकनक्तव्रते तिथिरिति॥ शातातपः॥ पूर्वा
ह्णो मध्याह्नोऽपराह्ण इति॥ त्रिधा तु पिंडपितृयज्ञपिंडान्वाहार्यकश्राद्धार्थ एव मतः॥ अ
तो द्विधा वा तु द्विभागे सत्यपि पिंडपितृयज्ञप्रकारे योऽत्रिधाऽयवितः॥ यथा॥ पूर्वाह्णो वै
देवानां मध्यंदिनो मनुष्याणामपराह्णः पितॄणां तस्मादपराह्णे ददातीत्यस्य पिंडपि
तृयज्ञार्थत्वादत एव कात्यायनः॥ पिंडान्वाहार्यकं श्राद्धं क्षीणे राजनि शस्यते॥ वास
रस्य तृतीयांशे नातिसंध्यासमीपत इति॥ पिंडानामनु पश्चादाह्रियते क्रियत इति पिंडा १५
न्वाहार्यकं श्राद्धमिति॥ सोऽयमन्यत्र देवपितृसंबंधेन दिवसस्य द्वैधविभागं द्योतयति॥
वसंतो ग्रीष्मो वर्षास्ते देवा ऋतवः शरद्धेमंतः शिशिरस्ते पितरो य एवापूर्यतेऽर्धमासः स दे

वा योऽपक्षीयते ते पितरोऽहरेव देवा रात्रिः पूर्वाह्णो देवा अपराह्णः पितर इत्यादिश्रुतिः॥ एवं सति
पिंडान्वाहार्यकश्राद्धव्यतिरिक्तस्थले॥ अपराह्णः पितॄणां तु याऽपराह्णानुयायिनी॥ सा ग्रा
ह्या पितृकार्ये तु न पूर्वाह्णानुयायिनी॥ इत्यादीनि यान्यपराह्णश्राद्धविधायकानि तानि द्वि
धा विभक्तदिवसापराह्णविषयाणीति बोद्धव्यं॥ अन्यथा॥ आरभ्य कुतपे श्राद्धं विधायकानि
त्वात्रिद्विधाविभक्तविकुर्यादारौहिणं बुधः॥ विधिज्ञो विधिमास्थाय रौहिणं तु न लंघये
दिति॥ रौहिणं नवमं मुहूर्तं न लंघयेत् नातिक्रमेत्॥ रौहिण एवं समापयेच्छ्राद्धमित्यर्थः॥
एतच्च तृतीये विभागेऽपराह्णे चतुर्थे विभागे वाऽपराह्णे गृह्यमाणेऽनुपपन्नं स्यात्॥ तयोर्म
ध्ये रौहिणस्याभावात्॥ एतच्च रौहिणसमापनं एकोद्दिष्टविषयमिति न शंकनीयं॥
पार्वणश्राद्धमपि कुतपकाले इत्यत्र हारीतवचनं॥ कृतविद्या ह्यमावास्या प्रतिपत्ति
श्चेनापि वा पित्र्ये कर्मणि विद्धि भार्गव॥ कुतपकालिकीति॥ अत एव मनुस्मृतिद्वैधेवद

तेनजति॥ यथा नैवापरः पक्षः सर्वपक्षाद्विशिष्यते॥ तथा श्राद्धस्य पूर्वाह्णादपराह्णो विशि
ष्यते॥ आमावास्यापराह्णो गजछायेत्यभिधीयते॥ अस्मिन्नयोभिमायांतु सदा सोमस्तु ष
धीः प्रतिपद्यते॥ तुषधिर्वनस्पतिरिति स्मृतिवचनबलात्भरद्वाजेनोक्तं॥ वनस्पतिगते॥
सोमे या छाया पूर्वाभिमुखी॥ गजछाया हि सा प्रोक्ता पितॄणां दत्तमक्षयं॥ मध्याह्नात्पूर्वं पश्चि
माभिमुखी कर्हि पूर्वाभिमुखीति गजछायाद्विःप्रकारा॥ यत्तु दर्शदिवसचतुर्थे त्रिमुहूर्ते॥
चंद्रस्य वनस्पतिगताभिधानं॥ यथा॥ त्रिमुहूर्त्तं वसेत्॥ त्रिमुहूर्त्तं वसेत्सोप्सु त्रिमुहूर्त्तं
वनस्पतौ॥ तत्तु चंद्रमसः॥ कल्पापद्धरिणो द्विमतापतिपूर्वदर्शनिपरं॥ अन्यथा वनस्प
तिगते सोमे यो लक्षेदंतधावनं॥ तथा॥ परान्नं यस्तु भुंजति॥ यथा॥ मंथानं यस्तु कारये १६
दिति एवमादी निंदनमात्रेण निषेधकानामसमंजसातिस्फुः॥ केचित्तु दिवसचतुर्थे त्रिमु
हूर्त्ते दिनद्वयव्याप्त्यंगीकृतवंतः स्मृत्यंतरवचनमुदाहृतं॥ आत्मनो द्विगुणछायायदा वा

स्यादपराह्णिकी॥ गजछाया हि सा प्रोक्ता पितॄणां तृप्तिकारिणी॥ तद्द्विगुणेति द्विःप्र
कारमभिधीयते॥ द्विगुणा ध्याममाक्रतइतिवेत्॥ द्विगुणा द्वितीयप्रकारः॥ पूर्वाभिमुखी
यावत्॥ एतद्वचनमनस्याप्यवचनेन समानार्थता भवति कृतपादिकाल्पोप्यनुष्ठी
तो भवतीति वा॥ पूर्वाह्णो विशिष्यते स्कंदपुराणे च॥ आवर्त्तनात्तु पूर्वाह्णो ह्यपराह्ण
स्ततः पर इति॥ आवर्त्तनं गगनमध्यवर्त्तिनः सूर्यस्य पूर्वभागात्पश्चिमभागगमनं
ततः कारणात् अह्नः पूर्वभागः पूर्वाह्णः॥ अपरो भागोऽपराह्णः इति॥ समासविधौ॥
पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणापाणिनिस्मरणात्॥ तथात पथ्याश्रुते
रपि॥ पूर्वाह्णो वै देवानामपराह्णः पितरः इति॥ मत्स्यपुराणे॥ आक्रोमुहूर्त्ता विज्ञेया
दशापंच सर्वदा॥ तत्राष्टमो मुहूर्त्तो यः स कालः कुतपः स्मृत इति॥ नवमो रौहिणः॥
तथास्मिन्नेव पुराणे॥ अपराह्णे तु संप्राप्ते अभिजिद्रौहिणोदये॥ यत्किंचिद्दीयते तत्र

तदक्षयमुदाहृतं॥ अभिजित्कुतपोऽष्टमो मुहूर्त्तः॥ वायुपुराणे॥ दिवसस्याष्टमे भागे मंदीभवा
भास्करः॥ स कालः कुतपस्तत्र पितॄणां दत्तमक्षयं॥ मत्स्यपुराणे॥ शुक्लपक्षस्य पूर्वाह्णे श्रा
द्धं कुर्याद्विचक्षणः॥ कृष्णपक्षेऽपराह्णे तु रौहिणं तु न लंघयेत्॥ तत्र पूर्वं दिनार्द्धं पूर्वाह्णः
अपरं दिनार्द्धमपराह्णः इति न त्रिधा विभक्तस्याह्नस्तृतीयो भागस्तस्य श्राद्धे पिंडपि
तृयज्ञार्थत्वेन तत्प्रकरणे पाठात्॥ तस्मान्निरग्निद्विजप्रवृत्तीनां कुतपकालिकामामा
वास्यायां श्राद्धमिति स्थिते विचार्यते॥ अमावास्या द्विविधा॥ शुद्धा असंदिग्धा॥ यस्यां प्रात
स्संध्योदयते॥ सा चतुर्दशीविद्धा सिनीवाली॥ यस्यां न दृश्यते सा प्रतिपद्विद्धा कुहू
ति अत्राह व्यासः दृष्टचंद्रा सिनीवाली नष्टचंद्रा कुहूर्मता॥ श्रुतिरपि॥ या पूर्वामावास्या
सा सिनीवाली॥ योत्तरा सा कुहूरिति विज्ञायते॥ तत्र शुद्धायां तिथेः परिपूर्णत्वे विचारो ना
स्ति॥ विद्धायां तु विचार॥ प्रतिपत्सिश्रितापि पूर्वदिने कालव्यापिनी चेत्तत्र ज्ञावलि

पूर्वाह्णे चेदमावास्या नापराह्णे न वेधदिने तद्विद्धैव सा ग्राह्या पित्र्ये कर्मणि सर्वदा॥ अत्रा
क्षेपः॥ ननु भूतविद्धाममावास्यां मोहाद्दत्ता न तोपिवा॥ श्राद्धकर्मणि ये कुर्युस्तेषामायु
र्गृहाः क्षयः इति वचनेन भूतविद्धायां निषेध उक्तः॥ वेधप्रमाणं बोधायनेनोक्तं॥ मध्याह्ना
त्परतो यत्र चतुर्दश्युपतुद्दृश्यते॥ सिनीवालीति सा कार्या पितृकार्ये तु निःफलेति॥ अत्र
पूर्वदिनार्द्धसामासिर्मध्याह्नः॥ तस्मान्मध्याह्नात्परस्मिन्दिनार्द्धे यदि चतुर्दशी वर्त्तते॥ त
दा सिनीवाली पितृकर्मणि निःफला॥ एवं सति द्वौ रितोति स्वयं वक्ति॥ नुत विद्धाप्यमावास्या
प्रतिपत्मिश्रा तापिवा॥ पित्र्ये कर्मणि विद्भिर्ग्राह्या कुतपकालिकी॥ कुतपो मध्याह्नस्य
क्षणमध्यत्वात्॥ परदिने कुतपकाले अमावास्या अभावे ग्राह्या कुतपकालिकी तिवच
नात्पूर्वा सिनीवाली ग्राह्या श्राद्धकर्मणि॥ तत्र व्यास॥ सिनीवाली सदा पित्र्ये कुहूर्दैवे तु क
र्मणि॥ अपरदिने प्रतिपदि कुतपकालव्यापिनी॥ न पूर्वदिने तदा ग्राह्या कुतपका

लव्यापिनी॥ न पूर्वदिने तदा ग्राह्या कुतपकालिकि तिहारीतवचनेन परैवाग्राह्या॥ यत्तु दं॰
दर्शश्राद्धे। दर्शं च पितृगणमासं च पितुः सांवत्सरं कृतं तद्दिने॥ पूर्वविद्धामकुर्वाणो नरकं प्रतिपद्य
त इति॥ नारदीयपुराणे पूर्वविद्धत्वमभिहितं॥ तत्तु दिवसपूर्वार्द्धमात्रव्यापिन्यां तिथौ वे
दितव्यं॥ पूर्वविद्धामात्रे अतिप्रसंग॥ अत एव स्मृत्यंतरं॥ मध्याह्नव्यापिनी या तु तिथि
पूर्वापराऽपि वा॥ तदहः कमं कुर्वीत ह्रासवृद्धी न कारणं॥ मध्याह्नः कुतपः स्तस्मात्को मध्यत्व
त॥ विधिकृत्सह लोम्येः कालव्यापिर्बलीयसी ति वचनत्वात्॥ परा एव चेत्कुतपकालव्या
पिनी परैवेति सिद्धं॥ यदा दिनद्वयेऽपि कुतपकालव्यापिनी अमावास्यात्॥ तदा तिथिक्षयेपू
र्वा सिनीवाली ग्राह्या॥ तिथिवृद्धौ परा कुहूः कार्या॥ तिथेः साम्येऽपि सर्वैः कुहूः कार्याः॥ तदुक्तं
प्रचेतसा॥ सिनीवालीकुहूश्चैव वक्ष्यत्यके श्राद्धकर्मणि॥ स्यातां ते यदि मध्याह्ने श्राद्धादि
स्यात्कर्यं तदा॥ तिथिः क्षयेऽसिनीवाली तिथिवृद्धौ कुहूः स्मृता॥ साम्येऽपि च कुहूः कृत्यैयावे

दंगवेदिभिरिति॥ तिथिक्षये सिनीवालीति॥ यदा दिनद्वये कुतपे अमावास्या भवति॥ तदा
दिनक्षये पूर्वा सिनीवाली कार्या॥ एतच्च कुहूश्राद्धविधानं च तु दर्श्यादिनपूर्वभागे
दर्शस्याप्रवृत्तौ वेदितव्यं॥ पूर्वभागे दर्शप्रवृत्तौ तु दर्शविपौ पमासं चेत्यस्य वचनस्य विष
य इति॥ तिथिक्षये हिंसा स्यात्पूर्वकालिकीति वचनात॥ यदा तु तिथिवृद्धिर्भवति॥ तदा॥
तिथिवृद्धौ कुहूः स्मृता परेत्यर्थः॥ खर्वदर्पौ परौ पूज्याविति वचनात्॥ तथा॥ मासवृद्धौ यथा
पूर्वमासस्यान्तु मलिम्लुच॥ तिथिवृद्धौ तथा पूर्वा तिथिः प्रोक्ता मलिम्लुचा॥ इति तत्र तु वि
षयं वेदितव्यं॥ साम्येति च कुहूः कृत्यैयेति॥ कथं समाता॥ यदा कुतपो द्दमारभ्य सिनीवालि
प्रवृत्ता॥ कुहूश्च कुतपपर्यंतं प्रवृत्ता तदा कुहूकामेव श्राद्धं॥ खर्वदर्पौ परौ पूज्याविति व
चनात श्राद्धारंभे कुतपे अमावास्या लाभाच्च॥ एवं मतं तन्न देपि॥ एतच्च निरग्निद्वि
जस्त्री शूद्रविषये॥ तदुक्तं॥ जाबालिना॥ पूर्वाह्णे चेदमावास्या नापराह्णे न वेधदि॥

नि॰दि॰ प्रतिपद्यपि कर्तव्यं स्याद्धं श्राद्धविदो विदुः॥ कालादर्शेपि जिवचनेन॥ अमावास्याया आ॰
१९ भावेपि प्रतिपदः कालत्वेन विधानात्॥ कृतपेत्र यत्रांत स्य प्रतिपद्योगे सामा प्राविधि
रपि न दोष इति तिव्याख्यातं॥ गार्ग्यौक्तिः॥ सिनीवाली द्विजैः कार्या साग्निकैः पितृकर्म॰
णि॥ स्त्रीभिः शूद्रैः कुहूः कार्या तथा चानग्निकैर्द्विजैः॥ जाबालीरपि॥ अपराह्णद्वयव्या
पिन्यदि दर्शस्तिथिक्षये॥ आहिताग्नेः सिनीवाली निरग्न्यादेः कुहूर्मता॥ अह्नः अपरो भा
गः अपराह्णः॥ आदिशब्देन स्त्रीशूद्राणामुपसंग्रहः॥ इति दिनद्वयेकृतयव्यापिन्या
निर्णयः॥ यदा तु तिथिक्षयवशात् दिनद्वयेकृतयेऽमावास्या न लभ्यते॥ तदा सिनीवाल्या
स वैरेव ग्राह्या॥ तिथिक्षये सिनीवालीति वचनादिति॥ यत्तु केश्चित् दिवसस्य त्रिधावि
भागपक्षापराह्णे॥ अमावास्यादिश्राद्धनिर्णीतं॥ तत्रैषा पूर्वाह्णेनेदमावास्या नापरा १९
ह्णे न वेद्यादि॥ मृतविद्धे दर्शे ग्राह्यापि न क्रेकर्मणि सर्वदा॥ तथा अपराह्णः पितॄणां

तु या पराह्णानुयायिनी सा ग्राह्या पितृकार्येतु न पूर्वाह्णानुयायिनी॥ इत्यादिवचनेषु
पूर्वाह्णापराह्णयोरंतर्वर्तिनां मध्याह्नकालेनां तर्हितयोः परस्परं संबंधः कथं स्यात्।
कालस्य व्यापित्वात् संबंध इति॥ चेन्नहि विचारापदत्वेन जाञ्जलिः पंचधा विभागे तु
प्रातः संगवः मध्याह्नः अपराह्णः सायाह्नः इति पूर्वाह्णशब्दो नास्ति॥ द्विधा विभागे तु॥
पृथ्वीकृयत्रगो पतिगौरिति कास्येन तप्रतिक्षणे॥ सकालः कृतपस्तत्र पितॄणां दत्त
मक्षयं॥ तथा॥ अपराह्णे तु संप्राप्ते निजितौहिणोदये॥ यत्किंचिद्दीयते तत्र तदक्ष
यमुदाहृतं॥ तथा मुक्तपक्षे स्यपूर्वाह्णे स्याद्वक्तयादि चक्षणं॥ कृष्णपक्षेऽपराह्णेतु रौ
हिणं तु न लंघयेत्॥ इत्यादिस्मृतिपुराणवचनान्युपपन्नानि भवंति॥ तस्माद्द्वे॰
धा विभागएवैहिणं तु नलंघ्वसाधियां निति॥ न तु पूर्वाह्णे दैविकं स्यान्मध्यपराह्ने तु पा
र्वणं॥ एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकमिति त्रिधा विभागपरं न॥ श्राद्ध

नि॰सि॰ विशेषेणकालविशेषोभिधीयते॥मध्याह्नादधस्तनोभागःपूर्वाह्णः॥तस्मादुत्तरोपरा
२० ह्णः॥मध्याह्नःकुतपोमुहूर्त्तः॥तस्मात्कोमध्यत्वात्॥तदुक्तं॥सप्तमात्परतोयस्तुनव
मादधरस्तुयः॥उभयोरपिमध्यस्थःकुतपःसोभिधीयते॥इतितस्यैवमध्यत्वोक्तेः॥त
स्मिन्नेवश्राद्धारंभविधानाच्चगौतमः॥प्रारभ्यकुतपेश्राद्धंकुर्यादारौहिणंबुधः॥विधि
ज्ञोविधिमास्थायरौहिणंतुनलंघयेत्इति॥रौहिणोनवमोमुहूर्त्तः॥अतएकोद्दिष्टपा
र्वणमपिचश्राद्धंकुतपेप्रारभ्यरौहिणेसमापनीयं॥रौहिणातिक्रमेदोषस्तत्रैवो
क्तः॥रौहिणंलंघयेद्यस्तुतानाद्दत्ताननतोपिवा॥आसुरंतद्भवेच्छ्राद्धंपितॄणांनोपतिष्ठ
ति॥अतएव॥कदाचिद्दैवापराधान्मानुष्याद्वापराधाद्रौहिणातिक्रमेसतितत्कालनित २०
रोध्यानंकानिमित्यर्थमापस्तंबवचनमप्युपपन्नं॥यथा॥कुतपादिमुहूर्त्तत्रि
न्यदाचरतिभास्करः॥सकलंकुतपस्तत्रपितॄणांदत्तमक्षयमिति॥कुतपोरौहिणो

विरंचइतित्रयः॥यत्तुकैश्चित्॥त्रिमुहूर्त्तोपिकृत्वापूर्वदिनानुवृत्त्यैव॥कुतपरश्मयु
भिःकार्यपिपीष्टिसामग्रीतिनिरिति॥एतत्तुहारीतवचनमत्वापद्यते॥इदंवचनंवेदम
त्वेनसंभवतिवैतिवेदोहिद्विजातीनांधारणधर्मंविदधाति॥इदंहिवचनंबहुव
चसौकालविशेषंविधत्ते॥वक्त्वाद्वासाग्निकचनिरग्निकत्वकृतोयोविशेषःसोपिनश्रू
यते॥किंचयथेष्टसामग्रीतिनिरित्यत्रप्रमाणंयदिस्यात्॥कथंतर्हिच्छंदोगपरिशि
ष्टादिके॥पिंडपितृयज्ञमन्वाहार्यादिकंचच्छंदोगमुख्यानुष्ठितिव्यवस्थितंविधत्ते॥
अतःइदंकुतपकालादेर्विधायकात्स्मृतिनिर्विरुद्धमनादरणीयं॥इति॥एवं
मनंतभट्टेपिप्रतिपादितं॥इतिनिरग्निकामावास्यानिर्णयः॥अथपौर्णमासीश्रा
निर्णयः॥अमावास्याश्राद्धनिर्णयवत्॥पौर्णमासीश्राद्धनिर्णयः॥पौर्णमासीपु
त्रजातकरणेदोषमाहपितामहः॥अमावास्याव्यतीपातपौर्णमास्यष्टकासुच॥विद्वा

नूच्छ्रमकुर्वणिः त्रामवृषत्रीमितेतुस॥ गार्ग्यः॥ पौर्णमासीषु पच्छ्राद्धं यस्तु दानं यथावि
धिः॥ उपवासादिकं सर्वं तदनंतफलं स्मृतं॥ पौर्णमासीषु सर्वासु तिथिष्वेवं पिंडपात
नं॥ वर्जयित्वा प्रौष्ठपदीं यथा दक्षस्तिथौ वसेति॥ चित्रानक्षत्रयुक्ता चैत्री॥ विशाखा
युक्ता वैशाखी॥ एवं स्वस्वनक्षत्रयुक्ताः सर्वाः पुण्यतमा इति॥ साग्निकानां पुनरपरा
ह्णे पिंडपितृयज्ञानंतरं दर्शश्राद्धस्य विहितत्वात्तद्विषयो दर्शनिर्णयः पृथक्प्रस्तू
यत इति॥ साग्निकविषये मनुः॥ पितृयज्ञं तु निर्वर्त्य विप्रश्चंद्रक्षयेऽग्निमान्॥ पिंडा
न्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकं॥ अत्र केचित् पितृयज्ञशब्देन पितृतर्पणं
व्याचक्षाणा मत्स्यपुराणं वचनमुदाहरंति॥ यथा॥ पितृयज्ञं तु निर्वर्त्य तर्पणाख्यं तु यो
ऽग्निमान्॥ पिंडान्वाहार्यकं कुर्यात् श्राद्धमिंदुक्षये सति॥ सर्वो हि स्नानंतर्पणं च कृत्वैव
श्राद्धमारभते॥ तस्यां साग्निनिरग्न्योरविशेषात्साग्नेयोऽग्निमानिति संतर्पकं॥ तर्पणस्य दे

वर्षिपितृमनुष्यसाधारण्यादसाधारणपिंडपितृयज्ञत्वव्यपदेशो न युज्यते॥ तर्पणस्यापिं
डरूपत्वाभावात् पिंडान्वाहार्यकव्युत्पत्तिरपि न घटते॥ पिंडा नाम नु पश्चादाह्रियंते क्रि
यंत इति॥ अतोऽस्य वचनस्यानर्थकत्वान्नियामहायज्ञांतर्गतं देवयज्ञमनुयज्ञानंतरं
पितृभ्यः स्वधा नम इति दक्षिणांतं॥ एवं पारस्करादिगृह्यविहितपितृयज्ञं निर्वर्त्य
पिंडान्वाहार्यकं श्राद्धं कुर्यादित्यर्थः॥ अयमेव पितृयज्ञस्तर्पणाख्यः॥ उक्तं च मत्स्य
पुराणे॥ जपो हुतोऽहुतो होमः प्रहुतो भौतिको बलिः॥ ब्राह्म्यं हुतं द्विजाग्र्ये पुत्राविन्नं
पितृतर्पणं॥ अनेन मत्स्यवचनेन॥ प्राक् पितृयज्ञादग्निमतो वैश्वदेवाख्यं महायज्ञा
नुष्ठानं विधीयते॥ भविष्यत्पुराणे स्पष्टमेतदुपदिश्यते॥ मासांते कर्म निर्वर्त्य वैश्वदे
वं तु साग्निकः॥ पिंडयज्ञं ततः कुर्यात्ततोऽन्वाहार्यकं बुधः॥ इति पिंडपितृयज्ञः॥ पितृय
ज्ञशब्देनोच्यते॥ गोरक्षमयत॥ पिंडपितृयज्ञोऽपराह्णे अमावास्यायां एवं पितृयज्ञं तु निर्व

न्त्येपितृन्कामयादेराश्रवणवाच्चात्पिंडपितृयज्ञस्यापिंडान्वाहार्यकस्यचैकस्मिन्दिनेसि
द्धेपिविरोधोदृश्यते॥यथा॥यदामावास्याप्रतिपत्संधिर्मध्याह्नादूर्ध्वंआमावास्याचदिन
द्वयेप्यपराह्णव्यापिन्यांतिथिक्षयेसिनीवालीति।सिनीवालीद्विजैःकार्यासाग्निकैःपितृक
र्मणि।त्यादिनाद्वयोःपिंडपितृयज्ञश्राद्धयोरेकत्रप्राप्तेपि॥आपस्तंबवचनकात्याय
नवचनाभ्यांविरुद्धमिवप्रतिभातियदहश्चंद्रमसंनपश्यंतितदहःपिंडपितृयज्ञंकुर्या
दित्यापस्तंबवचनेनचंद्रादर्शनएवपिंडपितृयज्ञोविहितः॥कात्यायनोपि॥अमा
वास्यायामापराह्णेपिंडपितृयज्ञश्चंद्रादर्शनेइति॥चतुर्दश्यांयत्रमुहूर्त्तत्रयादर्वा
क्समाप्यतेतत्रचंद्रदर्शनंनभवतीतिप्रसिद्धंज्योतिःशास्त्रे॥अतोमुहूर्त्तत्रयाधि
कायांचतुर्दश्यांचंद्रदर्शनेसतिआपस्तंबवचनेनचंद्रादर्शनविहितस्यपिंडपितृय २२
स्यसतिचंद्रदर्शनेविहितस्यपिंडपितृयस्यसतिचंद्रदर्शनेनिषेधाद्दुरूह्य॥

पिंडपितृयज्ञःपरेह्निक्रियते॥पितृयज्ञंतुनिर्वर्त्यविप्रश्चंद्रक्षयेग्निमानित्य
नेनविहितपिंडान्वाहार्यकस्यादितुमुख्यस्यपिंडपितृयज्ञस्यसिनीवाल्यांबाधदर्श
नात्मुख्यापबाधेपोन्याय्योऽवस्यतेइत्यनेनलक्षणायितर्पणाख्यंपितृयज्ञमाग्नि
त्यक्तंपक्वान्नकापिसिनीवाल्यांसाग्निनाक्रियतेश्राद्धमिति॥एवंचिंत्यतिथिद्वा
योर्द्वयोःकर्मणोरेकतिथिविधानविधिरस्यापिंडान्वाहार्यकस्यापश्चिमत्वात्लक्षण
दोषपरिजिहीर्षयाचपरिशिष्टकारआपस्तंबादिसूत्रार्थंव्याचष्टे॥यदुक्तंयदह
स्तेवदर्शनेनेतिचंद्रमाः॥तन्न्यायापेक्षयास्तेपंक्षीयोराजन्विवास्यतेइतिस्तेयदह
क्तेपदहश्चंद्रमसंनपश्यंतीतितत्त्वयाभिप्रायेणअदर्शनेनक्षयोभिप्रेतः॥यदे
दृश्यंद्रक्षयोभवतितस्मिन्नहनिपिंडपितृयज्ञइतिसूत्रार्थोव्याख्यातः॥चंद्रक्षय
कालस्तु॥अष्टमेंशेचतुर्दश्याःक्षीणोभवति॥अमावास्याष्टमेभागेततःकिलभवे

हणु॥ इति श्रातस्थं क्रमसिद्धेष्यपराह्णे स्याम्निन्या येण॥ हारीतोप्याह॥ यस्यां संध्यागतः
सोमो मण्याजृश्वदृश्यते॥ अपराह्णः स्यस्तस्यां पिंडानां करणं ध्रुवं॥ पिंडानां पितृय
त्रविहितानां पिंडानां विधायकत्वं स्य वाक्यस्यार्थविन्नानवति॥ पिंड पितृयज्ञरहित
स्य कृतपकालिकामामावास्यायां नित्यत्वात्॥ श्रुतिरपि॥ एष वै सोमो राजा देवानाम
न्नं यच्चंद्रमाः स एतां रात्रिं क्षीयते तस्मिन् क्षीणे ददाति॥ स एवापराह्णे ददाति॥ पू
र्वाह्णो वै देवानां मध्यंदिनो मनुष्याणामपराह्णः पितृणां तस्मादपराह्णे ददाति अस्य
श्रुतिरुद्यस्य विहितस्य पिंडपितृयज्ञस्य चंद्रक्षयेप्रतिपादनादेतदुक्तं भवति॥ प्रा
तश्चंद्रदर्शनेसति अपराह्णे यदा चंद्रः क्षीयते तदा पिंडपितृयज्ञः कर्तव्य इति॥ कात्या २३
यनोपि॥ पिंडान्वाहार्यकं श्राद्धं क्षीणे राजनि शस्यते॥ वासरस्य तृतीयेंशे नातिसंध्या
समीपतः॥ इति॥ आत्र पिंडान्वाहार्यकमित्यन्वर्थाभिधानं॥ पिंडपितृयज्ञोप्युक्तकाल

विशिष्टश्राद्धं विधीयते॥ तत्र क्षीणे चंद्रे प्रशस्तमिति॥ एतिकेचित्तैः चंद्रदर्शने एव पिं
डपितृयज्ञो विधीयते॥ तस्माच्चंद्रदर्शने निमित्ते नोत्कर्षः पिंडपितृयज्ञस्येति॥ कात्या
यनेन पितृयज्ञोदर्शाग्निसिन्क्कं॥ कर्कोपाध्यायेनाप्यपराह्णे कृतं॥ पूर्वैरेवदर्शा
श्राद्धात्पिंडपितृयज्ञो न पश्चादिति॥ नेमनेमतः नगत्वे पि हृन्मलिवरिषा॥ तत्र कम
पराह्णेति दत्वा पातः॥ पूर्वेद्युः पितृभ्यो यज्ञेनिः क्षीणीय श्रातदैवेभ्यः प्रतनुत इति आ
नयाश्चत्यैवान्वर्थकानि रस्ता॥ तदेवं पूर्वेद्युः पिंडपितृयज्ञ उत्तरेद्युर्दर्शेष्टिरिति च
निर्णीतः॥ अन्वाधाने पिंडपितृयज्ञं दर्शश्राद्धं चेत्येकदिने कृत्यं॥ कालादर्शे त्रि
ण्येकवासरे कुर्यादिति प्राकुमहर्षय इति॥ कारिकायां॥ श्राद्धस्यात्पिंडपितृयज्ञो
तेपिंडान्वाहार्यसंज्ञकं॥ पित्रादिभ्यस्त्रयाणां मातामहादिभ्यः सधर्मकं॥ तथा॥ श्राद्धा
त्पूर्वः पिंडयज्ञः श्रौतत्वादेककालिकः॥ आनाहिताग्नेः साग्निमतस्यश्रातादिदेशात्

नद्धति॥ तथा॥ अमायां नित्यहोमांते देवतानां परिग्रहः॥ अतः संकल्प्य वपनं पुंसः स्नात्वा
नौतु दंपती॥ कृतादौ लब्धिपिनान्वयकाकांक्षसमर्थनात्॥ पितृयज्ञविधिः कृत्वा मुक्तः
श्राद्धविधिः स्मृतौ॥ आपराह्णे पिंडयज्ञात्परं श्राद्धं तु दार्शिकं॥ अतश्चंद्रदर्शनिमित्त
पराह्णे क्षयामिश्रापेणायत्तपार्श्वेप्याह॥ अर्द्धं चतुर्दशीयत्र परो पंचदशी भवेत्॥ च
तुर्दश्यवसाने तु पितृयज्ञं तु कारयेत्॥ कारयेदिति पिंडपितृयज्ञस्याध्वर्युकर्तृकत्व
शाखानिश्रायेण णिच्प्रत्ययः॥ स्वयं कर्तृत्वे स्वार्थेपि णिजिति कल्प्यते॥ अस्तमयपर्य
तायामपि चतुर्दश्यां पिंडान्वाहार्यकं श्राद्धं विधीयते॥ यदि द्वितीयेह्नि अमावास्या
याः क्षयो भवति॥ तदुक्तं॥ यदा चतुर्दशी॥ वासरस्य तुरीयेंशे तदैव चंद्रस्य क्षीण
त्वात्॥ वासरस्य तुरीयेंश इति कात्यायनवचनाच्च॥ स्मृत्यंतरं॥ चतुर्दश्यां चतुर्या
मे अमा यत्र न दृश्यते॥ श्रौतं तेभ्यः प्रतिपद्यन्नंते कव्यादिकीं क्रियेति॥ एतानि चतु

र्दश्यां पिंडपितृयज्ञपिंडान्वाहार्यकश्राद्धविधायकानि वाक्यानि तु दार्शिकसंक्रांत्या
होदिनमानाल्पत्वे आमावास्यायाः प्रतिपदश्चात्यंतक्षयवत्गत प्रतिपद्यागका
लाभावे वेदितव्यानि॥ प्रतिपद्यागकालसत्त्वे तु चतुर्दश्यामग्न्याधानादीनां नि
षेधउक्तः॥ तत्र स्मृतिवचनं॥ भूतेह्नि चतुर्दश्याममां कुर्वंति ये द्विजाः॥ विहारं पितृय
ज्ञं च तस्य सर्वं निःफलं भवेत्॥ विहारस्त्वहरिणा॥ द्वितीयेह्नि यागकाले सति चतुर्दश्यामग्न्या
ग्न्याधानादेर्निषिद्धत्वात्॥ यागकालप्रमाणं वृद्धकात्यायन आह॥ पर्वणो यश्चतुर्थांश
आद्याः प्रतिपदस्त्रयः॥ यागकालः स विज्ञेयः प्रातरुक्तो मनीषिभिरिति॥ तथा॥ यत्तप
श्चैषि॥ पंचदश्याः परः पादः तु पक्षादेः प्रथमास्त्रयः॥ कालः पार्वणयागे स्यादन्यथा
तु यान विद्यते॥ इत्यादिवाक्यैर्विहितस्य यागकालस्य प्रतिपदि सद्भावे भूतेह्नीति
वाक्यं चतुर्दश्यां निषेधकः॥ प्रतिपद्यागकाले निषेधकाभावात्॥ अन्यथा पूर्वे

वचनैर्विरोधस्यात्॥ तस्मात्साग्निना यागकालं पर्युदस्यैव नया दिवसत्रिधाविभागाप
राह्णेऽमावास्यायां तु दर्शपिंडपितृयज्ञः कर्तव्य इति सिद्धे पितृविषये द्विधाविभा-
गो नास्तीति मंतव्यं॥ पिंडपितृयज्ञे द्विधाविभाग इत्यत्र वचनानि॥ पर्वसंधिकालभे-
देन व्यवस्थामाह॥ लौगाक्षिः॥ अपराह्णे यवा सायं यदि पर्वसमाप्यते। उपोष्यतस्मि-
न्नहनि श्वोभूते याग इष्यत इति॥ अपराह्णे दिवसस्योत्तरार्द्धे यदि पर्वसमाप्तिः। तदा
द्वितीयेऽहनि यागकालसञ्ज्ञावसति तस्मिन्नुपोष्य लब्धाधानादिन्नं तेन कृत्वा श्वोभूते परेद्यु-
र्यागः॥ अपराह्णोऽत्र दिवसस्य द्वितीयो भागो न तृतीयो नापि पंचधा विभक्तस्य च-
तुर्थो भागः॥ अत एवार्द्धे चित्तु दर्शोऽस्त्यपरे पंचदशीत्यत्र वाक्ये पितृयज्ञकालविधौ द्विधा-
विभागस्य गृहीतत्वान्मुख्यस्यायमपराह्णशब्दार्थः॥ अह्नः अपरो भागोऽपराह्णः।
पूर्वापराधरोत्तरेति समासः॥ तथा॥ पिंडाय ते दिवसद्विधाविभागे परार्द्धकारि- २५

का॥ पंचदशी प्रतिपच्च समेते एकादिने महती यदि मतस्मिंस्तु पंचदशी प्रकृते रूपवा-
सः पंचदशी क्षिपते यदि यागकालः॥ समेते मिलिते इत्यर्थः॥ पंचदशी महती दिनो-
नोत्तरभागे पिंडपितृयज्ञकारणसमर्था तस्मिन्दिने॥ तदाग्रेयातरेवापराह्णिकी
त्रिघटिकापद्मात्रकृते दर्शपौर्णमासयो रूपावासो व्रतमिति॥ एतद्वितीयदिने याग-
कालसद्भावे वेदितव्यं॥ पंचदशी क्षियंते यदि क्षीयते तदा तस्मिन्नहनि याग॥ अर्था-
त्पूर्वेद्युर्व्रतं॥ तथा गोभिलः॥ आवर्तनात्परः संधिर्यदि नस्मिन्नुपक्रमं॥ परेद्युरिष्टि-
रित्येष पर्वद्वयविनिर्णय इति॥ आवर्तनं मध्याह्नः॥ तस्मात्परतः पर्वप्रतिपदोः संधि-
स्तदा तस्मिन्व्रतं॥ परेद्युः परदिने इष्टिरिति॥ वरमित्यादि बहूनां वचनानां पर्यालोच-
नेपाश्रतपागयोः पूर्वोत्तरदिनसंबंधत्वेन परदिने च दर्शनिसत्व सतिवा यागः॥ प-
रेद्युरुच्चेद्धरणादिकमिति॥ स्मृत्यर्थसारेऽप्येवमुक्तं॥ अमावास्यायां तु अपराह्णादि

 पर्वसंधौ सत्त्विपरेह्नि दृष्टं चेदपि यागः कार्य इति॥ अमावास्या पूर्णिमा च पर्वशब्देनोच्यते तत्
 पाचस्कृतिः॥ अर्द्धमासपर्वदेवानस्मिन्त्रीणंतीति एवं पितृयस्तादो द्विधा विभागो ष्फक्कः॥
इति साग्निकस्यामावास्यामावास्यानिर्णयः॥ कृते बलद्विवेदेन ग्रंथे निर्णयदीपके॥ निरग्ना
देश्च साग्नीमानामावास्या विनिर्णयः॥ अथ यागकालनिर्णयः॥ दर्शपौर्णमासाभ्यां च हि
ताग्न्यानाहिताग्न्योः संधौ यजेतेति वाक्ये न विहितस्य प्रथियागस्य पर्वप्रतिपत्संधिनिबंध
नत्वात्संधेरतिसूक्ष्मात्वात्तत्र यागानुपपत्तेरुन्मेयतः॥ समीपलक्षणायां कालनिश्चय मा
हयाज्ञवल्क्यः॥ पंचदश्याः पादः पक्षादेः प्रथमास्त्रयः॥ यागकालः स विज्ञेयः प्रातरुक्तो
मनीषिभिः॥ एवं पर्वचतुर्थांशादि प्रतिपदं त्रयंशावधि यागकालः। संप्रातः कालीनो ग्र
हीतव्यः॥ प्रातः पर्वैतत्पक्षमहादृक्षात्प्राणि सूर्यनिवृत्तयति सह होमकालः स्वस्त्ययनतम इति
स्मृतः॥ उदित आदित्ये पौर्णमासतत्र प्रक्रमेत्प्रागुदयादारमभमावास्यमित्यापस्तं

ब॥ यदा मध्याह्नात्पूर्वं मध्याह्ने वा पर्वप्रतिपदोः संधिस्तदा संधिदिने यागः पूर्वेद्युरन्वा
धानं॥ तदाह लौगाक्षिः॥ पूर्वाह्णे प्रथमध्याह्ने यदि पर्वसमाप्यते॥ उपोष्यं तत्र पूर्वेद्युस्त
द्हर्यागइष्यते॥ गोभिलः॥ पर्वप्रतिपदोः संधिरर्वागावर्त्तनाद्भवेत्॥ तस्मिन्नहनि यष्ट
व्यं पूर्वेद्युः स्यादुपक्रमः॥ तथा॥ आवर्तने यदा संधिः पर्वप्रतिपदोर्भवेत्॥ तदा यागः
इष्यते परतश्चेत्स्यात्परेहनि॥ आवर्तनं मध्याह्नः॥ आवर्तनादूर्ध्वं पूर्वसंधौ परेहनीति याग
काले सतीति वेदितव्यः॥ संग्रहेपि॥ पूर्वाह्णे वाथ मध्याह्ने पर्वसंधिर्यदा भवेत्॥ तत्रोपो
ष्य सितीवाजीन्वान दृष्ट्वा रलक्षणेति चेन्द्रमिति शेषः॥ एतानि वचनानि यदा मध्याह्ना
त्पूर्वं मध्याह्ने वा पर्वप्रतिपत्संधौ संधिदिने यागविधायकानि॥ अथा यदा मध्याह्नादू
र्ध्वं सायं काले वा पर्वसमाप्तिस्तदा संधिदिवसे न्वाधाय परेद्युर्यागः॥ तदाह लौगाक्षिः॥
अपराह्णे प्रवासायं यदि पर्वसमाप्यते॥ उपोष्य तस्मिन्नहनि श्वो भूते याग इष्यते॥ सं

ग्रंहेपि॥ अपराह्णे क्षयामावापर्वसंधिस्त्रिविधेतिदि॥ उपोष्यातु कृत्स्नत्रयदहनेतिलक्षणे
चंद्रेणेत्यर्थः॥ गृह्यकारिका॥ पंचदशीप्रतिपच्च समेतएकदिने भवेत् तोयदितस्मिन्
पंचदश्यां प्रकुर्वीत उपवासः॥ पंचदश्यां हीयतेयदि यागः॥ गोभिल॥ आवर्त्तनात्परः संधि
र्यदितस्मिन्नुपक्रमः॥ परेद्युरिष्टिरित्येषपर्वद्वयविनिर्णयः॥ इतिएतानिवचनान्यपरा
ह्णपर्वसंधौपरदिनेयागविधायकान्यपियागकालसंज्ञाविवेदितव्यानि॥ अन्यथासं
धिदिनेएवंयागइति॥ असंनिर्णयः पूर्णिमामावास्ययोः साधारणः॥ अमायांतुयाग
कालानुपालेपिपर्वतितीयेंद्रोपियागोनभवेदिति॥ तत्रयुक्तिः॥ वृश्चिकसंक्रांतौदिनमान
त्वेसतियदातिथेः क्षयोभवतितदाद्वितीयेहनिप्रतिपत्तौतामाश्रित्यावासुतुर्यांशास्य
निदाघश्रवणाद्वयदाचतुर्दशीयामतुरीयमित्यादिवचनैः पिंडपितृयज्ञादिकंकर्मचतु
र्दश्यामुपदिश्यते॥ तत्रोपजीव्यद्वितीयदिवसेपूर्वाह्णः पितृभ्योयत्तंनिःक्रीणीयप्रात॰

द्वैव्यः॥ प्रतइत्यनयाक्रमपरयाभ्यस्यार्यस्मातः पर्वत्तीयांद्वोयागः स्यादितिसिद्धं॥ इ॰
यास्तुविशेषः॥ प्रतिपद्यप्रविष्टायांब्राह्मणतर्पणंनकर्त्तव्यं॥ प्रतिपद्यप्रविष्टायांयदि
त्विष्टिः समाप्यते॥ पुनःप्रणीयकृच्छ्रेष्टिः कर्त्तव्यायागवित्तमैरितिगार्ग्यवचनात्॥ यत्तुपंच
मीयत्रसंपूर्णाद्वितीयाक्षयगामिनी॥ चरुरिष्टिरमावास्यान्तेकव्यादिकीक्रियाअमा
वास्याप्रवृत्तीनांतिथिनामनुस्मृतेक्षयेषट्षट्घटिकाक्षयेपंचमीसंपूर्णानिवर्तितिथिस्त
येप्रतिपदिचन्द्रदर्शनंभवति॥ तयास्मतिन्नतेकव्यादिकीक्रियांविदधातोस्यवचनस्य
प्रतिपदिचंद्रदर्शनेसतिप्रतिपत्पर्वसंधिनिमित्तोयागोनकार्यइतितात्पर्यं॥ एतदुपजी
व्यचंद्रदर्शनेपातनिषेधकानिमुनिवचनानिप्रवर्त्तंते॥ यजनीयेह्नि सोमेध्वेदारुण्य
दिनाद्दृश्यते॥ अन्वाधानंचतुर्दश्याममायांतुयजेत्तदा॥ तथा॥ आदित्येस्तमितेचंद्रः प्र
क्षीयते दिवानदा॥ प्रतिपद्यप्रतिपत्तीः स्यात्पंचदश्यांयजेत्तदा॥ वृद्धवसिष्ठ॥ इंदौ न

कत्वेह विषिपुरस्तादुदिते विधौ॥ यद्वै गुप्यंपहृते तस्मिन्नमक्षादिति द्वितन्नवेत्॥ स्मृत्यंतरे॥
वर्द्धमानाममावास्यां लक्षयेदपरेहनि॥ यामांस्त्रीनधिकान्यापिपित्यतस्यतान्नवेत्॥ न
तत्तस्यां सप्तम्यर्धे तस्मिन्॥ दृष्टौ चंद्रदर्शनं न संभवति॥ तथा॥ पार्वणोंत्रोत्तरीये पिका
यांलिंष्टिद्विजोत्तमैः॥ द्वितीयासद्वितंयस्मादृष्यंत्याम्न्वाजायना॥ अवगिस्तमयाधत्र
द्वितीयानुग्रदृश्यते॥ तत्र यागं न कुर्वात विश्वेदेवाः पराङ्मुखाः॥ अत्र वचनद्वये द्वितीया
मात्रेति प्रसंगाद स्तमये त्रिमुहूर्त्तव्यापिन्या द्वितीयामाश्वंद्रदर्शनं यागनिषेधलक्ष
णादयान्विषेधेप्रतिपिपुनर्द्वितीयानिषेधेः त्रिमुहूर्त्ताधिकव्यापि द्वितीयाविशेषेव
षितिष्टते॥ अवगिस्तमया स्मापास्तात्स्वर्वेद्धृत्यनेन तत्स्विनो द्वितीयाविशेषो दृष्टद्वातातपे २९
नोक्तः॥ त्रिमुहूर्त्ता द्वितीया चेत्प्रतिपद्यापराह्निका॥ अन्वाधानं चतुर्दश्यां तरतः सोमद
र्शनादिति॥ अपराह्णश्चतुर्थः स्त्रिमुहूर्त्तः॥ तत्र भवा आपराह्निकीति कालादर्शे व्याख्या

तं॥ कार्त्तिकशुक्ल प्रतिपन्निर्णये निर्णयामृते प्यंगीकृतं प्रतिपदि षण्मुहूर्त्तव्यापिनी द्वि
तीया आपराह्निकीति व्याख्यातं॥ एवं प्रतिपदि षण्मुहूर्त्तयांयां चंद्रदर्शने यागनिषेध
इति प्राप्तं॥ एतानि सर्वाणि वचनानि प्रतिपदि यागनिषेधकानि॥ पर्वद्वितीयांशे याग
विधायकानि तानि क्षयपक्षेव कल्प्यंते॥ प्रतिपदि सोमदर्शनिस्य कारणस्य क्षमए वसं
भावात्॥ तिथितत्त्वे तु॥ ह्यस्य गायंतिथिः पर्वाह्निगायां परा स्मृता॥ तथा खर्ववेदे पौर्ण्यरौ
पूज्या वित्यादिना॥ अपराह्णसंधिगास्य बलाद्वप्रतिपदि सोमदर्शने पि प्रातः प्रतिद्वि
तीयांशे लभ्यमाने याग इति सर्वसमेतं॥ अयाप्येतद्वचनंजांतं प्रतिपदि सोमदर्शनिया
गनिषेधकं॥ तथाप्यपराह्णसंधिगास्तविधानान्यथानुपपत्त्या प्रतिपदि सोमदर्शनिस
त्तियामानुष्ठानं वैकल्पिकं द्रष्टव्यं॥ यदि द्विप्रातः पर्वतीयांशे लभ्यमाने सोमदर्शन
मात्रेण दर्शयागः प्रतिषिध्यते॥ तदापजनीये ह्नि सोमश्चेद्दृश्यां दिनिर्दृश्यते॥ तत्र

व्याहृतिभिर्होमो दंडं दंद्यादिजातयेइतिकात्यायनवचनमसंगतं स्यात्॥ कथं प्रतिपदि
चंद्रदर्शनसंभवे तच्चतुर्दश्यामन्वाधानं कृत्वा पंचदश्यां यागे कृते प्रतिपदि यजनीये
ऽग्निसोमस्येदिक्रमानमसंगतं॥ तस्याह्नोयजनीयत्वाभावात्॥ यागस्तु पूर्वेद्युरेव सेत्स्य
त इति॥ अस्तन्न प्रतिपदि यागाभावे व्याहृतिहोमाद्यसंगतं॥ सोमदर्शनेनतु याभि
कयागप्रतिषेधेऽभ्युपगम्यमाने पक्षेचंद्रदर्शनेसति होमादिसहितो यागो विधी
यते॥ तदेदवचनमर्थवत्। अन्यथेत्यनंतमतेऽपि चंद्रदर्शनेपियागो विकल्पेनाश्रितइ
ति॥ चंद्रदर्शने पाक्षिकयागानुष्ठानेपि पर्वतिनी यां त्रेधा आर्थिकः कालः॥ प्रतिपत्ती
यां त्रेधावाचनिकः कालइति॥ पर्वणोयस्य तुरीयो भाग इत्यनेन इदमत्र रहस्यं त्रिमुहूर्तद्वि २९
तीयां चेदित्यनेन दर्शनाता तपोक्तेन षट्मुहूर्तद्वितीयाव्याप्तौ याग निषेध उक्तः॥ सा
यं षण्मुहूर्तन्यूनकालव्यापिन्यां द्वितीयायां चंद्रदर्शनसति तैत्तिरीयश्रुतिः॥ यदहः

पश्चाद्भांज माअभ्युदेतितदहर्यजेतेतइमांल्लोकान्मृकदेष्यंतिरायावैसुमानानामेष्टि
यमनेवाभ्युद्विचंद्रमाअभ्युदेतीति॥ तस्माद्यागकालस्यप्रातःकालव्यापित्वविचारेण
याग। कार्य इति॥ इति अमावास्यायागकालनिर्णयः॥ अथ पौर्णमासी याग निर्णया
र्थं तावत्पौर्णमास्याः स्वरूपमुच्यते॥ तदाह गोभिलः॥ परमो विप्रकर्षः सूर्याचंद्रमसोः सा
पूर्णिमा सा॥ सा द्विधा॥ या चतुर्दशीयुक्ता पौर्णमासी सानुमतिः॥ प्रतिपद्युक्ता राकी
स्मृतिरपि राका चानुमतिश्चैव पौर्णमास्यौ द्वयं विदुः॥ राकासंपूर्णचंद्रा स्यात्कलोना
नुमतिः स्मृता॥ अत्रश्रुतिः॥ या पूर्वा पौर्णमासी सानुमतिः योत्तरा सा राकेति॥ पुराणे
पि॥ पौर्णमासी द्विवादृष्टेंदुः श्रियान्यनुमतिः स्मृता॥ रात्रिदृष्टेषुनष्टस्मिन्नु सैवराकेति
कीर्त्यते॥ अथ पौर्णमास्यपि संधिविशेषेण यागार्थं निर्णीयते॥ एवं बह्वृचाम
ध्याह्ने यदि पर्व समाप्यते॥ उपोष्यानुमतिस्तत्र साम्यः पूरितलक्षयाः॥ तत्रानुम

तिंपूर्वंनिर्णेष्यंसंधिदिनेयागः॥लौगाक्षिःपूर्वाह्णेमध्याह्नेयदिपर्वसमाप्यते॥ज्यो
ष्यतत्रपूर्वेद्युस्तदहर्यागइष्यते॥गोभिलः॥पर्वप्रतिपदोः॥संधिरर्वागावर्त्तनाद्भवेत्॥
तस्मिन्नहनिनियतंपूर्वेद्युःस्यादुपक्रमइति।संधिदिनेयागमपराणि॥अपरार्कः
पराह्णेथवारात्रौयदिपर्वसमाप्यते।उपोष्यातत्रराकास्यासापूर्णोक्तिर्विचक्षणः॥रा
काप्रतिपत्क्षयेद्वितीयदिनेयागः॥अतएवलौगाक्षिः॥अपराह्णेथवारात्रौयदिपर्वस
माप्यते॥उपोष्यंतस्मिन्नहनिश्वोभूतेयागइष्यते॥गोभिलः॥आवर्त्तनात्परःसंधि
र्यदितस्मिन्नुपक्रमः।परेद्युरिष्टिरित्येषपर्वद्वयविनिर्णयः॥इति॥पौर्णमास्यामप
धिकोविशेषः॥अपराह्णसंधौयदिद्वितीयदिनेप्रातःप्रतिपत्तृतीयांशोलभ्यते॥त ३०
द्दिनेतत्रैवेष्टिःकर्त्तव्या॥नात्यहर्वेषणीयमिति॥एवंह्रासेसंधौतुसंधिदिनेयागइति
निर्णयः॥पौर्णमास्यांविशेषोद्वेधासाद्यःकालासद्यःकालाच॥यस्यांपूर्वेद्युरन्वा

धानादिद्वितीयेहनियागःसाव्यहकालाः॥आपराह्णसद्यःकालासद्यइतिसमाने
ऽहनिअन्वाधानाधारध्यायप्रधानयागःसमाप्यतेसासद्यःकाला॥यदासंगवकालस्य
मध्याह्नकालस्यचांतरासंगवमध्याह्नयोर्मध्येपूर्णिमाप्रतिपत्संधिःस्यात्तदासद्यः
कालाविधिर्भवेत्॥तदुक्तं॥पूर्णिमाप्रतिपत्संधिर्यदिसंगवमंतरा॥आवर्त्तनंचतस्य
स्यात्सद्यःकालविधिर्भवेत्॥आवर्त्तनंमध्याह्नः॥कात्यायनोप्याह॥संधिश्चेत्संगवा
दूर्ध्वमर्वागावर्त्तनाद्यदि॥सापौर्णमासीविज्ञेयासद्यस्कालविधौतिथिरिति॥नन्वेवम्
अनन्वाधानातीत्रिपशुर्वत्सपूर्वेद्युरित्यादिविधिविरोधःस्यादितिचेन्न॥सद्यःकाल
विधेरपिदर्शनात्॥तथाचापस्तंबः॥पौर्णमास्यांचान्वाधानंपरिस्तरणंप्रवासः॥स
द्योवासद्यःकालायासर्वंक्रियतइति॥साद्योवान्वाधायसद्यःकालतःक्रियतइत्या
वत्॥संग्रहकारेणाप्यनयोःपक्षयोर्व्यवस्थोक्ता॥अन्वाधानंवास्तरणंप्रवासोपूर्वे

ह्नरेतेखलुपौर्णमास्यां॥आवर्त्तनात्प्रागपि पर्वसंधिः सद्यस्कदावाक्रियतेसमाप्तिः॥सर्व
स्वकर्मणाइतिशेषः॥इतिसद्यःकालः॥पर्वण्यनिवृत्ते इष्टिर्नसमापनीया॥तदुक्तं॥प्रति
पद्यप्रविष्टायांयदिचेष्टिःसमाप्यते॥पुनःप्रणीयकर्त्तव्येतिकात्यायनविस्तरेः॥पर्व
समाप्तिस्तिथेःपादस्य॥यदाप्रतिपद्वृद्धिगामीतितदाहर्द्वनाडीनामर्द्धपर्वणिसंयोज्यंय
दाक्षयगामिनीतदाक्षयनाडीनामर्द्धपर्वणियोज्यं॥एवंपर्वसमाप्तिर्ज्ञेया॥समायांसर्व
ता॥तदाहलौगाक्षिः॥तिथेःपरस्याघटिकास्तुयास्युर्न्यूनास्समावाप्यधिकास्तुतासां॥
अर्द्धंवियोज्यंचतयाप्रयोज्यंक्षयेचदद्यात्प्रथमेदिनेतत्॥तथा॥तिथ्यादौतुभवेद्यावान्
सोवृद्धिःपरिहानि॥तावान्ग्राह्यःसपूर्वेद्युरदृष्टोपिस्वकर्मणि॥ननुअपराह्नसंधाव ३१
न्वाधानेकृतेपरेद्युःकालातिपत्तौकथमिति॥तत्रोत्तरमाह हेमाद्रावातातपः॥संधिर्यद्य
पराह्णेस्याद्यागंप्रातःपरेहनि॥कुर्वाणःप्रतिपद्भागेतुरीयेपिनदुष्यति॥केचनेदंपौ

र्णमासयागपरंव्याचक्षते॥आमायांतुअवश्यंभावित्वात्सोमदर्शनेनिषिद्धत्वात्॥न
नु॥नयष्टव्यंचतुर्थेशीयोगःप्रतिपदःक्वचित्॥रक्षांसितद्विलुंपंतिश्रुतिरेषासनातनीति
कात्यायनवचनविरोधस्यादितिमेवं॥आवाधोकालसंभवेआलस्यादिनाचतुर्थांशेन
यष्टव्यमित्येवंपरत्वात्तस्या॥अपराकार्खविकापौर्णमासी॥वाजसनेयानुमतानुस्वा
र्वचनैरमावास्या वटसावित्रीव्रते चतुर्दशीयुता कार्येति॥ ननु नागविद्धा तु या षष्ठी
दशम्येकादशी तथा॥ भूतविद्धा सिनीवाली न तु तत्र व्रतं चरेदिति भूतविद्धा निषे
धात्कथं तत्र व्रतं स्यादिति चेत्॥ शृणु निषेधस्तु सावित्रीव्रतव्यतिरिक्तामावास्या
व्रतविषयः॥ ज्येष्ठमासकृष्णत्रयोदशी मारभ्यामावास्यायां॥ स्त्रीभिः सावित्रीव्र

नि·दि·
६३

तं क्रियते॥ तत्र अक्षत विधायकं वचनं॥ यदाह जाबालिः॥ तुलायां मकरे मीने कन्यायां
मिथुने तथा॥ व्रतविद्याव्रतेऽस्त्याद्येषु प्रतिप्रजाद्युतम्॥ मिथुनेऽन्येष्वमासेऽइति प्रसिद्धि
तुलागुरुतारव्यं लौकप्रसिद्धं॥ तत्प्रतिवर्षं तिथिविद्धा क्रियमाणेति तिथिः पूर्वविद्धोप
वासेऽमात्या॥ तदुक्तं॥ कृष्णाष्टमी वृहत्तपा सावित्री वटपैतृकी॥ अनंगत्रयोदशी रंभा
उपोष्याः पूर्वसंयुता॥ ब्रह्मवैवर्तेऽपि॥ कृष्णाष्टमी तथा रंभातृतीया वटपैतृकी॥ वृहत्तप
तथा ब्रतानं कर्तव्या सन्मुखतिथिः॥ पूर्वतिथियुक्ता सन्मुखा इति॥ तद्व्रतारंभे षोड
शतु दीपवर्तिका प्रतिकर्षमेकैकतन्तु दद्याः कार्या॥ सुपूजिते घृते देवे अष्टपदं धिव
दराह्यतदीपार्चितपात्रं गृह्णीत्वामावास्यातः प्रतिपदो द्वितीयामिति तिथिर्दुध्या गुरुं प्र ६३
छेत् एवं षोडश वर्षपर्यंतं कर्तव्यमिति॥ स्वर्णरूपिणा ता॥ तद्व्यक्रमोध्वरणापार्वतीप्र
ति॥ मार्गशीर्षे शुक्लपक्षे कुर्याद्व्रतमनुत्तमं॥ अमाप्य वंसिमा रभ्य यावत्षोडशिका

तिथिः॥ वर्षे वर्षे व्रतं कर्तव्या वर्तिषोडशतंतुका॥ संख्यायै विंशदेकांयया व्रतमखंडनं
महेश्वरं च संपूज्य पुष्पधूपान्नवारिभिः॥ गृहीत्वा पूपहृवादियुतं पात्रं गुरुं व्रजेत्॥ ग
छेत्तिथिस्तिथिश्चैतन्नु रुवाक्यास्तु सुंदरि॥ वर्षे वर्षे प्रकर्तव्यं यावद्वर्षसमाप्यते॥ पूर्णे
षोडशवर्षे तु कुर्याद्विजनमुत्तमं॥ उद्यापनं चेत्थयैः॥ आरोग्यपुत्रपौत्रत्वमवैधव्यत
थैवचैत्यादि गुरुत्वाव्रतविधि॥ अथ प्रतिपन्निर्णयः॥ प्रतिपद्यप्यमावास्यापि युग्मेषु
क्तेप्रति पदोमावास्या विशाला मुपवासे विहितं॥ तथा कालादर्शे॥ प्रतिपत्पंचमी कृ
ष्णाष्टमीन्तच सप्तमी॥ नवमी दशमी शुक्लेत्रयोदश्या श्रुतिर्हरि॥ रंभा तृतीया चे
त्येता उपोष्याः पूर्वसंयुता॥ व्रतं च तु दर्शिः॥ व्रतं च अष्टमी चेति विग्रहे पूर्वभावि
ति त्वेनाभ्यर्हितत्वादष्टमी शब्दस्य पूर्वनिपातः॥ अमुतिर्हरिः॥ श्रवणव्यतिरिक्ता द्वा
दशी॥ ब्रह्मवैवर्ते॥ प्रतिपत्पंचमी भूतं सावित्री वटपूर्णिमा॥ पूर्वविद्धेति॥ पैठीनसिः

पंचमी सप्तमी चैकादशी च त्रयोदशी ॥ प्रतिपन्नवमी चैव कर्तव्याः संमुखा तिथिः ॥ स
न्मुखेति पूर्वतिथियुक्तेत्यर्थः ॥ एतानि वचनानि विधिमुखेन पूर्वविद्धापराणि ॥ यत्तु प्र
तिपद्द्वितीया प्रतिपद्युतेत्यापस्तंबवचनं प्रतिपद्द्वितीया विधिमुखयोः परस्परं व्रत
संबंधाभिधायकं तद्व्रतविशेषाभिप्रायेण ॥ युग्मं शुक्लप्रतिपदः उपवासे पूर्वविद्धा
धानम् ॥ यत्तु द्वितीया पंचमी दशमी त्रयोदशी चतुर्दशी चैवमुपवासविषयेऽस्मा
त्पूर्वमुत्तरां च तिथिं कुर्यादित्येतदुक्तं वृद्धवसिष्ठेन ॥ द्वितीया पंचमी विद्धा दशमी च
त्रयोदशी ॥ चतुर्दशी चोपवासे हन्युः पूर्वोत्तरे तिथी ॥ एतदपि ॥ युक्तं तु द्वितीयातृती
योस्तु थी पंचम्योर्युग्मवाक्ये साहचर्यश्रवणाद्दैवत्र्यैव तिथिनिर्णये व्यवस्था
याप्रदर्शपति ॥ एतेनोपवासविषये द्वितीयापूर्वविद्धेति यदमुत्तरां त्वतीयादितिस्वे
धा तु ॥ अतः प्रतिपद्द्वितीयायुक्ता नोपोष्येति तात्पर्यार्थः ॥ उपावसितुश्चैकं प्रति

यदपि ॥ पूर्वविद्धैव वीनसिवचनादित्यनेन मद्दैः प्रतिपादितं ॥ यत्प्रतिपद्युपद्वितीयास्या
द्वितीया प्रतिपद्युतेत्यापस्तंबवचनं प्रतिपदो द्वितीयायुक्तत्वाभिधायकं तत्रोपवासव्य
वस्थापनात्तिलकाशोककरवीरादिव्रतविषये व्यवस्थाप्यते ॥ तानि हि व्रतषट्के शु
क्लप्रतिपत्कृत्यानि व्रतानि पूर्वाह्ण एव विधीयंते इति व्यवस्थयानेकत्र विदोषः एवमन्या
न्यापि विरुद्धवाक्यानि च स्वस्वविषये व्यवस्थापयिष्यंते ॥ द्वितीयायाः प्रतिपद्विद्धत्व
मप्यन्वयायनादिव्रतविषयं ॥ नैकभक्तादिव्रतविषयत्वं ॥ तेषां स्वकालव्यापित्वा
नियतत्वादिति ॥ प्रतिपद्यपामान्यनिर्णय ॥ निर्णयामृते प्रतिपत्सद्वितीयेत्येतद्वा
क्यं ॥ कृष्णपक्षयुग्ममित्युक्तामेवाशोककरवीरादिशुक्लप्रतिपद्व्रते योजितं तदसमी
क्षिताभिधानेकृतं ॥ आश्विनशुक्लप्रतिपदि अशोकव्रतं कार्यमिति नदशोकेन प्राप्नोत्य
कोन्न विप्रसूरा पोक्तस्नेन युधिष्ठिरं प्रति ॥ यथा अश्वयुक्शुक्लपक्षस्य प्रथमेऽह्नि

नोदये॥ अशोकं पूजयेद्धस्तं चरूढमुनलक्षणां॥ चरूढैः सप्तधान्यैश्च गुणाके मोदकै
श्चुभैः॥ फलैः काजोद्भवोद्रुद्धैर्नाजिकैरैः सदाडिमैः॥ पुष्पधूपादिनात्र पूजयेत्तं नगो
त्तमं॥ अशोकं पांडवश्रेष्ठः शोकनाशोति कुत्रचित्॥ अशोक शोकत्रमनोनवसर्व
न नक्कजे॥ इत्यच्छायंततोदद्यादर्घफलसकमन्वितं॥ पाताकाल्मिरलंकुत्य प्रच्छाद
वस्तुवाससा॥ दमयंती यथा त्यासीद्यथा देवी च जानकी॥ तथाशोकव्रतादस्मात्का
यतेपतिवल्लभा॥ दृष्ट्वाशोकं वनेपार्थपाद्यवालंकृतां तनुं॥ कृत्वा समीपेजंकारदंव
रंचतिलाक्षतैः॥ दीपालक्तकनैवद्यैर्धूपस्तत्र फलार्चनैः॥ अर्चयित्वा प्रार्थिता सौ
रक्ताशोको युधिष्ठिर॥ मैथिल्या प्रांजलिर्भूत्वा स एवतौराघवस्य च॥ चिरंजीवतुमद्दृ
दृः श्वशुरः कोशलेश्वरः॥ नक्तामिदेवरा श्चैवजीवतुजनको दय॥ कोसल्यामपिजीवंती
पुत्रपद्मस्मितिमैथिली॥ यथाचेदं महाभाग दुमं वनं विभूषयं॥ प्रदक्षिणमुपावृत्य

ततः सा श्वयथौ गृहं॥ एवमन्या स्त्रियानार्यरि पूजयेद्वनीगतं॥ तिलतंदुलसंमिश्रिर्य
वगोधूमसर्षपैः॥ क्षमाप्यवंदयेन्मुलेपादपेरक्तपल्लवं॥ तदनावेसौवर्णरजतंवाष्य
शोकितं॥ वर्णकेर्वासिमाज्जिरव्य पूजयेद्विधिवत्ततः॥ मंत्रेणानेन कौंतेमप्रणम्य स्त्री
पतिव्रता॥ महाद्रुम महाशाख कामकेरध्वजमंदिर॥ श्राषयित्वा माहाभाग सर्वकाम
प्रदो भव॥ एवमामन्त्य तं वृक्षं दद्याद्विप्राय दक्षिणां॥ तं च वृक्षं कृतं दद्याद्वस्त्रयुग्मस
मन्वितं॥ सखीभिः सहिता सा धीमन्तुजो नव्रतचारिणी॥ एतत्कृते च याकुर्यात्साशोकं
न तु पश्यति॥ अंते गौरीपदं याति निर्लसौरवं च विंदति॥ इत्यशोकाख्यमेकनक्तव्र
तं॥ अथ प्रतिपदोग्निर्देवता अतः सर्वाग्निसुपक्ष्वग्निव्रतं कार्यं॥ तदुक्तं पद्मपुराणे॥
प्रतिपद्येक नक्ताशी समांते कपिलाप्रदः॥ वैश्वानरपुरं याति व्रतं वैश्वानरं विदुर्मि
ति॥ तथा तस्मिन्नेव पुराणे॥ पृथिवीभाजनं कृत्वा यो भुक्ते पक्षसंधिषु॥ अहोरात्रे

एवैकेन त्रिरात्रफलमश्नुत इति॥ पक्षसंधिव्रतं॥ एवमुपवासरूपाण्यपि प्रतिप
न्नानि संततानि व्रतखंडात्ज्ञेयानीति॥ अथ कार्त्तिकशुक्लप्रतिपदि गोक्रीडाख्यं क
र्म विहितं॥ तत्र प्रतिपत्पूर्वविद्धावेत्यत्र यथा वचनानि गृह्यंते॥ तत्र पूर्वविद्धावच
नानि॥ प्रतिपद्दर्शसंयोगे क्रीडनं तु गवां मतं॥ परविद्धेषु यः कुर्यात्पुत्रदारधनक्षय
इति॥ तथा॥ याकुहूः प्रतिपन्मिश्रा तत्र गाः पूजयेन्नृपः॥ पूजनात्त्रीणि वर्द्धंते नागा
वो महीपतिः॥ परविद्धानिषेधास्तु न्यायेनादर्शिकं॥ कश्चित्तु द्वैध्यं विहितं दृश्यते
यथा॥ त्रिमुहूर्त्ता द्वितीया चेत्प्रतिपद्यापराह्णिकी॥ अन्वाधानं चतुर्दश्यां परतः सो
मदर्शनात्॥ एतदग्निप्रेत्यग्नौ क्रीडाविकर्मणीति॥ द्वितीयानिषेधवचनानि॥ गवां क्रीडा ६६
दिने यत्र रात्रौ दृश्येत चंद्रमाः॥ सोमो राजा पशून्हंति सुरभी पूजकांस्तथा॥ नंदाया
दर्शने रक्षा बलिदाने दशासु च॥ भद्रायां गोकुलक्रीडा स देशो वै वितन्व

तीति॥ नन्दाद्वितीयान्यायात्प्रतिपद्यग्निकरणं॥ द्वितीयायां तु गोचर्नं॥ छत्रच्छेदं करिष्ये
त विघ्ननाशं तथा सुखमित्यादिवाक्यैः प्रतिपत्काले अग्निकरणं दीपोल्मुकं द्वितीयायां
च गोपूजनं निषिद्धं॥ तथापि त्रियामा गादर्शीति येन विवेकसाद्वै त्रियामा प्रतिपद्वि
द्धा ध्या॥ दीपोत्सवे तमुनिभिः प्रदिष्टइत्यादिवाक्यान्नियामत्रयमात्रे दर्शे सायं प्रतिप
दि उल्मुकादिकं विदधाति॥ इति परविद्धावाक्यसद्भावे स्तात्र नेनेमानि पूर्वविद्धाप्र
तिपादकानीति तात्पर्यमन्वेयं नवेत्॥ तथा॥ क्रीडापयेत्त्रासयेच्च गोमहिष्यादिकं नरः॥
रात्रौ क्रीडनकार्यं प्रातर्नंदादिने नरैः॥ नंदाप्रतिपेत्॥ तथा॥ प्रतिपत्सद्वितीयाचे
द्गवां चैव प्रपूजनं॥ आपूर्वाह्णिकनाद्धिः राज्यवृद्धिस्तदा भवेत्॥ तथा॥ कार्त्तिके शुक्ल
पक्षादावमावास्याघटीद्वयं॥ दृष्टा गगनयात्त्वेव कुर्यान्मंगलमालिकां॥ घटिद्वयमि
तिकृतपकालव्यापिनि॥ अत एव॥ आश्विनेमासि दर्शादितिथयः कीर्त्तितास्त्रयः

नि०दि० दीपदानादिकार्येषु ग्राह्या मध्याह्नकालिका। इत्यादिविनिषेधमुखेनैव परविद्धाप्रतिपाद-
९ कानीति॥ एवं परस्परविरुद्धार्थप्रतिपादकानां वाक्यानां विचारमंतरेण निर्णयः॥ कर्त्तुं
न शक्यत इति दीपोत्सवाख्यकर्मंगिन्नत्यस्तियस्तुत्तन्निष्ठविहितकर्मविचारपूर्व-
कं निर्णेतव्य इति॥ ये काः तिथिका मुख्यत्वेन प्रतिपन्निर्णये परविद्धावाक्यानादरेण पूर्वविद्धा
मात्राणि वाक्यानि लिखितानि॥ तेस्तु साग्निकविषयत्वान्मस्वमती परिच्छिन्नतत्स्मात्सर्वा
ग्रकटाछन्नं॥ निर्णयास्तु विश्वजनीनत्वेनोन्नेया इति॥ अथ द्वादशीप्रभृतिद्विती-
यापर्यंतमितिकर्त्तव्यताप्रदर्शनपूर्वकं दीपावली निर्णीयते॥ तत्रादौ गोवत्सद्वादशी॥
मुहूर्त्तस्तत्त्वे च॥ गोवत्सद्वादशी चाश्विनकार्त्तिकि कृष्णपक्षगा॥ गोवत्ससहिता पूज्या ९
सुवर्णाजा दोषवर्जिता॥ तरुणी च सुरूपा च सुवत्सा च पयस्विनी॥ विशेषात् कर्त्त-
व्या गोवत्सद्वादशीव्रते॥ पूजनादिविधानं तु स्नानकाले विशेषतः॥ अर्चनविधि॥

अथाताम्रमये पात्रे कृत्वा पुष्पाक्षतैः शुभैः॥ फलैर्नानाविधैरर्घं दधिदूर्वासमन्वितैः॥ पा-
दमूले तु दातव्यो मंत्रेणानेन पांडव॥ माता रुद्राणामित्येषां मंत्रो यं तु द्विजन्मनां॥ यत्तु
वचनं॥ पुष्पपायिकाश्विनिकिमासि द्वादशी कृष्णपक्षगा॥ पूर्वविद्धा प्रकर्त्तव्या न तु कार्या
परे हनि॥ द्वादशीमिश्रितानं दा पूजयेद्वत्समातरं॥ अपुर्द्धिः ग्रजाम्बुवमांडव्य
वचनं यथा॥ तन्नविष्णोस्तरोकसांधकालीन गोवत्सद्वादशीविषयं॥ अथ त्रयोदशी॥
स्निग्धस्नानं न कर्त्तव्यं द्वितीयायां सदैव हि॥ दशम्यां च त्रयोदश्यां वर्जयित्वा तथा-
श्विने॥ एतस्मात्पूर्वत्राश्विने द्वितीयायां दशम्यां त्रयोदश्यां च स्नानं कर्त्तव्यं॥ त-
दुक्तं स्मृत्यंतरे॥ भोगाय न्धियन्किं ते यत्तुस्तत्त्वया ह छिकन्तरे॥ न निषिद्धदशम्या-
दौ नित्ये नैमित्तिके न तु॥ अथ चतुर्दश्यमावास्याप्रतिपन्निर्णयः॥ अभ्यंगे सूर्यप
क्षे तु चतुर्दश्यां विधूदये॥ तिलतैलेन कर्त्तव्यस्नानं नरकभीरुभिः॥ गार्ग्यः॥ पूर्व

नि॰दि॰ विद्धचतुर्दश्यांपाकस्यसितेतरे॥ पक्षेप्रत्यूषसमयेस्नानंकुर्यादतंद्रितः॥ अपामार्गं
६८ मच्छत्रवांभ्रामयेन्मस्तकोपरि॥ मंत्रः॥ सीतालोष्टसमायुक्तसकंटकदलान्वितः॥
हरपापमपामार्गभ्राम्यमाणःपुनःपुनः॥ ततश्चतर्पणंकार्यंधर्मराजस्य
नामभिः॥ ततःप्रदोषसमयेदीपान्दद्यान्मनोरमान्॥ ब्रह्मविष्णुशिवादीनांभव
नेषुमठेषुच॥ नरकायप्रदातव्योदीपःसंपूज्यदेवताः॥ एवंप्रभातसमयेत्वमा
यांतुनराधिप॥ स्नात्वादेवान्पितॄन्भक्त्यासंपूज्याहेवताः॥ एवंप्रभातसमयेह्यमायां
प्रणम्यच॥ कृत्वाचपार्वणंश्राद्धंदधिक्षीरघृतादिभिः॥ ततोपराह्णसमयेघोषये
न्नगरेनृप॥ अद्यराज्यंबलेर्लोकायथेष्टंचेष्टतामिति॥ लोकश्चापिप्रहृष्टात्मासु ६८
धाधवलितांतरे॥ हृष्टश्चंदनमाल्याद्यैश्चर्चितेषुगृहेगृहे॥ दीपमालाकुलेरम्ये
विध्वस्तध्वांतसंचये॥ प्रदोषेदोषरहितेशुभ्रेदोषागमेपुरे॥ आवी॥ पूर्वमु

रवानिरक्तकन्याभिःक्षिप्ततंदुलैः॥ नीराजनंप्रकर्त्तव्यंसद्वारवास्वदीपकैः॥ अमा
मावास्याप्रदोषेत्रयेदुघुःपित्रदीपकं॥ तेषामधस्तमसेनपत्रपतिपितरोध्रुवं॥ इयं
कौमुदीरात्रिर्विचित्रापिमहोत्सवा॥ कर्तव्यागीतवादित्रयुक्तानिद्राविवर्जिता॥
ततःप्रसुप्तनारीभिःसूर्पडिंडिमवादनैः॥ निःसार्यतेप्ररुष्टानिरलक्ष्मीःस्वगृ
हांगणात्॥ राजाप्रभातसमयेयथा॥ दमानयेकृतान्॥ क्रीडापयेत्तासंपन्नगोम
हिष्यादिकांस्ततः॥ एतत्कार्यंपीडनकार्यंप्रातर्वेदादिनेनरैः॥ ततोपराह्णसमयेपूर्वस्यां
दिग्विनारतमार्गपालीप्रबधीयात्तुंगेस्तंभेयपादपे॥ स्थापितस्यपुरीप्रांतोरात्रौदै
त्यपतेर्बलेः॥ पूजांकुर्यान्नृपःसाक्षाद्धिध्याचल्यामहस्त्रिया॥ बलिराजनमस्कु
भ्यंविरोचनसुतप्रभो॥ भविष्येंद्रसुरारातेपूजेयंप्रतिगृह्यतामिति॥ द्वितीयायांस्वसा
तुमंगल्यंविदधातिचा॥ एवंकुर्यान्नृपादिर्द्वितीयंतमुत्सवोभवति॥ तत्रतिथ्यैर्द्वै

दिं·नि· धे विशेषेणोत्सवो न कर्तव्यः॥ यतः संलग्नमेव कर्तव्यं दीपोत्सवदिनत्रयं॥ विभेदं कु-
६० रुते यस्तु नरके स निमज्जति॥ अत्र दिनत्रयमिति॥ सर्वदिनोपलक्षणं॥ अस्मिन्नुत्स-
वेद्धिकेषु विष्णुपुराणेषु॥ चतुर्दश्यादि तिदिनत्रयं॥ कालइत्युक्तं तदनुसरणेनादिन-
त्रयमित्युक्तं॥ तस्मान्नत्वादितरेषु तथात्वमिति॥ न्यायान्सर्वेषामपि संलग्नत्वे सति य-
दा त्वद्दर्शस्वल्पात्वधिस्तानेदा ततैव प्राद्दर्शात्रयोदश्याः कर्म॥ चतुर्दश्यास्तानं तु यस्य
विधुदये चतुर्दशी तदा कार्या॥ अभ्यंगश्चोदयस्तानं दंतधावनमेव तु ते॥ जाते च नि-
धने चैवत्तु कालव्यापिनी तिरितिवचनात्॥ उभयोर्दिनयोश्चतुर्दशीसत्वे पूर्वदिन-
स्नानं पूर्वविद्धचतुर्दश्यामितिवचनात्॥ नचैवममावास्याविशेषापत्तिः॥ अत्रत्यस्तु- ६०
त्रदिनातः पातित्वेन स्मृतौ वचनात्॥ नत्वेवं द्वितीयदिन एव चतुर्दश्यास्नानं त्रयो-
दश्या सह स्नानलग्नताविशेषः स्यात्॥ न॥ प्रत्यूषस्य दिनान्तर्गतिरपि स्मृतौ वचनात्

चतुर्दश्याः कारात्रिदीपदाने॥ विशेषेणायिकार्येवि धूदयस्य स्नानस्य संलग्नतापारे
णेय सर्वस्य चतुर्दशीकर्मणः संलग्नता सिद्धेः॥ यदि द्वितीयादिने चतुर्दश्या स्वाल्पात
दा रात्रौ कमावास्यं चातुर्दशिकं च दीपदानं सह कर्तव्यमिति॥ दर्शे तु श्राद्धे कालानु-
तुरोधेन निर्णयः॥ इदं ह्येयेस्मिन्ने मासि पितृकर्म विधायच॥ दीपनं ततः कुर्यान्निय-
योक्तेच्चतयोल्मुकं॥ रिक्तायुक्ते यादृदर्शे श्राद्धकालो न लभ्यते॥ तदा परेक्षिकं कर्त-
व्यं श्राद्धं दीपोल्मुकं तथा॥ श्राद्धकाले यदा दर्शोपि रात्रौ प्रतिपद्यादिकं कर्मतत्व-
दोषेण दुष्यति॥ दर्शश्राद्धं विनायस्मिन्नाह्ने दीपोल्मुकं भवेत्॥ तत्र श्राद्धं नाशमायाति
पर राज्ञो मितं स्कंदे॥ पूर्वं नीराजनं कृत्वा दीपान्दत्वा तयैव च॥ पश्चाद्यः कुरुते श्राद्धं
तस्य वंमासुरं भवेत्॥ इत्यादि वचनानि च यावत् श्राद्धकालोपि क्वतप्रत्यन्तिः श्रा-
द्धकाले यदा दर्शइति श्राद्धकालस्य सिविद्धस्यैवानुवादात्॥ तथा॥ अश्विने मासि

दर्शादितिथयः कीर्त्तितास्त्रयः॥ दीपदानादिका येषु प्रात्यामध्याह्नकालिकाः॥ अर्धो
दयात्प्रहरस्त्रेधोः प्रातस्यास्त्रिमुहूर्त्तकैः संगवः त्रिमुहूर्त्तस्यान्मध्याह्नस्त्रिमुहूर्त्तकः
पदिसुः संगवादेवेगिते च तिथयस्त्रयः॥ दीपदानादिका येषु कर्त्तव्याः पूर्वसंयुता॥
अथ चेत्संगवादूर्ध्वमितेस्युस्त्रिपयस्त्रयः॥ तदेतिर्हाद्विगामिन्यः कर्त्तव्याः परसंयुता॥
अथ च विष्णुपुराणे॥ तीर्थानां प्रवरा पस्मात्कुमया समुदाहृता॥ प्रतिपादित्यप
वप्रतिपत्तेन वाच्यते। तिस्रोत्पेताः पुराः प्रोक्तास्तिथयः कुरुनंदन॥ कार्त्तिकेश्व
युजे मासि चैत्रे मासि च भारत॥ स्नाने दाने शतगुणं कार्त्तिके या तिथिर्भवेत्॥ का
लनिर्णये तत्र॥ स्कन्दपुराणे॥ कार्त्तिके शुक्लपक्षे तु विधातव्यं तिथिं यदि तां॥ नारी नीराज
नं कुर्यात्सायं मंगलमालिकां॥ अत्र प्रातरित्यव्ययं पंचम्यंतं व्याख्येयं॥ घटिके इति
पूर्वपदं द्विवचनांतं॥ घटिकायाः द्वयं घटिकाद्वयमिति॥ एवं प्रातस्त्रिमुहूर्त्तादू

र्ध्वं घटिकाचतुष्टयं॥ प्रतिपदित्यर्क्कं भवति एवं दशघटिकायां प्रतिपदि पू
र्वेद्युः श्राद्धकालेमावास्या भवति॥ यदा तदा दशघटिकायां प्रतिपदि नीराजना
दिकं कर्त्तव्यं॥ पूर्वस्मिन्दिवसे श्राद्धकाले दर्शाभावे सति घटिकाद्वयं च कुर्वन्तं
तव्याख्याने पि नीराजनादि न कर्त्तव्यमिति॥ तथा देवीपुराणे॥ प्रातर्यदि तु ल
भ्येत प्रतिपद्घटिकाद्वयं॥ द्वितीयायां तदा कुर्यात्सायं मंगलमालिका॥ अभ्य
ंगे च दर्शतिथिनारी नीराजनं भवेत्॥ नारायणीनदीतीर्थे वैधव्यं देवोदुःखिमेव
च॥ कार्त्तिके शुक्लपक्षादावमावास्या घटीद्वयं॥ देवाः नंगनयान्नैव कुर्या
न्मंगलमालिकां॥ अत्रापि घटिद्वयमितिस्पष्टं एकत्वे नस्पष्टं तपस्यग्रहणं॥
स्त्रीवराहस्य॥ प्रतिपद्दिवसे कुर्यात्पदशांगो वाहनस्य च॥ पूर्वविज्ञान कर्त्त
व्या यावद्रूपालिनो दयात्॥ नंदायामेमोदमानाः मन्त्रान शाखाजायते॥ पूर्वमि

तौन्यत्र परविद्धा तुलासंक्रांतौ

वर्तितव्यं हर्षैर्जयदं सुखवर्द्धनं॥ एवं सति श्राद्धकालेयदामावास्या भवति तदा सैव दीपदा-
नादिषु ग्राह्येति सिद्धं॥ ननु तुलासंक्रांतौ पूर्वविद्धा। विद्धायां प्रतिपदि गोक्रीडा पुनि-
षेधः स्मर्यते॥ तेन तुलासंक्रांतौ पूर्वविद्धा॥ तत्रैव नान्ति॥ कार्त्तिकस्यासिते पक्षे तुलो-
ना तु यदा भवेत्॥ यद्यालनवजयेत्र गोगवां क्रीडनकामति॥ अस्मिन्नातेत्वतु दक्षिणे तुला-
संस्थे दिवाकरे॥ दिनांते चामाकाजामात्रापि कार्हिचित्॥ तदापरा हि श्राद्धस्यात्सापदी-
पोल्मुकादिक॥ प्रातर्गोक्रीडनं कार्यं द्वितीयदायुतेसदा॥ अमायां च क्रीडनं तत्र कृताबालोक-
स्य मातर॥ अश्ववृद्धाधिप नैव राज्ञः भास्वनयन्नहि॥ प्रतिपद्दर्शसंयोगे गवां यत्र प्रपू-
जिता॥ तत्रायुर्वर्द्धते नित्यं राज्यं पुत्र धनं तथा॥ इति। नैतद्युक्तं॥ ब्रह्मांडपुराणे॥ तुलासंक्रां- ७१
तौ वै वपूर्वविद्धा प्रतिपद्गोक्रीडायां निषेधाद॥ मिश्रां ने शुक्लपक्षे तु तुलायां तु यदा
भवेत्॥ स्मिन्संक्रीडनं तु दर्शे तु गवां नेरा शुकार्त्तिके॥ कार्त्तिके शुक्लपक्षे तु तुलायां-

तु यदा भवेत्॥ यत्नेन वर्जयेद्दर्शं गोक्रीडायां तु नृतले॥ गोवः संक्रीडमाना स्तुता यांति
न संशयं॥ आयुः क्षितिः सखजानां वाः छत्रभंगो नराधिपे॥ प्रतिपद्द्वितीयां चेद्दृशां चैव
प्रपूजनं॥ आयुर्वृद्धिः प्रजावृद्धी राज्यवृद्धिस्तदा भवेत्॥ अमावास्यायां क्रीडनं तत्र गोलो-
कस्य मातरः॥ अश्ववृद्धाधिप नैव तत्र राज्ञां नास्त्रं नयन्न भवेत्॥ तस्मात्तुलासंक्रांतिसदस-
द्भावाभ्यां व्यवस्था किंतु श्राद्धकालानैव व्यवस्था॥ किंच॥ चतुर्दश्यां कोजामात्रायासम्मा-
वास्यायां श्राद्धमिति वाक्ये न षट्त्रिंशद्घटिकायामपि परदिने मावास्यायां सत्यां ता-
भुजस्य पूर्वदिने श्राद्धं स्यादित्यति प्रसंग॥ श्राद्धकालानुरोधेन व्यवस्थायां तु न कश्चिद्दो-
षः॥ ननु प्रतिपदि चंद्रदर्शने निषेधः स्मर्यते॥ यथा॥ नंदायां किंचिद्युता यत्र दृश्यते च द्वि-
तीयायाः॥ बलेर्दिने नं कर्तव्यं चंद्रदर्शनसंभवेत्॥ गवां हि क्रीडनेनं दाद्वितीयां मि- ६
श्रितायदा॥ क्षतिरायुः प्रजानां च छत्रभंगो नराधिपे॥ सायां केचन तु श्यामामायत्र प्र-

दृश्यते॥ तत्राश्राद्धं तथा दीपं पितॄणामक्षयं न वेत्॥ तथा॥ त्रियामगा दर्शतिथिर्भवेच्चेत्सा
र्द्धत्रियामप्रतिपद्विवृद्धौ॥ दीपोत्सवं ते मुनिनिर्दिष्टे अतोन्यथा पूर्वयुते निषेधे इति॥
सत्यं॥ अयं निषेधः साग्निकविषयः॥ यत॥ सर्वास्विष्यमावास्यासु चंद्रदर्शनि प्रतिप
द्यां निषेधकानि वचनानि॥ त्रिमुहूर्ता द्वितीया चेत्प्रतिपद्यापराह्णिका॥ अन्वाधा
नं चतुर्दश्यां परतश्चांद्रदर्शनात्॥ तत्रापि त्रिमुहूर्तेष्वेव मिश्रावापराह्णिकीत्यादिपं
चधा विभक्तपराह्णव्यापकत्वमभिप्रेतमिति कालादर्शनिर्णयो लक्ष्यते॥ स्नानं प्र
तिपत्ष्टिकाद्वयमित्यपि द्विधा विभक्तपूर्वाह्णे। प्रातःस्नातो घटिकयोर्द्वयमिति व्याख्या
नं युक्तं॥ तथा श्राद्धे नैव व्यवस्था युक्ता॥ पूर्वां पौर्णमासीमुपवसेदिति पैंग्यनुत्तरा ७२
मिति कौषीतकं॥ तस्मादुत्तरामुपवासे दिति प्रातःपर्यंतं देकेदर्शे वोपवासं तीत्ये
कीयसुक्तोक्तं यदिह रेव पुरस्तात्संह्नमा अभ्युदेति तत दहयजेते न तु तिथिक्षये॥

पूर्वविद्धावाक्यानि तिथिवृद्धौ तु परविद्धावाक्यानि इति व्यवस्था युक्ता॥ इतरया क्षयवृ
द्धिपात्रे व्यवस्थायामानिप्रसंगः॥ दीपदानकालस्तु परदिने त्रियाममावास्यायामवश्यं
त्याज्याः॥ श्राद्धकालस्तु साग्निकैर्निरग्निकैश्च यथा यथा व्यवस्थितो न कदाचित्याज्य इ
त्येकांतिकीयं व्यवस्था युक्ता॥ अत एव विश्वरूपनिबंधे। दर्शस्य तिथिनिर्णयेनैव निर्णीता हि
पमालिका॥ अतो न निर्णयस्तस्याः पृथक्केन कृतो बुधैः॥ आनंतभट्टकाले निर्णय
कारग्रंथ तिनिरपि पृथग्निर्णयस्तेनैवापेक्षानन कृत॥ साधारणनिर्णयसामान्यवच
नमेवोदाहृतं॥ यथा॥ श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी॥ पूर्वविद्धा प्रकर्तव्या शि
ववरात्रिबलेर्दिनमिति॥ एतद्वचनेन सर्वत्रातिप्रसंगः॥ श्रावणी विष्टिकरणेपि
स्यात्॥ दुर्गानवमी दिनद्वयापि पारान स्यात्॥ तस्माद्यस्यामस्तं रविर्यातिपितर
स्तामुपासत इत्यादिसामान्यवाक्यानि कुतपकालेन्यपराह्णकालेन व्यवस्थाप्यवं

ते॥ यथा तथा कौमुदीवाक्यान्यपि व्यवस्थापनीयानि॥ निर्णयामृतेपि पूर्वविद्धावाक्यान्यु
दाहृत्यान्याधानं चतुर्द्दश्यामिति वाक्यमुदाहृतं तेन सायाह्नविषयता निरस्ता॥ त्रियाममे
तिवाक्यं तृतीययाम गेति व्याख्यातं॥ संख्यातः स्वरयाग्रस्त्य यस्पृशुकदब्रूयते॥ निर्णयामृता
स्करे पूर्वविद्धावाक्यानि प्रेतांतरविषयाणीत्युक्तं॥ यथा तत्र लिखितं॥ ब्रह्मपुराणे॥ आ
श्विने शुक्लपक्षे तु तुले मानुपदी भवेत्॥ स्त्रियः क्रीडंतु दत्ते तु गावो नंदासु कार्त्तिके का
र्त्तिके शुक्लपक्षे तु तुले मानुपदी भवेत्॥ यत्नेन वर्जयेद्द्यूतं गोक्रीडायां तु भूतले॥ गावः
संक्रीडमानास्तु नाशं यांति न संशयं॥ आयुः क्षतिः प्रजानाशः छत्रभंगो नराधिपे॥ प्र
तिपत्सद्वितीया चेत्कर्त्तव्यं चैव गोपूजनं॥ आयुर्वृद्धिः प्रजावृद्धी राज्यवृद्धिस्तदा भवेत्॥ अ ७३
मावास्यायां क्रीडंते गावो लोकस्य मातरः॥ अश्वव्याधिर्भवेत्तत्र राजा राष्ट्रभयं भवेत्॥ अ
अस्तूर्योदिये संबंधिन्येवमात्यः॥ यत्तु नक्तमवैवर्त्तवचनं॥ प्रतिपत्सन्मुखा कार्या द्विती

या द्विजसत्तम इति प्रतिपद्द्वितीययोरपि पूर्वविद्धत्वमुक्तं॥ ततक्कृष्णपक्षोपोषणासिन्ना
येण॥ एवमत्यान्यपि प्रतिपदः पूर्वविद्धावचनानि प्रेतांतरविषयाणीति सिद्धं॥ तथा
दीपोत्सवद्वितीया यमद्वितीया॥ तस्यां भगिनीभिर्भ्रातरो भोज्यंते॥ तदुक्तं॥ द्वितीयायां
स्वसा भ्रातुर्मंगल्यं विदधाति च॥ वनखंडात्॥ कार्त्तिके शुक्लपक्षस्य द्वितीयायां युधि
ष्ठिर॥ यमो यमुनया पूर्वं भोजितः स्वगृहे स्वयं॥ अतो यमद्वितीयेयं प्रोक्ता लो
के युधिष्ठिर॥ अस्यां निजगृहे पार्थ न भोक्तव्यमतो बुधैः॥ स्नेहेन भगिनीहस्ताद्भो
क्तव्यं पुष्टिवर्द्धनं॥ धन्यं यशस्यमायुष्यं धर्मकामार्थसाधकमिति॥ तथात्रात भगि
न्योपि च वस्त्राणि लंकारादिभिः पूज्या॥ तत्रैवोक्तं॥ दानानि च प्रदेयानि भगिनीभ्यो
विधानतः॥ स्वर्णालंकारवस्त्राणि पूज्या सत्कारभोजनैः॥ सर्वा भगिन्यः संपूज्या अभावे
प्रतिपन्ना इति॥ तथा अस्यां यमुनास्नानं यमपूजनं च प्रशस्तं॥ पुराणे॥ ऊर्जे शुक्लद्वि

तीययामपराह्णेर्चयेद्यमं॥ स्नानं कृत्वार्कतनुजायां यमलोकं न पश्यति॥ तथात्रैव
द्वितीयायां महोत्सवे नारकीयास्तु तर्पिता॥ पापेभ्यो विप्रमुक्तास्ते मुक्ताः सर्वे निबंधनात्
तेषां महोत्सवो वृत्तो यमराष्ट्रसुखावहः॥ अतो यमद्वितीया सा त्रिषु लोकेषु विश्रुतेति॥
इति दीपावलीनिर्णय इतिकर्तव्यता चेति॥ कृतेत्र लक्ष्मीवेदेत ग्रंथे निर्णयदीपके॥ दी
पावली च निर्णीता प्रतिपन्निर्णयान्विता॥ अथ द्वितीयां तिथिरूपसांवादिषु निर्णी
यते॥ परस्परविरुद्धार्थाभिधायिनां वाक्यानां व्यवस्था प्रतिपादनं निर्णयः॥ यथा ए
कादश्यष्टमी षष्ठी द्वितीया च चतुर्दशी॥ त्रयोदशी अमावास्या उपोष्याः स्युः परान्विता इत्य
नेन विष्णुधर्मवचनेन द्वितीयातृतीयाविद्धोपोष्येति॥ स्मृत्यंतरवचनेन तु द्वितीयातृतीया
विद्धोपवासेनि सिपिद्धेति॥ तदुक्तं॥ तृतीयैकादशी षष्ठी तथा चैवाष्टमी तिथिः॥ वेधाद
धस्ताद्दृश्यते यस्मात्तत्र सेत तिथिः स्थिता॥ तृतीया सवेधादुपवासे अधस्ताद्धोवर्तिनी॥

द्वितीयां हंतीत्यनेन तृतीयया विद्धा द्वितीया नोपोष्येति प्राप्ते॥ एवं द्वैधे सति स्मृतिद्वैधं
तु यत्र स्यात्तत्र धर्मविनौ स्मृतौ॥ स्मृतिद्वैधे तु विषयः कल्पनीयः॥ पृथक् पृथगिति व
चनात्॥ युग्मानीति युग्मसाद्वर्चयेणि विधिवाक्येन मुक्ता द्वितीया परविधीप्राप्त्येति॥ कृ
ष्णद्वितीया पूर्वविद्धोपोष्येत्येवं तन्निषेधवाक्यस्यार्थवत्त्वाभाव इति व्यवस्था॥ इदमर्थ
मभिप्रेत्य दीपिकाकारः॥ अयुगादितः कस्माद्द्वितीयादि दिना पूर्वविद्धयदि सा सि
ता तु परतः सर्वेति स्पष्टान्वयः॥ प्रतिपत्सु द्वितीया स्यात् द्वितीया प्रतिपद्युतेति द्वितीया
याः प्रतिपद्युक्तत्वं कृष्णपक्षव्यतिरिक्ता शुक्लपक्षायतनादिव्रतविशेषविषयत्वं स्थापितं
प्रतिपन्निर्णये॥ अशून्यशयनस्य चंद्रोदयविषयत्वात्तत्कालव्यापितिथावेव क
र्तव्यं॥ यदुक्तं॥ एकभक्ते दिवा नक्तेऽनि शिचंद्रोदयव्रते॥ तिथिस्तात्कालिकी ग्राह्या
पारणे तु परा तिथिरिति॥ यत्तु अशून्यशयनव्रतस्य परविद्धाभिधानं॥ चतुर्दशी

तेपक्षेमासेपुष्पाद्यादिषु॥ अशून्यास्यंव्रतंकुर्याद्यथाक्रमफलाधिकं॥ जयारती-
यां॥ तद्दिनद्वयव्याप्तिविषयं॥ तिथिद्वैधेपरानिधानादिति॥ दीपोत्सवद्वितीयायम
द्वितीयास्नानतुमंगल्येकर्मणि॥ दीपोत्सवानुरोधेनपूर्वविद्धापरविद्धावायथासंभवं॥
कार्या॥ द्वितीयायांस्वसाग्नानुमंगल्यंविदधातिचा॥ भगिनीभिर्व्वतिरोग्नोज्यंतेतै
वस्त्राहिकंदीत इति॥ यत्तुकैश्चित्॥ कृष्णद्वितीयायामपिपरविद्धोपोष्येत्याग्रायेनतती
येकादश्यांतस्मिन्वाकेतृजपवासत्वाद्वापूर्वविद्धामुक्तमत्रयुनादिमतघरोक्षणाय
मयधायि॥ तदुक्तंयुं॥ प्रतिपत्सन्मुखाकार्याद्वितीयाद्विजसत्तमेतिनसम्यैववद्वचनेन
कृष्णद्वितीयायाउपावासेपूर्वविद्धात्वमभिमतं॥ संभवतिहिमुख्यार्थेलक्षणानन्या- ७५
य्येति॥ द्वितीयासामान्यनिर्णयः॥ अथद्वितीयाविशेषाः॥ द्वितीयायाअधिपतिर्ब्र
ह्मा॥ अतःपक्षद्वयगतासुद्वितीयासुब्रह्मापूज्यः॥ तदुक्तंविष्णुपुराणे॥ ब्रह्मा-

यं हिद्वितीयायांपूज्यब्रह्मचारिणा॥ भोजयित्वाचविप्रांतंसर्वसांसारगोभवेत्॥ सु
वर्णनिर्मितोब्रह्माकर्तव्यश्रुतियोध्वर॥ समिदाज्यदधिक्षीरमाक्षिकानिचहोमये
त्॥ तेनसंतोषितोब्रह्मासर्वविद्याप्रदोभवेदितिब्रह्मसन्नते॥ अगस्त्यपुराणे॥ श्राव
णस्यद्वितीयायांकृष्णायांमधुसूदन॥ क्षीराब्धौसहलक्ष्म्याकःसदावसतिकेशव॥
तस्यांद्वितीयायांअशून्यशयननामव्रतंकार्यं॥ कृष्णपक्षादिमसामिद्धामेयणार
ने॥ चैत्रशुक्लद्वितीयातत्रोमाशिवाग्नीनांपूजाकार्या॥ तदुक्तं॥ शुचैत्रशुक्लद्विति
यायामुमायुज्याफलार्थिभिः॥ शिवपूजाअग्निपूजाकर्तव्यामुनिसत्तमेति॥
देवीपुराणे॥ उमाशिवौहुताशंचद्वितीयायांप्रपूजयेत्॥ हविष्यमन्नंनैवेद्यंदे
यंगंधाचैनान्वितं॥ फलमाप्नोतिविप्रेंद्रसर्वक्रतुसमुद्भवं॥ इतिचैत्रद्वितीया॥
अशून्यशयनद्वितीया॥ श्रावणादिषुचतुर्षुमासेषुकृष्णद्वितीयायामशून्य

नि॰सि॰ शयनव्रतंकार्यं॥ तदुक्तंभविष्यपुराणे॥ सुमंतुः॥ अशून्यशयनंनामद्वितीयांशृणु
७९ भारत॥ यामुपोष्यनवैधव्यंस्त्रीप्रयातिनराधिप॥ पत्नीवियुक्तश्चनरोनकदाचित्प्र
जायते॥ उपोष्येतिनभुक्तंभुंजीतेत्युक्तंग्रंथांतरे॥ शेतेजगत्पतिःकृष्णलक्ष्म्यासार्द्धं
यदापि॥ अशून्यशयनानामद्वितीयात्वानुसातिथिः॥ कृष्णपक्षेद्वितीयायांश्रा
वणेमासिभारत॥ इदमुद्धारतेभ्रातःश्रवणस्थेनगसति॥ नागरखंडे॥ सूत उवाच॥
श्रावण्यामाषाढ्यांमलतीतायांद्वितीयादिनसंस्थिते॥ प्रातरुत्थायविष्णुदैवतो॥ पापि
ष्टैःपतितैर्म्लेच्छैःसंभाषंनैवकारयेत्॥ ततोमध्याह्नसमयेस्नात्वाधौतांबरःशुचिः॥
जलशायिनमासाद्यमंत्रेणानेनपूजयेत्॥ श्रीवत्सधारिन्श्रीकांतश्रीधामन्श्रीपते ७९
तेव्यय॥ गार्हस्थ्यंमाप्रणाशंमेयातुधर्मार्थकामदं॥ लक्ष्म्यावियुज्यतेदेवनकदा
चिद्यथाभवान्॥ तथाकलत्रसंबंधोदेवमामेविभिद्यतां॥ विष्णुरहस्येपुनरिमेमंत्रा

पत्नीभर्तृवियोगंचत्वत्रमायसिमुह्यवं॥ नाप्नुवंतियथादुःखंदंपत्यानितथाकुरु॥ यथा
श्रियावियुक्तस्त्वंलक्ष्मीदेवतायायथा॥ प्रसादात्तवदेवेशस्थितिरस्तुतथावयोः॥ मास्मत्
त्रा॰ प्रणाशंतुमाधनंमाकुलक्रम॥ अशून्योमाप्रणश्यतुगृहमेगोस्तुमावयोः॥ एवंप्रसा
द्यपूजांचकृत्वालक्ष्म्यास्तथाहरेः॥ फलानिदद्यात्सुभगायाममीष्टानिजगत्पते॥ नक्तंव्रतमा
पतनेहरिंभुंजीतवाग्यतः॥ नक्तंभुंजीतेत्यर्थः॥ हरिंप्रणम्यसंपूज्येत्यर्थः॥ अशून्यशयन
द्वितीयोदयेक्रियतइत्युक्तंप्राक्॥ आत्मनाश्चद्वितीयायांशय्यादेयासदक्षिणा॥ याद्वि
तत्रमहाबाहोकालेसंतिफलानिच॥ मुक्ताफलानिशय्यायांस्त्रीलिंगानिविवर्जयेत्॥ द्वि
तीयेह्निप्रदेयानिभक्त्याचैवात्रभारत॥ वासोदानंतथाधान्यंफलधान्यसमन्वितं॥ एवं
करोतियःसम्यक्नरोमासचतुष्टयं॥ तस्यजन्मत्रयंयावद्गृहभंगोनजायते॥ मासच
तुष्टयंकृष्णद्वितीयाग्राह्यातिथिरितिशेषः॥ पद्मपुराणे॥ एतन्मंत्रादिकंउपक्रमसंकरआ॥ ह॥

नि०सि० गीतवाद्यनादैः॥ घंटामवेदवाक सस्वविघ्नमयीयतः॥ एवं संपूज्य गोविंदम श्रीयानैर्जवजितै
११ नकुमारलवणं यावत्तस्याश्वतुष्टयं॥ ततः प्रभाते संप्राते लक्ष्मीपतिसमन्वितं॥ दीपाल्लने
जनैर्युक्तां वाद्यांदद्यात्सलक्षणां॥ पादुकोपानहौ छत्रचामरासनसंयुतं॥ अव्यंगांगा
यविप्राय वैष्णवायकुटुंबिने॥ दातव्यावेदविदुषेनवकवतिनेक्वचित्॥ तत्रोपवेश्यपदं
पत्यं अलंकृत्य यथाविधि॥ पत्न्यास्तु भाजनं दद्यात् भक्ष्यभोज्यसमन्वितं॥ ब्राह्मणस्यापि
सौवर्णमुपस्करसमन्वितं॥ प्रतिमां देवदेवस्य सोदकं तान्निवेदयेत्॥ एवं यस्तु सुप
कु यदिष्ट्वा न्यस्त्राय नं हरं॥ न तस्य वित्तविरहः कदाचिदपि जायते॥ नारी वा विधवा राजन्
या वक्ष्यं ज्ञाकतारकं॥ न विरूपं न च शोकार्तं दंपत्यं जायते क्वचित्॥ न पुत्रविरहादि कमष्ट ११
सप्तकल्पसहस्राणि सप्तकल्पशतानि च॥ कुर्वन्तिष्ठन्त्यवरापनं विष्णुलोके महीयत
ति॥ अशून्यशयनं व्रतविधिरिति॥ निर्णयीपि॥ अथ चैत्रशुक्लद्वितीयायां अग्निं प्रकृ

तिं पुरुषं च संपूज्य येन्मुक्तिकाम इति॥ मार्कंडेयः॥ प्रकृतिपुरुषम्ब्रोतोजगत्सर्वग्निकान्निति॥
अग्नीषोमात्मकं सर्वमिति॥ वासुदेवस्य लक्ष्मीश्वता वेवपरिकान्निता॥ चैत्रशुक्लद्वितीया
यां सोपवासो जितेंद्रियः॥ पौरुषेण च सूक्तेन वह्निं संपूजयेन्नृत॥ सोपवास इति प्रतिपदि
कृतोपवासो द्वितीयायां वह्निं संपूजयेत् द्वितीयादिनकृत्ये चेत्पूर्वाह्णिकी ग्राह्या॥ उपरिष्टा
त् क्षीरघृतभोजनस्य विहितत्वात्॥ सर्वेषां चोपवासानां एवं ह्येषा रयं स्मृतमिति॥ गंध
माल्य दीपधूपान्नसंपदा॥ लक्ष्मीं च वरदां देवं पूजयेद्गरुडके हरिं॥ ध्यासक्तो न च धर्मं तोय
यावन्मासानुजोत्रमे॥ कांचनं रजतं चोपि दद्याद्विप्रेषु दक्षिणां॥ ततः क्षीरघृतभोजनं॥ संव
त्सरमिदं कृत्वा व्रतं सम्यगुपोषितं॥ मुच्यते पातकैः सर्वैर्मोक्षोपायं च विंदति॥ इति विष्णुध
र्मे क्लि प्रकृतिपुरुषव्रतविधि॥ अन्ये द्वितीयाव्रतानि तु शेषाव्रतसमुच्चयादे वगंतव्या इति॥
नक्षत्रादिव्रतविशेषे तु तत्कालव्यापिन्यामेवेति निर्णयः॥ तथा धन्या षिन्नी द्वितीयादि वसे

ति॰ दि॰ महालक्ष्मीः पूजनीयेति॥ तदुक्तं स्कंदेन॥ नागरखंडे॥ लक्ष्मीं प्रति ब्रह्मोवाच॥ महालक्ष्मी
७८ ति ते नाम तस्माद्दत्तं भविष्यति॥ अत्र तिथ्यहाटकेश्वरक्षेत्रे॥ राजवत्कांतरो यस्त्वां पूजयि
ष्यति भक्तितः॥ स राजाधिपतिर्भूत्वा न विष्यति भूतले॥ द्वितीयादिवसे यस्त्वां महाल
क्ष्मीरिति ब्रुवन्॥ श्रीसूक्तेन समस्तेन्यायमस्त्वां संपूजयिष्यति सप्तजन्मांतराण्येव न भवि
ष्यति सो धनः॥ इति द्वितीयानिर्णयः॥ अथ तृतीयानिर्णयः प्रस्तूयते॥ तत्र रंभां वर्जयित्वा
ऽन्या सर्वापि तृतीया चतुर्थीयुक्ता वा परा वा सैव ग्राह्या॥ तदुक्तं॥ मध्ये रंभां तृतीयैकादशी ष्टम
त्रयोदशी॥ चतुर्थी च वटायुग्मे त्वेताः पूज्याः परान्विताः॥ विष्णुधर्मोत्तरे॥ एकादश्यष्टमि
षष्ठी पौर्णमासी चतुर्दशी॥ अमावास्या तृतीया च ता उपोष्याः परान्विताः॥ युग्मं युग्मा ग्राह्या ७८
दिवाके तृतीयाया द्वितीयोपहिता पाद्यपादे च मुक्तं॥ तद्रंभाव्रते नोपोष्यते॥ यैषा अ
नंगत्रयोदशी रंभा चोपोष्या पूर्वसंयुता॥ तथा च कालादर्शे॥ सावित्री मा पौर्णमासी चतु

र्थीगणसंज्ञिता॥ रंभा तृतीया चैता ता उपोष्याः पूर्वसंयुता॥ गणसंज्ञिता गणेशचतुर्थी
॥ वत्सवैवत्रे॥ रंभा स्वाव्यावर्जयित्वा तु तृतीया यो द्विजसत्तम॥ अन्येषु सर्वकार्येषु गणेयुक्
त्रा स्यात इति॥ स्कंदपुराणेपि॥ कृष्णाष्टमी चतुर्थी च सावित्री वटपैतृकी॥ अनंगत्रयो
दशी रंभा उपोष्याः पूर्वसंयुता॥ एवं रंभायाः पूर्वविद्धावचनदर्शनिंभा व्रते स्त्राप्यते॥ रं
भाव्रतादन्यत्र पूर्वविद्धा निषिद्धा॥ तदाह॥ द्वितीयापंचमी वेधाद्दशमी च त्रयोदशी॥ चतुर्द
शी चोपवासे हन्युः पूर्वोत्तरे॥ तिथि इति द्वितीयां पूर्वप्रतिपदं सूत्रं संच तृतीयां हंतीति द्वि
तीयोपहिता निषिद्धा॥ ननु एतद्रंभाव्रतेपि निषेधकं कस्मान्न स्यादिति चेत्॥ शृणु॥ रं
भाव्रते पूर्वविद्धाविधानस्य वचनिकत्वादिति ब्रूमः॥ आग्नेये पुराणे चतुर्थ किरणं वदि
ति॥ अत एव द्वितीयायुक्तायां॥ कृत्सवा यो पि श्रूयते॥ पुराणसमुच्चये॥ द्वितीयावेधसं
युक्तां तृतीयां कुरुते तु यः॥ स याति नरकं घोरं कालसूत्रं भयंकरं॥ वत्सवैवत्रेपि॥ तृती

नि०सि० यातु न कर्त्तव्या द्वितीयोपहिता विभो॥ द्वितीयोपहितां तां तु यः करोति नराधमः॥ संवत्सर
७१ कृतेनेह न रो धर्मेण मुच्यत इति॥ तथा तत्रैव॥ द्वितीयाशेषसंयुक्तां यः करोति विमोहित
सा वैधव्यमवाप्नोति प्रवदंति मनीषिणः॥ एवं द्वितीयायुक्ता तृतीया प्रतिषिद्धा तत्रैव च
तुर्थीयुक्ता प्रशस्यते॥ चतुर्थीसहिता या च सा तृतीया फलप्रदा॥ अवैधव्यकरी स्त्रीणां
पुत्रपौत्रप्रदायिनीति॥ परदिने त्रिघ्नमभावे निषिद्धापि पूर्वविद्धा ग्राह्या॥ तथा च निगम
वाक्यं॥ एकादशी तृतीया च षष्ठी चैव त्रयोदशी॥ पूर्वविद्धा तु कर्त्तव्या यदि न स्यात्परेऽह
नि॥ एतदुपलक्षणं॥ एतद्विषये सर्वापि परविद्धाः पूर्वा ग्राह्या इत्यर्थः॥ एवं रंभा पूर्ववि
द्धान्या परविद्धेति सिद्धांत॥ उपवासःप्रत्याम्नायेर्विदिनान्येकनक्तादौ तत्पर्वा सविहित ७१
तिथौ कर्त्तव्यानीति॥ आत्मान्येकभक्तादीनि तत्कालव्यापिन्यामेवेति तृतीयासामान्यनि
र्णयः॥ अथ तृतीयाविशेषः॥ वैशाखशुक्ला तृतीया अक्षयतृतीया॥ तदुक्तं व्रतसमुच्चये

वैशाखस्य सिता मेका तृतीयां क्षयां शृणु॥ यस्यां स्नानं जपो होमः स्वाध्यायपितृतर्पणं॥
दानं च क्रियते किंचित्सर्वं स्यादिह चाक्षयं॥ आदिः कृतयुगस्येयं युगादिस्तेन कथ्यते॥ पु
राणांतरेपि॥ वैशाखमासि शुक्लायां तृतीयायां जनार्दनः॥ यवानुत्पादयायां वैशाखस्सम
पद्यते त्रेतायुगादितिकल्पज्ञाः॥ तत्कालभेदेन व्यवस्थापनीयं॥ भविष्योत्तरे॥ आसाद्य
पूर्वं तृतीयायां पद्मत्रिविक्रमेविना॥ सर्वं तदक्षयं याति स्नुषता मंत्रमोविधिः॥ तृतीयां तामथा
साद्य स्नात्वा संतर्प्य देवताः॥ एकचित्तस्तदा कृष्ण पद्मासु देवं प्रपूजयेत्॥ उदकुंभान्सकार
कान्सान्नान्सर्वरसैः सह॥ ग्रैष्मिकं सर्वमेवात्र सस्यं दाने प्रशस्यते॥ तथा तत्रैवोक्तं॥ गो
धूमचणकादीनि सक्तुदध्योदनं तथा॥ इक्षुक्षीरविकाराश्च सहिरण्यास्वशक्तितः॥ छ
त्रं वस्त्रमुपानंच यदिष्टं तत्प्रदापयेदिति॥ अस्यां लक्ष्म्या सह विष्णुः पूज्येति पुराणांत
रेपि॥ वैशाखस्य तृतीयायां लक्ष्मीसमेतं जगद्गुरुं॥ नारायणं पूजयेथाः पुष्पधूपविलेपनैः

रित्यादिविधानं॥ युगादीनां च परत्वमाह॥ वैशाखमासस्य तु या तृतीया नवम्यसौ कार्त्तिकशु
क्लपक्षे॥ नभस्यमासस्य च कृष्णपक्षे त्रयोदशी पंचदशी च माघे॥ मत्स्यपुराणेपि॥ वैशाखस्
स्य तृतीया या नवमी कार्त्तिकस्य च॥ अमावास्या च माघस्य नभस्यस्य त्रयोदशी॥ एता यु
गाद्याः प्रोक्ताः पितॄणां तृप्तिहेतव इति॥ आमुक्त्यमस्मिन्पुराणे॥ पानीयमप्यत्र तिलै
र्विमिश्रं दद्यात्पितृभ्यः प्रयतो मनुष्यः॥ श्राद्धं कृतं तेन समाः सहस्रं रहस्यमेतत्पितरो वदंति॥
तथा॥ कृतं श्राद्धं विधानेन मन्वादिषु युगादिषु॥ हायनानि द्विसाहस्रं पितॄणां तृप्तिदं भवे
त्॥ स्कांदे नागरे॥ मन्वाद्याश्च युगाद्याश्च तिथयस्तासु मानवः॥ स्नानाद्दानाज्जपाच्चैव अनंत
फलभाग्भवेत्॥ तथा नक्षत्रवारयोगेन विशेषो नारदीयपुराणे॥ वैशाखशुक्लपक्षे च तृती
या रोहिणीयुता॥ दुर्लभा बुधवारेण सोमेनापि तथा॥ अथ युगाद्यादिषु विहितविष्णुपू
जादौ श्राद्धादिकर्मणि च मत्स्यपुराणे कालविशेषोप्युक्त इति यत्ति॥ द्वे शुक्ले द्वे तथा कृष्णे

युगाद्याः कवयो विदुः॥ शुक्ले पूर्वाह्णिके ग्राह्ये कृष्णे चैवापराह्णिके इति॥ इदं शुक्लयोः पौ
र्वाह्णिके ग्रहणं तत्र द्विदिने दानपूजनाद्यभिप्रायेण॥ तथा वसिष्ठः॥ गौरी विनायकोपे
रोहिणी बुधसंयुता॥ विनापि रोहिणीयोगात्पुण्यकोटिफलप्रदा॥ गौरी तृतीया॥ विना
यकश्चतुर्थी॥ तथा॥ रोहिणी बुधयुक्तापि पूर्वविद्धा विवर्जिता॥ न तपाकृतापि मां ध्मतु पु
ण्यं हंति पुराकृतमिति॥ अतो विष्णुपूजनादौ परयुता ग्राह्येति सिद्धं॥ श्राद्धविषये तु ए
वमन्वंतरादीनां युगादीनां निर्णयः॥ महालयस्य पक्षस्य अष्टकानामपि स्मृत इति
हेमाद्रिश्राद्धनिर्णयप्रकरणे कालादर्शादिधृतवचनेन सर्वेषां युगादीनामापराह्णिकत्वे
न श्राद्धस्याभिधानात् युगादिप्रयुक्तश्राद्धविषये अमावास्यावदापराह्णिकैवेति ती
ग्राह्येति सिद्धांतः॥ अत्र विशेषः॥ मासपक्षेपि श्राद्धं स्यात्कार्यं दर्शे युगादिषु॥ यत्तु कू
नं॥ दत्त्वा हरिमुनीत्ककापोनि तत्क पोयुगादिषु॥ इदं तु नक्षत्रवारादिनिरूपणं वि

शेषव्रतदानपरमित्यपाकर्मनिर्णयेविशेषतोनिर्णतव्यः॥तथाक्षयतृतीयायांगंगास्ना
नंकुर्वन्तिदुःखं॥वैशाखेशुक्लपक्षेतुतृतीयायांतथैवच॥गं॥गंगातोयेनराःस्नात्वामुच्यंते
सर्वकिल्बिषैः॥तथादेवीपुराणे॥गौरीपूजनमुपक्रम्यतृतीयायांतुवैशाखेरोहिण्यर्क्षेत्रि
पूजनं॥उदकुंभप्रदानेनशिवलोकेमहीयते॥इतिअक्षयतृतीयानिर्णयः॥अथ
रंभातृतीयाव्रतविधिः॥मार्गशीर्षेशुक्लतृतीयातःसमारभ्यरात्रौगौरींसंपूज्याकुद्र
व्यंचप्राश्यजागरणानंतरंप्रभातेविप्रान्भोजयेत्तेभ्योदक्षिणांदत्वापारणंकुर्यादिवंव
र्षेणिवक्षतमुद्यापनमिति॥तदुक्तंश्रीकृष्णेनयुधिष्ठिरंप्रति॥रंभातृतीयांवक्ष्यामि
सर्वपापप्रणाशनीं॥सुरदसौभाग्यफलदांपुत्रपौत्रप्रदांतथा॥सपत्निदपदलभतांपा ८१
र्वतीप्रियकाम्यया॥शंकरेणपुराप्रोक्तातामिमांशृणुभारत॥मार्गशीर्षेशुभेमासितृती
यायांनराधिपशुक्लायांप्रातःरुच्छायदंतधावनपूर्वकं॥उपवासस्यनियमंगृह्णी

यादिक्रियान्विता॥देवीसंवत्सरंयावत्तृतीयायामुपोषिता॥प्रतिमासंकरिष्यामिपारणं
चापरेहरिनि॥तदविघ्नेनमेयातुसमासंवत्सरमुत्तमं॥प्रारणोत्वांप्रपन्नास्मिदौर्भाग्याद्दु
रसमां॥एवंसंकल्प्यविधिवत्कौंतेयकृतनिश्चया॥नक्ताशानारीध्यानपरास्नानंकृत्वा
जितेन्द्रिया॥पूजयेत्पार्वतींनाम्नारात्रौप्राश्यपतत्कुशोदकं॥प्रभातेभोजयेद्विप्रान्स्त्री
वस्त्रान्विशेषतः॥सहिरण्यंपंचलवणंदद्यात्तेभ्यश्चदक्षिणां॥अनेनविधिनाराजन्
कुर्यात्यावतीव्रतं॥साकल्यानानान्नातंत्रसातारयेन्नात्रसंशयः॥गोमूत्रंप्राशयेत्पौषेमा
घमासेतुगोमयं॥फाल्गुनेप्राश्यपयोक्षीरंचैत्रेदधिघृतंपरे॥ज्येष्ठेप्राश्यपतेत्ज्येआ
षाढेचतिलोदकं॥श्रावणेतुप्रियंपूज्यपिवेच्छृंगजलं॥बिल्वपत्रंतथाभाद्रेआ
श्विनेतंदुलोदकं॥कार्तिकेपंचगव्यंहिप्राश्यपक्षमतिद्विजागरे॥प्रभातेभोजयेद्विप्रा
न्सपत्नीकान्मनोरमान्॥माल्यवस्त्रैर्भूषयेद्वागौरिणाभोजयत्तया॥वर्षयावत्त

नि॰ सि॰ तीयासुव्रतंकृत्वाविधानतः॥ उमामहेश्वरंहैमंसमाप्तौकारयेच्छुभं॥ उमामहेश्वरंरूपंविधृत्य

८२ धर्मेत्रिरात्र॥ वामाङ्केपार्वतीकार्याशिवःकार्यश्चतुर्भुजः॥ अक्षमालांत्रिशूलंचदर्पणंदा

वरेदभत्॥ एकवक्त्रस्त्रिनेत्रश्चवामाचदयितातनुः॥ व्याख्याचात्रविनिर्दिष्टासर्वापिस्व

रसंयुता॥ सवस्त्रांवीजसंपन्नांगांचदद्यात्पयस्विनीं॥ पादुकोपानहौवस्त्रंपर्यंकस्तो

पवीतकं॥ उमामहेश्वरंस्थाप्यआसनेताम्रजेन्नृप॥ पूजयेद्देवदेवेशौनानापुष्पैःफलै

स्तथा॥ नैवेद्यैर्विविधैस्तद्वद्दीपैर्वाघृतनेकधा॥ ततोद्विजंसमाहूयवेदवेदाङ्गपारगं॥

सपत्नीकंसुरश्रेष्ठदिव्यचंदनचर्चितं॥ परिधापयित्वाजंहससवतिस्मैनिवेदयेत्॥

वंछतेफलंयूस्यात्तन्नाम्नामपरितु॥ पुरुषोवाथवानारीअतःश्रीवपुरंव्रजेत्॥ सोम ८२

पपिरयाचीर्णनियाराजसत्तम॥ तेनत्वंराजलक्ष्मीतायंपरंसौभाग्यदायिनी॥ सोहंसएव

भूतेश्रोगौरसैवनसंश्रयः॥ इतिमत्स्यामाहात्म्येनागद्वारणेव्रजपावती॥ घाएवंश्मी

रिति॥ इतिरंभातृतीयाव्रतं॥ अथज्येष्ठशुक्लतृतीयायांपंचाग्निसाधनंनामरंभाव्रतमस्ति

गार्हपत्यंदक्षिणाग्निंसभ्यंचाहवनीयकं॥ पंचमंभास्करंतेजइत्येतेपंचवह्नयः॥ त

न्मध्येदिवविद्धुध्यातपरातिष्ठेदिति॥ एतद्व्रतविधिस्तुग्रंथांतरप्रसिद्धत्वान्नलिखित

मिति॥ अथचैत्रशुक्लातृतीयातथाभाद्रपदेचतृतीयामन्वादिः॥ तदुक्तंगाणारपेण॥ अश्व

युक्शुक्लनवमीद्वादशीकार्त्तिकेसिता॥ तृतीयाचैत्रमासस्यतथाभाद्रपदस्यचेति॥

अत्रसितावाब्दस्तृतीयायांचान्वेति॥ तथा॥ मन्वाद्यासुयुगाद्यासुप्रदत्तःसलिलांजलिः॥

सहस्रवार्षिकींतृप्तिंपितृणांजनयत्यरं॥ द्विसाहस्राब्दिकींतृप्तिंकृतंश्राद्धंयथाविधि॥

स्नानंदानंजपोहोमस्तदानंत्यायकल्पंतइति॥ सर्वासितृतीयासुतिथिपतित्वेनगि

रिजापूजनीया॥ तदुक्तं॥ प्रतिपत्प्रभृतिदेवताक्रमः॥ वह्निविरंचिगिरिजागणेशफ

णीविशाखादिनकृन्महेशाःइति॥ तथातृतीयायांमविष्णुराधे॥ ज्ञानादिकार्योयन

हंपूजयेद्दिल्पकं॥ द्वितीयायां च विघ्नेशं संपूज्य धनमाप्नुयात्॥ कार्यादिव्यवहारे च जानद्वि
गुणो भवेत्॥ सौवर्णः पद्मपत्रस्थः कर्तव्यश्च तिथीश्वरः॥ इति तृतीयासामान्यं॥ अथ मा
घशुक्लतृतीया॥ तत्रोमाहेश्वरप्रीतये गुडलवणदानमुक्तं भविष्योत्तरे॥ माघशुक्लतृ
तीयायां गुडस्य लवणस्य च॥ दानं श्रेयस्करं राजन् स्त्रीणां च पुरुषस्य च॥ गुडेन तुष्यते देवी
लवणेन तु शंकर इति॥ तथा तीर्थविशेषे तृतीयायामिष्टदोक्ता॥ स्कंदे नागरखंडे पा
र्वतीतिर्जोत्रमासे वादे॥ माघशुक्लतृतीयायां स्नातानार्घ्यविमलोदकं॥ हाटकेश्वरजे क्षे
त्रे रूपतीर्थमिति स्मृतं॥ या नारी स्नातरुन्धाय तत्र स्नानं समाचरेत्॥ सा स्याद्रूपवती नून
मदृष्टे रविमंडले॥ सदा माघतृतीयायां तत्र स्नानं करोम्यहं॥ अघस्नात तत्र यास्या मिस्त्रा
नायकं तन्निश्चयेति पार्वतीवचनात्तत्र स्नानं महाफलदमिति॥ तथात्र पंचपिंडको
पूजनं वांछितप्रदं॥ तदुक्तं॥ हाटकेश्वरजे क्षेत्रे पंचपिंडा व्यवस्थिता॥ गौरी गोपा

यं तत्रस्था पिता परमेश्वरी॥ नामेषां वत्सरं या वछन्द्य या परमायुता॥ सदा पूजयतु प्राप्ता
तृतीयायां विशेषत इति नरेंद्रस्य वं॥ डिल्लीमत्स्यपदेशाद्वचनमिति॥ माघतृतीया॥ अन्या
तृतीया ना निबंधखंडाद्वगंतव्यानि॥ इति तृतीयानिर्णयः॥ अथ चतुर्थीतिथिरुपवासा
दिव्रते निर्णीयते॥ चतुर्थी पंचमीविद्धा ग्राह्या॥ तदुक्तं विष्णुधर्मोत्तरे॥ एकादशी तथा षष्ठी
अमावास्या चतुर्थिका॥ उपोष्याः परसंयुक्ताः पराः पूर्वेण संयुता इति॥ युग्मवाक्येनापि पंच
मीविद्धत्वं विधीयते॥ युग्माग्नियुगभूतानामिति॥ वृद्धवसिष्ठवचनमेतद्विरुद्धं दृश्यते॥ द्वि
तीया पंचमी वेधाद्दशमी च त्रयोदशी॥ चतुर्दशी चोपवासे हन्युः पूर्वोत्तरे तिथिं॥ अत्र कव
ते पंचसूपवासविषये स्ववेधात्पूर्वोत्तरे तिथी पूर्वोत्तरे तिथि पूर्वां चतुर्थीमुत्तरां षष्ठीं हंति
त्यतः चतुर्थीषष्ठीपंचमीविवक्षा नापोष्येति॥ तदेवं विरोधे सति यद्यपि केचित्पूर्वश्लोको
पते॥ चतुर्थ्याः पंचमीविद्धोपवासनिषेधः कृष्णपक्षपक्षविषयः॥ पंचमीविद्धोपवास

विधानं च शुक्लपक्षविषयमिति॥ तथापि व्रतविशेषविषयो निर्णयो नोपलभ्यत इत्यनि-
त्यशुक्ला वा कृष्णा वा या गणपतिव्रतोपयोगिनी सा पूर्वविद्धा यान्यदेवताव्रतोपयोगि-
नी सोत्तरेति स्पष्टमुक्तं दीपिकाकारेण॥ अथ विघ्नपयुजि हित्वा चतुर्थी परा॥ तथा च बृह-
स्पतिः॥ चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते॥ मातृविद्धा तृतीयाविद्धा॥ कालादर्शेऽपि॥
सा विघ्नमाघोपमासी चतुर्थी गणसंज्ञिता॥ रंभा तृतीया चैत्यतात् पौष्या॥ पूर्वसंयुता इ-
ति॥ गणसंज्ञिता गणेशचतुर्थी॥ ब्रह्मवैवर्तेऽपि॥ चतुर्थी संयुता या च सा तृतीया फलप्रदा।
चतुर्थी तु तृतीयायां महापुण्यफलप्रदा॥ कर्तव्या व्रतिभिर्वत्स गणनाथसुतोषिणी॥ ग-
णनाथं सुतारं तोषयतीति॥ गणेश्वरसंबंधत्वेन तृतीयायुक्तायाश्चतुर्थ्या विधानात्॥ अ-
न्यदेवताव्रते हि गणनाथसुतोषणीत्यसंगतं स्यात्॥ तस्माद्विनायकचतुर्थी तृतीयायुक्तै-
वोपोष्येति सिद्धं॥ गणपतिव्रताव्यतिरिक्तव्रते तु॥ भरण्यां चतुर्थ्यां विद्धे नैम्बरदानियम

पूजयेद्यः सततं मोक्षो मुच्यते पातकैर्नर इति कूर्मपुराणोक्तं॥ तथा॥ आदित्याग्निर्द्विजो यस्य
विघ्नेशं च चतुर्थ्यां॥ सोपवासश्चतुर्थ्यां तु शुक्लपक्षस्य फाल्गुने॥ अभ्यर्च्य चतुरात्मानं वा-
सुदेवमतन्द्रितं॥ सर्वकामसमृद्धस्य फलमश्नुत इति॥ ततो व्रतस्य सिध्यर्थं माहिमाश्विन
पूजयेत्॥ तदुक्तं विष्णुधर्मोत्तरे॥ ये त्वसपो वै चतुरः प्रदिष्टाः वासुदेवः कथितं स्तु तुर्याः॥
यः पूजयेत्तास्तण्यामाहिताग्निदेवमतेनाप्ययपूजितः स्यात्॥ पारणादिने इति॥ मार्क-
ण्डेयोक्तं॥ चतुर्मूर्तिव्रतं॥ एवं मंगारकचतुर्थ्यां भौमव्रतं चोक्तमित्याद्य देवताव्रतविष-
ये परिपरविद्धत्व विरोधः॥ गणपतिव्यतिरिक्तदेवतासंबंधिन्यपि बहुला चतुर्थी विच
नेन पूर्वविद्धा ग्राह्या॥ अन्यदेवसंबंधस्तूक्तः स्कंदे नागरखंडे॥ श्रावणे मासि या कृष्णा
चतुर्थी बहुला स्मृता॥ गोगौरीपूजनं तत्र सौख्यसंततिवर्धनमिति॥ इतिये पूर्ववि
वीक्षापुराणसमुच्चये॥ गौपश्चितुर्थी चितु वटधेनुपूजा दुर्गाचिंतं दमरहोलिके च॥ व

त्सस्य पूजा शिवरात्रिरेताः पराः ॥ योयस्मिंस्तु पर्वणि चतुष्टये धेनुजा दुग्धवर्जितं दर्शे रिक्ते लिकेच ॥ व्र
विनिघ्नंति नृपस राज्यं ॥ अस्यां धेनुः पूज्यत इति वत्सस्य पूजेति ॥ न विष्णोः त्रयोदशीक सापेकाल्य
नगोवत्सस्य हृदृश्य विषयं सापि पूर्वविषं देत्फक्का ग्राकृ ॥ निर्णयामृते तु माघ शुक्ल चतुर्थी ॥ कुं
डचतुर्थीति यासा वकूलाचतुर्थीति यत्नतिपादितं ॥ तन्नतखंडेन हूलेन्यनुक्तत्वात् स्कं
दपुराणे वचनवीरोधाच्चोपेक्षणीये ॥ शिष्टसमाचारस्तु ॥ नमोमा सगतायां दक्षप तइति चु
एवंविधविधानवचनविशेषाभावे गणेशव्रतादन्या चतुर्थी परान्विता फलके कालादर्शे ॥
षष्ठ्यंशमात् तीयेकादश्योः कृष्णत्रयोदशी ॥ चतुर्थी च परायुग्मन्येताः पूज्याः परान्विता ॥ अ
अत्र वरावरचतुर्थीव्यतिरिक्ता वरचतुर्थ्यां तु गणेशव्रतमभिहितं ॥ तन्नते पुर्वयुते फक्कं
ग्राकृ ॥ आतो गणेशव्रते पूर्वयुता न्यदेवव्रते परायुतेति सिद्धांतः ॥ तत्क्के वमत्कादिव्रते
तत्कालव्यापिता ग्राह्येति चतुर्थीसामान्यनिर्णयः ॥ अथ चतुर्थीविशेषे निर्णयः ॥ का

र्त्तिक शुक्लचतुर्थी ॥ तस्यां मध्याह्नव्यापिन्यामुपोष्योत्तरेतु दिने पंचम्यां फणिनः प्रपूजयेत्
तत्र फणीश्वराः शेषवासुकिकादयः प्रसीदंति ॥ तदुक्तं ॥ स्कंदपुराणे ॥ युगंमध्ये दिन
यत्र तत्रोपोष्य फणीश्वरात् ॥ क्षीरेणाप्याय्य पंचम्यां पारयेत्प्रयतो नर इति ॥ कूर्मपुराणे ॥
तिथौ युगाद्यया चैव समुपोष्य यथाविधि ॥ शेषं तथा ज्ञादि नागानां शेषस्य च महात्मनः ॥ पू
जा कार्यं पुष्पगंधक्षीराप्यायनपूर्वकं ॥ विषाणि तस्य नश्यंति न च हिंसंति पन्नगा इति
कार्त्तिक चतुर्थी ॥ अथ भाद्रपद शुक्लचतुर्थी ॥ तत्र चंद्रं न पश्येत् ॥ तत्र चंद्रदर्शने मि
थ्यादोषः जायते ॥ तदुक्तं कालादर्शे ॥ भाद्रशुक्लचतुर्थ्यां तु नक्षेत चंद्रमसं यदि ॥ पश्येत्
दोषशांत्यर्थं श्लोकं पौराणिकं पठेत् ॥ तथा पराशरः ॥ कन्यादित्ये चतुर्थ्यां तु शुक्ले चंद्र
स्य दर्शनं ॥ मिथ्याभिदूषणं कुर्यात्तस्मात्पश्येन्न तं तदा ॥ तद्दोषशांतये सिंहः प्रसेनमि
ति वै पठेत् ॥ कन्यादित्ये भाद्रपदे श्लोको कथ्योक्तो विष्णुपुराणे ॥ सिंहः प्रसेनमवधीत्सिं

होजांबवताहृत॥ सुकुमारक मा रोदीस्तव ह्येष स्यमंतकः इति तत्र चंद्रदर्शने निर्णयामृते॥
तथा तस्याः स्नानमप्युक्तं वाराहपुराणे॥ भाद्रे शुक्लचतुर्थ्यां यो भौमेनार्केण वा युता॥ मह
ती सात्र विघ्नेशमर्चित्वेष्टं लभेन्नर इति॥ तथा॥ शिवा चतुर्थी तत्र स्नानादिकं गणेशपूज
नं त्वानंतफलाय भवति॥ तदुक्तं भविष्योत्तरे शिवा शांता सुखा राजन्नूचतुर्थी त्रिविधा स्मृ
ता॥ मासि भाद्रपदे शुक्ला शिवा लोके प्रतिष्ठिता॥ तस्यां स्नानं तथा दानमुपवासो जप
स्तथा॥ क्रियमाणं शतगुणं प्रसादाद्दंतिनो नृप॥ तथा तत्रैव देव्या उत्सवः कर्तव्यो
वक्ष्यमाणविधिना॥ तदुक्तं देवीपुराणे॥ कन्यायां कृष्णपक्षे तु पूजयित्वार्द्रभे शिवां॥ न
वम्यां बोधयेद्देवीं गीतवादित्रनिस्वनैः॥ कन्यादिमे भाद्रपदमासे शुक्लपक्षे॥ तुलाशुक्ल
चतुर्थ्यां तु तस्याः केशान्धूपयेदिति कालादर्शोदाहृता॥ प्रातरेव तु पंचम्यां स्नापयेत्स
जलैः शुभैः॥ सप्तम्यां पत्रिकापूजा अष्टम्यामप्युपोषणं॥ पूजनं जागरं चैव नवम्यां

मप्युपोषणं॥ पूजनं जागरं चैव नवम्यां विधिवद्दसि॥ दशम्यां भाद्रपदे देवीं रियमाणे
प्पपदने इति भाद्रपदचतुर्थी॥ अथ माघचतुर्थी॥ तत्र गणेशं संपूज्य वर्षपर्यंत वि
घ्नं नैत्यादिष्टप्राप्तिश्च सा तदुक्तं॥ हाटकेश्वरमाहात्म्ये विश्वामित्र प्रतीश्वरेण॥ विना
यकं समुद्दिश्य तत्पूजां समाचर॥ येन जायते सिद्धिः सम्यग्ब्राह्मण संभवा॥ इत्युप
दिष्ट॥ माघमासे चतुर्थ्यां च शुक्लायां पूजयेन्नृप॥ स च संवत्सरं यावत्सर्वं यावत्सर्वैर्वि
घ्नैर्विमुच्यते॥ पूजामंत्रास्तु॥ नमास्तेहेरायैतनमोगणविभोतथा॥ कुमारगुरि
णीतिर्पतथा चासंगतायच॥ नमोमोदकभक्षाय नमोदंतैकधारिणे॥ एभिर्मंत्रैः स
मभ्यर्च्य पश्चान्मोदकनंसुखं॥ नैवेद्यं च प्रदातव्यं तत्स्यार्घं निवेदयेत्॥ अहं कमके
रिष्यामि पत्किंचिच्छुभं मम वा॥ अविघ्नं तत्र कर्तव्यं सर्वदेवतया विभो॥ ततस्तु ब्राह्म
णानां च भोजनं मोक्षकांक्षिभिः॥ यथाशक्त्या प्रदातव्यं वित्तशाठ्यं विवर्जयेत्॥ अनेन

नि॰सि॰ विधिवत्सम्यक्चतुर्थ्यां पूजयिष्यति॥ तस्य सर्वाणि विघ्नानि नाशं यास्यंत्यसंशयमिती
८० तथास्मिन्नेव व्रते पार्वतीं प्रति रुद्रः॥ पद्मासनेन यश्चैतं जीवत्पुत्रकेन सुंदरी॥ पूजयि
ष्यति सद्भक्त्या चतुर्थीदिवसे शुभे॥ विघ्नानि तस्य नश्यंति तमः सूर्योदये यथा॥ अपुत्रो
लभते पुत्रं धनं दीनो महद्धनं॥ शत्रून्जयति संग्रामे स्मृत्वा तं गणनायकं॥ या नारी प
तिना त्यक्ता दुर्भगा च विरूपिता॥ सा सौभाग्यमवाप्नोति गणनाथस्य पूजयेदिति॥ वि
श्वामित्रेण माहात्म्यं स्मृत्वा तत्र प्रतिष्ठितः॥ गणनाथो द्विजश्रेष्ठ सर्वसिद्धिप्रदो नृणा
मिति स्मृतवचनं॥ जीवत्सकं गणानां त्वा गणपतिं हवामहे इति॥ इति गणपतिचतुर्थी
व्रतं॥ अथ माघचतुर्थी॥ वरदाख्या तत्र स्त्रीकामः शिवं पूजयेत्॥ तदुक्तं कूर्मपुराणे॥
कुंभे शुक्लचतुर्थ्यां तु कुंदपुष्पैः सदाशिवं॥ संपूज्य योदिने नक्ताशी संप्राप्नोति श्रियं न
रः इति॥ इयं कुंदचतुर्थी॥ यथा॥ माघमासे तु संसेव्या चतुर्थी कुंदसंज्ञिता॥ सा उपोष्या ८०

पुरश्रेष्ठ ततो राज्यं भविष्यतीति॥ देवीपुराणे॥ दिमाघचतुर्थी॥ ब्रह्मपुराणे॥ ज्येष्ठे शुक्ल
चतुर्थ्यां तु जाता पूर्वमुमा सती॥ तस्मात्सा तत्र संपूज्या स्त्रीभिः सौभाग्यवृद्धये॥ तथा म
त्स्यपुराणात्॥ चतुर्थ्यां नक्तभुग्दद्यादब्दांते हैमवारणं॥ व्रतं विनायकं नाम शिव
लोकफलप्रदं॥ इदं तु पक्षद्वयचतुर्थीसाधारणं॥ व्रतविशेषानभिधानात्॥ एवं च स्वचतु
र्थिष्वनुनीति वर्षचतुष्टयसाध्यानि तथा मासचतुष्टयसाध्यानि वर्षमात्रसाध्यानि ना
नाविधानि नक्तैकभक्तादिरूपाणि व्रतानि समुच्चयादवगंतव्यानीति॥ तथा॥ चतुर्थी
भौमवारेण रविघ्नानि नक्तैकभक्तादिरूपाणि व्रतसमुच्चयद्वारेण संसमि॥ जामावै
सोमवारेणास्त्र्यपवित्रताधिकं॥ सर्वास्वपि चतुर्थीषु विधिपतितेन गणेशोऽपूजनीय इ
ति चतुर्थीनिर्णयः॥ कृते चलङ्घिवेदे नभ्रयेति निर्णयदीपके॥ हेरंबतुष्टये यो कृष्णचतुर्थी
स्तु विनिर्णयः॥ अथ पंचमीनिर्णीयते॥ पंचमीति स्कंदपूजनं गोपवासव्रतिरि

क्रोपवासादिव्रते पूर्वतिथियुताग्राह्यातदुक्तं ॥ प्रतिपत्पंचमीकृष्णाष्टमीव्रतेच सप्तमि
रंभातृतीयाचेत्येताउपोष्याः पूर्वसंयुताइति ॥ पंचमीकृष्णाशुक्लास्तुयुग्मवाक्येपूर्व
विद्धाप्राप्तित्वात् ॥ व्रतंचअष्टमीचेतिविग्रहे अष्टम्याः पूर्वनिपातेप्राप्ते नाभ्यर्हितत्वादष्ट
मीशब्दस्य पूर्वनिपातः ॥ अष्टमीव्रतइतितेअपितद्व्रतेनतुशुक्लापंचमीतुकर्तव्याष
ष्ठ्यायुक्तातुनारद ॥ नहिषष्ठिनागविद्धाकर्तव्यातुकदाचनेत्यनेननञ्समेववक्त्र
वचनेनपंचम्याः षष्ठ्यायुक्ताविधानात्पूर्वयुतेतिविरुद्धं ॥ सत्यं ॥ पंचम्याः पंचम्याष
ष्ठ्यायुतात्वविधानमिदंनागपूजाविषयं ॥ तदुद्देशेनैकभक्तभोजनादिविषयं
च ॥ तदुक्तं ॥ उभयोः पक्षयोः नागातपंचमीषुपूजयेदिति ॥ वचनादविरोधः ॥ किंच ॥ ४८
अत्रोपवसिशब्दाश्रवणादुपवासव्यतिरिक्तव्रतविषयेशुक्लपक्षसामान्येनास्य
प्रवृत्तिरितिचेत्ये ॥ कारणं विनासंकोचाभावात् ॥ नहिषष्ठीनागविद्धेत्येतदपिस्कं

दषष्ठ्यतिरिक्तविषयं ॥ स्कंदषष्ठीतुपूर्वयुतानिहितास्मृत्यंतरे ॥ कृष्णाष्टमीस्कंदष
ष्ठीशिवरात्रिश्चतुर्दशी ॥ एताः पूर्वयुताकार्यास्तिथ्यंतेपारणंभवेत् ॥ पूर्वेद्युरुपवासंकृत्वा
षष्ठ्यांस्कंदः पूज्यतइत्यपिचोक्तं ॥ तदभिप्रायेणोपवासेपंचमीपरयुताग्राह्येत्युक्तंव्रत
वैवर्त्तेस्कंदोपवासेस्वीकार्यापंचमीपरायुताविसर्जनीतुषष्ठ्यांस्यात्ताएपूर्वयुतान्व
या ॥ एवोपिवासवचनान्तुवाराहपुराणे ॥ आरभ्यशुक्लषष्ठीतिथिः कौमारिकास्मृता ।
पूर्वेद्युरुपोष्यविधिवत्स्यामन्यन्वयेद्गुहमितिवचनात्पंचम्याः परविद्धोपवासस्तद
गत्वेनविहितः ॥ तथा ॥ शुक्लायामथकृष्णायांषष्ठ्यांसंपूजयेद्गुहमितिवचम्याः परवि
द्धोपवासस्तेसदंगत्वेनहितः ॥ तथा ॥ शुक्लायामथकृष्णायांषष्ठ्यांसंपूजयेद्गुहमितिस्कं
दपुराणवचनात्षष्ठ्यांविहितस्यकार्तिकेयपूजनस्यकार्तिकेयपूजनस्यतदंगो
पवासेशुक्लावाकृष्णावापंचमीपरयुतोपोष्येतिसिद्धं ॥ अथपंचमीस्वविषयोपवा

ति॰ दि॰ सेचतुर्थीयुता॥तदुक्तं पैठीनसिना॥पंचमी सप्तमी चैव दशमी च त्रयोदशी॥प्रतिपन्नव
७९ मी चैव कर्तव्या सन्मुखा तिथिः॥सन्मुखा सायाह्नव्यापिनी॥पूर्वयुतेत्यर्थः॥जाबालिरपि॥
प्रतिपत्पंचमी चैव उपोष्याः संपूर्वसंयुता॥एकादशी तथा षष्ठी अमावास्या चतुर्थिका॥
उपोष्याः परसंयुता पुराः पूर्वेण संयुता॥अन्याः परा॥द्वादशी सप्तमी प्रतिपत्पंचमी ए
ताः पूर्वसंयुता॥इत्यतः पंचमी चतुर्थीयुतेवेत्यर्थः॥स्कंदपुराणे॥पंचमी तु तथा कार्या च
तुर्थ्या सहिता विभो॥एतानि विधिमुखेन पूर्वविद्धापूज्यतापराणि॥प्रतिपत्पंचमी भूतं सा
वित्री वटपूर्णिमा॥नवमी दशमी चैव नोपोष्याः परसंयुता॥इति दं ब्रह्मवैवर्तवचनं तु
परविद्धानिषेधमुखेन पूर्वविद्धाप्रतिपादनपरमिति॥अतः परं पूजां गोपवासव्यतिरि ७९
क्तोपवासादिव्रते॥पंचमी पूर्वयुतेति सिद्धांत॥स्कंदस्य षष्ठ्या अधिपतित्वादिति॥न
क्तैकनक्ताद्धितैकाजव्यापिसर्वैरेंगैक्रियत इति पंचमीसामान्यनिर्णयः॥अथ पंचमी

विशेषः॥श्रावणशुक्लपंचम्यां द्वारस्योभयतो नागानालिख्य पूजयेत्तेन सर्पतो भयं न
जायत इत्युक्तं भविष्यत्पुराणे श्रावणे मासि पंचम्यां शुक्लपक्षे नराधिप॥द्वारस्योभय
तो लेख्या गोमयेन विषोल्बणाः॥तथा भाद्रपदे मासि पंचम्यां श्रद्धयान्विते॥यस्त्वालिख्य
नरो राजन् कृष्णवर्णादिवर्णकैरिति॥तेषां स्वरूपं तु मत्स्यपुराणे॥नागाश्चैव तु कर्तव्याः
खड्गखेटकधारिणः॥वर्णकैः अधः सपाकृतिस्तेषां नाभेरूर्ध्वं तु पौरुषी॥फणाः स्वस्
त्रिकः कर्तव्या द्विजिह्वा बाहवः समा॥असमा विषमा इति॥पूजयेद्विधिवद्दधिदूर्वा
क्षतैः मुने॥गंधपुष्पोपहारैश्च ब्राह्मणानां च तर्पणैः॥नागानां पूजनेतस्यां न भयंस्यु
तो न वेत॥क्षीरं सर्पिस्तु नैवेद्यं देयं सर्वसुखावहमिति॥तथा तस्मिन्नेव मासि तार्यवि
शेषणान्नीमितफलमप्तिदिता स्कांदपुराणे॥च्याचतेन कर्कोटकं प्रति॥अत्रास्ति
स्नुमुनतो पंटाटके ष्वरसंस्थितं॥क्षत्रेतत्र समाव्याः संयुक्ता कार्याप्तयास दा॥श्रावणे॥

नि·दि· कृष्णपक्षेतु संप्राप्ते पंचमीदिने॥ संप्राप्स्यति परां पूजां पृथिव्यां नवमंकुले॥ अद्यप्रभृतितेयं
९० नागतीर्थमिति स्मृतं॥ ख्यातिं यास्यति मत्पृष्ठे सर्वपातकनाशनं॥ येत्र स्नानं करिष्यंति संप्रा
प्ते पंचमीदिने॥ नतेषां वत्सरं यावद्भविष्यत्यहिजं भयं॥ विषार्दितस्तु योमर्त्यस्तत्र स्नानं करि
ष्यति॥ तत्क्षणान्निर्विषीभूत्वा संप्राप्स्यति परं सुखं॥ पुत्रकामा तु या नारी पंचम्यां भास्करोदयं
करिष्यति तत्र या स्नानं फलं तस्या प्रकीर्तितं॥ भविष्यति च सा नारी ध्रुवं वंध्यापि सुपुत्रिणी॥ नारा
णामपि स्नानमात्रेण वांछितं प्रदमित्युक्तं तत्रैव॥ इति श्रावणपंचमीविधिः॥ अथ पुत्र
कामपंचमी॥ ब्रह्मोवाच॥ अथातः संप्रवक्ष्यामि संक्षेपान्न च विस्तरात्॥ येनानुष्ठानमा
त्रेण पुत्रोत्पत्तिः प्रदृश्यते॥ अष्टौ दोषास्तु नारीणां पुरुषस्य चतुर्दश॥ तस्य दोषविशुध्य ९०
र्थं पंचमीश्राद्धमाचरेत्॥ गरुडपुराणे॥ पुन्नाम्नो नरकं घोरं पुत्रं दृष्ट्वा न पश्यति॥ पौत्रे
णस्वर्गमित्याहुरित्येवं वैदिकी स्मृतिः॥ अपुत्रस्य गतिर्नास्तीत्यादि स्कंदपुराणे॥ मार्ग

शीर्षे तिथ्या माघे वै श्रावणे कार्तिके तथा॥ पुत्रकामनरैः कार्या शुक्ला कृष्णपंचमी॥ पुत्र
काममनुष्याणामन्योपायो न विद्यते॥ इत्युक्त्वा कृष्णपंचमीश्राद्धमिति ब्रूते॥ चापथ्रि
त्रायमीहोतु रुद्रैकादशकादशकं जपेत्॥ गायत्र्यष्टसहस्राणि दद्याद्येन तु होमयेत्
कृष्णपक्षे चतुर्थ्यां तु होमं कुर्यात्स्वशक्तितः॥ ग्रहान्देवांश्च समभ्यर्च्य गणनाथं प्रपूजयेत्॥
पक्षे तु पंचमीमध्ये श्राद्धं वै पुत्रादानयोः॥ वैश्वदेवादिकं श्राद्धं पङ्क्तिः पिंडैः प्रकल्पयेत्॥
इच्छेत्पार्वणवत्कुर्यात्काम्यं श्राद्धं विधानतः॥ मध्यमं तु ततः पिंडं नमस्तु पितामह॥ तंह्री
गृत्वा ध्यायादात व्याध मं पिन्ने मुनार्चिता॥ पत्नीतं पिंडमादाय प्राश्नाति विधिवत्तदा॥ आ
धत्त पितरो गर्भमिमां चैवं तु न जपत्यपि॥ दक्षिणां दिव्रामास्थित ततो भुंजीत वाग्यतः॥ ए
वं द्वादशमासेषु स्वधाकार्याश्राद्धमाचरेदिति॥ पुत्रकामपंचमीश्राद्धे प्रारब्धे नराम
धामरणीयोगे सति मघादौ न रपपाश्राद्धं कुर्यान्निमित्तत॥ पिंडदानं न कुर्वीत पदोष

नि॰द्वि॰ जीवतःसुतानित्यनेनपिंडदाननिषेधोनाशंकनीयः॥स्मृत्यंतरवाक्यात्॥यथा॥श्रयाने
९१ त्रपंचम्यांश्राद्धहस्तश्चतुर्दशीपिंडदानंप्रकुर्वीतपुत्रवान्यमयंनदुष्यतीति॥आरंभेकृष्णवासा
सितकृष्णागौर्दक्षिणातया॥ततःसंवत्सरस्यांतेतिलदानंप्रदापयेत्॥यत्तुसूर्यपुराणव
चनं॥पैतृकेब्राह्मणेपिंडंपैतामहंतुवैष्णवं॥कृष्णपक्षतिलामत्स्यवानुहिश्यपदीपतइतिपि
डत्रयाभिधानं॥तदेतद्विष्णुरूपमध्यमपिंडश्राद्धनामित्रायेणतद्देवताधानं॥पुरोडाशो
भ्यचदानंवदिति॥नेकपार्वणपरं॥तथासतिवैश्वदेवादिकंश्राद्धेषाड्भिःपिंडैःप्रकल्प
येदिति॥स्कंदपुराणवचनविरोधः॥किंचपितरोयत्रपूज्यंतेतत्रमातामहाअपि॥अवि
शेषेणकर्तव्यंविशेषान्नरकंव्रजेदितिसर्वस्मृतिपुराणसंमतेनतत्रकंपातेनाधिकंफ ९१
लंनस्यात्॥तस्मात्पार्वणाद्यविधिनाश्राद्धमिति॥स्त्र्यपक्रियोतुपुत्रेत्रातिपंचमीश्राद्ध
मुपक्रम्योक्तं॥कृष्णपक्षस्यापंचम्यांपंचवृत्तातिवार्चयेत्॥गव्येनपयसासिद्धैर्मु

त्यन्नैःश्राद्धमाचरेत्॥पितृमातामहानांचसपत्नीकोजितेंद्रियइत्यादीतिपार्वणद्वयेनोक्तं
अयातत्रेतिकर्तव्यता॥पुराणांतरात्॥वसिष्ठः॥आरंभेसितपंचम्यांकुर्यात्छांतिविनायकी
शांतिकंविधिवत्पूर्वंकृत्वामातृःप्रपूजनं॥अप्सरोरतिसंयुक्तंकामंसंपूजयेत्सुधीः॥त
तोघटंस्थापयेत्कुंभेसजलंवारुणांजलं॥तस्योपरिन्यासेत्यात्रंनागपूजान्वततः॥मंडल
स्थांस्तुरांस्तत्रपूजयेद्विधिवद्द्विज॥नमस्तेकामदेवायनमस्तेविश्वमोहन॥रतीशायन
स्तम्यपुत्रंदेहिममार्चितः॥कामपूजामंत्रः॥नमस्तेसितनागायनमस्तेश्वेतरूपिणे॥
शेषस्त्वंविष्णुरूपेणममपुत्रंप्रयच्छहि॥नागपूजामंत्रः॥आपित्रापायसंवत्सरश्राद्धंकु
र्वीतपार्वणं॥तत्रपूर्वेद्युःकुर्वीतवैश्वदेवप्रपूजनं॥धनीरोचनतामानौकाम्यश्राद्धेप्रपूज
येत्॥पितृकंब्राह्मणेपिंडंपैतामहंतुवैष्णवैः॥कृष्णापत्रपितामहंदेवानुहिश्यप्रदीयते॥
शतपत्रेश्वपकौश्चपूजातेभ्योयथाक्रमं॥नमस्तेपितृरूपायसोमरूपनमोस्तुते॥आ

ज्ययापतनमस्तेस्तुसौम्यत्वंसंततिंकुरु॥पितामहनमस्तेस्तुबर्हिषिषपुषेनमः॥कव्यवा
लायतीलायापुत्रदायनमोस्तुते॥पितामहायसोमायपूज्यस्त्वंममपूर्वज॥पिंडंग्रहाणपू
ज्यंत्वमसन्नत्वंसततैदैवव॥इतिसंपूज्यविधिवत्ब्राह्मणान्नमोजयेत्ततः॥मंत्रेणामध्यमंपिंड
पत्नीप्राश्यातिवाग्यता॥कव्यवाडानलश्चैवनमःसोमंर्यमावसो॥अग्निष्वात्ताबर्हिषद
आज्यपाःसोमपाहर॥आदित्याद्याद्वसवश्चैवप्रपुत्रंप्रयच्छता॥इतिसंमंत्रितंपिंडंप्रा
श्नीयात्कपिलंपयः॥अनेनैवविधानेनकुर्यात्संवत्सरंसुधीः॥वर्षांतेतुद्विजान्भोज्यान्गां
दद्याद्धिरण्मयं॥प्रसादात्कामराजस्यपूर्वजानांनसंशयः॥नविष्यत्येवपुत्राप्तिस्तस्मि
न्नरेकृते॥पुण्यंयशस्यमारोग्यंपुत्रदंपापनाशनं॥गयातुल्यंतपश्चेष्टंपंचम्यांवृद्धवेदि ९२
ने॥स्नात्वासर्वार्थसिध्यर्थमहापातकनाशनं॥स्नामामेतकपिलादद्याद्वस्त्रयुग्मगुरोरपि॥पि
तस्माद्व्रतानुतपादिकालव्यापिन्यामिति॥इतिपंचमीस्नाद्वनिर्णयः॥अथऋषिपंचमी

भाद्रपदशुक्लपंचमीऋषिपंचमी॥तत्रकश्यपादीन्ऋषीन्संपूज्यत्यक्त्वाकादिनाएकभ
क्तव्रतंकुर्यात्त्रिमिंसर्वपापक्षयोभवेत्॥इत्थंकोमाधातृवसिष्ठसंवादेकौशिकसंहितायां॥नभ
स्यतुमासस्यपक्षेपापंचमीसिता॥स्वातिनक्षत्रसंयुक्तासामहापापनाशनी॥तामनुप्राप्य
कर्तव्यंमुनिधान्यैर्व्रतोत्तमं॥ऋषिपंचमीतिविख्यातंकथायाःश्रवणेनचैतिसप्तर्षयश्चसं
पूज्याअरुंधत्यासमन्विता॥ऋतुकालेतुसंप्राप्तेतानतोस्ताननतोपिवा॥संस्पर्शंकुरुतेपा
पंनारीसंभवंमानता॥तत्सर्वंविलयंयातिसप्तर्षीणांप्रसादतः॥नरोवायदिवानारीमु
च्यतेसर्वकिल्बिषैः॥तस्मात्त्वमपिमांधातःपंचमीव्रतमाचर॥संवत्सरकृतंपापंव्रतेनानेनन
श्यतीति॥व्रतसमुच्चये॥मासिभाद्रपदेराजन्शुक्लपक्षेतुपंचमी॥पंहायत्नेनसंग्राह्याए
कभक्तेननैवतु॥फालकृष्टपक्वमन्नत्र॥काहारस्तुकर्तव्योनीवारैःश्यामकैस्तथा॥फलाहारश्च
कर्तव्यऋषीणांप्रीतिहेतवे॥अस्यव्रतस्यातिप्रसिद्धत्वात्पूजादिविधिनोक्तेति॥अस्य

नि०दि० व्रतस्यैकभक्तरूपत्वादेकभक्ततिथिनिर्णयेननिर्णयः॥ दिनद्वयेऽपितिथेरेकभक्तकालव्याप्तित्वेपर
९३ युताग्राह्या॥ पंचमीकर्त्तव्याषष्ठ्यायुक्तानुनारदेत्यनेनतत्सर्वैर्व्रतैर्वचनेन॥ यत्तुपंचम्यांतुतथाका
र्याचतुर्थीसहिताविभो॥ तदस्यस्कंदपुराणवचनस्योपवासप्रकरणेपाठात्कृष्णपक्षोपवास
विषयत्वंस्थापितंकालनिर्णये॥ अतएवदीपिकाकारः॥ कृष्णापद्युतासितापरयुतास्यात्पंच
मीतिस्थितिर्यद्यात्वैनविनोपवासमनुनयिति॥ एवेनोपवासव्यतिरिक्तव्रतेपरयुतानिधानेस्कं
दोपवासनागपूजाव्यतिरिक्तेपूर्वयुक्तेतेतिकृत्यचिदुक्तंतदपिनिराकृतविनोपवासमनु
पपरेतिस्पष्टमुक्तत्वादिति॥ इतिऋषिपंचमीनिर्णयः॥ अथलक्ष्मीपंचमी॥ यःपंचम्यांलक्ष्
म्याःसंपूज्योपवासंकुर्यात्सवैष्णवपदंयातित्युक्तंपद्मपुराणे॥ लक्ष्मीमभ्यर्च्यपंचम्यामुप ९३
वासीभवेन्नृप॥ समांतेहेमकमलंदद्याद्धेनुसमन्वितं॥ सवैष्णवंपदंयातिलक्ष्मीस्याज्जन्म
जन्मनि॥ एतल्लक्ष्मीव्रतंनामदुःखशोकविनाशनमिति॥ सलक्ष्मीपंचमी॥ भविष्योत्तरे॥

पयोव्रतेस्तुपंचम्यांदत्वानागंद्विजायवै॥ सौवर्णंसिपजिनिनंतस्यंतस्यनजायते॥ एतत्सर्वव्रतंप्रो
क्तंसर्पभित्रीकरंपरमित्यादीनिनानाप्रकाराणिपंचमीव्रतानिव्रतखंडेद्रष्टव्यानीति॥ पं
चम्यांनागाःपूज्याअधिपतितीर्थविशेषेपंचम्यांस्नानेनापिपापक्षयोजायते॥ तदुक्तंहाटके
श्वरमाहात्म्ये॥ कृष्णपक्षेतुपंचम्यांमासिभाद्रपदेनृप॥ राजवाप्यांनरःस्नात्वासर्वपापैःप्र
मुच्यते॥ श्रद्धयापरयायुक्तःसंप्राप्तेपंचमीदिने॥ स्नात्वाकरिष्यतिश्राद्धंयावत्संवत्सरंनृप॥
अपुत्रःप्राप्स्यतेपुत्रान्वंशवृद्धिकरान्सदाइति॥ कृतेचलक्ष्मीविदेनमध्येनिर्णयदीपकेव्रतोपवा
सविषयेनिर्णीतापंचमीतिथिः॥ अथषष्ठीनिर्णयःप्रस्तूयते॥ स्कंदोपवासव्यतिरिक्तेषष्ठी
तिथिरुपवासादिव्रतेपरयुताग्राह्येतितदुक्तंषण्मुन्योरितियुग्मवाक्यात्॥ नागविद्धानकर्तव्या
षष्ठीचैवकदाचन॥ सप्तमीसंयुताकार्याषष्ठीधर्मार्थकोविदैरितिस्कंदपुराणवचनात्॥ तत्र
याचनिगमः॥ नागविद्धातुयाषष्ठीदर्शश्चैकादशीतथा॥ भूतविद्धाष्टमीवास्यान्निःफलं

नि॰ दि॰ स्याद्दिनत्रयं॥ बृहद्वसिष्ठेऽपि॥ द्वितीया पंचमी वेधाद्दशमी च त्रयोदशी॥ चतुर्दशी चोपवासे प
१४ वासे हन्तुः पूर्वोत्तरे तिथी॥ ना बाजिः॥ नागविद्धा तु या षष्ठी न तु विद्धो महेश्वरः॥ चतुर्दशी का
मविद्धा तिस्रो मलिना स्मृताः॥ नागः पंचमी॥ भानुः सप्तमी॥ कामस्त्रयोदशी॥ स्कंदपुराणे॥
नागविद्धा तु या षष्ठी सप्तम्या च तथाष्टमी॥ भूतविद्धा अमावास्या न मात्या मुनिसत्तमेत्यादी
नि यानि सर्वविद्धानिषेधकानि तानि स्कंदषष्ठीव्रतेतरषष्ठीव्रतोपवासविषये योजनीति॥ स्कं
दषष्ठी तु पूर्वयुक्तैवोपोष्या तथा कृष्णाष्टमी संदेषष्ठी शिवचतुर्दशी॥ एताः पूर्वयुताः कार्याः
तिथ्यंते पारणं भवेदिति॥ अतः स्कंदषष्ठीव्रतेतरषष्ठी शिवचतुर्दशी मुख्येन परविद्धा वाक्या
नि शृद्दत्र्यंपती॥ विष्णुधर्मोत्तरे॥ एकादश्यष्टमी षष्ठी द्वितीया च चतुर्दशी॥ आमावास्या तृती १४
या च उपोष्याः स्युः परान्विताः॥ द्वितीया शुक्ला चतुर्दश्यष्टम्यौ चतुर्दशी शुक्लेतरयारं नाप्यतिरि
क्ता॥ बृहस्पतिः॥ एकादश्यष्टमी षष्ठी पौर्णमासी चतुर्दशी॥ अमावास्या तृतीया च ता उपोष्याः

परान्विता॥ निगमेऽपि॥ षष्ठ्यष्टमी अमावास्या कृष्णपक्षे त्रयोदशी॥ एताः परयुताः पूज्याः परा
पूर्वेण संयुता॥ इति॥ अत एव मदनरत्नेप्येवं॥ न हि षष्ठी नागविद्धा कर्तव्या तु कदाचनेति॥ एवं
सति स्कंदव्रतव्यतिरिक्ता षष्ठी परयुतेति सिद्धांतः॥ परविद्धे षष्ठ्यामेव पूर्वविद्धाग्राह्येत्युक्तं तृ
तीयानिर्णयेऽपि त्यामेवेति षष्ठीसामान्यनिर्णयः॥ यत्तु केनचिद्द्वादशनाडीनिषेधयुक्तं
त्रैतिथ्यमिति तत्र स्कंदोद्देशेन विघ्नेजनादिकं न कार्यमित्यर्थः॥ नक्तैकभक्ता
दीनीत्यान्यपि च कालविशेषोक्तानि तत्कर्मकालव्यापिन्यामेवेति षष्ठीसामान्यनिर्ण
यः॥ अथ षष्ठीविशेषः॥ भाद्रपदशुक्लषष्ठ्यां भौमे धृतिविशाखयोगेन चंपाभिधाना
सा व्रताचरणेन सर्वपापक्षयंकर्येति स्कंदपुराणे॥ षष्ठ्यां भाद्रपदे शुक्ला वैधृतेन सम
न्विता॥ विशाखर्क्षभौमयोगेन सा चंपेतीह विश्रुता॥ त्रेतायां चैव पंचाशत्त्वापेत्यस्तु कृतेयुगे
॥ भवंति च कालौ विंशाद्वापरे तु दशाधिका॥ अतो देवमनुष्याणां पूज्यमानपसत्तम॥ सर्व

पापक्षयंकुर्यात्प्रतानामप्यखंडतां॥ दूर्वासितास्येवमुक्तं॥ द्विदैवत्यर्क्षनीमेनवेधतेनसमन्वि
ता॥ नभस्यपासिताषष्ठीसाचंपेतिनिगद्यते॥ इतिअस्यांद्विदैवत्यर्क्षविनारवा॥ अथपंचतु
पांयोगेनचंपाभिधानमस्मिंधास्नेभद्रेदिपर्यविवित्॥ अतस्मातन्ययोगत्वात्पूर्वदिनेवाप
दायोगतउपलभ्यतेतदानतेग्रात्यानपूर्वविद्धापरविवादरः॥ नथापिसूर्यमितत्वाद्दिवायोग
संबंधिनीग्राह्यादिवैवयोगः॥ स्तेयंनचरात्रौकदाचनेत्यत्रेदिपन्नतोक्तमात्राविसमा
तं॥ अस्मिन्चंपाव्रतेव्रतैखंडेतुपंचम्यामुपावासोविहितः॥ यद्यपितत्रस्नात्वाविमले
गत्वागुरुगृहंव्रती॥ सर्वेपिकरणैःसूक्ष्मविद्यानवेविद्धिषुनग्रात्यास्तुवासराः॥ सूर्य
मात्वार्पयितिविवेदयेदित्यनेनरात्रिसंबंधउक्तस्तथापिदिवानुस्मृतःश्राद्धस्तइतिसंतोष
व्यंनियमंउपावासनियम॥ व्रतविधिःपुराणसमुच्चयदि॥ स्नापयेद्धपांकेनंमत्यात्रं
व्रतयोपरि॥ तस्योपरिन्यसेत्सूर्यंपिछेकेनविनिर्मितं॥ सौवर्णंवायथाशक्त्या॥ वित्तसारं

तयारुणं॥ अर्चयित्वंजगन्नाथंगृहीत्वातांगुरोःस्वयं॥ षडक्षरेणमंत्रेणगंधपुष्पादिभि
श्चते॥ ॐनमःसूर्यायेतिमंत्रं॥ धेनुंपयस्विनींदद्यात्सूर्योमेप्रीयतामिति॥ ततःस्नात्वावि
मलेगुरुगृहंव्रती॥ सर्वेपिकरणैःसूर्यमाचार्यायनिवेदयेत्॥ गवांकोटिप्रदानेनकुरुक्षे
त्रेकपर्वणि॥ चंपाव्रतस्यराजेंद्रकलांनार्हंतिषोडशीं॥ इतिचंपाषष्ठीनिर्णयः॥ अथ
कपिलाषष्ठी॥ भाद्रपदषष्ठीरोहिणीव्यतीपातभौमयोगेनकपिलाप्रोक्ता॥ तदुक्तंवाराह
पुराणे॥ नभस्यशुक्लपक्षेचरोहिणीपातसंयुते॥ युक्ताषष्ठीपुराणज्ञैःकपिलापरिकीर्ति
ता॥ व्रतोपवासनियमैनस्किरंतत्रपूजयेत्॥ कपिलांचद्विजाग्र्यायदत्वाक्रतुफलंल
भेदितिनिर्णयामृतेतुशुक्लायांरोहिणपसंभवानयाकृष्णपक्षेतिजिमितं॥ कालादर्शेत्त
शुक्लेत्यनापि॥ व्रतसमुच्चये॥ प्रोष्ठपदासितेपक्षेषष्ठीभौमेनसंयुता॥ व्यतीपातेनरोहि
ण्यासाषष्ठीकपिलास्मृता॥ यस्मिकालेनवेदेतैर्गुणैःषष्ठीयुतातदा॥ यस्मिन्कान

नवेदे तै गुणैः षष्ठीयुता तदा ॥ कपिलइति श्रावणस्यानंतरं षष्ठीयद्येतैर्युक्ता कपिला स्यात् ॥
सदैव प्रौष्ठपद इति ॥ निर्णयामृते तु भानौ चेत्करे स्थित इति पठित्वा लिखितं तद्युक्तशुक्लपक्षा
दिमासानिध्यायेणतत्रापि स्यात् ॥ इदं च तं व्रतखंडे नास्ति अतो विचार्यं अत्र न्यायो गत्वे
नयस्मिन्कालइति श्रवणाच्चपाष्ठी निर्णयेनास्या निर्णयइति व्रतविधिस्तु व्रतखंडादि
तिकपिलाषष्ठि ॥ तथा च विष्णुपुराणे ॥ येयंभाद्रपदे मासि षष्ठी सांवत्सर तर्पने ॥ इयं पाप
हरा पुण्या शिवा शांता शुभावह ॥ स्नानदानादिकं सर्वमस्यामक्षयमुच्यते ॥ अस्यां पश्यंति गांगे
यं दक्षिणापथमाश्रितं ॥ ब्रह्महत्यादिपापैस्तु मुच्यते नात्र संशय इति ॥ अथ दरिद्रहरष
ष्ठी ॥ षष्ठीव्रते धनप्राप्तिः स्यात् ॥ तदुक्तं स्कंदपुराणे ॥ षष्ठीनामा तिथिर्यस्याज्ञा मान्या॰ ९६
देवतैरपि ॥ एकभक्तेन नक्तेन तथैवायाचितेन च ॥ उपवासेन दानेन तैलक्षारविवर्जि
तः ॥ अस्मिन् संपूजिते तात दारिद्र्यं न भवेत्कुले ॥ षष्ठीतिथिं समुद्दिश्य ब्राह्मणस्य च भो॰

जने ॥ शाल्योदनेन पयसिक्तावामकरीयान्वितं ॥ वाह्यं घृतसंयुक्तं वर्षभिक्षं प्रदापयेत् ॥ व्र
तांते विप्रमाहूय अभ्यंगितशरीरिणं ॥ तस्मै देया सुशीला च गौः सवत्सा पयस्विनी ॥ अनेनै
व विधानेन यः षष्ठीव्रतमाचरेत् ॥ धनप्राप्तिरिहाने स्याद्दारिद्र्यं न च तत्कुले ॥ इति दरिद्रहरष
ष्ठी ॥ अथ कार्तिकषष्ठी ॥ कार्तिके शुक्लषष्ठी तु भौमवारेण संयुता ॥ महाषष्ठीतिसा प्रोक्ता
सर्वपापहरा तिथिः ॥ तस्यां स्वपिति वै वह्निः स्कन्दोपोष्य वै नर ॥ षष्ठ्यां वह्निं समभ्यर्च्य कुर्या
द्वह्निमहोत्सवमिति ॥ मत्स्यपुराणात् ॥ तथा आषाढशुक्लषष्ठी तु तिथिः कौमारिका स्मृता ॥
कुमारमर्चयित्वात्र स्कन्दोपोष्य वैनरैर इति ॥ सर्वास्वपि षष्ठीषु तिथ्यधिपतित्वेन स्कंदः पूज॰
नीय इति ॥ एवं नानाप्रकाराणि षष्ठीव्रतानि व्रतखंडादेवगंतव्यानि ॥ निर्णयेन तिर्णेतिव्या
नीति च ॥ तथा माघषष्ठ्या माघषष्ठ्यां क्षेत्रविशेषेऽपि तु दर्शनात् सर्वपापक्षयो जायते ॥ तदुक्तं
स्कंदपुराणे ॥ लाटकेश्वरक्षेत्रे देवदेवमहेश्वरं ॥ दृष्ट्वा विमुच्यते पापात्सप्तापि तनलन्तु

ति॰ दि॰ भुजा॥ यस्तं पश्येन्नरो भक्त्या माघषष्ठ्यां सिते द्विजः॥ सर्वरोगविनिर्मुक्तः प्राप्नोति परमं पदं॥ कं
९७ डूपामाव्याद्व्रणिमंडलानि विचर्चिका॥ दद्रूनितान्नस्य नश्यंति जंत्र नोमास्ति तात्मनो॥ अस्ति त
श्री स्याग्रतः कुंडं स्वच्छोदकसुपूरितं॥ यस्तत्र कुरुते स्नानं प्रत्यूषे रविवासरे॥ अपि कुष्टामयग्र
स्तः सन्नरः स्यात्पुनर्नवः॥ यदा संस्थापितः श्रीमान्नुर्वजिन पृथिवीभुजा॥ तदानुदृष्टेन रूपेण भाषितं
तु नलामतः॥ इति माघषष्ठी॥ अथांगारकषष्ठी॥ भौमेन प्रयुक्ता षष्ठी तीर्थविशेषे स्नानमहा
पातकस्य विनाशकारिणी॥ स्कांदे नागरखंडे॥ स्त्रीहत्यया समायुक्तो भीष्मः कुरुपि
तामहः॥ तीर्थयात्राप्रसंगेन चमत्कारपुरं ययौ॥ अथापश्यन्महात्मासौ सुपुण्यं तत्र यास्थि
रः॥ स्नात्वा श्राद्धं च विधिवत्तयावश्रद्धया समन्वितः॥ तावदाकाशजा वाणी वाक्यमेतदुवाच ह॥ ९७
भीष्म भीष्म महाबाहो नात्र स्विं श्राद्धजं विधिं॥ कर्तुं स्त्रीहत्यया युक्तस्तस्माच्छृणु वचो मम
प्रसिद्धिं तीर्थमित्येव ख्यातं पातकनाशनं॥ अस्मात्स्थानात्समीपस्थं वारुण्यां दिशि पुण्यदं॥

कृतं॥ कृष्णांगारकषष्ठ्यां यो नरः स्नानं समाचरेत्॥ स स्त्रीहत्याकृतात्पापान्मुच्यते नात्र सं
शयः॥ अथ भौमयुतषष्ठीतः स्नात्वा तत्र कृतेन तत्॥ अहं तव पिता पुत्र शंतनुः पृथिवीपतिः॥ स्त्री
हत्ययान्वितस्त्वां तत्क्षणमिहागतः॥ ततो भीष्मोऽद्भुते गत्वा तत्र स्थाने समाहितः॥ स्नानं कृत्वा
ततः श्राद्धं चक्रे समन्वितः॥ ततो भूयः समागत्य तं प्रोवाच स शंतनुः॥ विमुक्तस्त्वं कुरुश्रेष्ठ सं
शयः॥ तस्माज्जित्वा जगद्गच्छ राज्यं चिंता समाचरेति॥ अंगारकषष्ठी॥ तथा तत्रैव नरादित्य त
त्रैव नरादित्यतनः श्रान्यौयान रेण प्रतिष्ठितः॥ षष्ठ्यां तस्य तु वारेण दृष्ट्वा पापात्प्रमुच्यते॥ रो
गी विमुच्यते रोगात् दरिद्रो धनमाप्नुयात्॥ कृते चल्लद्विवेदेन ग्रंथे निर्णयदीपके॥ उत्तम ग्रत
संयुक्तो जातः षष्ठ्या विनिर्णयः॥ श्री इति षष्ठीनिर्णयः॥ अथ सप्तमी निर्णीयते॥ सप्तमीतिथि
रुपवासादिव्रते पूर्वतिथ्यन्विता पोष्यते॥ [illegible] कूर्मपुराणे॥ नागविद्धा तु या षष्ठी रुद्रवि
द्धो दिवाकरः॥ कामविद्धो न वेदिद्ध्वनेमा गार्ग्ये तु वासरा इति॥ नागपंचमी॥ रुद्रोऽष्टमी॥ दि

वाकरः सप्तमी॥ कर्मिन्त्रयोदश्री विष्णुरुद्रिनी॥ षष्ठ्येकादश्यमावास्या पूर्वविद्धा तथाष्टमी॥ स
प्तमीपरविद्धातु नोपोष्यादिकदाचनेति स्कंदपुराणवचनेनापि सप्तमी परविद्धा निषिद्धा॥ त
था॥ सप्तमी नाष्टमीयुक्ता न सप्तम्या तथाष्टमीति ब्रह्मवैवर्ते सप्तम्यष्टमीमिश्रत्वात्र तिषेधदर्श
नात्॥ षण्मुन्योरिति युग्मवाक्याच्च षष्ठीयुक्ता सप्तम्युपोष्येति स्कंदपुराणे तु परविद्धा निषि
द्ध षष्ठीसंयुक्तायाः श्रृपस्य मुक्त षष्ठ्या युता सप्तमी च कर्तव्या तात सर्वदा॥ षष्ठी च सप्तमी य
त्र तत्र संनिहितो रविः॥ तत्रेति षष्ठीयोगे सप्तम्युपवासे रविः॥ सप्तम्यधिपतिः संनिहितः संनि
धानेन व्रतानुग्राहकत्यमुमेवार्थमिह पैठीनसिरपि॥ पंचमी सप्तमी चैव दशमी च त्रयोद
शी॥ प्रतिपन्नवमी चैव कर्तव्या संमुखा तिथिरिति संमुखा सायाह्नव्यापिनी॥ एवं निगमो
क्ता॥ षष्ठ्याष्टमी अमावास्या कृष्णपक्षे त्रयोदशी॥ एताः परयुता पूज्याः पराः पूर्वेण संयुता इ
ति॥ षष्ठ्याः परा सप्तमी सा पूर्वयुतोपोष्येत्यर्थः॥ कृष्णसप्तमीविषये तु विशेषवचनाभि

धानान्नावात एतैरेव स्कंदपुराणे निगमादिवाक्यैः कृष्णापि पूर्वतिथ्यन्वितोपोष्येति दीपिकाका
रः॥ पूर्वस्यादिह सप्तमीति इति तिथिनिर्णये सप्तमी पूर्वा पूर्वतिथियुतेत्यर्थः॥ कालादर्शेति।
प्रतिपत्पंचमी कृष्णाष्टमी रते च सप्तमी॥ एता नातीपाचेल्येता उपोष्याः पूर्वसंयुता॥ अत्र सप्तमि
कृष्णा अष्टमी चतुर्दश्योः कृष्णयोः साहचर्यात्॥ शुक्ला तु युग्मे पूर्वा प्राप्तैव॥ अतएव मया पूर्वयु
तेउपोष्येइति सिद्धांतं॥ पूर्वविद्धा प्राप्त्येक्केपि पूर्वदिने सायंतिथ्यभावे निषिद्धापि परविद्धा
ग्राह्या॥ एतत्सर्वं पूर्वविद्धासाधारणं॥ नक्तैकभक्तादिकं तु कर्मकालव्यापिन्यामेवेति॥ सप्त
मीसामान्यनिर्णयः॥ अथ सप्तमीविशेषः॥ यदा शुक्लपक्षसप्तम्यां सूर्यसंक्रांतिस्तदा स्ना
नादिकमनंतफलं स्यात् इत्युक्तं भविष्योत्तरे॥ ब्रह्मोवाच॥ शुक्लपक्षे तु सप्तम्यां यदा संक्रमते
रविः॥ महाजया तदा ख्याता सप्तमी भास्करप्रिया॥ स्नानं दानं जपो होमः पितृदेवाभिपूजनं॥
सर्वकोटिगुणं प्रोक्तं यत्नेनेमहोजसा॥ यस्तस्यां मानवो भक्त्या घृतेन स्नापयेद्रविं॥ सो

ति॰हि॰ श्वमेधफलंप्राप्यततः स्वर्गपदंव्रजेत्॥पयसास्नापयेद्यस्तुयातिसूर्यसलोकतामिति॥तथा
९९ तस्मिन्नेवपुराणे॥शुक्लपक्षस्यसप्तम्यांनक्षत्रेपंचतारकं॥यदाभवेत्तदातेयाजयाना
मेतिसप्तमी॥पंचतारकमितिरोहिण्युपलक्षणंहस्तस्य॥तस्यांदत्तंहुतंजप्तंतर्पणंदेवपू
जनं॥सर्वंशतगुणंप्रोक्तंपूजाचादिदिवाकरे॥शुक्लपक्षस्यसप्तम्यांसूर्यवारोभवेद्य
दि॥सप्तमीविजयानामतत्रदत्तंमहाफलं॥स्नानंदानंतपोहोमउपवासस्तथैवच॥
सर्वंविजयसप्तम्यांमहापातकनाशनमिति॥तथा॥षष्ठीयुतायांसप्तम्यांरविवारेपुत्र
कयोविधीयते॥षष्ठीसप्तमीसंयोगेवारस्यंदेशुभाजिनः॥योगोपद्मकोनामकोटिसू
र्यग्रहैःसमइतिस्मृत्यंतरे॥कालिकापुराणे॥कृतोपवासःषष्ठ्यांतुसप्तम्यांयस्तुमानवः ९९
करोतिविधिवच्छ्राद्धंभास्करःप्रीयतामिति॥सर्वरोगविनिर्मुक्तःसूर्यलोकेमहीयते॥
तथा॥सप्तम्यांपूजयेद्रक्तैर्गंधैर्भक्त्यानुदिवाकरं॥रक्तैःस्रग्गंधकुसुमैर्महदारोग्यमा

प्नुयादिति॥भविष्यत्पुराणेतत्रमाघशुक्लसप्तमीमन्वादिरुक्तंगार्ग्येण॥आषाढस्यापिदश
मीमाघमासस्यसप्तमी॥तासुस्नानादिकंसर्वमनंतफलदंभवेत्॥इतिमाघसप्तमीविशेषः॥
अथमाघशुक्लसप्तमीअचलासप्तमी॥तस्यांप्रातःसमयेभक्त्यादिभिरस्पृष्टनवगाहितेजलेस्ना
नंसर्वपापहरंसौभाग्यदंभवेत्॥तदुक्तंभविष्योत्तरे॥यथानदत्तंनहुतंनोपवासव्रतंकृतं॥भा
स्करःपूजितःक्वापिकथंपापंप्रणश्यति॥इतिपृष्टेवसिष्ठः॥माघस्यसितसप्तम्यांसर्वकाम
फलप्रदं॥रूपसौभाग्यजननंस्नानंकुरुवरानने॥कृत्वाषष्ठ्यामेकभक्तंसप्तम्यांनिश्चल
जले॥रात्र्यंतेचाजयेद्यास्तुकृत्वाशिरसिदीपकं॥माघस्यसितसप्तम्यांमंचलंचाजितंचयत्
जलंमलानांचसर्वेषांस्मृतंप्रक्षालनंततः॥नकेनचाप्यतेयावत्तावत्स्नानसमाचरेदिति
नकेनचालितंनिश्चलंजलं॥अतएवरात्र्यंतेकिंचिज्ज्ञाननिर्णयेइत्यर्थः॥तथास्मृतिचंद्रिका॥
सूर्यग्रहणतुल्यातुशुक्लामाघस्यसप्तमी॥अरुणोदयवेलायांतत्रस्नानंमहाफलं॥अरुणो

नि॰सि॰ दयकाल आचाररत्ने चतस्रो घटिकाः प्रातररुणोदय उच्यते॥ मुनीनां स्नानकालोयं गंगांभः
१०० सदृशः स्मृत इति॥ तत्रास्तसप्तम्यां सप्तम्यां स्नाने॥ तथा च मनुः॥ स्नाने वाभ्यंजने चैव दंतधावनमैथु
ने॥ जनने मरणे चैव तत्कालव्यापिनी तिथिरिति॥ तत्र दिनद्वये तत्कालव्याप्तौ पूर्वाग्राह्या
तन्निषिद्धतिलस्य पूर्णानादावग्रे विद्यमानत्वात् यत्तु कंस्ववदि पौर्णमास्यापि परो पूज्या वितिं॥ नन्तु निषेध
व्यतिरिक्तविषये वेदितव्यं॥ अत्र विशेषोस्ति सप्तमी नाष्टमीयुक्तेति दिनद्वये कर्मकालव्या
प्तौ पूर्वातिथ्यत्वे पूर्वा तिथ्यादौ तु मवेधावाज्ञासो वृद्धिः परेह्नति॥ तावान्ग्राह्याः सप्तमेघुरेद्
ह्यापि कर्मणी त्वनेन॥ परदिने चेत्परा एव॥ तत्रागतिकत्वेन परविद्धानिषेधाभावात्॥ कर्म
णाय स्य यः काल इत्यनेनापि परा ग्राह्या॥ उपवासविषये सामान्यसप्तमीनिर्णयेन निर्णयः॥ १००
इति अचलासप्तमीनिर्णयः॥ अथ तद्व्रतविधिस्तु भविष्ये कृष्णेनोक्तो युधिष्ठिरं प्रति॥ एकभक्तेन त
तिष्ठेत्षष्ठ्यां संपूज्य भास्करं॥ सप्तम्यां तु व्रजेत्प्रातः सुगंधिनिरजलाशयं॥ सरित्सरस्तडागं वा

देवखातमथापि वा॥ सुखावगाहं सलिलं दुष्टसत्वैरदूषितं॥ अलाबुपक्षिप्तनिमग्नश्च जल गौर्म
स्य कच्छपे॥ नकेन चाल्यते यावत्तावत्स्नानं समाचरेत्॥ सौवर्णे राजते पुत्रे ताम्रपात्रे वा मृन्मये य
वा॥ तैलेन वर्त्तिं दीपं तथा महारजनरंजितां॥ इक्षुकाष्ठारमादाय जलमवगाहयेन्नरः॥ सप्तजन्म
कृतं पापं मिश्रकं देवि नश्यतु॥ यच्च जन्मकृतं पापं मया जन्मसु सप्तसु॥ तन्मे रोगं च शोकं च
माकरी हंतु सप्तमी इति॥ अर्घमंत्रः॥ समाहितमनास्त्वा दत्वा शिरसि दीपकं॥ भास्करं रुद
येध्यात्वा इमं मंत्रमुदीरयेत्॥ नमस्ते रुद्ररूपाय रसानां पतये नमः॥ वरुणाय नमस्तुभ्यं हरि
वास नमोस्तु ते॥ जलोपरि धरेद्दीपं स्नात्वा संतर्प्य देवताः॥ चंदनेनालिखेत्पद्मम् अष्टपत्रं सक
र्णिकं॥ मध्ये शिवं सपत्नीकं सवेदं वादितः क्रमात्॥ भानुर्विवस्वान्भास्करः सविता सूर्य
सहस्रकिरणः सर्वात्मा पूर्वास्तु नमस्कारांत योजिता॥ पुष्पधूपादिभिः पूजां कृत्वा सग
हमाव्रजेत्॥ ताम्रपात्रे यथाशक्त्या मन्मये वा यथाशक्तिमात्॥ स्थापयेत्तिलपिष्टं च सघृतं

ति॥ जाबालिरपि॥ नागविद्धा तु या षष्ठी नानुविद्धो महेश्वरः॥ चतुर्दशी कामविद्धा तिस्रस्ताः पूजि
ताः स्मृताः॥ नानुः सप्तमी॥ महेश्वरोऽष्टमी॥ हृदस्य नाप्युक्तं॥ एकादश्यष्टमी षष्ठी पौर्णमा
सी चतुर्दशी॥ एताः परयुताः पूज्या उपवासव्रतादिषु॥ विष्णुधर्मेऽप्यष्टमी परविद्धेत्युक्तं॥ ए
षु वचनेषु चतुर्दश्यष्टम्योः शुक्ले इति कालादर्शे व्याख्यातं॥ मत्स्येऽपि॥ नाष्टमी सप्तमी
युक्ता सप्तमी नाष्टमीयुता॥ नवम्या सह कार्या स्यादष्टमी सर्वदा बुधैः॥ एतानि वचनानि पू
र्वविद्धानिषेधमुखेन परविद्धा पूज्येत्यपराणि॥ एवं चाष्टमी विद्धा प्रतिषिद्धा वसुरंध्रयो
रित्यनेनापि च वचनेन नवमी विद्धा विहिता॥ एतच्च शुक्लपक्षाभिप्रायविषयं॥ शुक्लपक्षेऽष्टमी
चैव शुक्लपक्षे चतुर्दशी॥ पूर्वविद्धा न कर्तव्या कर्तव्या परसंयुता॥ उपवासेषु कार्येषु एष १०२
धर्मः सनातनः इति निगमस्मरणात्॥ अत्रोपवासस्यैवोक्तत्वादष्टम्याः परतिथ्यन्विता
विधानमुपवासविषयं शुक्लपक्षे अत उपवासव्यतिरिक्ते होमपूजादौ कर्मणि दुर्गा

ष्टम्यादिविशेषाष्टमी शुक्लपक्षेपि सप्तमीविद्धा ग्राह्येति॥ तदुक्तं ब्रह्मयामले॥ श्रावणी दुर्गन
वमी दूर्वा चैव हुताशनी॥ पूर्वविद्धाः प्रकर्तव्या शिवरात्रिर्बलेर्दिनमिति॥ तथा॥ मधौ मुख्येऽष्टत
पस्य आश्विनस्य तथाष्टमी॥ पूर्वविद्धैव योगिनी पूर्वा दुर्गा या होमपूजयोः॥ मधुश्चैत्रः॥ मुचि
रात्वाद॥ शुक्लपक्षे विशेषरूपनिबंधेपि॥ चैत्राष्टमी माघसिताष्टमी च दूर्वाष्टमी चाश्विनजा
ष्टमी च॥ एताश्चतस्रः प्रथमेह्नि कार्या यदि द्वैधा रवृमासस्य च या तृतीया॥ प्रथमेह्नि तिथिर्व
तिथ्यन्विताऽन्यथा वत्॥ पूर्वतिथ्यन्वितकालविशेषानुक्तेपि अन्वितामात्रेति प्रथमाहश्चे
ध्यां क्रियमाणस्य होमपूजादेर्दैवकर्मत्वेन पूर्वाह्णो दैवो अपराह्णः पितर इति॥ तथा॥
पूर्वाह्णे दैवकं कर्मापराह्णे तु पैतृकमित्यादिस्मृतिस्वरसानुरोधेन पूर्वाह्णयोगयुक्ता पू
र्वतिथ्यन्विता ग्राह्येत्यर्थः॥ तद्भिन्नो विशेषस्तु महाष्टमीनिर्णये निरूपयिष्यत इति शुक्ला
ष्टमी॥ अथ कृष्णाष्टमी तु पूर्वविद्धा ग्राह्या॥ तदुक्तं गार्ग्येण॥ कृष्णपक्षेऽष्टमी चैव कृष्णप

शेचतुर्दशी॥ पूर्वविद्धा तु कर्तव्या परविद्धा न कस्यचित्॥ अत्रैव व्रतेऽपि॥ कृष्णाष्टमी तथा रंभा
तृतीया वटपैतृकी॥ षष्ठ्येकया तथा ग्रस्त न कर्तव्या सन्मुखा तिथिः॥ पूर्वविद्धेत्यर्थः॥ स्कंदपु
राणे॥ कृष्णाष्टमी चतुर्दशी सावित्री वटपैतृकी॥ पूर्वविद्धेति॥ इत्यादिवाक्यैः कृष्णाष्टम्याः पूर
र्वविद्धाविधानात्॥ यानि तु पूर्वविद्धानिषेधकानि तानि तु विद्धो महेश्वरः॥ नवम्यायुताष्टमी
त्यादीनि शुक्लाष्टमीविषयाणि॥ कृष्णाष्टमी पूर्वेत्यप्यन्तितापोषेति सिद्धं॥ अष्टम्यष्टमी
नवम्योर्योगे उमामहेश्वरः पूज्य इत्युक्तं भोजराजीये॥ अष्टम्यां पूज्यते रुद्रो नवम्यां ब्रह्मकि
रयति॥ द्वयोर्योगे तु संप्राप्ते पूजयेत् महाफलमिति॥ तत्राष्टमीनवम्योर्युग्म एव शिवव्रता
नयोरुभयोः पक्षद्वयेप्यष्टम्यां परविद्धा॥ तदुक्तं पद्मपुराणे॥ अष्टम्यां नवमीविद्धा नव
म्या चाष्टमी तया॥ अर्द्धनारीश्वरप्रायमुमामाहेश्वरी तिथिः॥ अष्टमी नवमी युग्मे महा॰ १०३
महोत्सव॥ शिवव्रतमौ शिवक्षेत्रे पक्षयोरुभयोरपीति॥ अत उमामहेश्वरपूजने पक्ष

द्वयेप्यष्टमीपरविद्धा ग्राह्येति सिद्धं॥ नक्तैकभक्तादिकं तु कर्मकालव्यापिन्यामेवेति अष्टमी
सामान्यनिर्णयः॥ अथाष्टमीविशेषनिर्णयः॥ यदा यदाष्टशुक्लाष्टम्यां बुधवारो भवेद्यदि॥
तदा तदा कल्प्यो॥ क्रविधिना एकभक्तव्रतं कार्यं॥ तदुक्तं भविष्योत्तरे॥ यदा यदा सिताष्टम्यां बु
धवारेण वेधः हि॥ तदा तदा हि सा ग्राह्या एकभक्ता यतेन्नृप॥ पृथक्कृष्णपक्षेऽष्टमी चाष्टमीउ
र्यदि स्यात् व्रतपात्रो बुधाष्टमी तु संपूर्णा यथोक्तफलदायिनी॥ अत्रास्य योगत्वेन सर्वका
लव्याप्तिरदित्याद्यायेन॥ अथ यानिषिद्धा ता माह॥ संध्याकाले तथा रात्रौ प्रसुप्ते च जनार्दने॥ बु
धाष्टमी न कर्तव्या हंति पुण्यं पुराकृतं इति बुधाष्टमी॥ अथ माघशुक्लाष्टमी सा भीष्माष्ट
मीत्युक्ता॥ तस्यां भीष्मतर्पणं कार्यं॥ श्राद्धं चेति॥ तदुक्तं महाभारते॥ माघे मासि सिताष्टम्यां
सतिलं भीष्मतर्पणं॥ श्राद्धं च ये नराः कुर्युस्ते स्युः संततिभागिन इति॥ तर्पणमंत्रः॥ वै
याघ्रपदगोत्राय सांकृत्यप्रवराय च॥ अपुत्राय ददाम्येतत्सलिलं भीष्मवर्मणे॥

इतिजयपौष्पष्टमी॥ईश्वरःपार्वतीप्रति॥पौषेमासियदादेविशुक्लाष्टम्यांबुधोभवेत्॥तदासा
नुमहापुण्यामहारुद्रेतिकीर्तिता॥तस्यांस्नानंजपोहोमस्तर्पणंविनानेनं॥मत्पातयेन्महादे
विपूर्व्वोक्तंविधिवन्नरैरिति॥इयंभरण्यायोगेपुण्योक्ताजयंतीनाम॥अथकार्त्तिकेतुस्मृतागो
ष्टाष्टमीबुधैः॥अथाश्विनशुक्लाष्टमीनवरात्राष्टमीसामहाष्टमीत्युच्यते॥तावन्निर्णयेत्रि
रोमणौ॥ततोनीराजनंकर्मप्रतिपद्याश्विनेसिते॥प्रारभ्यनवरात्रंस्यात्स्वातिचित्राचवैधृ
तिः॥प्रतिपद्याहृतंखड्गंद्वितीयायांधंधनेतु॥तृतीयायांकरेचक्रंचतुर्थ्यांचर्मनिर्मलं॥पंच
म्यांमाहेश्वरंजपंषष्ठ्यांतुपरशुंतथा॥गदामविंन्नन्सप्तम्यामष्टम्यांशक्तिमुत्तमा॥नवमी
चसदादेव्यास्त्रिंदिदश्यविनाशिनीति॥तथाविश्वरूपनिबंधे॥कात्यायन्याःपुरायस्मान्नव १०५
म्यांमहिषोहतः॥तेनपतस्मात्सदाष्टम्यांनवम्यामर्चयेच्छिवामिति॥नवम्यांपूज्यतइति॥
देवीपुराणेप्युक्तं॥सततंजयंतिदुष्कारैर्विघ्नोच्छेदनतत्परा॥नवम्यांपूजितादेवीददात्यनरांक्ष्म

फलं॥सापुण्यासापवित्राचसाधन्यासुखदायिनी॥तस्यांसंपूजनीयाचचामुंडामुंडमालिनि
त्वादिवाकंपनवम्यांदेवीपूजनप्रशस्ततत्राष्टम्यांदेवीपूजाप्रशस्तोक्तमनविष्णोत्तरे॥तत्राष्ट
म्यांभद्रकालीदक्षयज्ञविनाशिनी॥प्रादुर्भूतामहाघोरायोगिनीकोटिभिःसहा॥अ
तोऽर्थंपूजनीयासातस्मिन्नहनिमानवैरिति॥तत्रैवदेवमहात्म्ये॥अष्टम्यांचचतुर्दश्यांनव
म्यांचैकचेतसः॥श्रोष्यंतिचैवयेभक्त्यामममाहात्म्यमुत्तमं॥माहात्म्यस्त्रवपाठ॥तस्यपू
जापूर्व्वकालाद्दष्टम्यांनवम्यांचपूजनमभिहितं॥विश्वरूपोपि॥अष्टम्यांचनवम्यांचज
गन्मातरंमंबाकां॥तत्रकर्यकुंपाष्पूजांतासामेवप्रदक्षिणां॥गवानुगवामनेकार्यंसर्व
कामानवाप्नुतेति॥पूजयित्वाश्विनेमासिविशोकोजायतेनरइत्यतोष्टमीचतिथीनां
क्त्यासहद्विसंभावनयाहोमपूजादौनिर्णतुमहत्तइतितावदष्टमीनिर्णीयते॥आश्विनशुक्ला
ष्टमीमहाष्टमी॥तदुक्तंपराणसमुच्चये॥धोम्येनआश्विनेमासिशुक्लानुयास्यान्महालेन

नि॰ द्वि॰ चाष्टमी॥ सा महत्यष्टमी ज्ञेया तत्र देवीकृतालया॥ अष्टम्येव मूलेन स्वत्र युक्ता महानवमीत्य
१०५ च्यते॥ सा पूर्वविद्धा ग्राह्या॥ तदुक्तं विश्वरूपनिबंधे॥ आश्विनस्य तु शुक्लपक्षे तु अष्टमी मूलसंयुता।
यदि स्याद्द्विविद्धापि सा महानवमी स्मृता॥ रविविद्धा सप्तमी विद्धा॥ तथा तत्रैवोक्तं॥ महाष्ट
म्याश्विने मासि मुक्ता कल्याणकारिणी॥ सप्तम्या हि युता कार्या मूलेन तु विशेषतः इति॥ मू
लेनैतिसमव्याप्ति न्यायं तन्मूलस्यापि दोषप्रजा दौ पूर्वविद्धायुता ग्राह्या॥ तदुक्तं तत्रैव॥ मूले
न पूज्यते देवी तथा च जनदैवते॥ वैश्वदेवे तु नक्षत्रे पूजिता दुःखदा भवेदिति॥ अतो महाष्टमी
पूर्वाह्णयोगयुक्ता चेत् पूर्वतिथ्यन्विता कार्या॥ शुद्धायामविवादः इति॥ ननु नाष्टमी सप्तमीयुक्ता
न सप्तम्या तथाष्टमी॥ नवम्या सह कार्या स्यादष्टमी सर्वदा बुधैरिति॥ तथा॥ नगविद्धा तु सा षष्ठ् १०५
मानु विद्धं महेश्वर॥ चतुर्दश्यां कामविद्धा तिस्रः स्याम जिना स्मृता॥ तथा षण्मुन्यो रिति युग्मवा
क्यमिति ब्रह्मवैवर्तनीवा॥ इति युग्मवाक्यादिभिः परविद्धा विधौ तद्दर्शनात्॥ नो न राजीये पू

र्वविद्धाष्टम्यादिनिंदा॥ तथा॥ पुत्रान्हंति पशून् हंति हंति राष्ट्रं सराजकं॥ हंति जातानजातांश्च स
सप्तमीसहिताष्टमी॥ तस्मात्सर्वप्रयत्नेन सप्तमीविधसंयुता॥ वर्जनीयाष्टमी पार्थ नित्यं वा राज्य
मन्नीपुन्निरिति॥ एवमादिभिः परविद्धायाः ग्राह्यास्यानिधानात् पूर्वतिथ्यन्विताग्रहणविरोध
इति चेत्॥ न॥ अष्टम्याः परतिथ्यन्विताग्रहणे विरोध इति ग्राह्यास्याभिधायकानां मेषादि
वचनानां समान्ययुक्ताष्टम्युपवासमान्ययुक्ताष्टम्युपवासविषयत्वं वेदितव्यं॥ प्रतिपादितं च
चाष्टमी मासाना ना निर्णये॥ माद्यष्टमी तु विश्वरूपाद्युक्तौ विशेषवाक्यैः पूर्वविद्धा विधीयते स्य
विरोध॥ तथा॥ चैत्राष्टमी माघसिताष्टमी च दूर्वाष्टमी आश्विननाष्टमी च। एताश्च तत्र प्रथम
क्रिके यद्भिद्यारव्यमासस्य च यात् तिथा॥ तथा॥ सप्तम्यामुदिते सूर्ये अष्टम्यस्तमितो यदि।
मूलजक्षसमायुक्ता पूजनीया प्रयत्नतः॥ मूलाभावेपि कर्तव्या यदि स्यात्तोयसंयुता॥ तो
यं पूर्वविद्धा नवसि ष्टः॥ धेनुः स्थिते निशानाथे अविकाप्नुयेद्बुधः॥ तैरुत्यं च बुद्धैवत्येन विश्व

क्षैकदानतः॥ पुनरपि स्कन्दे विधानिधाने स्मृत्यन्तरादुक्तं बिम्बरूपनिबंधः॥ यदाष्टमी च संप्रा-
प्यास्तं याति दिवाकरः॥ तत्र दुर्गोत्सवं कृत्वा यदि परेऽहनि॥ कुलं पुत्रं धनं राज्यं दीर्घ-
मायुस्तथैव च॥ प्रथमा चाष्टमी पूज्या ये कांक्षंति सदा सुखं॥ अथ पूर्वाष्टमी यत्र पूज्या नव-
मी मिश्रीता तु निःक्षिप्तं तत्र जातीयाहृत्रावमाणि पंच च॥ देवी निवेदये धत्र नवम्यां चेत राधि-
प॥ राज्यपीडा भवेत्तत्र कुलप्राणप्रदारिणी॥ एवमादिवाक्यैर्महाष्टम्याः पूर्वविद्धाग्रह-
णे पि सप्तम्यन्विता मान्येति प्रसंगात होमादेः कर्मणो दैववलेन परवह्नि क्रियमाणत्वात्तत्र पूर्व-
काल योगिनी चेत् पूर्वा अष्टम्याः सप्तमीविधानिधानात्तत्र विद्धायहितत्वाद्वर्णमानावास्तु
त्वंधे पि होमपूजादिकं कार्यमित्युक्तानो विप्रा॥ महाष्टम्यां भवेद्देवी नवम्यामपि पूजिता॥ दद्यो- १०६
न्निचायुरारोग्यं पतो भ्रासरूपिणी॥ विहितं त्वक्ता महाष्टम्यां मम पूजां करोति यः॥ तस्य पूजां
न गृह्णामि तेनाहमपमानिता॥ भविष्योत्तरे पि॥ अहं भगवन्महाहं तावयोरंतरं च वित॥

सर्वसिद्धिप्रदा स्यामित्राया मन्विता त्वहं॥ नवम्यां नवकाल्यान्मध्ये स्यादर्चनक्रिया॥ त-
स्माद्वै सप्तमीविद्धा कार्या दुर्गाष्टमी बुधैः॥ एवमादिवाक्यैः सप्तम्यन्विताष्टमी त्रत्रास्त॥ सप्त-
म्यन्विताष्टवास्मा निधाने पि यदा सप्तमी॥ मध्याह्नादूर्ध्वं प्रवर्तते तदाष्टमी तोधिकत्वात्सप्त-
मी बहुलेत्यक्ष्यते॥ तत्र दुर्गोत्सवं न कुर्वति॥ एतत्तु नरोपपणोक्तं॥ सप्तमी वर्द्धनेता पापर-
तस्याष्टमी यदि॥ तेन राज्यमिदं प्रोक्तं पुत्रपौत्रधनक्षयं॥ बाहुल्यं अधिका॥ सप्तमीशल्य-
संयुक्ता मोहविस्तानतोपिवा॥ पूर्वविद्धा न कर्तव्या नरकं प्रतिपद्यते इति॥ अतः तद्विधान-
निक्तापि विविष्टि हानातत्र सप्तमीशल्यसमोपहता॥ तथा॥ सप्तमीशल्यसंविद्धा वर्जनी-
या सदाष्टमी त्यादौ निमीमपराह्णमादीनां सप्तमीविद्धानिषेधक वाक्यानि सप्तम्याम-
ध्याह्नादूर्ध्वं प्रवृत्तिविषयाणि त्रायपराणीति बोद्धव्यं॥ यत्तु कौस्तुभे अष्टम्याः पूर्वविद्धा-
निधान वाक्यानि कृष्णाष्टमीविषयाणीति व्याख्यातं॥ तन्न॥ अष्टमी नवमीयुग्मे महादोषः

नि.सि. बः॥ शिवशक्त्योः शिवक्षेत्रे पक्षयोरुभयोरपीति॥ पद्मपुराणवचनेनकृष्णाष्टम्या अपि परविद्धा
प्रतिपादनादनैकांतं परत्वं॥ निर्णयामृते तु यदाहृन्यादं वमहाष्टमी नवमीयुता ग्राह्येत्यु
१७ क्तं॥ तदत्रत्यलिखितपूर्वविद्धावाक्यविचारपर्यालोचनया स्वमनीषामात्रमिति॥ अष्टम्यां च
नवम्यां चैवैवं विधेपि वाक्येष्टमीपुनवमीयुक्तेत्यसंबद्धप्रलापदर्शनात्॥ केचित्तु पूर्ववि
द्धाविधायकानां वाक्यानां क्षयविषयत्वमित्युक्त्वा दुर्गाभक्तिवाक्यमुदाहृतं॥ उत्तरास्तिथ
यो यत्र क्षयं यांति नराधिप॥ तदा पूर्वाष्टमी तुर्या निक्कमदिहति॥ पूर्वा सप्तमीविद्धा॥ एतद
प्युत्तरतिथिविषयक्षयपरं ध्यारष्टमीनिर्णये तु प्रयोगितात्क्षयमात्रेति प्रसंगोक्त्येपि
मध्याह्नव्यापेक्षया पूर्वाह्णव्यापित्यष्टमा चेत्पूर्वेति व्याख्येयं॥ तस्मात्पूर्वविद्धाप्रतिपादकव १७
चनानि मध्याह्नकाल॥ व्यपेक्षया योजनीयानि मध्याह्नात्पूर्वविद्धा मादिकर्मणि पूर्वेति
प्यन्विता ग्राह्या मध्या परेत्यष्टमीनिर्णयः॥ तथा च धौम्यः॥ आवर्तनात्पूर्वकाले नवमी स्या

त्परे यदि॥ तदा दुर्गार्चिपि पूर्वेद्युः पूर्वाह्णिके त्वष्टमी यदि॥ अर्चाहोमादिका॥ अतो महाष्टमी वन्म
हानवम्यपि व्रतपारणादौ पूर्वविद्धा पूर्वाह्णव्यापिनी च ग्राह्यान्यथा परविद्धेति तदुक्तं विष्णुध
र्मे तिवधौ नवमी सह कार्या स्यादष्टम्या सततं नृप॥ न कुर्यान्नवमी तात दशम्या तु कदाचन
योमो हाद्वामीवेधे नवम्यां चंडिकां यजेत्॥ पूजा मारो महाहोमो हयास्यात्रस्यनानयया॥ त
था॥ ब्रह्मांडपुराणे॥ आश्विने शुक्लपक्षे तु नवरात्रमुपोषितः॥ नवम्यां पारणं कुर्यात् दशम्यास
हितां न चेत्॥ दशमी मिश्रिता यत्र पारणे नवमी भवेत्॥ दुःखदारिद्र्यदा तत्र यावतो वितादि
नौ॥ तथा स्तरत्यंतरात्॥ युक्तादशम्यां नवमीकवृधियैस्ता न हानयस्य पश्चन्ति दंति॥ दुर्गानिय
त्ता॥ तिबलिपूजां नवेद्दरि व्यामशुमंत्र पाणां॥ यत्तु हिंसन अस्नि पाव्यतिरिक्तविषयं॥
एतत्कृतपारणाहावष्टम्यासत्तानिधानपूर्वदिने पूर्वाह्णिनवमीसद्भावे सति वेदितव्यं॥ अ
ष्टम्यन्विते पूर्वाह्णिनवम्यभावे तु परतिथ्यन्विता ग्राह्या॥ तदुक्तं देवीपुराणे॥ अष्टम्यामुदिते

सूर्योदिनांतेनवमीनवेत्॥ दिनांतेभपराह्णमागेतदापरविद्धा अत एव॥ अष्मातेवतिलिदा नेव

कियन्मात्रापिलभ्यते॥ नवम्यांतत्र संज्यादुर्गादुर्गाच्चिंगानाचाने॥ तस्त्ररांसापितत्रैवोक्तं
सूर्योदियेपरंरिक्तापूर्णास्यादपरायदि॥ बजिदानंप्रकर्तव्यंतत्रदेवाःशुभावहवदंति॥ अत॥
नक्तयन्तिवमीतानदशम्यानुकारावनं॥ करोतिधर्मदिरणदवामीसंयुताकृतेतिदासमि
विद्धातदिनायिसूर्योदियेपरंरिक्तेत्यनेनग्रह्वास्तानवमीसहकायस्यादशम्यामततेंत्वपु
त्रादिनिरष्टमिविद्धायांविधिबलिनाश्वव्यनरूछयापूर्वाक्तिव्यापिनीचेत्पूर्वान्यथापरविद्धेत
नवमीतिनिर्णयः॥ पूर्वविद्धातिद्वितापिमहाष्टमीतिनिर्णयहृदौनवम्यनुरोधेनग्राह्या॥ होमपार
णयो। संलग्नातायथास्यादितिमहाष्टमीनवमीतिनिर्णयः॥ अथाश्विनशुक्लप्रतिपदादिन १०८
वमीपर्यंतंनवरात्रमिति॥ तत्रोतिकर्मतंत्र्याताधौम्येनोक्तं॥ आश्विनेमासिशुक्लेस्यकर्त
व्यंनवरात्रिकं॥ प्रतिपदादिक्रमेणैवयावच्चनवमीभवेत्॥ एकभक्तेननक्तेनस्वशक्त्या

याचितेनच॥ पूजनीयानवैदेवीस्थानस्थानेपुरेपुरे॥ अत्यहंदेव्याःपूजनाशक्तौतुत्रिरात्रं
पंचरात्रंवानवरात्रंविशेषतः॥ कर्तव्यमितिकमेश्च आपुरारोग्यसिद्धये॥ त्रिरात्रंवापिकर्त
व्यंसप्तम्यादियथाक्रमं॥ भूतप्रेतापिशाचानांनाशार्थंचोत्सवायतं॥ तथाव्रतखंडे॥ यस्य
यस्यहियादेवीकुलमार्गेणसंस्थिता॥ तेनतेनचसापूज्याबलिगंधानुलेपनैः॥ नैवेद्यै
र्विविधैश्चैवपूजयेत्कुलमातरं॥ नाजिकेरैश्चकूष्मांडैःश्रीफलैश्चविशेषतः॥ ततोबजिंदद
न्मेध्यामजमादिमेध्यकैः॥ रक्तमांसैर्बलिंदद्याज्जैरवीप्रीयतामिति॥ पशुवधमांसादि
स्त्रिपविषये॥ श्रीकृष्णेनाप्युक्तं॥ महानवम्यांयेदेव्याहन्यंतेमहिषादयः॥ सर्वेतेस्वर्गमि
यांतिघ्नंतांपापंनविद्यते॥ नवनीशागयोच्चाणायेषांयांतायुधिष्ठिर॥ तेषांस्वर्गेचिरंवा
सोवीरास्तेप्सरसांप्रियः॥ पुनरपिधौम्यः॥ पुण्यामहानवम्यांसाक्रियानामुत्तमातिथि
भावानीतत्रसंपूज्यासंवत्सरंसुखायचेति विश्वरूपोपि॥ अष्टम्यांनवम्यांचजगन्मा

नरमंत्रिकां॥ पूजयित्वाश्विने मासि विशोको जायते नरः॥ अष्टमीरात्रिमासाद्य पूजांगरूढातिपा
र्वती॥ निशायां पूजिता देवी वैष्णवी पापनाशनी॥ तस्मात्सर्वप्रयत्नेन अष्टम्यां निशि पूजयेत्॥
नवम्यां बलिदानं तु प्रकर्तव्यं सदा बुधैरिति॥ नवमी दशमी विद्धापेक्षं वैत्तिकबुद्धयः॥ हस्त
याते षां म वेस्मार्व बलिपूजादिकं तथा॥ एवं तु पूजनं कुर्यात्प्रतिवर्षे नराधिप॥ तथा नवरा
धिया॥ त्रिषु प्रत्यहं कुमारिकाः पूज्या इति॥ तदुक्तं स्कंदपुराणे॥ एकैकां पूजयेत्कन्यामे
कवृद्ध्या तथैव च॥ द्विगुणं त्रिगुणं वापि प्रत्येकं नवकं तथा॥ एकवर्षा तु या कन्या पूजार्थं तां
विवर्जयेत्॥ गंधपुष्पफलादीनां प्रीतिस्तस्या न विद्यते॥ कन्यकां सुरूपां तु॥ अरोगिणीं सु
रूपांग्यां व्रणवर्जितां॥ समानवंशसंभूतां कन्यां सम्यक् प्रपूजयेत्॥ तथा ब्राह्मणी सर्वकार्या
र्थेषु जयार्थे नृपवंशजा॥ लाभार्थे वैश्यवंशोत्था सुतार्थे शूद्रवंशजा॥ दारुणे अंत्यजाती
नां पूजयेद्विधिना नरः॥ भोजनैः श्वेतवस्त्रैश्च गंधपुष्पाक्षतादिभिः॥ श्रीदेव्या कुमारी॥

पोच पूजाविधिस्तन्मंत्राः कुमार्यो निधानानि च विश्वरूपनिबंधादिग्रन्थांतरप्रसिद्धास्ता
न्नलिखिता इति महाष्टमीनवमीतिकर्तव्यता विधिः॥ अथ नवरात्रगतः सूतकादिविचारे वि
चारविशेषः प्रस्तूयते॥ व्रतादिकेषु प्रारब्धेष्वंतरा सूतकादिपाते प्रारब्धमात्रकरणे सूत
केन स्यात्॥ तदाह विष्णुः॥ व्रतयज्ञविवाहेषु श्राद्धे होमे च नित्यजपे॥ प्रारब्धे सूतकं न स्या
दनारब्धे तु सूतकं॥ सूतकमिति मृतकस्याप्युपलक्षणं॥ विष्णुनाप्यारंभोप्युक्त इति॥
प्रारंभो वरणं यज्ञे संकल्पो व्रतसत्रयोरिति॥ एतन्मकर्मस्विप्रोक्त्या विश्वरूपनिबंधे॥ अ
श्वीनस्यामले पक्षे प्रारब्धे नवरात्रके॥ ह्याव्व सूतकसमुत्पन्ने क्रियाः कार्याः कथं बुधैरित्या
शंकयोक्तं तत्रैव॥ प्रवृत्ते नवरात्रे तु सूतकं च यदा भवेत्॥ देवीपूजा प्रकर्तव्या पशुपतवि
धानतः॥ तथा॥ सूतके पूजनं प्रोक्तं दानं चैव विशेषतः॥ देवीमुद्दिश्य कर्तव्यं तत्र दोषो न
विद्यते॥ इति सूतकेपि पूजादिकं विहितं कर्मादि मिस्तु निषिद्धं॥ काम्योपावासप्रक्रांते

नि॰दि॰

११०

त्वंतरामृतसूतकयोः॥तत्रकाम्यव्रतंकुर्याद्दानार्चनविवर्जितं॥अंतरामृतकेपिकाम्यंनामव्रतंकु-
र्यात्॥सूतकमध्येपरित्यक्तदानार्चनादितदैवतेकांतंकुर्यात्॥तदाहमत्स्यः॥सूतकांतेनर-
स्नात्वासंपूज्यविप्राजयित्वाजनार्दनं॥दानंदत्वाविधानेनव्रतस्यफलंसुनियतव्रते॥तत्कर्तव्यंनु-
फल्यमश्नुतइति॥जनार्दनितिमतेदेवतोपलक्षणं॥सूतकविषयेकालादर्शेप्युक्तं॥पूर्व-
संकल्पितयद्व्रतंसुनियतंव्रतं॥तत्कर्तव्यंनरैःशुद्धंदानार्चनविवर्जितमिति॥एवंपूर्वैर्निबंधा-
कैःसहविरोधदर्शनात्॥अयंदानादिनिषेधोव्रतसमाप्तिविषयेसिद्धान्नदानादौव्यवस्था-
प्यते॥सिद्धान्नदानमत्रसूतकेनावदर्शनात्॥तदाहमरीचिः॥लवणेमधुमांसेचपुष्प-
मूलफलेषुच॥शाककाष्ठतृणाद्यप्सुदधिसर्पिःपयःसुच॥शुष्कपक्वेषुवसर्वेषुनाशौचंमृत-
सूतकेइति॥लवणइतिलवणादिगुडशर्करादावुपलक्षणं॥यत्तुविष्णुः॥दोषसवयस्तेषुअं-
णमृतसूतके॥सपूर्वसंकल्पितान्येषुनदोषःपरिकीर्तितइतिदक्षस्मृतिवचनमपिसि-

११०

द्धान्नातिरिक्तविषयेदोषाभावपरं॥सिद्धान्नविषयेमिरस्यानिषेधउक्तः॥अन्नसत्रप्रवृत्तानामा-
ममन्नमगर्हितं॥भुक्त्वापक्वान्नमेतेषांत्रिरात्रंतुपयःपिबेदिति॥सूतकान्नस्याभोज्यत्वंयमे-
नाप्युक्तं॥उभयत्रदशाहानिकुलस्यान्नंनभुज्यतइति॥उभयत्रसूतके॥मृतकेकुलस्यसू-
तिकिकुलस्यसूतकेवान्नमानुष्याणांनिषिद्धंकिमुतदेवानामिति॥तस्मात्सूतकेषुका-
म्यफलघृतादिभिस्तत्रोक्तकर्मकर्तव्यंपारणसिद्धान्नसाध्यकर्मव्रतसमाप्तिंचसूतेकुर्या-
त्॥रजस्वलापिस्नातेंव्रतसमाप्तिंकुर्यादितिदुक्तंकालादर्शे॥सूतकेमृतकेवापिदानार्चन-
विवर्जितं॥अंतेकुर्याद्द्विजोदृष्ट्वापतिवान्यंनियोजयेत्॥पतिव्यतिरिक्तमन्यंपुत्राद्यंनावे-
वदितव्यं॥सत्यव्रते॥प्रारब्धेदीर्घतपसांनारीणांयद्रजोभवेत्॥नतत्रापिव्रतस्यस्यादु-
परोधःकदाचनेति॥पंचमेहनिसंशुद्धावेपिकर्मेचकर्मणी॥तिष्ठनातंत्रव्रतसमाप्तिंकु-
र्यादिति॥स्वकर्तृकमपिपूजादिकसूतकेसमस्तत्यन्येनकारयितव्यमन्येरोमवंदितिसू-

कविचारविशेषान्निर्णयि॥ अथनवरात्रेनवमीयावत्प्रत्यहंशस्त्राणांगजाश्वानांचपूजोक्ता
मतिदुक्तंदेवीपुराणे॥ लोहाभिसारनामास्वनवम्यंतंदिनवत्समहाबलः॥ सदैवैःसमरेःकुर्वैर्वकिंधमाक
ल्पितंतदंगसंनवंसवेलोड्यलदत्तपतेक्षितौ॥ शस्त्राणांमंत्रैर्होतव्यंपयसंघृतसंयुतं॥ शस्त्रा
णांचैवकर्तव्यंहोमन्नोपास्तिधारणं॥ विजयार्थंगजाश्वानांपिंडमेकैकमर्पयेत्॥ पूजयेद्रा
जचिह्नानिफलमाल्यविलेपनैः॥ राजचिह्नानिछत्रचामरादीनिपूजामंत्राअंतरखंडादेर
वगंतव्याइति॥ अभिषेकश्चकर्तव्योगजाश्वानांदिनेदिने॥ तथातत्रैवअश्वयुक्शुक्लप्र
तिपत्स्वातियोगेप्युक्तेदिने॥ पूर्वमुच्चैःश्रवानामपूजयेच्चततःपरं॥ पूजनीयाःश्वतुरंगा
नवनवमीयावद्दिवादिवा॥ नचवाह्याःकचन्तत्रनचताड्याःकथंचनेति॥ अथवर्णगोपथे
ब्राह्मणेतुनवम्यामपराह्णेवाहानसमापयीत्वाविचित्रैर्वासोभिरलंकृत्यगंधपुष्पादिधि
दुर्वाक्षतादिनानाविधफलैर्नानाविधान्नादिभिःशांतिसूक्तैर्मंगिरैर्भ्यमेरीपटहादिवा

द्यैश्चसहपूजयेत्॥ अश्वपूजामंत्र॥ गंधर्वकुलजातस्त्वंमाभूयाःकुलदूषकः॥ ब्राह्मणसत्य
वाक्येनसोमस्यवरुणस्यच॥ प्रभावाच्चहुताशस्यवर्धयत्वंतुरंगमान्॥ तेजसाचैवसूर्यस्य
मुनीनांतपसातथा॥ रुद्रस्यब्रह्मचर्येणपवनस्यबलेनच॥ स्मरत्वंराजपुत्रत्वंकौस्तुभंच
मणिंस्मर॥ निष्कृतोयदिवाछिन्नोयुद्धेघ्नन्तिःतुरंगमरिपून्विजित्यसमरेसहभर्त्रासु
सुखीभवेतिमंत्रः॥ अथहस्तिपूजामंत्र॥ कुमुदैरावणौपद्मःपुष्पदंतोथवामनः॥ सुप्रती
कोंजनोनीलइत्यष्टौदेवयोनयः॥ तेषांपुत्राश्चपौत्राश्चवनान्यष्टौसमाश्रिताः॥ पांतुत्वांव
सवोरुद्राआदित्याःसमरुद्गणाः॥ भर्तारंरक्षनागेंद्रस्वामीवत्प्रतिपाल्यतां॥ आवाहनुहि
जयंयुद्धेगमनेस्वस्तिमान्भव॥ इतिमहाभ्युदयः॥ अथमहानवमीप्रसंगादपराजिता
पूजनंनिर्णीयते॥ आश्विनेशुक्लपक्षेस्याद्दशम्यांचापराजिता॥ पूजनीयानरैःसम्यकै
कदिवपाकदाचन॥ ईशानादिशमाश्रित्यापराह्णेप्रयत्नतइति॥ विश्वरूप॥ मूलेनाम

मनं देव्याः पूर्वविद्धासु पूजयेत्॥ तत्र रामुबलिं दद्याच्छ्रवणेचापराजितां॥ तथा॥ याः पूर्णानव
मीयुक्तातस्यां पूज्यापराजिता॥ क्षेमार्थं विजयसिद्ध्यै विधिनानरैः॥ नवमीशेषायुक्तायांद
शम्यामपराजिता॥ ददाति विजयं देवी पूजिता जयवर्धनी॥ नवमसहकार्यास्याद्दशमि
सर्वदा बुधैः॥ नकार्याद्विशमीतात एकादश्याकदाचन॥ तथा॥ दशम्यां रुद्रयुक्तायां पूज
येदपराजिता॥ महाप्रजाप्रिये तत्र कृतमप्यकृतं भवेत्॥ रुद्र एकादशो देवस्थानमपिदश
म्यां नवेत्॥ तदुक्तं विश्वरूपनिबंधे॥ इंद्रस्यानमीदं यस्माद्दशम्यां हि प्रकीर्तितं॥ तस्माद्वि
जययात्रां तु नैकादश्यां कदाचन॥ जंभः शक्रेण निहतो दशम्यां तत्र स्थितेन तु॥ तस्माद्द
शम्यां कुर्वंति सीमोल्लंघनमादरात्॥ श्रवणर्क्षे तु पूर्णायां काकुत्स्थः प्रस्थितो यतः॥ उल्लंघ
येयुः सीमानं तद्दिने र्क्षे ततो नरा इति॥ श्रवणइति संज्ञयाभिश्रयं॥ तदभावे केवलापि दश
म्युक्ता॥ स्कंदपुराणे॥ दशमीयः समुल्लंघ्य प्रस्थानं कुरुते नरः॥ तस्य संवत्सरं राज्ये ११२

न क्वापि विजयो भवेत्॥ अतः अपराजितापूजने प्रस्थाने च दशम्येव मुख्या॥ तदुक्तं जयेन
तिथिः शरीरं तिथिरेव कारणं तिथिः प्रमाणं तिथिरेव साधनमिति॥ तथा च विश्वरूपः॥ दशा
दिनमतिक्रम्य करोत्येकादशीदिने॥ सीमायालंघनं तस्य नैहिकामुष्मिकं फलं॥ तथा
च गर्गः॥ तिथिष्वविद्यमानेषु कर्म कुर्वंति ये नराः॥ वृथा न वेकृतं तस्य आत्मानं नरकं न
येदिति॥ तस्माद्दशम्यामेव प्रस्थानमपराजितापूजनमिति च॥ अपराजितापूजने मंत्रं
जयायैविजयादेवि अजिताय पराजिता॥ अपराजिता जगन्मातः कुंडलधेति
नानते॥ अपराजिता रुद्ररता करोतु विजयं मम॥ त्वं चापराजिते देवि शत्रूणां क्षयमाव
हारारोग्यमैश्वर्यं प्रस्थाने सकलं यच्छ मे॥ दिक्षु मे विजयं देवि नमस्ते च पराजिते॥ इति वि
श्वरूपनिबंधात्॥ तथा गार्ग्यः॥ इषसंध्यामतिक्रांतः किंचिदुन्नतारकः॥ विजयोनाम
योगोयं सर्वकार्यार्थसाधकः॥ तत्रापराजितापूजनं प्रस्थानं च दशम्यां तु पूजयेत्॥ तदुक्तं म

नि०सि० पर्वणि गोपथब्राह्मणे॥ अथापराजितादशम्यां पूर्वोक्ते विजयमुहूर्ते ऐकं प्रास्थानिकं॥ पतंग
११३ ध्वजाद्यामहे तथा॥ त्रातारमिन्द्रमः॥ अनेनमंत्रा॥ हृद स्वस्तिर्नः परिः॥ पगान्रराजाशमीतरुंग
छेत् गतदर्पैतिश्लोकाः॥ अजं कृतेन्द्रपितंद्र स्वर्गेः पुरिष्कृतोतुंगतुगरंगनारा॥ वादित्रना
दनतिनादिताशाः सुमंगलाचारमपरंपराश्च॥ राज्ञानिर्गत्यनवास्तुरोह्नितपुरोगमः॥ प्रस्था
निकं विधिकृत्वात्रतिष्ठेत्स्ववृतीदिवि॥ गत्वानगरसीमांते वा सुपूजां समाचरेत्॥ संपूज्य
पायद्विक्याजान्पूजयोत्सुपिदेवता॥ मंत्रैर्वैदिकपौराणै॥ पूजयेच्च शमीतरुं॥ अमंगलानां
शमनीं शमनीं शमनीं दुःकृतस्य च॥ दुःस्वप्ननाशिनीं धन्यां प्रपद्येहं शमीं शुभां॥ तथा शमीश
मयते रोगान्शमी शमयतेरिपून्॥ शमी शमयते पापं शमी सर्वार्थसाधनी॥ अर्जुनस्य ध
नुर्धारी रामस्य प्रियदर्शिनी॥ लक्ष्मीण प्राणदात्री च सीताशोकनिवारिणि॥ शमीं संपूज्य ततः ११३
कृत्वाथ पूर्वस्यां दिशि विष्णुक्रमान्क्रमेत्॥ रिपोः प्रतिकृतिं कृत्वा ध्यात्वा चाभिमनसा तथा॥

शरेणास्य यसुरेखेन विध्येत्हृदयमर्मणि॥ दिक्षु विजयमंत्राश्च पठितव्याः पुरोधसा॥ एवमे
व विधिकुर्याद्दक्षिणादि दिक्षास्वपि॥ स्मृत्यंतरे॥ वामदक्षिणपार्श्वेषु गरस्थायान्त्रिकापु
नः॥ अपराजिते नमस्तेस्तु वरदे कामपूजिते॥ यात्रामंकरिष्यामि सिद्धिसवंत्रमेकुरु॥ पुरो
हितंच संपूज्य पूजनीया द्विजास्ततः॥ जयमंगलशब्देन ततः स्वभवनं विशेत्॥ य एवं कुरु
ते राजा वर्षे वर्षे सुमंगलं॥ आयुरारोग्यमैश्वर्यं विजयं स च गच्छति॥ इति विजयादशमीनि
र्णयः॥ विजययात्राप्रसंगात् शुक्राभिमुखी यात्रा निर्णीयते॥ शुक्राभिमुखं प्रयाणं न कु
र्यादित्युक्तं विश्वरूपनिबंधे॥ प्रतिशुक्रं प्रतिबुधं प्रत्यांगारकमेव च॥ ललाटगे दिगीशे वा
न सीमां लंघयेद्बुधः॥ शुक्रस्य त्रिविधाः संमुखं तत्फलं रत्नमालायां॥ उदयति दिशि यस्यां
यातियत्राशमाशां विचरति च नवके चैषु दिक्षारकेषु॥ त्रिविधमिह सितस्य प्रोच्यते संमुखं
च मुनिभिरुदय एव त्यज्यते॥ तत्रापवादः॥ शुक्रो यस्यां दिशि प्रागुदेति॥ स्वपिवेत॥ प्रहराष्ट

केनदिगष्टकंभ्रमति॥ एवंलमात्यस्यांयाति चक्रतिकादयःसप्तपूर्वस्यांमघाद्यास्तिसप्तदक्षि
णस्यांअनुराधादिसप्तपश्चिमायांधनिष्ठादिसप्तोत्तरस्यामेतानिदिग्द्वाराणि॥ येषुक्षिपुर
ति॥ एवंत्रैविध्येपिसन्मुखत्वेस्मृतिभिरुदयएवत्याज्यते॥ प्रतिशुक्रगमनेदोषश्चकोप
या॥ स्वल्पोपिनाथः प्रतिशुक्रयानेपियासतांसिद्धिमुपैति॥ नूनमिति॥ एकग्रामादौप्रति
शुक्रगमनेपिदोषाभाव॥ तदुक्तं॥ एकग्रामेपुरेवापरिणयनविधौधमतीर्थादियाने दुर्भि
क्षेचातिभीतौनृपद्विजगुरुर्विधतेसम्मुखेवाप्यवामो॥ सिद्धान्त्रेप्यपत्न्यांगिरसन्तगुप्तुवाकम्पपो
ष्वेषुवापिमारद्राज्ये पुत्रापिद्विजवरनिवहाकीर्त्तयंत्येवमाद्याः॥ सत्यव्रतपुरप्रवेशोदेवां
नांविप्लवेतथोद्वाहे॥ नववध्वागृहागमने प्रतिशुक्रविचारणानास्तितथा॥ पौष्णादिवह्निपा ११४
दैकंयावत्तिष्ठतिचन्द्रमा॥ तावच्छुक्रोभवेदंधःसम्मुखंगमनंशुभमिति॥ बुधत्रेतिकादा
पिनगच्छेत्॥ तदाहप्रजापतिः॥ एवंविधेयास्त्कुजितेप्रयाया हुधोयदिस्यादनुकूलंनैव व

तोद्दुजम्मृयतेगतिस्यनान्येग्रहाराणाविधौसमर्था॥ आस्फुजितशुक्रः॥ इंदुजोबुधः॥ त
थाबुधशुक्रौप्रयाणेसन्मुखौदक्षिणास्थौचवर्जनीयौ॥ तथान्यत्र॥ वारुण्यादिक्फदिते
शुक्रेपूर्वेत्रिरेघापात्॥ प्राच्यादिरफदिनेशुक्रेपुनरपरायाम्योदिक्षोपायादिति॥ तथा॥ पूर्व
तोस्तुदितेशुक्रेप्रयायाद्दक्षिणोत्तरे॥ पश्चादभ्युदितेचैवपायात्पूर्वोत्तरेदिशौनिवचना
तरं॥ तथातेनैवसर्वदायात्राप्रसूतोक्ताकाजविशेषेपूर्वाह्णेचोत्तरांगच्छेन्मध्याह्ने
पूर्वतोव्रजेत्॥ अपराह्णेव्रजेयाम्यामर्द्धरात्रेतुपश्चिमां॥ नतस्यागारकोविष्टिर्नचाशनेश्च
रजंभयं॥ व्यतिपातोनदुष्येतचयस्याकोदक्षिणस्थितइति॥ इतिशुक्रयात्रानिर्णय॥
अथगुर्वष्टमीव्रतमुक्तंभविष्योत्तरे॥ श्रेतउवाच॥ मालिन्नाकृपदेराजानशुक्लेपक्षेयदा
ष्टमी॥ गुरुवारेणसंपूर्णासितिपिधमविर्द्धनी॥ गुर्वष्टमीव्रतेकार्यंसर्वपापप्रणाशनं
प्र बुधाष्टमीसदकृत्यस्यतेनफलमाप्नुयात्॥ ज्योदनंचनोक्ताव्याषष्टिकान्नमय

नि॰सि॰ पिबेत् ॥ एकभक्तं प्रकर्तव्यं संपूज्य च बृहस्पतिं ॥ कपिला गौः प्रदातव्या संपूर्णव्रतहेतवे ॥ एत
त्पवित्रं परमं व्रतं मोक्षप्रदायकमिति ॥ शेषो व्रतविधिस्तत्खंडादवगंतव्य इति गुर्वष्टमी ॥ अ
११५ थ भाद्रपदशुक्लाष्टम्यां ज्येष्ठानक्षत्रयुक्तायां ज्येष्ठां देवीं पूजयेत् ॥ तदुक्तं लिंगपुराणे ॥ क
न्यार्केपाष्टमीयुक्ता ज्येष्ठर्क्षे समिद्धति स्मृता ॥ अलक्ष्मीपरिहाराय ज्येष्ठां तत्र प्रपूजयेदिति ॥
कन्यार्केऽभाद्रपदे काश्यादयोऽपि ॥ भाद्रे शुक्लाष्टमी ज्येष्ठानक्षत्रेण समन्विता ॥ महतीकीर्तिता
तस्यां ज्येष्ठां देवीं प्रपूजयेत् ॥ तथा प्रतिवर्षं क्रियमाणं ज्येष्ठाव्रतं केवलेन नक्षत्रेणैव कार्यं
तदुक्तं मत्स्यपुराणे ॥ प्रत्याब्दिकं तिथावुक्तं ज्येष्ठादैवतभे व्रतं ॥ प्रतिज्येष्ठाव्रतं ॥ यत्तु विहि
तं केवलोऽदुतिः ॥ अत्र विशेषः ॥ ज्येष्ठर्क्षेण तु संयुक्ता यदा भाद्रसिताष्टमी ॥ पदेज्यदेवीं ११५
प्रपूज्याथ द्रव्यमभ्यर्चयित्तदा ॥ पूजामंत्रः ॥ ज्येष्ठरूपायै नमो देव्यै ज्येष्ठता ॥ च यया तवं ॥ त
पा मम मापि ज्येष्ठत्वं ॥ कुरु पूजां गृहाण मे ॥ अत्रशस्यं च पत्रिं चि ज्येष्ठे देवि गृहे मम ॥ स्थि

स्येकुरु तस्मै वलिक्ष्यो वर्द्धयमे गृहे ॥ इति ज्येष्ठा ॥ अमावास्या ॥ कथं ॥ दृष्टचंद्रं यदा सा स्यान्त ज्यचे
ति अमावास्या स्याद्दर्शः स्याज्यादेन्तो मर्त्तिमाः अमावास्याः इयं मासामति भावयेत् अमावास्येति ज्येष्ठा ॥
अथ वान्यच्च दृष्टस्याचिता दृष्टस्य अमाब्दस्य न्या देवो इयमी सा मतिभावयेन दृष्टा ज्येष्ठेतीष्ट
अतस्य पेयपरे प्रकृते काजिति न्य पुराब्द का चेत्तात टिल्लो पो न भवति ॥ मस्येति चेत्स्य कारलो
पश्च न भवति ॥ एवं ज्येष्ठा अमावास्या देवा दृष्टावा ॥ अमावास्या या अतिशौये न दृष्टा या च ज्येष्ठा
या ॥ पूजनानुरोधे न ज्येष्ठत्वेऽपि ॥ क्रियमाणं दूर्वाव्रतं न दोषमावहतीत्याह ॥ अतो ज्येष्ठा
च दृष्टं विसंपूज्य व्रतमाचरेदिति ॥ ज्येष्ठर्क्षे कोवलाह भवति पूज्येति ज्येष्ठाष्टमी ॥ अथ दूर्वाष्टमी
निर्णीयते ॥ सा शुक्लापि पूर्वविद्धा स्मृता तदुक्तं पुराणसमुच्चये ॥ शुक्लाष्टमी तिथिर्यातु मासि
भाद्रपदे भवेत् ॥ दूर्वाष्टमीति सा ज्ञेया पूर्वविद्धा बुधैः स्मृतेति ॥ विष्णुरूपोऽपि ॥ चैत्राष्टमीमा
घसीताष्टमीं च दूर्वाष्टमीं वाश्विनजाष्टमीं च ॥ एतास्तु तस्याः प्रथमे क्रियासु पादित्युक्तं याक

 ष्टदुष्टदोषोपि॥ श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी। पूर्वविद्धा तु कर्तव्या शिवरात्रिर्बलेर्दि
नमिति॥ भाद्रपदाष्टम्यां दूर्वाष्टमी ज्ञेयेति स्कन्दपुराणे॥ नन्दस्य व्यतिरेकेण अष्टमी या तु पूज्यते
 न। ततो येन निमित्तेन तस्यां काकवन्ध्या च जायते॥ अतो भाद्रपदाष्टमी दूर्वेति तत्र दोषचतुष्ट
यसंभावना॥ यथा॥ पुराणे भाद्रपदे मासि मूलर्क्षेऽष्टम्यां च भारत। दूर्वामभ्यर्चयेद्भक्त्या
ज्येष्ठामूलां च वर्जयेदिति। ज्येष्ठायोगो मूलयोगोऽगस्त्ये इति दोषद्वयं॥ तथा सिंहस्थे चोत्तमा।
सूर्ये त्वनुदिते मुनिसत्तमे। दूर्वा ततैव कर्तव्या सर्वकामफलप्रदा॥ वेवृन्दकी वाक्यादग
स्त्योदयस्तृतीयो दोषः॥ तथा॥ शुक्ले भाद्रपदे मासि दूर्वासंज्ञा तथाष्टमी॥ सिंहस्थे सा च क
र्तव्या न कन्यार्के कदाचनेति कन्याकस्थितु तुर्यो दोष इति दोषचतुष्टयं॥ एतद्दोषवत्त्वे नित्या दा
वाप्ति स्मृत्यन्तरे। दूर्वाष्टमी सदा त्याज्या ज्येष्ठामूलर्क्षसंयुता ज्येष्ठामूलयुता दूर्वा अप
त्यानि निहन्ति सा॥ स्कन्दपुराणे॥ अगस्त्य उदिते तात पूजयेद्यस्तु तां दूर्वां वैधव्यं पुत्र

कं च दशजन्मानि पंच च॥ तथा॥ कन्यागते सवितरि पूजयेद्यस्तु तां दूर्वां॥ विषकन्या भ
वेत्सा तु सप्तजन्मानि पंच चेति॥ एवं भाद्रपदाष्टम्यां तद्दोषचतुष्टयमध्येऽन्यतमेनापि युक्ता
तदा कार्यमिति॥ तत्र पक्षद्वये तोत्तरम्॥ भाद्रपदेऽगस्त्योदये श्रावणकृष्णाष्टम्यां कु
र्यात्तदा दूर्वका॥ श्रावणे कृष्णपक्षे तु पूजयेद्यस्तु तां दूर्वां॥ अष्टवर्षकृतं पापं दहत्येकापि
चाष्टमी॥ अत एव दीपिकाकारः॥ दूर्वा यदि तनु यात्तत्र भ्रष्टस्तु कृष्णाष्टम्यामगस्त्योदय इति।
तथा॥ कृष्णमासे तु संप्राप्ते तत्रस्येन्दूदये मुने॥ श्रावणे दूर्वा कर्तव्या तत्र दोषो न विद्य
ते॥ तत्रस्ये मुनेरगस्त्यस्योदये सति तस्माद्वर्षकृष्णा श्रावणेऽलक्ष्ये॥ अथवा भाद्रे मास्येतद्दोष
वत्यामपि दूर्वामिष्ट्वाऽपि केनचित्कारणेन कृतं कार्यमिति दूर्वापुराणोत्तरे॥ कर्तव्या चैकभक्ते
न ज्येष्ठामूलं यदा भवेत्॥ दूर्वामभ्यर्चयेद्भक्त्या नैवध्यं दिवसं तपेदिति॥ तथा॥ व वाधानि
कानि वपक्तिकर्मे ध पूजा दूर्वाष्टमी फलं विरूढविरूढकनागराणि॥ स्त्रीणां व्रतानि

नि॰द्वि॰ निखिलान्यपिवार्षिकाणिकुर्यादिदंस्सवृतदयेनगुमनिजिस्नुरितिज्योगाक्षिणागस्त्यउदितेसति
११७ फलरूढादेर्निषेधदर्शनादग्निमकर्मस्यतुत्वातमितिगम्यते॥इतिद्वितीयपक्षः॥एकभक्तस्य
मध्याह्नोत्तरकालीनत्वात्पूजामध्याह्नेकार्याद्विवयि॥इति॥दतुदपूजनेपुराणसमुच्चयेदो
षउक्तं॥नपूजयतियादूर्वामोहादिहयमाविधि॥त्रीणिजन्मानिवैधव्यंजन्मतेनात्रसंशयः
तस्मात्संपूजनीयासाप्रतिवर्षंविधूननैः॥सुखसंतानजननीभर्तुःसौख्यकरीतथेति॥प्रति
वर्षंद्वादशवर्षपर्यन्तमिति॥एवंपूर्वोक्तपक्षद्वयेपुत्रवत्यपिसदोषायांगागायामष्टम्यांनिषेध
वचनेषावल्यात्मावणकृष्णाष्टमीश्रेयसीति॥तत्रव्रतपूजनासंभवेद्वितीयःपक्षोभाद्रकृष्णाष्ट
मीतिमुक्तं॥निर्दोषात्वेज्ञात्वाभमासाष्टमीतिसिद्धांते॥अत्रविशेषाकारस्यदोषोनत्वकन्यादोषः ११७
ज्ञमीतकानांनचमलदोषः॥भाद्रमासेतुशुक्लपक्षेदूर्वाग्निपूज्याकथ्यायेतिसिद्धां॥दूर्वा
नमस्येमुनिभिःप्रतिपाशुक्लाष्टमीसानवमीयुताच॥दुष्यातमपूजेनचन्नाकस्तेकन्यागते

केपिटनेोदयेपि॥इदंवचनद्वयंस्पतदूर्वाविषयं॥यत्तुविकल्पेनपरविद्धाविधानं॥मदनरत्नेरो
हिणीष्टम्याएवाचायदिवापरा॥दूर्वाष्टमीतिसाकार्याज्येष्ठामूलंविवर्जयेत्॥एतदपिदिन
द्वयव्यापित्वेपरविद्धायरत्येवनकिंतुज्येष्ठादिदोषयुक्तापूर्वात्याज्येत्येवंपरं॥यथानीतिन्न्रा
स्त्रोवरहाल्लाद्वत्यंपीतसप्रत्राणहरंविषं॥नतुदष्टधनाघस्यन्मगकुटिजमुखं॥अत्रवि
खनक्षणंनविहितंकिंतुधनात्पस्याऽरूपितस्यमुखवालोकनप्रतिषिद्धत्वात्॥पूर्ववि
द्धाविधानतत्त्वेदेवपरविद्धानिषिद्धेतितथापियदिवापरेतिपरविद्धाभिधानंततदिनद्वये
कर्मकालव्याप्तौपिचेत्तदाज्येष्ठामूलयुक्तापूर्वापिपरित्यज्यपरविद्धापिकार्येतिल्लापनार्थ
मितिनिरहस्यं॥ज्येष्ठान्वितायातुज्येष्ठापूजनपूर्वकंदूर्वाग्नितमर्तकान्येष्ठानिर्णये॥दूर्वा
ष्टमीनिर्णयः॥अथदूर्वाग्नितविधिरादित्यपुराणात्॥शुक्लाष्टम्यांतुसंप्राप्तेमासिभाद्र
पदेतथा॥दूर्वाग्नितानांसुम्नेनासुन्नसौरोनिगामिती॥पूजयेद्धतमानीयगंधमाल्यानुलेप

ते॥ पूजामंत्रः॥ त्वं हर्षे भरतजन्मासि वंदितासि सुरासुरैः॥ सौभाग्यसंततिं देहि सर्वकार्यक-
री भव॥ यथाशाखाप्रशाखाभिर्विस्तृतासि महीतले॥ तथा ममापि संतानं कुरु त्वमजरा-
मरं॥ फलमूलैः सनैवेद्यैर्धूपदीपैः समर्चयेत्॥ अग्निपक्वं तथा सर्वं न निवेद्यं कथंचन॥ नो-
क्तं व्रतपारणमत्राग्निपक्वविवर्जितं॥ तथा॥ भविष्यपुराणे॥ ततः संपूजयेद्दूर्वां प्राग्वत्फ-
लैर्नानाविधैर्द्विजः॥ अनग्निपक्वमश्नीयाद्घृतदधिफलं तथा॥ दद्यात्फलानि विप्रेषु फ-
लाहारः स्वयं भवेत्॥ एवं पुण्या पापहरा अष्टमी दूर्वासंज्ञिता॥ चतुर्णामपि वर्णानां स्त्रीज-
नानां विशेषतः॥ इति दूर्वाष्टमीविधिनिर्णयः॥ तथा चैत्रसिताष्टम्यां क्षेत्रविशेषे धि-
ष्ण्यदेवताविशेषपूजनादारोग्यं तेष्टम्यां जायते तदुक्तं स्कांदे नागरखंडे॥ हाटके-
श्वरक्षेत्रे विश्वतीर्थसमीपतः॥ धारानामेति विख्याता शांकरी लोकवरप्रदा॥ तां प्रतिवर्-
ष॥ चैत्रमासे सिते पक्षे अष्टमीदिवसे स्थिते॥ यस्तु पूजां करिष्यति श्रद्धया परया युतः॥ ते

सर्वं संवत्सरं यावत् भविष्यति निरामयः॥ तस्माद् अत्रैव स्थातव्यं सदैव श्रमवाक्यात् इति॥ तथा॥
अरुंधत्या स्वयं कृतेन स्तोत्रेण स्तुत्वा तां प्रत्यक्षं॥ स्तोत्रेणानेन भवती स्तुता चक्रकृतेन ते॥
वंध्यापि या भवेन्नारी संस्तूया पुत्रसंयुता॥ दुर्भगापि च सौभाग्यरूपा रूपसंयुतेति॥ शापि-
तान्तेरुंधती प्रत्यक्षा वाच धारेति॥ अत्र यो नागरो भक्त्या समागत्य तपस्विनि॥ त्वदृश-
णात्रयं कृत्वा मम फलत्रये॥ सोपि संवत्सरं यावद्भविता रोगवर्जित इति॥ तथा या नारी दु-
र्भगा वंध्या सापि पुत्रवती भवेत्॥ चैत्रमासि सिता पष्टाम्यां भक्तो वेशो समन्वितेति॥
चैत्राष्टम्यां देवीविशेषपूजाविधिः॥ अथ जन्माष्टमी निर्णीयते॥ श्रावणाष्टमी श्रीकृष्ण-
जन्माष्टमी तत्रोपवासेन पापक्षयो जायते॥ उक्तं भविष्योत्तरे श्रीकृष्णेन॥ मासि भा-
द्रपदेष्टम्यां निशीथे कृष्णपक्षके॥ शशांके वृषराशिस्थे ऋक्षे रोहिणिसंज्ञिते॥ योगेस्मि-
न्वसुदेवाद्धि देवकी मामजीजनत्॥ उपवासं तु यः कुर्यात्तस्मिन् जन्मदिने मम॥ स

नि॰ दि॰ ष्णजन्मकृतात्पापान्मुच्यते नात्र संशयः॥ भाद्रपदशतिकृष्णप्रतिपदादिमासास्त्रिथायेण॥
११९ तथा चोक्तं विष्णुरहस्ये॥ प्राजापत्यर्क्षसंयुक्ता कृष्णा नभसि चाष्टमी॥ मुहूर्तमपि लभ्ये
त सैवोपोष्या महाफला॥ मुहूर्तमध्यरात्रव्यापीति॥ इयं तु रोहिणीयुक्ता या विशेष॥
यत्कल्पातिशयजनकत्वं महाफलत्वं॥ मुहूर्तमध्यरात्रव्याप्तिवचनात्॥ जयंतीशब्दवा
च्यत्वं च विशेषतः॥ अर्द्धरात्रादधः सार्द्धकला यावाद्यदा न वेत्॥ जयंती नाम सा प्रोक्ता स
र्वपापप्रणाशनी॥ अन्यच्च सनत्कुमारेणोक्तं॥ शृणुष्वावहितो राजन् कथ्यमानं मया त
व॥ श्रावणस्य तु मासस्य कृष्णाष्टम्यां नराधिप॥ रोहिणी यदि लभ्येत जयंती नाम सा ति
थिरिति॥ अत्र पदोत्कचारणा॥ रोहिणीयोगः संभवासिन्नाय इति॥ योगेऽसौ गेवोन्प ११९
त्रोपावासाकारणे प्रत्यवायश्रवणात्॥ यथा॥ न करोति यदा विष्णो जयंतीसंभवं व्रतं॥ य
मस्य वशमापन्नः सहते नारकीं व्यथां॥ तथा॥ गर्धमांसे खरं कांक्षेपतं वा मुनिसत्तम

मांसं वा द्विपदां नुक्तो कृष्णजन्माष्टमीदिने॥ अतीतानागतं तेन कुलमेकोत्तरं शतं॥ पाति
तं नरके घोरे योऽभुंक्ते कृष्णवासरे॥ तथा॥ श्रावणे बहुले पक्षे कृष्णजन्माष्टमीव्रतं॥ न क
रोति यः स भवति क्रूरराक्षस इत्यादिभोजननिंदावाक्यैर्जन्माष्टम्यामुपवासव्रतं लभ्यते॥
यथा॥ अपत्रावीवा अन्ये गोमूत्रस्यः पत्रावीगोअस्मादिवत्॥ उक्तं च भाष्यकारेण न हि नि
दा निंद्यं निंदितुं प्रवर्त्तते॥ अपितु निंद्यादन्यं प्रशंसितुं॥ अतस्तत्रोपवासः परास्त इति॥
अयं तु धूर्यदेवकास्तदोजयंतीसंभवं व्रतं॥ कर्त्तव्यं वित्तमानेन नभक्त्या न कृतं नैरपि॥
अकुर्वन्याति निरयं यावदिंद्राश्चतुर्दशेति॥ तथा॥ प्राजापत्यर्क्षसंयुक्तं कृष्णा नभ
सि चाष्टमी॥ वर्षे वर्षे तु कर्त्तव्या तुष्ट्यर्थं चक्रपाणिनः॥ इत्यादिवाक्यजातं तुष्ट्यर्थं चेत्
पापानि नश्यंति॥ तुष्टिलक्षणफलस्य वन्नंतविधर्मे॥ ते न काम्यत्वे सत्यपि वर्षे वर्षे इति वी
प्सायुक्तत्वात् वसंते ज्योतिष्टोमेन यजेत॥ संवत्सरे संवत्सरे सोमयाजीति वत्तु नित्यमपि काम्य॥

त्वेनित्यत्वमेकादशीवदविरुद्धं॥ नताकारयोनरेकपातादिदोषदर्शनात्॥ शुद्धविद्धेनयप
क्षेफलंपक्षेपोष्यमितितदयनिर्णेतव्येति॥ अथश्रावणकृष्णाष्टमीशुद्धविद्धानक्षत्राधिकादिने
दनिर्णयापिमध्यरात्रव्यापिनीत्वेनग्राह्येति॥ तदुक्तंविष्णुधर्मोत्तरे रोहिणीसहिता कृष्णा
श्रावणेमासिचाष्टमी॥ सप्तम्यामर्द्धरात्राधः कलयापिभवेत्॥ तत्रजातोजगन्नाथःकौ
स्तुभीहरिरव्ययः॥ तमेवोपवसेत्कालंकुर्याच्चजागरं॥ अर्द्धरात्रेतुयोगोयंतारापत्युद
येसति॥ नियतात्मासुचिःस्नातःपूजांतत्रप्रवर्त्तयेदिति॥ वह्निपुराणे॥ सप्तमीसंयुताष्ट
म्यांनिशीथेरोहिणीयदि॥ भवितासप्तमीपुण्यायावच्चंद्रदिवाकराविति॥ यदिरोहिणीस्प
र्वविद्धास्का॥ अष्टम्यांनिशीथव्यापित्वेपियदापुनरर्द्धरात्रेरोहिणीयोगः॥ पूर्व १२०
स्मिन्नादिनेतेकार्यंतदुक्तंमदनरत्ने॥ अर्द्धरात्रेतुरोहिण्यांयदाकृष्णाष्टमीभवेत्॥ तस्या
मभ्यर्चनंशौरेर्हंतिपापंत्रिजन्मजं॥ सोपवासोहरेःपूजांतत्रकृत्वानसीदति॥ एतेनार्द्ध

रात्राद्धःपतितायामष्टम्यामुपवासइत्युक्तं॥ ननुकार्यविद्धासप्तम्यारोहिणीसिता
ष्टमी॥ तत्रोपवासंकुर्वतितिथिभांतेचपारणमिति॥ अनेनब्रह्मवैवर्त्तवचनेनसप्तमी
विद्धायांरोहिणीसहितायामष्टम्यामुपवासंविधायद्वितीयदिनेतिथिभांतेपारणंवि
धीयते॥ पारणंहिपारयतेर्ल्युडंतं अभोजननिषिद्धकालेतिथिभांतोयदातदारात्रौपार
णंस्यात्॥ तच्चनिषिद्धंगारुडपुराणे॥ अन्यतिथ्यागमोरात्रौतामसस्तेनसोपिवा॥ त
मसेपारणंकुर्वन्तामसींगतिमश्नुतइति॥ अत्रोत्तरकालादर्शनियंत्यापूर्वविद्धायांमु
पवासंसमाचरेत्॥ तिथ्यंतेचोत्सवांतेवाव्रतीकुर्वतिपारणं॥ तयास्मृत्यंतरे॥ तिथ्यृक्षयो
र्यदायोगोनक्षत्रेतमयापिवा॥ अर्द्धरात्रेयदाकुर्यात्पारणंत्वपरेहनि॥ अतिथिनक्षत्रयोरं
तेपारणं॥ अथवानक्षत्रांतेद्वयोरवसानेयद्यर्द्धरात्रेभोजननिषिद्धकाले॥ तदादिवस
एवपारणंकुर्यादित्यर्थः॥ तदुक्तंब्रह्मवैवर्त्ते॥ सर्वेष्वेवोपवासेषुदिवापारणमिष्यते॥

अन्यथा पुण्यहानिः स्याद्व्रते धारणपारणमिति॥ तिथीनक्षत्रयोरेकविगमे पारणं कुर्यादि
त्युक्तं व्रतखंडे॥ रोहिणीसहिता चेयं विद्वद्भिः समुपोषिता॥ तियोगे पारणं चक्रुर्मुनयो ब्र
ह्मचारिणः॥ तथा तत्रैव॥ सांयोगिके व्रते प्राप्ते यत्रैकापि वियुज्यते॥ तत्रैव पारणं कुर्या
देवं वेदविदो विदुः॥ नांते कुर्यात्तिथेर्वापि शस्तं भारत पारणमिति॥ तदानंतमहोदारुतं॥ या
काश्चित्तिथयः प्रोक्ताः पुण्यानक्षत्रयोगतः॥ ऋक्षांते पारणं कुर्याद्विना श्रवणरोहिणीमि
ति॥ अत्र तिथ्यंते च यत्पारणमुक्तं तत्संभवाभिप्रायं॥ अंतश्च यदा भोजननिषिद्ध
काले तिथ्यंतो भवति तदोत्सवांते पारणमिति॥ अत्र तिथ्यंते च पारणं यदुच्यते तत्सं
भवाभिप्राये॥ पूर्वदिने मध्यरात्रव्यापिनी अथ यदा तिथिनक्षत्रद्वयं दिनद्वये पूर्व १२१
रात्रेसंयोगः तदा परदिने जयंतीव्रतं॥ तदुक्तं॥ अष्टम्यां रोहिणीयोगो मध्यरात्रे दिनद्व
ये॥ तद्युक्तैरैक्यकानुविधानमेवैतिपनिर्णयः॥ तथा॥ अर्द्धरात्रे भयोगो यदा रोहिण्याम

वतिकिंचित्॥ तामेवोपवसेन्मान्यामर्द्धरात्रोपयोगतः॥ परदिने मध्यरात्रयोगिनी यदासदा
वर्जनीया प्रयत्नेन सप्तमीसंयुताष्टमी॥ सऋक्षापि न कर्तव्या सप्तमीसंयुताष्टमी इत्यादि
वदनेन पूर्वस्याः सप्तमीविद्धा निषेधात्॥ एवं दिनद्वये मध्यरात्रव्यापिनी परा एव॥ अथ
यदात्यंततिथिनक्षत्रक्षये दिनद्वयेपि मध्यरात्राव्यापिनी सा॥ यद्यपि किं सास्या तुवका
लिकात्यंतेनापूर्वदिने भवेत्॥ तथापि मुहूर्त्तमात्रेणाप्यहोरात्रविद्यमानसंबंधेनोपव
सेत्प्रावास्तोक्ता विष्णुविरहस्ये॥ मुहूर्त्तमप्यहोरात्रे यस्मान्युक्तं तु लभ्यते॥ अथ सायं
रोहिणीरहितानुक्ताधिका तदा संपूर्णामुपोष्याद्धितीये किंचित्स्वांते पारणं कार्यमिति सर्व
समंजसं॥ अथ उदयानंतरं कियन्मात्राप्यष्टमी तत्संयुक्ता द्वितीयपर्यंतं रोहिणी उप
रि सकला नवमी बुधवारेण सोमवारेण वा नवेति तदाष्टमी सत्याप्युपोष्यानस्वेतिदु
क्तं स्कंदपुराणे॥ उदये चाष्टमी किंचिन्नवमी सकला यदि॥ बुधवारेण संयुक्ता प्राजा

पलक्षसंयुता॥अपिवर्षशतेनापिलभ्यतेवानवाविभो॥मुहूर्तेनापिसंयुक्तासंपूर्णासाष्टमी
भवेत्‌किंपुनर्नवमीयुक्ताकुलकोट्यास्तुमुक्तिदाविष्णुधर्मे॥तिथिनक्षत्रयोर्योगेद्वयो
वनराधिप॥पद्मपुराणेऽपिकल्पादिजन्यतेविस्तेत्याष्टम्यामिति॥पद्मपुराणे॥प्रेतयोनि
गतानांतुप्रेतत्वंनाशितंनरैः॥यैःकृताश्रावणेमासिअष्टमीरोहिणीयुता॥किंपुन
र्नवमीयुक्ताकुलकोट्यास्तुमुक्तिदेति॥बुधवारादियोगःप्रायिकः॥जयंतीबुधवारेण
वापुनर्लभ्यतेदैवयोगेनतत्रासुयोप्यमहाफलामित्यनेनतन्महा॥अथजन्माष्टमीसामान्ये
नद्यानाधिकावापिपूर्वतिथ्यन्वितोपवासेग्राह्या॥तदुक्तंमनंते॥जयंतीशिवरात्रिश्च
तुर्दश्या॥ताताह्यवयुताःकार्यास्तिथ्यंतेपारणंभवेत्॥अथस्यारोहिणीसहिताविद्धा॥ज १२२
न्माष्टमीरोहिणीचशिवरात्रिस्तथैवच॥पूर्वविद्धैवकर्तव्यातिथिभांतेचपारणं॥यद
हिरात्रौतिथिभांतःस्यात्तदोत्सवांतेप्रातःपारणमित्यर्थः॥प्राक॥यद्वासप्तमीसंयुता

स्यांनलाकुर्यात्द्विजोत्तम॥प्राजापत्यंद्वितीयेऽह्निमुहूर्तमपिवेद्यदि॥तदाष्टम्यामिकंतेयं
प्रोक्तंव्यासादिभिःपुरेति॥तन्नोपवासांगेउपवासस्याचाराम्नवणात्॥किंतुद्वितीयदिने
ष्टमीरोहिण्यतिक्रमेऽपिपारणंगत्वेनक्रियमाणब्राह्मणभोजनादिकंसंकल्पत्वादि
धानेनाष्टमीरोहिण्योरेवकृतंभवतीतिमहाफलत्वमुपवासवत्प्रयत्नापत्ति॥जन्माष्ट
मीनिर्णयः॥अथपद्यंमत्वादिनतदुक्तं॥श्रावणस्याष्टमिकृष्णातथाभाद्रीचपूर्णिमेत्यादि
तथामन्वादौचयुगादौचदत्तमक्षयतामियात्॥तथा॥अष्टम्यांदिवाभोजनंनक्तंपति।
तदुक्तंतत्राष्टम्यांदिवानक्तंरात्रौभुक्त्वाचपर्वणि॥एकादश्यांदिवारात्रौभुक्त्वाचांद्राय
णंचरेत्॥अथभाद्रपदकृष्णाष्टमीमहालक्ष्म्याष्टमीतत्रलक्ष्मीव्रतंकरोति॥तदुक्तं॥अ
ष्टमीपुष्यसंयुक्ताकृष्णाभाद्रपदेतुया॥तत्रलक्ष्मीव्रतंकार्यंयावद्वर्षाणिषोडशे
ति॥पुष्यसंयोगःसंभवाभिप्रायः॥कन्यासंक्रांतेरुत्तरभागेगतेसूर्येवितआरंभतद्धा

नि॰ सि॰ पतेच समाप्तिं न कुर्यात्॥ तदुक्तं ब्रह्माण्डपुराणे॥ ग्री ये चिंन भाद्रपदे सिताष्टमी आरभ्य क
१२३ न्यार्द्धगतेन सूर्येण समाप्ये तत्र तियौ च यावत्स्पष्टि पूर्वदिग्गतो युवत्याः॥ युवत्याः क
न्यायाः॥ अस्मिन्व्रतेष्टमी चंद्रोदयव्यापिनी ग्राह्या॥ तथा च॥ अर्द्धरात्रमतिक्रम्य वर्त्तते यो
त्तरा तिथिः॥ तस्यां तदा तियौ कार्यं महालक्ष्मीव्रतं शुभं॥ चंद्रोदयोर्द्धरात्रिमुहूर्त्तव्यापि
न्यष्टमी चेत्परा नवमीविद्धा न चेत्पूर्वा॥ तदुक्तं॥ पूर्वाविद्धा परविद्धा वा ग्राह्या चंद्रोदये स
दा त्रिमुहूर्त्तापि सा पूज्या परतश्चोर्द्ध्वगामिनीति॥ तथा पूजनोपारणस्थेन अष्टमी ग्राह
विधिष्विय॥ दौर्गे स्यात्तु निःसंपत्का सर्वसंपत्करीति तिथिरिति॥ दोषवचनं तु ष्वयंतु॥ नवमाविध
रवेः कान्यासां क्रांत्वा राढ्गतत्वं त्रिदिनं अवमं दिनं चेति॥ एतद्दोषवचनं निंद्य तत्रार १२३
मेघापवनयोर्द्धिनव्यं॥ प्रतिवर्षपरित्यक्तुमशक्यत्वात्॥ पशुपुत्रसौभाग्यराज्यायुर्ना
ग्री साधककीर्त्तिता॥ तस्मात्सर्वप्रयत्नेन त्याज्या कन्यागते रवौ॥ तदुपिस्मारस्य विष

यं॥ कन्यागते रवाविति कन्योत्तराह्नगत इति॥ यतः हस्तोत्तरदले सूर्ये द्विदुतं न समारभे
दिति वचनात्॥ पुत्रवानवमीविद्धास पोडशस्तार्द्धगे रवौ॥ धर्मघ्नी त्रिदिनेष्टोक्ता त्याज्या योवा
धमेपिसा॥ तदपि आरंभोद्यापनविषयं संभावामि आयांचा॥ स्वद्रव्या हतीति स्वघ्नी॥ यदात्रे
कः स्पृशा तिति थिद्वयावसाने वारस्त्रैव वमदिनं तदुक्तं माधवीये॥ यत्र स्पृशाति तिथिद्वय
स्य चार्को त्रिघुस्पृक्कथितमिदं द्वयं न चेष्टमिति त्रिदिनावमदिनयोर्लक्षणं ज्योतिः शा
स्त्रादिति महालक्ष्म्यष्टमी निर्णयः॥ कृतेच जन्हिवेदेन ग्रंथेनिर्णयके॥ विजयाख्यू दत्राम्या
तुतो हस्याविनिर्णीयते॥ नवमीतिथिरुपवासादिव्रते पूर्वविद्धा [illegible] ग्राह्या॥ वसुरंध्रयोर्युग्मा
वाक्याभिधानात्॥ यदा त्वतिप्लवे वक्त्री॥ अष्टम्या नवमीविद्धा [illegible] महाफलकोटिभिः॥ न
कुर्यान्नवमीं तात दशम्यां तु कदाचन॥ तेतिपैवीनसिरपि॥ पंचमी सप्तमी चैव दशमी चत्रयो
दशी॥ प्रतिपन्नवमी चैव कर्त्तव्या संमुखा तिथिः॥ संमुख [illegible] क्षव्यापिनी पूर्वविद्धा

।द्वितीयावत्॥पद्मपुराणे॥अष्टमी नवमीयुता॥अष्टमीं नवमीयुग्मं महोत्साहे महोत्सव इति॥त
था॥नवमी दशमी चैव नोपोष्या परसंयुतेत्यादिवचनेभ्यो नवम्यष्टमीविद्धा तत्रैवोपवासव्रतं नात्ये
ति सिद्धं॥नक्तैकभक्तादिव्रते तत्र तत्र दृष्टकालव्यापिनी ग्राह्यते॥कर्मणो यस्य यः कालस्त
त्कालव्यापिनी तिथिरिति वचनात्॥इति नवमीसामान्यनिर्णयः॥अथ नवमीविशेषः॥अथ भग
वतो विष्णोः सप्तमावतारस्य दशरथात्मजस्य श्रीरामस्य जन्मनवमी निर्णेष्यते॥चैत्रशुक्लनव
म्यां श्रीरामजन्म तत्रोपवासव्रतेन महाफलयुक्तमगस्त्यसंहितायां॥चैत्रमासे नवम्यां तु शु
क्लपक्षे रघूत्तमः॥प्रादुरासीत्पुरा ब्रह्मपरब्रह्मैव केवलं॥तस्मिन्दिने तु कर्तव्यमुपवासव्रतं
सदा॥नित्यमेव न वेत्ति स्मार्त श्रीरामनवमीव्रतं॥सूर्यग्रहे कुरुक्षेत्रे महादानैः कृतैर्मुहुः॥यत्फलं त
दवाप्नोति श्रीरामनवमीव्रतात्॥तथा॥प्राप्ते श्रीरामनवमीदिने मर्त्यो विमूढधीः॥उपोषणं
न कुरुते कुंभीपाकेषु पच्यते॥यस्तु रामनवम्यां तु भुंक्ते मर्त्यो विमूढधीः॥कुंभीपाकेषु

घोरेषु पच्यते नात्र संशय इति॥अतोकरणे दोषदर्शनात्॥उपवासव्रताचरणे तु ब्रह्मप्राप्तिः
स्यादित्युक्तं॥तस्मात्सर्वात्मना सर्वैः कार्यं वै नवमीव्रतं॥मुच्यते सर्वपापेभ्यो याति ब्रह्म सनातनमि
ति॥तथा॥रामार्चनचंद्रिकायां च॥मेषं पूषणि संप्राप्ते लग्ने कर्कटकाह्वये॥आविरासीत्सकल
या कौसल्यायां परः पुमान्॥चैत्रशुक्ला नवमी तु पुनर्वसुयुता यदि॥सैव मध्याह्नयोगेन महा
पुण्यतमा भवेत्॥तथा॥पुनर्वसुऋक्षयोगे स्वल्पापि यदि लभ्यते सा महाफलदा प्रोक्ता॥पुन
र्वसुऋक्षयोगत इति॥पुनर्वसुनक्षत्राभावेपि नवमी एकैवोपोष्येत्युक्तं॥रामव्रत॥केवला
पि सदोपोष्या नवमी शब्दसंग्रहात्॥तस्मात्सर्वात्मना सर्वैः कर्तव्यं नवमीव्रत
मिति॥तथा॥उपोषणं नवम्यां वै दशम्यामेव पारणं॥एतैर्वाक्यैर्नवम्यामुपवासस्तस्याव
श्यकर्तव्यत्वात्तदर्थं निर्णीयते॥सा द्विविधा॥शुद्धा विद्धेति॥शुद्धा समा न्यूना अधिका चेति
त्रिविधा॥सात्र प्रत्येकं पुनर्वसुयोगायोगौ योगभेदेन षोढा॥विद्धा तु पूर्वविद्धा मेदे नैव ह्यदशधा॥

नि॰ द्वि॰ यदा शुद्धाधिका न तदा संपूर्णायामुपोष्य द्वितीयेऽहनि तिथ्यंते पारणं कार्यमिति सर्वसं
१२५ मत ॥ अथ विद्धात्वे द्वे अपि रामो जातः कर्कटके प्रादुरासीत्तथा सैव मध्याह्नयोगेनेत्यादिवचने
न्योमध्याह्नयोगान्विता ग्राह्येति ॥ अनेन मध्याह्नानुरोधेन रामजन्मनवमीनिर्णयः ॥ निर्णयानु
रोधेन कृष्णजन्माष्टमीवदिति ॥ यथा ॥ प्रादुरासीत्स मध्याह्ने रामो दशरथिस्तथा ॥ तथैव देव
कीसुः कालेस्मिन्नूनं नंतयोरिति ॥ तस्मात्पूर्वदिने परदिने वा या मध्याह्नयोगान्विता ॥ सा उपव
सव्रते ग्राह्या ॥ तथा च रामोद्भवे ॥ चैत्रे शुक्लपक्षे तु मध्याह्ने नवमीतिथौ ॥ पुनर्वसुऋक्षयोगे जातो
रामः स्वयं हरिः ॥ तत्र संपूजनं विष्णोः सर्वकिल्बिषनाशनमिति ॥ ननु परविद्धाग्रहो विष
मं ग्रपन्यासः ॥ अष्टमीनवमीविद्धा कर्तव्या फलकांक्षिभिः ॥ नक्तपत्नी नवमी तात तदारम्या ११५
तुकाद्यवचनात् ॥ तथा च पुरंध्रयोरित्यादिना मंत्रविवर्त्तनिगमादिवाक्यैर्नवम्याः पूर्वविद्धात्वाभिधाना
त् ॥ सत्यं ॥ विद्धानिषेधस्य वष्टीनवमीचेतिवाक्ये ॥ नवमी चाष्टमी विद्धा त्याज्या विष्णुपराय

णैरिति ॥ अगस्त्यसंहितोक्तेन वैष्णवव्रतविषयविशेषवचनेनाष्टमीविद्धानिषेधानुवादपुरःसरं
परविद्धाप्रतिपादनाद वैषम्यं मान्यविशेषन्यायेन ॥ एतेन एतदप्यपास्तं ॥ द्वितीयापंच
मीवेध्याद्दशमीचत्रयोदशी ॥ चतुर्दशी चोपवसेद्धन्तु पुर्वान्तरे तिथिः ॥ दशमी सर्वेधात पूर्व
नवमीत्यन्तरालेकाद्यादिति व्याख्या ॥ अथात्यंतत्रिपक्षे यद्वा द्वितीयेपि मध्याह्नसंयो
गाभावे ॥ तदा नवमी चाष्टमी चाष्टमी विद्धा त्याज्येत्यस्य वचनस्य मध्याह्नव्याप्तिविषये साव
काशत्वात् ॥ तिथ्यादौ तु भवेद्यावान् ह्रासो वृद्धिः परेऽहनि ॥ तावानग्रात्यः सर्वेषु रहस्ये
पि स्वकर्मणीत्यनेन पूर्वविद्धापोष्या अथ तिथिवृद्धौ परा ग्राह्या ॥ तदुक्तं माधवेन दशम्यादि
षु वृद्धिः स्याद्विद्धा त्याज्यैव वैष्णवे ॥ तदन्यथा तु सर्वेषां व्रतं तत्रैव निश्चितमिति ॥ पुनर्वसुऋयो
गे सत्यपि यदि लभ्यते सा महाफलप्रदा श्रेष्ठेति सर्वेषु पक्षेष्वेतद्योगे तत्फलविशे
तव्य इति ॥ अथ नवम्याः पुनर्वसुनक्षत्रयोगमुक्तौ यदा सा जन्माष्टमीतिथियोग

पयित्वापि स्नातव्यः॥ तत्र याः काश्चित्तिथयः प्रोक्ताः पुण्या नक्षत्रयोगतः। ऋक्षांते पारणं कुर्या
द्विना श्रवणरोहिणीमिति॥ श्रवणरोहिण्योर्मध्ये पारणं विहितं॥ अत्र नक्षत्रांतपारणमिति
विशेषः॥ पारणे दशमीं नैव लंघयेदित्युक्तं अगस्त्येन॥ दशमीं नैव लंघयेदित्युक्तं अगस्त्येन
दशम्यामेव शब्देन दशमीं नैव लंघयेत् निर्मूलत्वैवं विचारेण नवमीव्रतमाचरेदिति रामन
वमीनिर्णयः॥ अथाश्विनशुक्लनवमी मन्वादिः॥ तदुक्तं॥ आश्विनवम्युभवस्तु निरूपितो
नो महाष्टमीनिर्णये॥ अथ कार्तिकशुक्लनवमी युगादिः॥ तदुक्तं स्मृतौ॥ शुक्ला तृतीया वैशा
खे प्रेतपक्षे त्रयोदशी॥ कार्तिके नवमी शुक्ला माघे दर्शो युगादयः॥ एता युगादयः प्रोक्ता दत्तस्या
क्षयकारका इति॥ युगादिनिर्णयोऽक्षयतृतीयानिर्णयोक्तः॥ अथैतद्व्रतविशेषो नि
रूप्यते॥ कार्तिकशुक्लनवमी अक्षयनवमी तत्राश्वत्थमूले तर्पणं कुर्यात्॥ तत्र विधिः॥ त्रा
नक्तं स्नात्वा समयानजल एपाति विष्णुमूर्तिं स्थापयित्वा तर्पणं प्रारभेत योगविधिना

विष्णुं संपूज्य तर्पणं कार्यं॥ तथा चोक्तं श्रीकृष्णेन युधिष्ठिरं प्रति बोधमूलेच्छितो विष्णुः कृ
रुते वीक्षणं नृप॥ कालो नागवतो मत्वा कार्तिके नवमीदिने॥ कृत्वा योगीश्वरीं मूर्तिं मा
मकीं मत्संभवां॥ पूजयिष्यति पुण्यात्मा पितॄणां मुक्तिहेतवे॥ स्नानं विलेपनं कृत्वा द
त्वा वस्त्रं सुशोभनं॥ आचार्योक्तैः श्रुतैर्मंत्रैः पूजा कार्या विधानतः॥ अथ पूजामंत्राः॥ योगीश्व
राय पादौ तु योगगम्याय जानुनी॥ महायोगाय तन्नरूम् गुह्यं ब्रह्मप्रदाय च॥ कटिं वै योग
नयस्ताय नाभिं नारायणाय च॥ योगात्मने च जठरं विश्वनाथाय वैउरः॥ कंठं विश्वस्रजे
पूज्यो बाहू विश्वेश्वराय च॥ आस्यं यज्ञपुरुषाय नासां नागेश्वराय च॥ कर्णौ दिगीशाय देवा
य जगन्नाथाय चाक्षिणी॥ भ्रुवौ निवर्ते पूज्यो ललाटं पीतवाससे॥ एवं संपूज्य देवं
शिरो वै योगमूर्तये॥ नातात्मने तथा बाहू सनाम्ना वायुधातिच॥ नमस्ते देवदेवाय यो
गेश्वर जगत्पते॥ नमस्ते सृष्टिनाथाय जगदादे नमो नमः॥ योगेश्वराय सर्वाणि एवं दे

वार्द्धनंविधिः॥अथार्घमंत्र॥संप्राप्यवारुण्यांयोगंनवम्यांकार्त्तिकेदिने॥अर्घश्चगृह्यतांदे
वसर्वकामप्रदोभव॥ततस्तुसिंचयेतराजन्अश्वत्थंविष्णुरूपिणं॥कलशांतामृमादा
यजलपूर्णंतुसव्यत॥मंत्र॥योगेश्वरायदेवाययोगगम्यायवेधसे॥परमात्मस्वरूपाय
सेवतायदुरामच॥शिवायशिवरूपायब्रह्मणेविष्णुरूपिणे॥जलमाप्याजगद्योनि
केशवःप्रीयतामिति॥ततआदायकलशंतिलदर्भजलान्वितं॥द्वितीयमपसव्येन
अश्वत्थंतेनसिंचयेत॥मंत्रः॥पितापितामहश्चैवतथैवप्रपितामहः॥मातापितामही
चैवतथैवप्रपितामही॥मातामहस्ततःपश्चात्मातामहीएवच॥वृद्धप्रमातामहा
श्चापितृगच्छंतिमांस्मृती॥अन्येयेममहस्तेनएकोद्दिष्टंश्रगोत्रिणः॥तेभ्योनीरंमयादत्तं १२७
त्स्तायांतुपरांगछंति॥ममहस्तेननीरेणबोधमञ्जेतुसिंचयेत॥आप्नुवंतिपितरोसे
परांतृप्तिंजगत्पते॥अथतृतीयंघटमादायतिलमिश्रंजलप्लुतं॥अश्वत्थंसिंचये

त्तेनइदंवाक्यमुदारयत॥मंत्र॥वृक्षयोनिंगतायेचवियोनिंचापियेगता॥मुक्तत्वं
गतायेचप्रेतत्वमागता॥सर्पयोनिंगयेचकृमियोनिंगताश्चये॥तेसर्वेतृप्तिमायांतुग
च्छंतुगतिमुत्तमां॥प्रसादात्देवदेवस्यवासुदेवस्यचक्रिणः॥एवंकृतेमहिपालअक्ष
योवैनवेत्लये॥तर्पणंचततःकार्यंविष्णुसूक्तेनसव्यतइति॥विप्रेभ्योदक्षिणांदद्याछ्राद्ध
योगादिकंततः॥इत्यक्षयनवमीतर्पणनिर्णयः॥इतिसर्वासुनवमीषुतिथ्यधिपति
र्वैनदुर्गापूजनीया॥नानाप्रकाराणिनवमीव्रतानिव्रतसमुच्चयादवगंतव्यानीति॥
कृतेचल्लद्दावेदेनग्रंथेतिथिदीपके॥नवमीनिर्णयःयोजातोरामचंद्रश्रुतान्विताइति
नवमीनिर्णयः॥अथदशमीनिर्णीयते॥अनंतभट्टात्॥दशमीयदितोदशायात्मवत्ता
संपूर्णाश्चातेएकादशी॥विद्धातदोपवासश्चतेपरविद्धाग्राह्या॥यदानवमीविद्धास्यात्द्वि
तीयदिनेउदयेप्राप्तास्वल्पादीनातदापूर्वाएवंव्यवस्थायोपवासेग्राह्या॥अपयोक्तं॥

संपूर्णादशमीकार्यापूर्वयापरयाथवा॥युक्तानदूषितायस्मादितिसामवतीमखौ॥अस्मि
न्नेववचनेव्यवस्थांविनोदमिच्छंनस्यादितियदाद्वितीयस्मिन्दिनेउदयंयोगिनी॥अपराह्णपर्य
तंनलभ्यतेतदातिथ्याग्रेणापस्तंबः॥पूर्वविद्धामाचरेत्॥दशमीतुप्रकर्तव्यासदुर्गाद्विज॥
सत्तम॥पूर्वविद्धायाअलाभेतूदयव्यापिनीग्राह्या॥स्कंदपुराणेपिदशम्यामेकादश्यांतं
गमकमक्तादिकंकार्यमिति॥दशमीप्राधान्यविहितमेकभक्तादिकंकर्मकालव्यापिन्या
मेवेतिदशमीसामान्यनिर्णयः॥अथदशमीविशेषः॥ज्येष्ठस्यशुक्लदशमीहस्तनक्षत्रेण
अंगारकवारेपंचयुक्तागंगारथ्यादिसर्वतीर्थेषुस्नानजपाद्याचरतांतपांदशविधपापह
रणात्॥दशहरेत्युच्यते॥तदुक्तंकाशीखंडे॥ज्येष्ठस्यशुक्लदशमीहस्तांगारेणसंयुता॥ १२८
कायिकंत्रिविधंचैवस्यंवाचिकंचचातुर्विधं॥भागीरथ्यादितीर्थेषुस्नानाद्याचरतांतपां॥ह
रत्याघंदशविधंतस्माद्दशहरास्मृता॥कायिकंकायव्यापारकृतंत्रिविधंप्रदाह मनुः॥

अदत्तानामुपादानंहिंसाचैवाविधानतः॥परदाराभिगमनंकायिकंत्रिविधंस्मृतं॥चित्त
व्यापारकृतंचैत्यंतदपित्रिविधं॥यथा॥परद्रव्येष्वभिध्यानं॥मनसानिष्टचिंतनं॥वितथाभि
निवेशश्चमानसंत्रिविधंस्मृतं॥वाग्व्यापारकृतंवाचिकंचतुर्विधंयथा॥पारुष्यमनृतंचैवपैशु
न्यमपिसर्वशः॥असंबद्धप्रलापश्चवाचिकंस्याच्चतुर्विधं॥एवंदशविधकल्मषहारायेपि॥
ज्येष्ठस्यशुक्लदशमीभवेद्भौमदिनेयदि॥ज्ञेयाहस्तर्क्षसंयुक्तातिथिर्दशहरास्मृता॥त
स्यांस्नानंचतीर्थेषुदशपापहरंस्मृतमिति॥ज्येष्ठशुक्लदशम्यांतुजन्हुसुतायोगेगंगा
स्वर्गादवतीर्णेत्युक्तंवाराहपुराणे॥दशमीशुक्लपक्षेतुज्येष्ठेमासिकुजेदिनि॥अवती
र्णायतःस्वर्गाद्धस्तर्क्षेचसरिद्वरा॥हरतेदशपापानितस्माद्दशहरास्मृता॥अतस्त
स्यांदशहरास्तोत्रपाठंगंगापूजनंचकुर्यात्॥इत्युक्तंस्कंदपुराणे॥तस्यांदश
म्यामेतच्चस्तोत्रंगंगाजलेस्थितः॥यःपठेद्दशकृत्वस्तुकिल्बिषान्नाशयेद्ध्रुवं॥अं

नि॰सि॰ संनिधाने गंगायां गंगासे प्रत्यहं पठेत्॥ तथा तत्रैवोक्तं॥ मं॥ स्नानकालेन्यतीर्थेषु जप्यते जाह्न
१२० वीजनैः॥ विना विष्णुपदं क्वान्यत्समर्थमघशोधनमिति॥ ब्रह्मपुराणे तु॥ केवलं हस्तयोगे द
शहरेत्युक्ता॥ ज्येष्ठे मासि सिते पक्षे दशमी हस्तसंयुता॥ संहरेद्दश पापानि तस्माद्दशहरा
स्मृता॥ यत्तु स्कंदपुराणे॥ योगबाहुल्यमुक्तं ज्येष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः॥ व्यती
पाते गरानंदे कन्याचंद्रे वृषे रवौ॥ तद्योगाधिक्ये फलाधिक्यदमिति परे॥ अन्ये तु कूर्मादि
वाक्यानामसमीचीनत्वात्॥ ज्येष्ठशुक्लस्य दशमी संवत्सरमुखा स्मृता॥ तस्यां स्नानं प्रकु
र्वीत दानं चैव विशेषतः॥ यां कांचित्सरितं प्राप्य दद्याद्दर्भतिलोदकं॥ मुच्यते दशभिः पापैः स
महापातकोपमैरिति॥ स्कंदपुराणे केवलाप्युक्तेति दशहरानिर्णयः॥ अथाश्विनशु १२०
क्लनवमीविजयदशम्यौ तु महार्णवप्रसंगान्नवरात्रनिर्णये॥ इति दशावतारव्रतं अन्यदा
स्यादि दशमीव्रतानि व्रतसमुच्चये कल्पान्तज्ञे रिवलानि इति दशमीनिर्णयः॥ अथा

षाढशुक्लदशम्यादिः॥ तदुक्तं॥ आषाढस्यापि दशमी माघमासस्य सप्तमी॥ श्रावणे
स्याष्टमी कृष्णेत्यादि॥ अथैकादशीमाहात्म्यं नारदीयपुराणे॥ एकादशीसमुत्थेन वह्नि
ना पातकेंधनं॥ भस्मतां याति राजेंद्र अपि जन्मशतोद्भवं॥ नारद॥ त्रसंगा द्वायदे मा द्वालोने
त्रिदशाधिप॥ एकादश्यामनं कृत्वा सर्वदुःखाद्विमुच्यते॥ इत्यादिस्मृतिपुराणेषु बहुवाग
मेष्वेकादशीव्रतविषयाणि नित्यकाम्यविषयरूपाणि यानि वचनानि प्रदर्शयंति॥ नित्यत्वं नाम फ
लानपेक्षत्वं॥ काम्यत्वं च फलापेक्षत्वमिति॥ यत्तु घृष्य॥ देवलः॥ न शंखेन पिबेत्तोयं न खा
देत्कूर्मसूकरौ॥ एकादश्यां न भुंजीत पक्षयोरुभयोरपि॥ अत्रायं विशेषः॥ स्कंदे॥
शुक्लवर्णः सुराहित कनकं ब्रह्म चक्रांकितस्तु यः कूर्मस्त्रियमं तं न भक्षयेत्॥ रोहितो
लोमवश्यः॥ स ब्रह्महा स गोघ्नश्च स्तेयी च गुरुतल्पगे॥ एकादश्यां तु यो भुंक्ते पक्षयोरु
भयोरपि॥ तथा वार्तिकानि च यानि ब्रह्महत्यासमानि च॥ अन्नमाश्रित्य तिष्ठंति

संप्राप्ते हरिवासरे॥रटंतीह पुराणानि भूयो भूयो वरानने॥न भोक्तव्यं न भोक्तव्यं संप्राप्ते हरिवा
सरे॥इत्येवमादीन्येकादश्युपारागतः आप्तभोजननिषेधपराणि॥चंद्रसूर्यग्रहे नाद्यादित्यादि
वदुपरागे॥अथ व्रतनिषेधो धिकारिविशेषाश्रवणादिपर्यायदोषश्रवणाच्च सर्वेषांप्रसक्ते
नतत्प्रतिषेधवन्नित्यत्ववशे एकादशीव्रतं नित्यं सदा यावदायुरित्युक्तं॥नित्योक्तिर्यथा गरुडपुरा
णे॥उपोष्यैकादशी नित्यं पक्षयोरुभयोरपि॥सदेत्युक्तेः सनत्कुमारप्रोक्ते॥एका
दशी सदोपोष्या पक्षयोः शुक्लकृष्णयोः यावदायुरित्युक्तेर्विष्णुरहस्ये॥द्वादशी न मोक्तव्या
यावदायुः प्रवृत्तिभिः॥एकादशीव्रतं न कदाचिदतिक्रमं कएवं न॥एकादशीमुपवसेन्न
कदाचिदतिक्रमेत्॥विष्णुस्मृतौ॥एकादश्यां न भुंजीत कदाचिदपि मानवः इति॥अत १३०
क्रमाद्द्विविध॥अकरणरूपमुपक्रम्याकरणंच॥अकरणे सनत्कुमारः॥न करोतीति हि
यो मूढ एकादश्यामुपोषणं॥स नरो नरकं याति रौरवं तमसावृतं॥उपक्रम्याकरणे

विष्णुरहस्ये॥समादाय विधानेन द्वादशीव्रतमुत्तमं॥तस्य भंगेन रः कृत्वा रौरवं नरकं व्रजेत्॥तथ
योगहीत्वा व्रतं मोहादेकादश्यादिकं नरः॥न समापयते तस्य गतिः पापीयसी भवेत्॥एकाद
श्यां निराहारो यो भुंक्ते द्वादशीदिने॥शुक्ले वा यदि वा कृष्णे तद्व्रतं वैष्णवं महत्॥एकादशी
मुपोषेत पक्षयोरुभयोरपि॥यथा शुक्ला तथा कृष्णा न विशेषोस्ति कश्चनेत्यादी
नि व्रतोपवासवाक्यश्रवणादुपवासविषयविधिपराणि॥अथैकादशीव्रताधिकारिणः॥प्रद
र्शिते॥कात्यायनः॥अष्टवर्षाधिको मर्त्यो ह्यपूर्णाशीतिहायनः॥एकादश्यामुपवसेत्पक्षयो
रुभयोरपि॥कूर्मः॥एकादश्यां न भुंजीत पक्षयोरुभयोरपि इति॥वनस्थयतिधर्मोयं शुक्लामेव
सदा गृही॥तथा॥एकादशीषु शुक्लासु रविसंक्रमणे तथा॥चंद्रसूर्योपरागे च न कुर्यात्पु
त्रवान् गृही॥कात्यायनो विस्नधावा यावन्न स्वस्य पुत्रेष्वेकादश्यां द्वये॥उपवासो गृहस्थस्य शु
क्लायामेव पुत्रिणः॥भुंजेन निषिधः कृष्णायामस्ति दिस्योस्तोयनेतो व्रते॥अतोयवासमकरणा

व्रतशब्दोपवासपरः॥ पुत्रिणो गृहस्थस्य शुक्लायामेकादश्यामुपवासः कृष्णैकादश्यां तु भो

जननिषेधः॥ अन्ननिवृत्तिमात्रमिति॥ तथा॥ आदित्येहनि संक्रांतावसितैकादशीग्रहे॥
व्यतीपाते श्राद्धे पुत्री नोपवसेद्गृही इत्यादिवचनपर्यालोचनया शुक्लैकादश्यामपि रविवारसं
क्रांत्याद्युपवासनिषेधनिपातेन गृहिणः पुत्रवत उपवासो न प्राप्नोतीति॥ मैवं॥ अत्र संक्रांत्या
दिनिमित्तोपवासस्यैव निषेधस्तेन तु तद्युक्तैकादश्युपवासः॥ तदाह जैमिनिः॥ तन्निमित्तोपवास
स्य निषेधं तिथेर्योयमुदाहृतः॥ प्रयुक्तं तत्प्रयुक्तस्य न विधिर्न निषेधमिति॥ संक्रांत्यादिनिमि
त्तोपवासप्रतिषेधात् एकादशीनिमित्तोपवासः पुत्रवतो गृहिणो न वृत्येव किंचित्॥ काम्यसं
क्रांत्युपवासनिषेधान्न नित्यैकादश्युपवासविषयान्न वंसि अतस्तु कृष्णैकादश्यां पुत्रवान्
गृही नित्योपवासं कुर्यात्॥ पक्षे पक्षे तु कर्तव्यमेकादश्यामुपोषणमुमिति॥ सनत्कुमारो
क्त्यावसते वसंते ज्योतिषे तिवन्नित्यत्वा॥ कूर्मे॥ सोमसूर्यग्रहे पुण्ये यावमुनिभिः स्मृतौ॥

तथा सितासिते पुण्ये एकादश्यौ विष्णुतुष्टिदे इति॥ नित्योपवासे दशम्याद्वादश्योर्नैकभ
क्तनियमः॥ तदुक्तं कात्यायनेन॥ नित्योपवासी यो मर्त्यः सायंप्रातर्मुदिनिक्रिया॥ सत्य
जेन्मतिमान् विप्रः प्रोसंस्तेह रिवासरे॥ विप्र इति सर्ववर्णोपलक्षणं॥ काम्योपवासे दश
म्यां द्वादश्यां चैकभक्तमिति वक्ष्यते॥ श्राद्धदिवसे विहितं पितृसेवितमन्नमाघ्रायोपवासं कु
र्यात्॥ तथा॥ मातापित्रोः क्षये प्राप्ते भवेदेकादशी यदा॥ अभ्यर्च्य पितृदेवानामाजिघ्रेत्पितृसे
वितमिति॥ तत्र चायं संकल्पविधिः॥ वाराहपुराणे॥ गृहीत्वौदुंबरं पात्रं वारिपूर्णमुदङ्मुखः॥
उपवासं तु गृह्णीयाद्यद्वा चार्यैर्विधारयेत्॥ उदुंबरं ताम्रं तेन घटितं दुंबरः॥ विष्णुस्मृतौ मंत्रः॥ ए
कादश्यां निराहारः स्थित्वा चैवापरेहनि॥ भोक्ष्येहं पुंडरीकाक्ष शरणं मे भवाच्युत॥ अयं च
संकल्पः प्रातरेकादश्यां स्नात्वा कर्तव्यः॥ उपवासस्य निरुक्तिर्व्यासेनोक्ता॥ उपावृत्तस्य
पापेभ्यो यस्तु वासो गुणैः सह॥ उपवासः स विज्ञेयः सर्वभोगविवर्जितः॥ पापेभ्यो व्रतं ग

तथा परिवर्जनीय दिवास्वापादिमैथुनादिश्च॥ उपावृत्तस्य निवृत्तस्य गुणैः केशवनामकीर्त्त
नादिभिः सहितस्य तांबूलादिसर्वभोगविवर्जितस्याहोरात्रावस्थानमुपावासः॥ वर्जनीयं च
तदपीति॥ ब्रह्मचर्यं तथा शौचं सत्यमामिषवर्जनं॥ व्रतेष्वेतानि चत्वारि विहितान्यपि नित्यशः॥
आमिषमांसं तस्य वर्जनं पारणाहे उपवासे प्राप्त्यभावात्॥ उपवासस्यापि व्रतत्वात् प्राप्ति
ब्रह्मचर्यपतितं च॥ स्त्रीणां समीक्षणा स्पर्शनात्ताभिः संकथनादपि॥ निःस्पंदते ब्रह्मचर्यं न दारैः
सह संविशतो न दुष्टं विन्नेतावलोकेत्या ब्रह्मचर्यं लिप्यतीत्यभिप्रायः॥ किंच॥ असकृज्जलपा
नात्सकृत्तांबूलस्य चर्वणात्॥ उपवासः प्रदुष्येत दिवास्वापाच्च मैथुनात्॥ उपवासे तथा श्रा
द्धेन दद्यात् दंतधावनं॥ दंतानां काष्ठसंयोगो हन्ति सप्तकुलानि वै॥ पुण्यस्त्रीविषयेऽभ्यासे तद्वि
शेषोक्तं॥ अभ्यंगं कारयेत्स्त्रापि गंधपुष्पानुलेपनं॥ उपवासे न दुष्येत दंतधावनमंजनं॥ १३२
तथाहारीतः॥ पतितपाखंडसंभाषणा॥ अनृतवाक्यस्तेयादिकं वर्जयेत्॥ आदिनाब्दादिसंग्र

पंचापव्यादीनां ग्रहणं॥ इह स्नेपादीनां पुरुषांयत्विन प्रतिषिद्धानामपि पुनः प्रतिषेधवचनं
तांबूलचर्वणदिवास्वापादीनां विशेषव्रतांगत्वं वेदितव्यं॥ तथा॥ यदि वाप्यसमर्थः स्यात्स्ना
नहोमजपादिषु॥ व्याहरेद्वैष्णवान्मंत्रान्स्मरेद्वा विष्णुमव्ययं॥ इदं विष्णुर्दिसादि॥ अष्टा
क्षरादि॥ अथवा नारीमंत्रः करणोपघातं वा चक्षुर्विष्णुर्भगवान्दृष्टोषु॥ नामनतपश्चात्सुस
मेहसर्वपापापघ्नं तावद्दासंतिविष्टः॥ अतः शुद्धिर्बहिः शुद्धिः शुद्धो धर्मनियोक्तृतः॥ सक
रोत्वमलेतस्मिंश्चिरे वास्मिन्सर्वदा॥ जपेत्स्नानवैष्णवान्नित्यत्र निमित्तन्तदोषगुरुण
धुलावानुसारेणामंत्रजपस्य हन्ति कल्पनीयेति॥ उपवासासमर्थत्रिति विस्तरहस्ये॥ अस
सामर्थ्ये शरीरस्य व्रतेन समुपस्थिते॥ कारयेद्धर्मपत्नीं वा पुत्रं वा विनयान्वितं॥ जगतीजातरं
चापि व्रतमस्य न लुप्यते॥ नायापिल्क व्रतं कुर्यान्नयापि॥ स्वपतिव्रत॥ असामर्थ्ये परस्तान्वं
व्रतं नेगोनजापते॥ पतिपुत्रायसंनिधाने न दत्विणादानेनान्यं नियोजयेत्॥ तथा॥ स

कनकेनतनकेनक्षीपादद्यातुरः क्षिपेत्॥ नातिक्रमेद्द्वादशींतु उपवासेत्वशक्तानामन्ततोरुद्धी
जीविनां॥ एकभक्तादिकं कार्यमादावेवद्ध्यपनोमुनिः॥ सूतकादौ पुनः॥ परमापदमापन्नेह
र्षेवासमुपस्थिते॥ सूतकेमृतके वापि नत्याज्यो द्वादशीव्रतं॥ तथा॥ सूतकेषु नरः स्नात्वाप्र
णम्य मनसा हरिं॥ द्वादश्यां तु नमोरोमन्त्रात्सूतकांते जनार्दनं॥ पूजयित्वा विधानेन भोजयि
त्वा द्विजोत्तमान्॥ सूतकांते समाप्तिं कुर्यादिति॥ कात्यायनः॥ पूर्वसंकल्पितं यच्च व्रतं सुनिय
तव्रतैः॥ तत्कर्तव्यं नरैः शुद्धं दानार्चनविवर्जितमिति शेषः॥ एकादशीव्रतं नित्यमपि संक्रा
न्त्याद्युपवासनिषिद्धे काले एकादशीनिमित्तत्वेन क्रियमाणत्वान्नैमित्तिकमपि भवति।
अथ काम्योपवासव्रतविषयाणि वाक्यानि॥ देवलः॥ दशम्यामेकभक्तस्तु मांसमैथुनव १३३
र्जितः॥ एकादश्यामुपवसेत्पक्षयोरुभयोरपि॥ देवतास्तस्य तुष्यन्ति॥ कामितं चोपसिध्यति।
अंगिरा अपि॥ सायमाद्यं तयोरह्नोः सायंप्रातश्च मध्यमे॥ उपवासफलं प्रेप्सुर्जह्याद्भक्तच

तुष्टयं॥ कूर्मपुराणे कांस्यं मांसं मसूरं च पुनर्भोजनमैथुने॥ घृतमत्यं बुपानं च दशम्यां वैष्ण
वस्त्यजेत्॥ वृद्धस्यात्॥ दिवानिद्रा परान्नं च पुनर्भोजनमैथुने॥ क्षौद्रं कांस्यामिषं तैलं द्वादश्या
मष्ट वर्जयेत्॥ तथा ब्रह्मांडपुराणे॥ पुनर्भोजनमध्वानो भाराया समैथुनं॥ उपवास
फलं हान्त्यदिवानिद्रा च पंचमी॥ इत्यादीनि यमाअन्यातो वगंतव्यानि॥ एषु वाक्ये
षु कामितं चैव सिध्यति॥ कश्चित् उपवासफलं प्रेप्सुरिति॥ कश्चिदुपवासफलं हन्त्येरे
ति॥ कामाधिकारस्यैवानुवादादवगम्यते काम्याधिकारिविषयाणीमानीति॥ तथा॥ कूर्मे।
एकादश्यां सिते पक्षे यो विष्णोः पुरतः स्वपेत्॥ स विष्णुलोकं व्रजति कृष्णपक्षे विमुच्यते॥
तथा॥ यदीच्छेद्विष्णुसायोज्यं पुत्राणामपि संपदं॥ एकादश्यां न भुंजीत पक्षयोरुभयोरपि
वसिष्ठः॥ एकादश्यां यदा रामं वारश्च सवितुर्भवेत्॥ जयोभ्या सा महापुण्या पुत्रपौत्रवि
वर्धिनी॥ इमेवामेककमनाविच्छिन्नविधयास्तत्कामविशिष्टाधिकारिणो ज्ञातव्याः॥ नात्र

त्र्यंकालस्य विभागः॥ अत्रापि संकल्पनादीनि कर्त्तव्यानि कालाद्य॥ पूर्ववदेव द्रष्टव्य॥ अथैकादशी

र्धेकोपवासइत्यवबोधायपक्षानुगताबोद्धाव्यनिर्णेष्यते॥ सापूर्णादिशमीद्वेधेति संक्षेपतउप
नोद्वैधंतत्रसंपूर्णत्वंस्कंदपुराणोक्तं॥ प्रतिपत्प्रभृतयःसर्वाउदयादोदयाद्रवेः॥ संपूर्णाइति
ख्याताहरिवासरवर्जिता॥ आदित्योदस्यत्राजनामादित्योदयेप्राप्ता॥ सैवसंपूर्णाइति॥ ह
रिवासरस्यैकादश्याःसंपूर्णत्वंमन्याद्वैर्मिकांशिपं॥ करएवोपि॥ अरुणोदयवेलायांदशमी
यदिदृश्यते॥ संयुक्तैकादशीतांतुमोहिन्यादत्तवान्प्रभुः॥ उदयोपरिविद्धातुदशम्यैकाद
शीयदा॥ दानवेभ्यःप्रीणनार्थंदत्तवान्पाकशासनः॥ तस्मात्सर्वप्रयत्नेनसंकीर्णैकादशी
त्यजेदिति॥ आतल्वदयाच्चतुर्घटिकात्मकादारभ्यपुनरुदयपर्यंतावस्थापित्वंसंपूर्णत्वं॥
अपसूर्योदयकालावस्थापिसंपूर्णत्वानुरोधेन॥ वक्ष्यमाणभेदेषुदशकादश्याद्वादश्या
पिन्युनाधिकत्वावेदीतत्वं॥ तथाष्टदशभेदनिर्न्नैकादशीतिमकरावायेणोक्तं॥ शुद्धा

त्रेधा॥ तथा॥ विद्धापि दैन्यूनसमाधिकैः॥ प्रत्येकंचपुनस्त्रेधाद्वादश्यूनसमाधिकैः॥ अस्यार्थः॥
दशमीवेधारहिताएकादशीशुद्धासंपूर्णान्युनाधिकाचेतिएवंत्रिधापिप्रत्येकंद्वादश्यांन्यून
तासमताधिकात्वत्वेनशुद्धानवधा॥ अन्यादशमीविद्धासापिशुद्धाभेदप्रकारेणनवधा॥ एते
ष्टादशभेदा॥ अथनिर्णयः॥ तत्रतावदेकादशीयदासंपूर्णाद्वादश्यांनविद्यते॥ रात्रिशेषेन्युना
वा॥ द्वादशीचसंपूर्णान्युनाधिकावा॥ तदाएकादश्यामुपवासोद्वादश्यांपारणमिति॥ नकिं
चिदुक्तंव्यं॥ दशम्याःषष्टिघटिकात्मकोन्यूनत्वेनशुद्धाखेत्सर्वासिति॥ शुद्धात्वात॥ तदुक्तंस्कं
दपुराणे॥ शुद्धायदासमाद्वीतासमक्षिप्याधिकोत्तरा॥ एकादशीमुपवासेल्लशुवैष्णवी
मिति॥ शुद्धाएकादशीमिहीनावा॥ उदयराद्धादशीसमाप्ताक्षीणाअधिकावा॥ तदाएका
दशीमुपवसेत्सशुद्धांवैष्णवींद्वादशीमित्यर्थ॥ अनेनस्कंदवचनेनचद्वादशीहीनेतिदष्टु
शुद्धायांद्वादश्यांएकादशीतिमित्रोपवासप्रतिषेधात्॥ अविद्धामितप्यविद्धापरतोद्वादशी

यदायेतदाप्यनादृते ॥ विधवायाःषड्भेदाश्चविषयांवक्ष्याम ॥ तत्राएकादशीततीमाचषष्ठीचैकत्र
योदशी ॥ पूर्वविद्धातुकार्त्तव्यायदितस्यात्परेह्नीत्यनेननिगमवाक्येनपरदिनस्त्रयोदशीयोगेकै
वाघन्नावेपूर्वविद्धाकर्त्तव्येत्यर्कः ॥ किमुतावेद्धेति ॥ तत्रातेआद्याःषड्भेदाःवेधानामातिशुद्धैनै
कादशीऊनद्वादशी ॥ १ ॥ शुद्धैनैकादशीसमद्वादशी ॥ २ ॥ शुद्धैनैकादशीअधिकद्वादशी
३ ॥ शुद्धसमएकादशीऊनद्वादशी ॥ ४ ॥ शुद्धसमद्वादशीसमद्वादशी ॥ ५ ॥ शुद्धसमएका
दशीअधिकद्वादशी ॥ ६ ॥ एषुषट्सुभेदेषुत्रयाणांतरमेकादश्युपासावात् ॥ गृहस्थैर्यति
भिश्चपूर्वकार्यइतिविश्वरूपः ॥ अयसप्तमाष्टमौ ॥ यदासंपूर्णैकादशीद्वादश्यांचक्रिय॰
न्माञ्चविघतेद्वादशीश्रुक्त्येदियान्सुनासप्तावा ॥ तदातिथिद्वयमप्युपोष्यमधिकारिभेदे १३५
न ॥ तथाचस्मरतिः ॥ संपूर्णैकादशीयत्रप्रभातेपुनरेवसा ॥ निःलुप्यतेद्वादशीतस्मिन्नुप
वासःकथंभवेदिति ॥ ब्रह्मेमार्कंडेये ॥ संपूर्णैकादशीयत्रप्रभातेपुनरेवसा ॥ अत्रकामि

गृही ॥ गृहीणांत्रायेणसकामकालात् ॥ एवमुद्रापवसेत्कामुस्कन्तरांसदेति ॥ कामोपति
रिति ॥ स्मृतिरपि ॥ संपूर्णैकादशीयत्रप्रभातेपुनरेवसा ॥ तत्रोत्तरातुपतिःक्रुयात्सुवमुवसेदृहि
ति ॥ गृहिणांकाम्योपवसेत्पूर्वानित्यैकादश्युपवासेविष्णुप्रीतयेच्चगृहस्थैरपिसदाकार्येति॰
त ॥ तदुक्तंवितानेभ्यरेणउपोष्योद्वेतिथी तत्रविष्णुप्रीणनतत्परेति ॥ अत्रद्वेतिथीउपोष्ये
सकामनिष्कामव्यवस्थायाद्वादशीवृद्ध्यभावेसतिद्वादशीवृद्धिपक्षेविशेषोनवमभेदे
शुद्धाधिकोपक्रमेकाम्याघांसमुपावासेत्परदिनेवांछाविदीनस्तदाविष्णुप्राणानरूपो
रुपवसेदितिदीपिका ॥ विष्णुरहस्येपि ॥ निःकामस्तुगृहीकुर्यादुत्तरैकादशींसदा ॥ सकाम
स्तुसदापूर्वामितिदीपिकायांनोनवात् ॥ नवात्रयोदशीपारणेनिषिद्धाराकाकायास्तु॰
प्यतेद्वादशीतस्मिन्नुपकम्याद्वादशीविरुद्धविषयएवोपवासविधानात् ॥ अत्रलुतक्र यौ
श्रुतिःनारदः ॥ द्वादशीयत्रसंभिन्नात्रिदशाधिपात्मुपोष्यततःकुर्यात्योदशीतुपारणमि

नि॰सि॰
१३६

ति॥ बौधायनः॥ कलाप्येकादशी यत्र परतो द्वादशी न चेत्॥ परतः पारणदिवसे॥ तत्र क्रतुशतं
पुण्यं त्रयोदश्यां तु पारणमिति॥ तथा द्वादशीमिश्रिता कार्या सर्वत्रैकादशी तिथिः॥ विधिवा
दशी च त्रयोदश्यां विद्यते यदि वा न चेति॥ गरुडपुराणे॥ एकोपवासो विद्धि तत्त्वतु यस्मिन्मता
सिनां॥ विद्धावापि च तत्रैव परतो द्वादशी न चेदिति॥ स सम्माहमो॥ अयन व मोत्तेद॥ यदा तु
संपूर्णैकादशी द्वादशी च कियन्मात्रा विद्यते द्वादशी च त्रयोदश्यां तदा नारदः॥ संपूर्णै
कादशी यत्र प्रभाते पुनरेव सा॥ तत्रोपोष्या द्वितीया तु द्वादशी यदि दृश्यते॥ गरुडपुराणे॥
संपूर्णैकादशी यत्र परतः पुनरेव सा॥ तत्रोपोष्या परा पुण्या परतो द्वादशी यदि इत्यादिवा
क्यपर्यालोचनया त्रयोदश्यां द्वादशीवृद्धौ द्वितीयैकादश्युपवासः सर्वैरुपोष्येति निर्णयः॥ ननु १३६
संपूर्णैकादशी यत्र प्रभाते पुनरेव सा॥ उत्तरां तु यतिः कुर्यात्पूर्वामुपवसेद्गृही इति वचनात्तद्वि
षये द्वितीयैकादश्युपवासविधिः किमिति नेष्यते॥ नैवं॥ द्वितीयोपोष्या न प्रथमेति नारदी

यगरुडवचनात्॥ अधिकारिविशेषसंबंधविरहेणाद्वितीयैकादश्युपवासविधिविषयत्व
स्य गमात्॥ इतरथा अधिकारिविशेषव्यवस्थया तिथिद्वयस्याप्युपवासविधिविषयत्वे द्वितीयाग्र
हणमविवक्षितं स्यात्॥ तस्माच्छुद्धाधिकायां सर्वैरेव परा कार्या॥ तदाह भृगुः॥ संपूर्णैकादशी
यत्र प्रभाते पुनरेव सा॥ सर्वैरेवोत्तरा कार्या परतो द्वादशी यदि॥ तथा॥ वत्सरस्यान्तरे॥ संपूर्णैकाद
शी यत्र प्रभाते पुनरेव सा॥ वैष्णवी च त्रयोदश्यां घटिकैकापि दृश्यते॥ गृहस्थोपि परां कुर्यात्पू
र्वां नोपवसेत्तदा॥ वैष्णवी द्वादशी॥ यत्तु वचनं॥ एकादशी भवेत्पूर्णा परतो द्वादशी यदि॥ ए
कादशीं परित्यज्य द्वादशीं समुपोषयेदिति॥ तत्प्राचीनवचनानि च यद्दृष्टा द्वादश्यां किंचिच्छिदे॥
कादशीं सज्जा वेद्यस्त्व्यं॥ इति श्रीछायानवमेदाः॥ एवं शुद्धाविषये निर्णयमुक्त्वाधुना दशमीवि
द्धैकादशीविषये निर्णयो निधीयते॥ यदा च दशमीविद्धैकादशी द्वादश्यां चेन विद्यते द्वादशी
च समाप्ता वा॥ तदा दशमीविद्धैकादश्यामुपवासः शुद्धैकादश्या अभावेन गत्यंतराभावात्॥

द्वितीयैकादश्युपोष्या ॥ तदुक्तं ॥ एकादशी न लभ्येत सकला द्वादशी भवेत् ॥ उपोष्या द्वादशी
विद्धा ऋषिरुद्दालकोऽब्रवीत् ॥ स्मृतिरपि ॥ त्रयोदश्यां न लभ्येत द्वादशी यदि किंचन ॥ उ
पोष्यैकादशी तत्र दशमीमिश्रितापि वा ॥ ननु ॥ दशम्यां तु गता यत्र तिथिरेकादशी भवे
त् ॥ तामुपोष्य नरो जह्यात्पुण्यं वर्षत्रयोद्भवं ॥ तथा कालादर्शेपि विद्धा स्याद्दशम्यैका
दशी यदा ॥ तदा त्वेकादशीं त्यक्त्वा द्वादशीं समुपोषयेदित्यादि स्मृतिवचनैर्विहितप्रति
षिद्धत्वाद्द्वादश्युपवास एवास्तु विकल्पो वा कस्मान्नेष्यत इति रात्रेषोडश्यां ग्रहणमेववदिति ॥
आग्नेयं रघुराणसमुच्चयात् ॥ दशमीमिश्रितापर्वविद्धा द्वादशी च विलुप्यते ॥ एकादशीम
हाभाग तत्रोपवासः कथं भवेदित्यपेक्षायामशुद्धैव द्वादशी राजन्नुपोष्या मोक्षकांक्षिभिः ॥ द १३७
शम्यैकादशी मिश्रा कर्तव्या न कदाचनेति वचनान्मोक्षकामिनां चतुर्थाश्रमिणां ॥ द्वादश्यु
पवासविध्यधिकारसंबंधत्वाद्गमात् तत्र गृहस्थादीनां द्वादश्युपवासो विकल्पो वा भवितु

मर्हति ॥ कुत्रचिद्दशमीवेधयोगदृष्टे दशमीविद्धाप्रत्यायति त्रिस्पृशा द्वादशी ग्राह्येति व्यवस्थि
कृता ॥ सापि ॥ यदा तु शुद्धा द्वादशी त्रयोदश्यां नास्ति तदा दशमीविद्धैकादश्यामुपवासः ॥
यथोक्तं ॥ एकादशी दशाविद्धा परतोपि न वर्धते ॥ गर्हितापि यतिभिश्चैव सैवोपोष्या सदा
तिथिरित्यनेन महोदाहृतानिराकृता ॥ विद्धाप्येकादशी ग्राह्या परतो द्वादशी न चेत् ॥ द्वादश्या
द्वादशीं दृष्ट्वा त्रयोदश्यां तु पारणमिति ॥ कदयिका ॥ कलायामप्यभावेनोपोष्येति रहस्य
पंचमचतुर्थौ ॥ विद्धा समस्तैकादशी समद्वादशी यथा ॥ तथा विद्धसमस्तैकादशी
न्यूना द्वादशी ॥ १०।४।२।१ ॥ चतुर्थपि च समभेदयोः पूर्वविपोष्येति गरुडोक्तिः ॥ पूर्वापि ति
निरुत्तरेति विश्वरूप ॥ अथ यदा दशमी विद्धा एकादशी द्वादश्यां च कियन्मात्रा
विद्यते द्वादशी ॥ लवमात्र त्रयोदश्यामस्ति तदा द्वितीयैकादश्यामुपवासः तदुक्तं ब्रह्मवैवर्ते
दशमीशेषसंयुक्तं यः करोति समुद्भवः ॥ एकादशीफलं तस्य द्वादशी वार्षिकं ॥ तथा ॥ ए नस्य

१०	२१	
११	२४	१
१२	२	३

नि॰ दि॰ काद्शीदशमातुसप्तम्याचतथाष्टमी ॥ पंचम्याचतथाष्टमी त्रयोदश्याचतुर्दशी ॥ आसुकार्यं
१३८ नकुर्वीतपूर्वविद्धासुवानव इतिवचनेत्योदशमीविद्धैकादश्यामुपवासविनिषेधाधिगमा
त्॥ विष्णुधर्मेएकादशीतथाषष्ठीअमावास्याचतुर्थिका॥ उपोष्याःपरसंयुक्ताःपराःपूर्वेणसं
युताः॥ इतिपरविद्धाविधानात् ॥ तथा ॥ द्वादशीमिश्रिताकार्यासर्वत्रैकादशीतिथिः ॥ द्वादशी
चत्रयोदश्यांविद्यतेयदिवानवेत्योदपिकार्येकादशीसद्भावेपरोपोष्यतिसिद्धांतइति॥ नि
वमोभेदोग्रंथेस्मिन्नुक्तीय॥ विद्धाधिकेकादशीअधिकद्वादशी॥ अस्मिन्भेदद्वितीयासर्वै
तिविश्वरूपः॥ अथादशमीविद्धैकादशीद्वादश्यांचकिंचिन्नविद्यतेद्वादशीचत्रयोदश्यां
नास्तितदापिपारणाहेद्वादश्यभावेपिद्वितीयेकादश्यामुपवासःकार्यः॥ उदयाद्दूर्ध्वमेप्ये १३८
कादशीसद्भावात्॥ ननुकलाकाष्ठामुहूर्त्तंवायदितस्यात्परेह्निद्वादशीहितित्रयोदश्या
नुपारणमिति॥ तथा ॥ एकादशीमुपोष्यैवद्वादश्यांपारणंस्मृतं॥ त्रयोदश्यांनतत्कुर्या

द्वादशीद्वादशीक्षयादित्यादिविद्धाधिकैकादशीसमद्वादशीमत्सःकूर्मपुराणादिवाक्यैस्त्र
योदश्यांपारणाप्रतिषेधात्कथंतस्यामुपवासःउच्यते॥ दशम्यनुगतायत्रतिथिरेकादशी
भवेत्॥ तत्रापत्यविनाशःस्यात्परत्रनरकंव्रजेत्॥ तथादशमीशेषसंयुक्तागांधार्यासमुपो
षिता॥ तस्याःपुत्रशतंनष्टंतस्मात्तांपरिवर्जयेदित्यादिनारदविष्णुरहस्यादिवाक्यै
र्दशमीविद्धाप्रतिषेधाद्वनश्यंभाविन्यन्यतरप्रतिषेधेत्रयोदश्यांपारणप्रतिपादकवच
नानांसद्भावादुपवासेदशमीविद्धैकादशीप्रतिषिध्यति॥ यत्तथाचोक्तं॥ एकादशीमुपो
ष्यैवद्वादशीमथवापुनः॥ मिश्रांवापिकुर्वीतनदशम्यायुतांक्वचित्॥ विमिश्रांद्वादश्या
मिश्रितां॥ द्वादश्यभावेत्रयोदश्यांपारणंप्रमास्तंवायुपुराणेरे॥ कलाप्येकादशीयत्र
परतोद्वादशीनचेत्॥ तत्रक्रतुशतंपुण्यंत्रयोदश्यांतुपारणं॥ स्मृतेरपि॥ सर्वत्रैकाद
शीकादशीकार्याद्वादशीमिश्रितानरैः॥ प्रातर्भवितुवामान्वाद्यतोनित्यमुपोषणं॥ प्रात

पारणे द्वादशी भवतु वा मा भवतु॥ विद्यमानां द्वादशीमतीक्रम्य पारणं न कर्त्तव्यमिति मिरहस्य॥ इ
त्यष्टमः॥ अथ सप्तम॥ यदा दशमीविद्धैकादशी द्वादशी च किंचिन्मात्रा विद्यते रात्रिशेषे त्रयो
दशी तदा पुत्रादारान्वच्छित अप्रवृत्तत्वात् द्वादश्यामुपोष्या॥ तदुक्तं॥ द्वादशी संगता यत्र भवेत्सैका
दशी कलाः॥ दिनक्षयेपि सा पुण्या न दशम्या कथंचन॥ तथा॥ त्रिस्पृगेकादशी यत्र तत्र संनिहि
तो हरिः॥ तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणं॥ अतो द्वितीयदिने उपवासः॥ ननु॥ एकाद
शीं च रात्रीशेषे त्रयोदशी॥ उपवासेन नक्तव्रतीपुत्रसमन्वित इति गृहीणः पुत्रवतः॥ उपवास
निषेधात्कथं स्मृत्युक्त दिनक्षयैक संक्रांतौ ग्रहणे चंद्रसूर्ययोः उपवासं न कुर्वीत पुत्रपौत्र
समन्वित इति मत्स्यपुराणे ग्रहसंक्रान्त्यादेः साहचर्याद्दिनक्षयनिमित्तोपवासो गृहिणां तु १३९
निषिध्यते॥ न तु नित्यैकादशी निमित्त इति कूर्मपुराणे॥ दिवसत्रिस्पृशायां पक्षवाधिका मसि
द्वितमिति॥ यत्तु॥ एकादश्यां यदा विद्धा द्वादशी च क्षयं गता क्षीणा सा द्वादशी तेषां न क्रते

त्र विधिपात इति नक्तविधिवचनं॥ तदुपवासासमर्थपरमिति वदितव्यं॥ तथा॥ एकभक्तेन
नक्तेन तथैवायाचितेन च॥ उपवासेन दानेन न निर्द्वादशिको भवेत्॥ विद्धाधिकैकादशी
कं न द्वादशी अथ प्रथमद्वितीयतृतीयभेदाः॥ यदा दशमीविद्धैकादशी रात्रिशेषे च द्वाद
शी कलेनत्यधिकेत्येकं॥ उदयपर्यंतं द्वादशी समेत्यप्ये इति द्वितीयः॥ त्रयोदश्यां द्वादशी कि
यन्मात्रा विद्यते अधिकेत्यपि॥ द्वादश्यूना वा॥ तदा दिनक्षयपक्षत्वात्सर्वेषामेव दशमीविद्धै
कादश्यामुपवासः॥ तदुक्तं पुराणे॥ एकादशी दशायुक्ता परतः पुनर्न वै इति॥ यतिनिष्ठैव से
वोपोष्या क्षयेतिथि॥ दिनक्षये संप्रते देवि तोपोष्या दशमीयुतेति त्रिस्पृगेकादशी यत्र त
त्र संनिहितो हरिः॥ तामेवोपवसेत्कामी सकामो विष्णुतत्पर इति दशमीं द्वादशी च यास्पृ
शति सा त्रिस्पृगित्यनेन मदे॥ किंच॥ उदयानंतरे सु उपवासयोग्यस्य कालस्य तत्रैकाद
श्यभावात्॥ उदयात्प्रागपि द्वादश्येकादशीसंगतत्वेन गत्यंतराभावाद्दशमीविद्धाया॥

तथाचोक्तं॥ एकादशी न लभ्येत सकला द्वादशी भवेत्॥ उपोष्या दशमीविद्धा ऋषिरुद्दालको
ऽब्रवीत्॥ तथा॥ यदि दैवात्तु संमोहादेकादश्यां तिथिक्षये॥ तत्र क्रतुशतं पुण्यं द्वादश्यां पारणे वि
भवेत्॥ अत्र द्वादशीवृद्धिर्नेदेपि दशमीविद्धोपोष्या॥ तदुक्तं निगमे॥ एकादशी तृतीया च षष्ठी
चैव त्रयोदशी॥ पूर्वविद्धा तु कर्त्तव्या यदि न स्यात्परेऽहनीति॥ चतुर्भिर्विद्धानामशक्तौ तु पयो दधि
फलानि वा॥ सकृद्देवाल्पमश्नीयादथवा सोमवेदितिवचनेन सविकल्पं विधायाप्युपवासः॥ मे
वे॥ क्षीरादिग्रहणमेकादश्यामतिरिक्तविषयं॥ एकादश्यां विद्धायामप्युपवासविधानात्
यत्कुद्दुक्तं॥ अविद्धानि निषिद्धैर्वर्जनमभ्येते दिनानि तु॥ सहस्रैः पंचभिर्विद्धा ग्राह्या चैकाद
शीति॥ तदर्वविद्धानपरत्वादिनानि दिव्यानात्पकपरसद्धुधः॥ पूर्वविद्धा न कर्त्तव्या षष्ठीका १४०
व्यष्टमी॥ एकादशीं तु कुर्वीत क्षीयते परतो यदीति॥ नेदन्नेये॥ विद्धोनराकादशी ऊन
द्वादशी॥ विद्धोनरकादशा समधाद्वादशी यधिक द्वादशी॥ अपयपक्षोन्ने द॥ यदा दशमीवि

द्धैकादशी द्वादश्यां च न विद्यते॥ द्वादशी च त्रयोदश्यां किंयन्मात्रा विद्यते॥ तदा तु यतिविषये
वक्ष्यमाणस्कन्दाद्यभिधानवचनदर्शनान्न गृहिणः पूर्वविद्धोपोष्या॥ परस्मादर्शनेनतरं
कलार्द्धस्याप्यभावात्॥ एकादशी न लभ्येत सकला द्वादशी भवेत्॥ उपोष्या दशमीविद्धा ऋ
षिरुद्दालकोऽब्रवीत्॥ निगमः॥ एकादशी तृतीया च षष्ठी चैव त्रयोदशी॥ पूर्वविद्धा न कर्त्तव्या यदि न
स्यात्परेऽहनि॥ अत एव॥ दशम्याप्यस्तविद्धायामेकादश्यामुपोषितः॥ तस्यायुःक्षीयते सत्य
नारदोऽहं ब्रवीम्यहं॥ इत्यादिदशमीविद्धानिषेधवाक्यानि द्वितीयदिने कलामात्राप्यभावा
योकादश्याः सद्भावे वेदितव्यानि॥ यतिविषयेत्॥ दशमीगमिता एव लुप्येतैकादशी परः॥
उपोष्या॥ द्वादशीतत्र न दशम्याः कथंचन॥ कलार्द्धेनापि विद्धा स्याद्दशम्यैकादशी यदि॥ त
दा ह्येकादशीं त्यक्त्वा द्वादशीं समुपोषयेदित्यादिवाक्यानामेषले नास्ये द्वै सुवर्ष दशार
जत्पुपोष्या मोक्षकांक्षिभिरितिश्रवणादत्राधिकारः पान्यायेन मोक्षैकामिनां यतीनां मु

द्वादश्यामेवोपवासः ॥ अतो विद्धाया विद्धावृत्तिर्यथोपरतो द्वादश्यां चेत् ॥ अविद्धापत्या विद्धोप-
रतो ह्युद्दश्यादौ ॥ त्यैतद्धायि द्वादश्या वृद्ध्यायतिविधावादिविषये चरितार्थमिति ॥ तस्माद्दशम्येक-
व्यवस्थायामहानियतिनिष्ठायां षष्ठो भेदः पावस्तव्या ॥ इति विद्धायानवमेदः ॥ उन्मीलिनी
वंजुलि त्रिस्पृशापक्षवर्धिन्य एकादश्युपवासान्नित्यैकादश्युपवासाऽइत्येकादशीनिर्णयः ॥ अथ द्वा-
दश्यां पारणानिर्णयः ॥ ब्रह्मवैवर्ते ॥ तावत्काम्या द्वादशी ॥ अस्नानमिति रेत्फक्कासमाप्योये
षयांहरे ॥ द्वादशांगां पारणं कुर्यान्नित्यकाम्येष्वुपोषिते ॥ मंत्र ॥ अज्ञानतिमिरांधस्य व्रतेनाने
नेन केशव ॥ प्रसादसुमुखो नाथ ज्ञानदृष्टिप्रदो भवेति ॥ कात्यायनः ॥ मंत्रं जपित्वा हरये निवे-
द्य योषणं व्रती ॥ द्वादश्यां पारणं कुर्याद्वर्जयित्वा घृपोदकी ॥ उपोदकी शाकविशेषः ॥ विष्णु-
धर्मे ॥ द्वादश्याः प्रथमः पादो हरिवासरसंज्ञितः ॥ तमतिक्रम्य कुर्वति पारणं विष्णुतत्पराः ॥
आद्याः पंच दशानाडिकाः प्रथमः पादः ॥ कूर्मपुराणे ॥ एकादश्यां तु पोष्यैव द्वादश्यां पारणं

स्मृतं ॥ त्रयोदश्यां न न कुर्याद्द्वादश्यां द्वादशीक्षयात् ॥ विष्णुरहस्येपि ॥ पारणं तु न कर्तव्यं सुपो-
ष्यैकादशीमिह ॥ त्रयोदश्यां नरैर्जंतु नित्यं धर्ममभीप्सुभिः ॥ स्मृत्यंतरे ॥ हंत्यनुगता हंति द्वा-
दशद्वादशीफलं ॥ धर्ममपित्यां तथा पुंसि त्रयोदश्यां तु पारणमिति त्रयोदशीपारणनिषेधा-
दिति चेत् ॥ उच्यते ॥ त्रयोदश्यां पारणनिषेधवचनानि सामान्यशास्त्राणि ॥ त्रयोदशीपा-
रणविधिस्तु विशिष्टविशेषविषयो बाध्यते ॥ यथा अग्नीषोमीयपशुहिंसाविधीरेव सामान्यहिं-
सा निषेधशास्त्रं ॥ यदा तु पारणाहे द्वादशी विद्यते तदैकादश्युपवासिनां द्वादश्यतिक्र-
मे दोषः ॥ तदुक्तं ॥ यदि किंचिच्छ्रयोदश्यां द्वादश्युपलभ्यते च ॥ द्वादश्यां पारयेत्तत्र वर्ज-
यित्वा त्रयोदशीं ॥ महाहानिकरी ह्येषा द्वादशी लंघिता नरैः ॥ करोति धर्महरणमस्नाते-
व सरस्वती ॥ यथा सरस्वती अस्नाता लंघिता धर्महरणं करोति ॥ एवं पारणे द्वादशी अति-
क्रमिता च ॥ एकादश्यामुपोष्यैव द्वादश्यां पारणं स्मृतमिति वचनात् ॥ स्कंदपुराणे ॥

नि॰ दि॰ यदा भवेदतिस्वल्पा द्वादशी पारणादिने॥ उषःकाले द्वयं कुर्यात्प्रातर्माध्याह्निकं तदा॥ इ
१४४ ति वचनात्॥ स्वल्पद्वादश्यांभुजपकर्षे प्रातर्माध्याह्निकयोः कर्मणोरपकर्षस्तदन्याये
नं॥ यथा तिष्ठंत पशुप्रपजेतीत्यनेनैव याजापकर्षवत्॥ तदुक्तं गरुडपुराणे॥ यदाल्पद्वा
दशी स्यादपकर्षोपि जैमिनिवत्॥ प्रातर्माध्याह्निकस्यापि तत्र स्यादपकर्षणं॥ एतदपि स्मृत्यंत
रे॥ एतस्मात्कारणाद्विप्राः अरुणे स्नानमाचरेत्॥ पितृतर्पणसंयुक्तमल्पां चेद्द्वादशीं न वेत्॥
अल्पायामपि विप्रेंद्र द्वादश्यामरुणोदये॥ स्नानार्चनक्रियाः कार्या जपहोमादिसंयुताः॥ य
दा त्वतीवाल्पा द्वादश्यां तदा तामतिक्रमेत्॥ उक्तं च॥ कलाद्यमेव वापि द्वादश्याः समति
क्रमेत्॥ एकादशीमुपोषयित्वा तत्राधर्मफलं व्रजेत्॥ प्राप्नुयादित्यर्थः॥ स्वल्पद्वादश्यां
पारणासंभवकाले वाद्भिः पारणं कृत्वा नित्यकर्म कुर्यात्॥ इदं च काम्यपरं तेन संध्याह्निकं १४२ १४३
भवेन्नित्यं पारणं तु निमित्ततः॥ अद्भिस्तु पारयित्वाथ पश्चान्नित्यकाले तु भुंजीत्॥ संक १४४

टे विषमे प्राप्ते द्वादश्यां पारयेत्कथं॥ अद्भिस्तु पारणं कुर्यात्पुनर्दोषकृदिति॥ इदमत्रं
सूचितं भवति एकस्य कर्तुरेकस्मिन्दिने भोजनद्वयप्रवासे कर्तव्ये भुक्तिकार्यप्राप्तिरेव न
द्वितीयमनन्नितं च भवति उदकविधानाद्भुजिक्रियाकार्यसिद्धिर्यापि सिद्धिस्तेति॥ तथात्रा
द्भिः पारणे भुजिक्रियासिद्धिर्नित्यकर्मानुष्ठानार्थं भोजनं सिद्धिश्चेति वेदितव्यः॥ अथ स्मृत
त्र द्वादश्यां व्रतोपवासिनां सत्यामपि द्वादश्यां तामतिक्रम्य त्रयोदश्यां पारणेति यिन्नक्षत्रं ति
थमेति यि नानेच पारणमिति तिथ्यंते पारणविधानात्॥ इत्युक्तं च जवीवेदनये निर्णयप्रदीप
कैः स्म पारणां च निर्णीतानि मते द्वैकादशी तिथिः॥ ॥ अन्यापि श्रवणद्वादश्यां पायस्नं विवक्ति॥ उ
न्मीलिनी वंजुलिच त्रिस्पृशा पक्षवर्द्धिनी॥ जया च विजया चैव जयंती पापनाशिनी॥ द्वादश्य
ष्टौ महापुण्याः सर्वपापहराः स्मृताः॥ तिथियोगेन जायंते चतस्रश्चापरास्तथा॥ नक्षत्रयोगा
च्च बलात्पापं प्रशमयंति ता॥ एकादशी तु संपूर्णा वर्धते पुनरेव सा॥ उन्मीलिनीति गुरुश्रेष्ठ

कथितापापनाशिनी॥ द्वादश्यामुपवासस्तु द्वादश्यामेव पारणं॥ वंजुलीनाम सा प्रोक्ता द
शाकोटिविनाशिनी॥ अरुणोदयमारभ्य द्वादशी सकलं दिनं॥ अंते त्रयोदशी चात्र त्रिस्पृ
शा सा हरिप्रिया॥ कदुकेदाराकेयदा वृद्धिं प्रयाते पक्षवर्द्धिनी॥ विहायैकादशीं संमुपोष
येत्॥ पुष्या श्रवणा रेवती रोहिणी संयुता तु या॥ उपोषिता समफला द्वादश्यष्टौ पृथक्पृ
थगित्यादि॥ एता अष्टौ महाद्वादश्यस्तत्तद्रूकफलाभिलाषिभिरुपवास्याः॥ महाद्वादशी
निर्णयः॥ अथ द्वादशीतिथिरुपवासादिषु निर्णीयते॥ सा पूर्वयुक्तितोपोष्या॥ न परति
थ्यं वितेवितदुक्तं॥ कूर्मपुराणे॥ नगाविद्धा तु या षष्ठी रुद्रविद्धो दिवाकरः॥ कामविद्धो नवे
ष्णुर्न ग्राह्यास्ते तु कदाचन॥ नागः पंचमी रुद्र एकादशी दिवाकरः सप्तमी कामस्त्रयोद
शी विष्णुर्द्वादशी॥ तथा त्रयोदशीविद्धा द्वादशी निषिद्धा॥ युग्मे त्वेकादशी द्वादशीस
द्भावे ग्राह्यत्वमुक्तं॥ रुद्रेण द्वादशी युक्तेति निगमे॥ अथ द्वादशीसामान्यनिर्णयः॥ १४५

अथ श्रवणद्वादशी॥ तत्र स्कंदपुराणे॥ मासि भाद्रपदे शुक्ला द्वादशी श्रवणान्विता॥ महा
ती द्वादशी ज्ञेया उपवासे महाफला॥ तथा च विष्णुधर्मोत्तरे॥ द्वादशी श्रवणोपेता यदा भवति भा
रत॥ संगमे सरितां स्नात्वा श्रवणयत्ताधिकं फलं॥ तत्र तीर्थादिकं सर्वमनंतफलदं वेदि-
त्युक्तं॥ कालादर्शे॥ भाद्रे द्वादश्यां शुक्लायां नक्षत्रं श्रवणं यदि॥ श्रवणद्वादशी नाम सा-
प्रोक्ता मुनिपुंगवैः॥ तीर्थे स्नानं कृतं तत्र दानं वा देवपूजनं॥ उपवासो जपो होमस्तथा ब्रा
ह्मणभोजनं॥ श्राद्धादि पि च तत्सर्वमनंतफलदं वेदिति॥ विष्णुधर्मे त्रिरात्रं प्रतिशंकर-
मासे भाद्रे श्रवणोपेता द्वादशी महती तु सा॥ तस्यामुपोषितः स्नातः पूजयित्वा जनार्दनं॥ प्राप्नो
त्ययत्नात्तत्स्मृतिं द्वादशीफलमिति॥ तथा बुधश्रवणसंयुक्ता सा चेद्वादशी भवेत्॥ अ
तीव महती तस्यां सर्वं कृतमक्षयं॥ संगमे सरितां स्नात्वा द्वादश्यां तामुपोष्य॥ पायेदिति॥ वि-
ष्णुनक्षत्रवज्रोत्स्यात्तराचंमा दिवाकरे॥ श्रवणयुक्तद्वादश्यामुपवासस्तामहइति॥ अतोय

दासंपूर्णैकादशीसंपूर्णचद्वादशीतदात्वेकादश्यांत्रयमुपवासःसंपूर्णेतिप्राप्ते।।तिद्वादश्यांच
त्रयमेवमुपवासद्वयंकर्तव्यं।।ननुभोजनसंकल्पाप्राणेकस्मोपवासस्यपारणेभोजनेनद
भावेसतिव्रतांतरेप्रारम्भामावात्पूर्वव्रतेपारणाविधिलोपःप्राप्नोति।।तस्मात्पूर्वव्रतासमा
प्तौव्रतांतरंकर्तव्यमियुक्तं।।तथास्मृत्यंतरेअसमाप्तेव्रतेपूर्वेनैवकुर्याद्व्रतांतरंमितिवचना
त्कथव्रतांतरप्रारंभःस्यादितिचेत्।।शृणु।।उभयोर्व्रतयोरेकदेवतत्वात्समाप्तेपिपूर्वव्र
तांतरप्रारंभेनविरोधोन्यैरुक्तेनवचनेनपूर्वव्रतस्यपारणाविधिलोपजन्यदोषोनभवे
तद्यथा।।एकादशीमुपोष्यैवद्वादशीमप्युपोषयेत्।।नचात्रविधिलोपस्यादुभयोर्देवता
हरिरितिसंनिधानात्।।तथाश्रवणद्वादशीमुपक्रम्यविष्णुरहस्ये।।द्वादश्यामुपवासोत्र
योदश्यांतुपारणं।।निषिद्धमपिकर्तव्यमित्याज्ञापारमेश्वरी।।अथोपवासद्वयकर्तव्यमित्युक्ते १४६
श्रवणद्वादश्युपवासंकुर्यान्निपूर्वोपवासस्यापिफलंप्राप्नुयात्।।तदुक्तं।।पुराणांतरा

दंतेनमदे।।एवमेकादशीमुक्त्वाद्वादशीसमुपोषयेत्पूर्वोपवासजंपुण्यंसर्वंप्राप्नोत्यसंश
यं।।तथाउपोष्याद्वादशीपुण्याविष्णुऋक्षेणसंयुता।।एकादश्युद्भवंपुण्यंनरःप्राप्नोत्यसंशयं
किंच।।उपवा।।समर्थस्यनित्येप्येकस्मिन्नेकादश्युपवासेनक्तादिकंविहितं।।एकभक्तेन
नक्तेनक्षीणवृद्धातुरःक्षिपेदितिव्यासवचनेनतदुपवासद्वयासमर्थस्येतिकिमुवक्तव्य
मिति।।अथयस्तूपवासद्वयासमर्थः।।सोकृतैकादशीव्रतसत्वैकादशीमपोष्याश्रवणान्वित
यांद्वादश्यांपारणंकुर्यादित्युक्तंमत्स्यपुराणे।।द्वादश्यांशुक्लपक्षेतुनक्षत्रंश्रवणंयदि।।उ
पोष्यैकादशीपुण्यांद्वादश्यांपूजयेद्धरिमितिदीपिकापि।।अथात्रव्रतोनंदायांसमुपोष्य
तामृक्षेतिद्वरौभुंजीतविद्वान्वाचकिः।।नंदायामेकादश्यांऋक्षेतिद्वरौश्रवणयुक्तद्वादश्यांभु
जीतेत्यर्थः।।एतदेकादशीव्रतसिद्धिनिष्ठायपरं।।अथयदैकादश्यांद्वादशीयोगःश्रवण
योगोवाभवतितदैकेनोपवासेनैकादश्युपवासोद्वादश्युपवासश्चसिध्यति।।तदुक्तं

विष्णुधर्मोत्तरे ॥ एकादशी द्वादशी च विष्णुऋक्षमपि तत्र वेत् ॥ तद्विष्णुशृंखलं याम विष्णुसायो
ज्यकृद्भवेत् ॥ वैष्णवं श्रवणं ॥ पद्मपुराणेपि ॥ द्वादशी श्रवणस्पृष्टा स्पृशेदेकादशीं यदि ॥
 स एव वैष्णवो योगो विष्णुशृंखलसंज्ञकः ॥ तस्मिन्नुपोष्य विधिवन्नरः संक्षीणकल्मषः ॥ प्रा
प्नोत्यनुत्तमां सिद्धिं पुनरावृत्तिदुर्लभामिति ॥ अत्रोपवासद्वयासिद्धिं वदद्विद्वांनंतरं पारणे
कृते वेदितव्यायतः ॥ सांयोगिके व्रते श्रायेय नैकोपि विमुच्यते ॥ तत्रैव पारणं कुर्याद्विवेद
विदुरिति व्रतखंडोदाहृतवचनात् कस्तांते पारणं कुर्याद्विना श्रवणरोहिणीमिति ॥ श्रवण
मध्ये पारणविधानादिति ॥ अथेदं श्रवणद्वादशीव्रतं श्रवणयुक्तायामेकादश्यामपि कार्यं ॥
तथा चोक्तं रूपनारायणेन ॥ याः काश्चित्तिथयः प्रोक्ताः पुण्या नक्षत्रयोगतः ॥ तास्वेव तद्व्रतं कु
र्याच्छ्रवणद्वादशीं विना ॥ याः काश्चित्तिथयो येन केन चिन्नक्षत्रविशेषयोगेन पुण्याः प्रोक्ताः
तन्नक्षत्रयुक्तासु तास्वेव तद्व्रतं कुर्यात् न तिथ्यंतरे तन्नक्षत्रयुक्ते ॥ पुष्याफाल्गुनयुक्तद्वाद

शीपुष्यक्षणयुक्ता गोविंदद्वादशी नाम तस्यामुपवासव्रतं विधिवत् तस्यां सूपवासमतं त्रैवि
कुर्यात् ॥ न पुष्यान्वितायामेकादश्यां सोयं श्रवणद्वादशीं विना नियमः ॥ श्रवणद्वादशीकं
तु श्रवणयोग एकादश्यामपि व्रतान्यस्य तासु यद्यपि ॥ तन्त्रवासापि न विष्णोत्तरे श्लोकस्तेन प्रतिपा
दिता ॥ एकादशी यदा च स्यात् श्रवणेन समन्विता ॥ विजया नाम सा प्रोक्ता भक्तानां विज
यप्रदा ॥ नारदीये ॥ यदा न प्राप्यते ऋक्षं द्वादश्यां वैष्णवं क्वचित् ॥ एकादशी तदोपोष्या यो
पर्वा श्रवणान्विता ॥ अत्र योदैवते विष्णुपुराणपुष्यामाम इति ॥ द्वादशी श्रवणोपेतास्ये
कादश्यां भवेद्यदा ॥ तदंते पारणे सिद्धिरुपवासद्वयस्य चेति ॥ द्वितीयदिने श्रवणहीन
न्मध्ये पारणं कुर्यादित्युक्तं विष्णुभक्तिचंद्रे ॥ विशेषमहीपालश्रावणविधये दि ॥ तन्मध्ये
पारणं कृत्वा पुण्यं पुण्यकृतं भवेत् ॥ यत्तु क्वचित् द्वादशीश्रवण ऋक्षयुक्तायामेका
दश्यामुपोषितो यदा द्वादश्यां श्रवणं वर्धते तदा द्वादशीकृत्यं नाम वर्जितं तदाहि तिथ्यंतो ना

येक्षित इत्युक्तं॥ तिथिनक्षत्रसंयोगे उपवासो यदा भवेत्॥ तावदेव न भोक्तव्यं यावदेकस्य सं
क्षयः इति नारदीयवचनमुदाहृतं॥ तिथिनक्षत्रयोगे न भोक्तव्यमिति वचनार्थः॥ वचनावता
रिकायां संयोगे न भोक्तव्यमित्यर्थः॥ प्रतिभासत इति तत्र दोषः॥ पक्षस्तु न स्वत्रैव॥ विद्वेषिणमः
दीपालभ्रवणं वर्णितयदि॥ अस्योत्तरार्द्धं तिथिक्षये न भोक्तव्यं द्वादशीं नैव लंघयेत्॥ तदि
दं तिथिनक्षत्रसंयोगे भोजनविधायकमपि नैत्यिकद्वादश्युपावासपारणाविधिपरत्वेऽदुष्ट
श्रवणैकादश्युपवासाविहितपारणविधिपरत्वे तु दोषः॥ यथा संयोगिके व्रते श्रासेयत्रैका
पि वियुज्यते॥ तथा तिथिनक्षत्रसंयोगे उपवासो यदा भवेत्॥ तथा॥ तत्रोपोष्य तिथिस्त्वि
श्रवणयोर्वन्ति व्रतं न पारयेदित्यादिवचनेभ्यः एकविंशमेया रणविधानाच्च॥ किंच॥ इदम
संबद्धमुत्तरार्द्धं कीलनतिथ्ययिपकालादर्शादि पिकानं तमदव्रतकाल्यविष्णुरहस्यादि
दर्शनात्॥ कौस्तुभमिति विज्ञो कनीयमिति॥ याः काश्चित्तिथयः प्रोक्ताः पुण्यनक्षत्रयो १४८

गतः॥ कष्टं ते पारयंक्रू यान्दिना श्रवणरोहिणीमिति॥ इयां तु विशेषः॥ श्रवणद्वादश्यां ज
नार्दनं नाम विष्णुः पूज्यते॥ श्रवणैकादश्युपवासम्नावतार इति॥ तथा॥ आमाकासितपक्षेतु
श्रवणे रेवती॥ प्राप्ता तिष्य द्वादशी तत्र हरिमभ्यर्चयेन्नरः॥ सा विष्णुशृंखला नाम सायुज्यफल
दायनी॥ तथा॥ तिथिनक्षत्रयोस्त्रयोगस्त्रे वनराधिप॥ द्विकलाय दिलम्पेतस संतेयोत्याह्यमा
सिकं इति॥ श्रवणद्वादशीनिर्णयः॥ अथ त्रयोदशी॥ कृष्णपक्षे त्रयोदयोदशी सापरवि
द्धेयोष्या॥ तदुक्तं निगमे॥ षष्ठ्यष्टमी तथा दर्शः कृष्णपक्षे त्रयोदशी॥ एताः परयुताः पूज्याः प
राः पूर्वेण संयुताः॥ बृहस्पतिपरि॥ एकादश्यष्टमी षष्ठी द्वितीया च चतुर्दशी॥ त्रयोदशी चमा
वास्या उपोष्याः स्युः परान्विताः॥ अत्र त्रयोदशी कृष्णआमावास्या साहचर्यात्॥ कृष्णत्र
योदशी परविद्धेति कालादर्शेऽप्युक्तं॥ षष्ठ्यूरं मास्त्रतीयैकादशी कृष्णत्रयोदशी॥ चतुर्थी
लचरा सुग्मेत्येताः पूज्याः परान्विताः॥ शुक्लपक्षे त्रयोदश्यप गृहीतापि दद्वितिवाक्यो॥ क

स्त्रयोदशपापरविद्धा॥धौम्निनात्॥शुक्लत्रयोदशी पूर्वतिथ्यन्विता पोष्येति गम्यते॥अतरा॥
व॥नवमीदशमीशुक्लत्रयोदशप्रमुखातिर्हरिः॥रंभातृतीयावेत्येता उपोष्याः॥पूर्वसंयुताइतिका
लादर्शे लिखितं॥ब्रह्मवैवर्तेपि॥त्रयोदश्यां तु कर्तव्या द्वादशपासहिता विभो॥व्रतविधान
कर्तव्यादशम्यां पूर्णाकिदाचन॥पैठीनसिरपि॥पंचमीसप्तमीचैव दशमीचत्रयोदशी॥प्र
तिपन्नवमीचैव कर्तव्या द्वादशपासहिता विभो॥व्रतविधानकर्तव्या दशम्यां पूर्णा किमन्तु
खातिथिः॥सन्मुखापूर्वविद्धेत्यर्थः॥एतद्वचनद्वयमपि शुक्लपक्षत्रयोदशीविषयं॥यत
अनंतभट्टैस्त्रयोदशीपरविद्धाग्राह्येत्यभिधायैतद्वाक्यसमीपे चतुर्दशीस्ववेधात्त्रयो
त्रयोदशीं दूषयतीतिहद्वयसिद्धवचनमुदाहृतं॥द्वितीयापंचमीवेधाद्दशमीचत्रयोद
शी॥चतुर्दशी चोपवासे हन्युः पूर्वापरे तिथी इति॥हस्त्रयोदशीपरविद्धोपोष्येति नि: १४९
सदिग्धा द्वितीयदिने त्रयोदश्यभावे तु॥एकादशी तृतीया च षष्ठी चैव त्रयोदशी॥पू

र्वविद्धा न कर्तव्या यदि न स्यात्परेहनीति निगमः॥त्रयोदशी सामान्यनिर्णयः समाप्तमिति॥
अथ त्रयोदशी विशेषः॥अनंगत्रयोदशीव्रतेन वांछितार्थं जायत इत्युक्तिं स्मृतिदर्पणेन॥त्रयो
दश्यां घृतं गारव्यास वर्धितौ घविनाशनी॥सर्वेदुष्टग्रहामनोसर्वभोगाय वर्द्धनी॥अनंगेन
ताहे यातेनानंगत्रयोदशी॥मार्गशीर्षमासमारभ्य व्रतं कार्यं विधानतेति व्रतविधिरिति
प्रसिद्धत्वात्र लिखितं॥सा पूर्वविद्धोपोष्येति सर्वत्रैवनाक्तैः॥हस्ताष्टमास्कंदषष्ठीसावित्री
कांटपैतृका॥अनंगत्रयोदशीरंभा उपोष्याः पूर्वसंयुताइति॥अनंगत्रयोदशी॥सर्वस्मिन्त्र
योदशीमधिष्ठिताना नंगः पूजनीयः॥तदुक्तं भविष्ये॥कामः पूज्यत्रयोदश्यां सुरूपो जा
यते ध्रुवं॥इत्यार्पवती भार्यात्मनेकामांश्च पुष्कलानिति॥अथ नरसिंहत्रयोदशी॥
गुरुवारे त्रयोदश्यां नरसिंहं पूजयेत्॥तदुक्तं नरसिंहपुराणे॥गुरुवारे त्रयोदश्याममपराह्णे तु ज
लाप्लुत॥तर्पयित्वा देवपितृन्नरूपिश्वति जतं दुःखे॥नरसिंहसमभ्यर्च्य यः करोत्य

नि॰ सि॰

१५०

पवासकं॥ स तु पापविनिर्मुक्तो विष्णुलोके महीयते॥ इदं पक्षविशेषानुपादानादुभयोपक्ष
योः साधारणं काल विशेषाग्रहणादपराह्णव्यापिनी ग्राह्येति॥ अथ शनित्रयोदशी॥
सौरपुराणे व्यास उवाच॥ मंदवारेण या पुण्या शुक्लपक्षे त्रयोदशी॥ तस्यामुपोष्य विधिवत्
पूजयेद्गिरिजापतिं॥ ब्रह्महत्यादिभिः पापैः मुक्तो भवति मानवः॥ इति॥ तथा स्कंदपुराणेपि॥ त्र
योदश्यां तथा रात्रौ सोमवासः त्रिलोचन॥ दृष्ट्वा प्रयमेया मे मुच्यते सर्वपातकैः इति॥ इद
त्रयोदशी साधारणी॥ विशेषानुक्तत्वात्॥ इदं संपूज्य॥ नमस्काराष्टकं वाजस्राए जोस
मप्यर्चि॥ वृषराजस्य मंमध्यर्च्य वृष मंत्रेण मंत्रवित्॥ मंत्र॥ धर्मस्त्वं वृषरूपेण गवां माता तेक
रक॥ अष्टमूर्तेरधिष्ठानमतः पाहि सनातन॥ पृथिव्यां यानि तीर्थानि सागरांतानि यानि च॥ १५०
अंडपाश्रित्य तिष्ठंति प्रदोषे गोवृषस्य च॥ स्पृष्ट्वा तु वृषणौ तस्य शृंगमध्यं विलोक्य च॥ पुच्छं
च ककुदं चैव सर्वपापैः प्रमुच्यते॥ एवं सर्वस्मिन्कर्मणि त्रयोदशीमिदं व्रतं॥ मंदवारेण वा

युक्तायुष्येष्टा प्रभुयात्फलं॥ इति शनित्रयोदशी॥ अथ नागपदकृष्णत्रयोदशी॥ युगादि
तु कोद॥ शुक्ला तृतीया वैशाखे प्रेतपक्षे त्रयोदशीति॥ तथा॥ कलिकृष्णत्रयोदश्यां न
भस्ये मासि निगतः॥ स्नान क्षत्राहियोग गजच्छायेति॥ तदुक्तं॥ यदेंदुः पितृदैवत्ये हंसश्चैव
करे स्थितः॥ त्रयोदश्यां गजच्छाया श्राद्धे पुण्यैरवाप्यते॥ इंदुः सोमः॥ पितृदैवत्यं मघा॥ हं
सः सूर्यः॥ कारो हस्तः॥ अत्र घृतमधुयुक्तेन पायसेन श्राद्धं कुर्यात्॥ यथा च पितृगाथा॥ अ
पि नः सकुले जातो यो नो दद्यात्त्रयोदशीं॥ पायसं मधुसर्पिर्भ्यां वर्षासु च मघासु चेति॥
त्रयोदश्या दश्याविकन न विशेषापापिनी तकल्पादिवद्ग्राह्यानीति॥ अत्र विशेषः॥ तनोव
रायतनोम्यो वामजमासोपदामवेत्॥ सप्तमपितृपक्षः स्यादस्त्रैवतु पंचम इत्यनेन॥
पूर्वस्मिन्नागपदे यदप्यपरपक्षत्रयोदशीति मित्रंश्राद्धं न भवेत्॥ तथा पितुर्गोदि
निमित्तं न वत्सेव॥ मत्वा दोचपुगादौ चतन्मासो रुन्नयोरपि तिक्षवनाच्॥ यत्तु॥ दश

हराहसुतोत्कर्षश्चतुर्ष्वपि युगादिषु ॥ इदं व्यवस्थापितमक्षयतृतीयानिर्णये ॥ इति त्रयोद
शीनिर्णयः ॥ कृते च लक्ष्मीधरेण ग्रंथे निर्णयदीपके ॥ तिथिद्वयं च निर्णीतं द्वादशी च त्रयोद
शी ॥ अथ चतुर्दशी निर्णीयते ॥ शुक्ला चतुर्दशी परविद्धा ग्राह्येति ॥ तदुक्तं निगमे ॥ शुक्लप
क्षेऽष्टमी चैव शुक्लपक्षे चतुर्दशी ॥ पूर्वविद्धा न कर्तव्या कर्तव्या परसंयुतेति ॥ बृहस्पति
नापि ॥ एकादश्यष्टमी षष्ठी पौर्णमासी चतुर्दशी ॥ अमावास्या तृतीया च ता उपोष्याः परा
न्विताः ॥ अत्रेति मुख्येति कालादर्शे व्याख्यातं ॥ चतुर्दश्यपि पौर्णिमेति युग्मेनापि शुक्लाया
परविद्धाविधानात् ॥ कृष्णचतुर्दशी पूर्वविद्धा ग्राह्येति ॥ तदुक्तं गार्ग्येण ॥ कृष्णपक्षे
ऽष्टमी चैव कृष्णपक्षे चतुर्दशी ॥ पूर्वविद्धा प्रकर्तव्या परविद्धा न कस्यचित् ॥ स्कंदपुरा
णेपि ॥ कृष्णाष्टमी चतुर्दशी सावित्री वटपैतृकी ॥ पूर्वविद्धा प्रकर्तव्येत्यादिवाक्यैः कृ
ष्णा पूर्वविद्धा विहितेति ॥ नक्तैकभक्तादिषु तत्र व्रतकालव्यापिनीति ॥ चतुर्दशी सा १५१

मान्यनिर्णयः ॥ अथ शिवरात्रिर्निर्णीयते ॥ तत्र व्रतकालस्तूक्तो विश्वरूपेण ॥ माघफा
ल्गुनयोर्मध्ये कृष्णपक्षे चतुर्दशी ॥ शिवरात्रिस्तु सा प्रोक्ता शंकरेण महात्मना ॥ शिव
योगेन संयुक्ता रात्रिभागे चतुर्दशी ॥ शिवरात्रिस्तु सा प्रोक्ता सर्वकामफलप्रदा ॥ तथा
माघफाल्गुनयोर्मध्ये यासासितचतुर्दशी ॥ अनंगेन समायुक्ता कर्तव्या सा सदा तिथि
अनंगत्रयोदशी ॥ बृहन्मधे ॥ श्रावणी दुर्गनवमी तथा दूर्वाष्टमी च या ॥ पूर्वविद्धा तु कर्त
व्या शिवरात्रिर्बलेर्दिनमित्यनेन चतुर्दश्युक्तापि या शिवरात्रिः सा पूर्वविद्धैवोप
वसनीयेति विधीयते ॥ आचारतिलके दीपके त्वेतद्विरुद्धं वचनं दर्शितं ॥ माघफाल्गु
नयोर्मध्ये कृष्णपक्षे चतुर्दशी ॥ सा दर्शसंयुता कार्या अन्यथा निःफला भवेदिति
परविद्धोक्ता ॥ अत्र पूर्वविद्धापराविद्धा मान्वेति प्रसंगात्पुराण्या कृत्कालविशेषाव
गमनेन निर्णीयते ॥ कालविशेषाभिधानमुक्तं शिवपुराणे ॥ प्रदोषव्यापिनी ग्रा

सा शिवरात्रिः शिवप्रिया॥ रात्रौ जागरणं यस्मात्तस्मात्तां समुपोषयेत्॥ इति वचनात्पूर्वविद्धा वा
या प्रदोषव्यापिनी सोपोष्येति॥ प्रदोषपरिमाणमुक्तं स्कंदपुराणे॥ त्रिमुहूर्त्तः प्रदोषः स्याद्भा
नावस्तंगते सतीति॥ शिवरात्रिमुपक्रम्य विश्वरूपोपि॥ दिवाव्रते दिवाग्राह्या तिथिरौदयिकी द्वि
ज॥ निशाव्रतेषु सर्वेषु कर्त्तव्या यानिशामुखे॥ निशामुखे प्रदोषे पर्वविच्चूनानुरोधात्॥ ननु अ
होरात्रात्पुरस्ताच्चेज्जयायोगो यदा भवेत्॥ पूर्वविद्धा प्रकर्त्तव्या शिवरात्रिः शिवप्रियैरित्यनेन का
लनिर्णयादाद्यतेन वचनेन प्रदोषकालादूर्ध्वतरकालेऽप्ययोदश्या ग्रहणात्तु चतुर्दश्या निमित्तोप
वासविधिदर्शनात्कथं प्रदोषव्यापिनी ग्राह्येति चेत्॥ शृणु॥ अनेनापि प्रदोषान्विता विधीय
ते॥ कथं अहोरात्रात्पुरस्ताच्चेदित्यत्र रात्रेरहनि॥ अहमिति विग्रहे एकस्यार्द्धाद्वयलो
पेन समासे अहोरात्रात्पुरस्तात्प्रथमयामो त्रयोदश्यां चतुर्दशी चतुर्दश्युपायोगो यदा स्या
त्तदा त्रिमुहूर्त्तात्मके प्रदोषे चतुर्दशी प्रदोषान्वितापि भवति प्रदोषव्यापिनी विधायक

वचनमप्यनुगृहीतं भवति च॥ प्रदोषव्यापिनी ग्राह्येति वचनान्यथानुपपत्त्या एकादेशिपदलो
पिसमासस्तु आश्रीयत इति॥ किंच॥ अहोरात्रात्पुरस्तादस्य वचनस्य मुख्यार्थग्रहणे द्विती
यदिने एव चतुर्दश्याः प्रदोषव्यापित्वसद्भावात्॥ विधिवाक्यमदर्शनस्य कालव्याप्तिर्विलीय
तेत्यनेन प्रदोषव्यापिन्याः द्वितीयायास्या विधायकेन मुख्यार्थे बाधितः स्यात्॥ अतो लोप
लक्षणाश्रीयते मुख्यार्थबाधे न्याये लिष्यते सा लक्षणेति लाक्षणिको रः॥ दीपिकाका
रेण यथाश्रुतवचनानुरोधी तु प्रवृत्तिनिषिद्धमिति न दोषः तस्य अस्मिन् विषये एव विशाप्य
कत्वादिति स्कंदपुराणात्॥ कृष्णाष्टमी स्कंदषष्ठी शिवरात्रिश्चतुर्दशी॥ एताः पूर्वयुताः का
र्यास्तिथ्यंते पारणं भवेत्॥ तथा चानंतः॥ जयंती शिवरात्रिश्च कार्ये भद्राजयान्विते॥ कृ
त्वोपवासं तिथ्यंते तदा कुर्यात्तु पारणां॥ नक्षत्रसप्तमी॥ जयात्रयोदशी॥ इत्यादीकृपपन्न
ति॥ यानुतंतानिधिच्छये दिहृयपि प्रदोषव्यापिनीत दोषैवोपोष्या॥ तदुक्तं भक्तवैव

नि॰सिं॰
१५३

र्शी॥ स्कन्देपि नवनाडीघुमृतविद्धात्रयोदशी॥ शिवरात्रिव्रतं तत्र कुर्याज्जागरणं तथेति॥ न
वघटीपर्यंतं त्रयोदश्याहन्ता॥ शिवरात्रिव्रतं तत्र कुर्याज्जिञात्मर्थः॥ मत्वेधत्रयोदश्यामृतत्वा
ग्रामहानिशा॥ शिवरात्रिव्रतं तत्र कुर्याज्जागरणं तथेति॥ तदपि महानिशा तु सा प्रोक्ता
मध्यस्थं घटिकाद्वयमिति स्मृत्यन्तरवचनात्॥ अत्रोदाहृतेन स्कान्दवचनेन समानार्थं।
इदं वचनद्वयं अर्धरात्रात्पुरस्ताच्चेदेतत्सव्याख्यानं चेतीमानि वचनानि तिथिक्षयविषये वे
दितव्यानि॥ यतोन्यत्र तिथिक्षये वक्ष्यमाणत्वात् दिने वायुपुराणे कश्चतुर्दश्यात्मकप्रदोषव्या
पित्वाभावात्॥ त्रयोदशीप्रसंगे स्कन्दे चतुस्त्रवचनादिषु॥ मृतविद्धा तु यात्र शिवरात्रिव्रतंच
रेदिति वायुपुराणे॥ परदिने द्वक्ष्ये समतायां च परे वोपोष्या॥ खर्वादर्पोपि रोपूज्यावितिव १५३
चनात्॥ विश्वरूपोपि॥ हृद्ये पुनर्व्यास्त समयात्॥ द्वितीयेह्नि चतुर्दशी॥ युज्यते सहयमित्व
शिवरात्रिस्तदा परा॥ अस्य मयाहृद्वये प्रदोषव्यापिनीत्यर्थ॥ यदा तु परदिन एव प्रदोष

व्यापिनी न पूर्वदिने तदा परैवोपोष्या॥ यदुक्तं माघासिते भूतदिने हि राजन्नुपैति योगं यदि
पंचदश्याः॥ जयाप्रयुक्तां न तु जातु कुर्याच्छिवस्य रात्रिं प्रियकृच्छिवस्येति॥ शिवस्य प्रियकृ
त् जयाप्रयुक्तां रात्रिं न कुर्याच्छिवस्य रात्रिं प्रियः कृच्छिवस्येति॥ दित्यत्र त्रयोदशी संज्ञि
न्ता यदा चतुर्दशी रात्रिर्न भवति॥ तदा तु पवासादि कर्तव्यमिति गम्यते॥ एतच्च परदिने प्र
दोषव्याप्तिविदितव्यं॥ तथाचाचारतिलके॥ चतुर्दशी शिवोदर्श्यां निधीयते॥ तयोर्योगः
शिवोयोगः शिवयोगः स उच्यते॥ यदा च चतुर्दशी दिनद्वये प्रदोषव्यापिनी त्रयोदशी च
पूर्वदिनपर्याप्तिरात्रिभागेन स्यात्॥ तदा पूर्वा॥ तदुक्तं वाराहपुराणे॥ त्रयोदशी यदा
देवि दिनभुक्तिप्रमाणतः॥ जागरे शिवरात्रिः स्यान्निशि पूर्णा चतुर्दशीति वचनेन किंच।
रात्रिजागरणयोरूपं परं जितलाभावेन चतुर्दश्याः प्रदोषात्मकत्वेन संपूर्णत्वात्॥ प्र
धमानिकार्यकारणान्वावेति पूर्वातिशिवरात्रिमतिम्लानिरेक्रमः स्ववबध्यते॥ अतश्च

स्यांचतुर्दश्यांसत्यांतल्लंघनंनदूष्येदितिच॥इतिनिर्णयः॥अथपारणाविचारः॥ननुपरदि
ने॥रात्रमयोरुभयोर्विद्धयोर्व्रततिथ्योःपूर्वविद्धोपवासेकृतेव्रततिथिर्यदारात्रावस्तिपरदिने॥त
दाजन्माष्टमीरोहिणीचशिवरात्रिस्तथैवच॥पूर्वविद्धैवकर्त्तव्यातिथिभांतेचपारणातिथ्यं
तरात्रौपारणंविहितंअमावास्यायांचरात्रौभोजनंनिषिद्धं॥यदुक्तंकात्यायनेन॥[illegible]
ष्टम्योर्दिवानुक्तारात्रौभुक्ताचपर्वणि॥राकादर्शयोर्दिवारात्रौभुक्त्वाचान्द्रायणंचरेदिति॥
अतःपरदिनेदिवातिथ्यंतानावकंत्रोपपूर्वपवासइतिचेन्नसत्यं॥अमावास्यायांरात्रौ
रागतः॥प्राप्तस्यभोजनस्यनिषेधोनवैधस्य॥तिथ्यंतेपारणंकुर्यादितिविधितः॥प्राप्त
स्यभोजनस्यनिषेधानुपपत्तिः॥अग्नीषोमीयहिंसावदिति॥अथवाःपरोविधिः॥सात्रकम १५४
घपर्यंतंव्याप्तिनिचेत्परेहनि॥दिवैवपारणंकुर्यात्पारणान्तेवदोषभागितिकालादर्शा
त्॥यत्तु॥यामत्रयोर्ध्वगामिन्यांप्रातरेवहिपारणमित्यत्रतिद्विषयेयोज्यं॥तिथ्यंतेचोत्स

वांतेवांतेवाव्रतीकुर्वीतपारणमिति॥पारणनिर्णयः॥यत्तुवचनंचतुर्दश्यांतुकृष्णायांफा
ल्गुनेनित्यपूजनं॥तामुपोष्यप्रयत्नेनविषयान्परिवर्जयेत्॥शुक्लकृष्णप्रतिपदादि
पौर्णमास्यंतमासाभिप्रायेण॥अतएवान्यानिमाघस्नानमासोपवासादीनित्युक्तं॥नि
पौर्णमास्यामेवारभ्यंते॥इतिनिर्णयः॥अथनरसिंहचतुर्दशीनिर्णयः॥वैशाखशुक्लचतु
र्दश्यांनरसिंहव्रतंकार्यंतदुक्तंनरसिंहपुराणेप्रह्लादनृसिंहसंवादेमद्व्रतंपापनाश
नमित्युक्तेप्रह्लादउवाच॥कस्मिन्मासेभवेदेतत्कस्मिन्वावासरेप्रभो॥इतिपृ
ष्टेनरसिंहः॥वैशाखस्यशुक्लपक्षेतुचतुर्दश्यांसमाचरेत्॥मज्जन्मसंभवंपुण्यंव्रतंपापप्र
णाशनं॥स्वातिनक्षत्रयोगेनशनिवारेतुमद्व्रतं॥सिद्धियोगस्यसंयोगेवणिजेकरणे
तथा॥पुंसांसौभाग्ययोगेनलभ्यतेदैवयोगतः॥सर्वैरेतैस्तुसंयुक्तंहत्याकोटिविनाश
नं॥एतदन्यतरेयोगेमद्दिनंपापनाशनं॥केवलेपिभक्तकर्त्तव्यंमद्दिनंफलकांक्षिभिः॥

नि॰सि॰ तथा॥ वर्षेवर्षेतु कर्त्तव्यंमम संतुष्टिकारणं॥ मयागुप्तमिदंप्रोक्तं॥ मानुषेर्नविनीरुतिः॥ येन
वैक्रियमाणे नसहस्रशताद्वादशीफलं॥ जायते नमरवावन्विमानुषाणां महात्मनां॥ वितीय
१५५ मद्दिनेयस्तुलं घयेत्तु पापमाक्॥ उपावासाकरणोत्यरूत्रंघयेदित्यर्थः॥ एवंत्तात्वात्र
कर्त्तव्यंमद्दिने व्रतमुत्तमं॥ इतिव्रतविधिनरसिंहपुराणादेवगंतव्यः॥ इदंव्रतमुपवास
रूपं॥ यतोऽन्यत्र समंत्रः श्रूयते॥ नरसिंहदेवदेवेशतव जन्मदिने शुभे॥ उपवासंक
रिष्यामि सर्वभोगविवर्जितमिति॥ इयं शुक्लाचतुर्दशीचतुर्दशी पूर्णिमेतियस्मवा
क्यात्॥ परविद्वाउपवासेग्राह्या॥ तथाच व्रतत्वेवक्तीत्व॥ शुक्लपक्षेष्टमीचैवशुक्लपक्षे
चतुर्दशी॥ पराउपोष्येतिसामान्यचतुर्दशीनिर्णयोक्तमंत्रानुसंधेयमितिनरसिंह १५५
चतुर्दशीनिर्णयः॥ अथचतुर्दशीसामान्यंनिरूप्यते॥ तथा॥ लिंगाचर्नरूत्तनपोव्रत
शिवदितत्रये॥ वाराणस्यांचमरणं मुक्तिरेषाचतुर्विधेत्यक्तोक्त॥ एकादश्यष्ट

मीचैवपक्षयोश्चचतुर्दशी॥ शिवस्यतिथयःप्रोक्ता मुनिभिःशौनकादिभिः॥ तासामा
१०८ यामेमंत्रैरिति॥ ऋतुकाले गर्भाधानं तृतीये मासि गर्भे चिह्नजाते तु रा पुंसवनं॥ षष्ठेऽष्टमेवा
सीमंतोन्नयनमिति याज्ञवल्क्यः॥ चतुर्थे मासि गर्भरक्षणं समंतोसेमासि प्रथमगर्भे सीमंतो
न्नयनमिति आश्वलायनः॥ एते क्षेत्रसंस्कारकत्वात्सकृत्कार्या नप्रतिगर्भं॥ यथाह देव
लः॥ सकृच्च संस्कृता नारी सर्वगर्भेषु संस्कृतेति॥ गर्भकोशाद्बहिर्गते कुमारे जातकर्म नाम
कर्मादि कुमारस्येति॥ ऊनो वाप्यधिको वापि यः स्कन्दगारवो स्थितो विधिः॥ ततः संततु याघृते
नकुर्यादिरग्ना रिवकमिसि सचारवोक्तं पतंयजनन लक्षणं कमकिं यति॥ आर्षधर्मोपदे
शं च वेदशास्त्राविरोधिना॥ यस्तर्केणानुसंधत्ते स धर्मं वेद नेतर इति मनुः॥ तथा वृद्ध १०८
याज्ञवल्क्यः॥ आहिताग्निर्यथान्यायं दग्धव्यस्त्रिभिरग्निभिः॥ अनाहिताग्निरेकेन लौकि
केनापरो जनः॥ अपरो जननितरग्निः॥ इति अग्निहीनः॥ क आहिताग्निः को नाहिता

ग्निरिति॥ तत्र मार्कंडेयः॥ आहिताग्निर्द्विजो यस्य विद्यतेऽग्निचतुष्टयं॥ सोपवासश्चतुर्थ्यां तु
शुक्लपक्षस्य फाल्गुने इत्यादि आहिताग्नमुक्तं व्रतखंडे॥ विष्णुधर्मोत्तरे तु॥ चत्वार एतेऽग्न
य आहिताग्नेः सर्वासु देवः कथ्यते श्चतुर्णां चातुर्णां॥ यः पूजये ब्राह्मणमाहिताग्निं देवः स तेन
प्रयष्टूनितः स्यात्॥ आहिताग्निः॥ अग्निहोत्री॥ वैतानिक इति॥ तदग्निचतुष्टय रहितः अना
हिताग्निः॥ आवसथ्यिकः॥ एकाग्निरिति॥ एते नैव अग्निधर्मेतथा अनाहिताग्नेः पिंडपितृय
तः आनोहिताग्निः अवध्यमंनित्यादि श्रुतिस्मृतिभिरेकाग्निरित्युक्तं॥ वितानाग्नीनां विस्तार
स्तत्र नवौ वैतानिक निरग्नेः स्मृतं कमरणाहात इति तिविवादं॥ तत्र वचनानि संति बहूनि॥
इदानीमाहिताग्न्यनाहिताग्निविषये निर्णीयते॥ तावदंगिरा भारद्वाजमत उक्तं तेसा
ग्नः संस्कारकर्मणि शुद्धिः संचयनं दाहात् मरणाहस्त्वयथा तिथि॥ पैठीनसी रपि॥ अनग्नि
मत उक्तं तेरात्रं च द्विजातिषु॥ दाहादग्निमतो विद्याद् विदेशस्थे मृते सतीति॥ अन्त्रसा

ति॰दि॰ ग्निः॥अग्निमानृशब्दस्य तत्र यवाचको मुख्यगौणदृश्यागौणमुख्ययोर्मुख्ये कार्यसंप्रत्यय इ
१८७ ति॥वह्न्यग्निमदग्निहोत्रे येस्त्याएका ग्निमानावसति यि को गौणः॥तयासति यत्र विरोधव
नास्ति तत्रास्तत्स्य वाचकः॥तत्र विरुद्धाग्निकापिग्निमुग्नाशास्त्राग्गेवक्तवाति वैश्वदेवसा
ग्निकरत्यादौ॥यत्र विरोधि वचन सद्भाव॥मरणाद्भूते केदाहा हूइमित्यादिक॥तत्र विरु
द्धाग्निकापाणित्कल्प्यं तइ ति तिपाये ति स्वयानवगतो साग्रोर्मुख्यायविबोधार्थमतग्निम
च्छब्दः प्रयुक्तः॥अंगिरसा॥आत्राल्पायेनिञ्॥अनुदरी कंन्येति वत्॥अनग्निमतः अल्पा
ग्निमतः अनाहिताग्नेः उक्तेतःशुद्धिः साग्ने वह्न्यग्निमतः आहिताग्नेः संस्कारकर्मणः दाहा
त्शुद्धिः इतरथा साग्नेः शावस्य दृष्टाः प्रवर्त्तकित्वे निर्णयः ति स्वयोन नवेत्॥हुत्वेमिरसो १८७
निग्रायांबुध्वाविस्तातेस्युरेण स्वग्रंथे मिताक्षरादौ॥तद्भावना निधानात्पूर्वं आहिताग्नेः सं
स्कारादि वधमनुति स्ततकं आनाहिताग्नेः मरणाद्भूतकमित्कपक्रांत संचयनं तु त्र्योदा

हात्॥स्मृत्यर्थसार विम्बादर्शादौ वह्न्याक कालाद ऋचिकुनिबंध पारिजात निर्णयामृतादि नि
बंधकर्त्तृभिरिदमेव निर्णीतं यथा विस्तारेणस्वरेण॥स्मृत्यर्थसारे॥आहिताग्नेः प्रेतकार्यमित दग्ना
दहनादि कार्यं त्रिपक्षांतं॥अनाहिताग्नेर्मरणाद्दादि प्रेतकार्यमिताह स्याद्धंच॥यत्तु गृह्यस्मृ
तिवच॥एवंयआहिताग्ने धर्मः स एवंउपासनिकस्यापि॥एव शब्दः प्रकारस्य चानार्थेयेन त्र
करिणाहिग्नेदर्शपूर्णमासव्रतपितृयज्ञादेधर्मः तेनैवर्त्तपासनिकस्येति॥अत्र धर्मग्रह
णात्जीवदवस्थास्स्विता॥यतः धर्माधिमैश्रिकरुते यावत्जीवति मानवा॥परलोकगतोज
तुर्मुक्तिसुकृतेइति॥किंच॥तत्रापि वैश्यानयर्थादौ यत्राहिताग्नेपुरोडाशास्तत्रानाहिताग्नेःस्थ
र वइति तयोर्भिन्नाधर्म तद्भिरिते किमुव क्तव्यमित्यर्थः॥इत्यर्के तु आहिताग्नेः पुनः संस्का
रे दशाहं॥अनाहिताग्नेस्त्रिरात्रं इतिवसिष्ठः॥अथ शौचमाध्याह्न नाहिताग्नेर्मरण
दिनादारभ्य कर्तव्यं भवति॥आहिताग्नेर्दहनदिनमारभ्य कर्तव्यं॥यदाहंशंखः॥म

यदाह शंखः॥ मरणादेव कर्त्तव्यं संयोगो यस्य नाग्निभिः॥ दाहादूर्ध्वं तु कर्त्तव्यं यस्य वैतानिको
विधिः॥ मिताक्षरायां॥ आशौचमाहिताग्नेरुपरमे संस्कारदिवसप्रभृति कर्त्तव्यं॥ अनाहि
ताग्नेस्तु मरणदिवसप्रभृति संचयने त्वनयोरपि संस्कारप्रदिवसप्रभृतीनि॥ यथाहांगि
राः॥ अनग्निमत उत्क्रांतेः साग्नेः संस्कारकर्मणि॥ शुद्धिः संचयनं दाहान्मृताहस्तु य
थातिथि॥ साग्निराहिताग्निरिति चोक्तं॥ इत्यर्थः स्मृत्यर्थसारे॥ अनाहिताग्नेर्मरणादाहि
प्रेतकार्यं मातामहाश्चाद्यं चान्वंहुनि विधेतु॥ एकाग्नियुक्तानामपि तत्क्रांतिदिवसएव
नग्नेरिव कर्त्तव्यानीत्युक्तं॥ तथा॥ विश्वादर्शे॥ अग्नेर्दाहादिरिह कक्तिरितरस्य प्रया
णादेवेति॥ चंद्रस्मृतौ॥ मृताहनि तु कर्त्तव्यं मग्निहीनस्य यो द्विजः॥ संस्कारादेव वित्ते
यो यस्य वैतानिको विधिः॥ मासिके विशेषः॥ त्रिपक्षात्पूर्वतः साग्नेर्नवं संस्कारवासरे॥
ऊर्ध्वं मृतदिने तन्नग्नेः सर्वाण्येव मृताहतः॥ मृताहत इति मृताहे स सम्यग्यंति सिलः॥ साग्ने

राहिताग्नेस्त्रिपक्षात्पूर्वतः॥ पूर्वत्रिकं द्वितीयमासिकं संस्कारवासरे दाहवासरे भवेत्॥
इतराणि मृतदिने भवेयुः॥ अनग्नेरनाहिताग्नेः सर्वाण्येव मृतदिने भवेयुरिति कालाद
र्शे॥ जलकर्ण्ये निष्कृष्टं॥ ऊर्ध्वं त्रिपाक्षाद्यच्छ्राद्धं मृताहन्येव तद्भवेत्॥ अधस्तत्का
रयेद्दाहादाहिताग्नेर्द्विजन्मन इति॥ एवं स्मृत्यर्थसारेपि॥ आहिताग्नेः प्रेतकार्यं मृताह
श्राद्धं सहनादि कार्यं त्रिपक्षांतं॥ तस्मादूर्ध्वं श्राद्धं मृताहरे वेति॥ साग्निकानग्निकाद्वै
चम्याश्च निर्णयः॥ अपकर्षणादाहादौ सपिंडीकरणे सति षोडशश्राद्धानां विधानं प्र
दर्शयति॥ श्राद्धानि षोडशादत्त्वा नैव कुर्यात्सपिंडनमिति गोभिलः॥ सपिंडनं द्वादशाहे
कापतिंदाहव्याघ्रः॥ आनंत्यात्कुलधर्माणां पुंसां चैवायुषः क्षयात्॥ अस्थितेश्च श
रीरस्य द्वादशाहे प्रशस्यत इति॥ पैठीनसिः॥ सपिंडीकरणादर्वाक्कुर्यात् श्राद्धानि षो
डश॥ एकोद्दिष्टविधानेन कुर्यात्सर्वाणि तानि तु॥ गालवः॥ अर्वाक् संवत्सराद्यस्य संपि

डीकरणेकृते॥षोडशानांद्विरावृत्तिंकुर्यादित्याह॥गौतमः॥पुनःस्वेकालेकुर्यादेवद्विरा
वृत्तिः॥तदाहहारीतः॥प्रेतसंस्कारकार्याणिपिण्डान्निश्राद्धानिषोडश॥यथाकालेतुकार्याणि
नान्यथामुच्यतेततः॥प्रकृष्टेनेहतोप्रेतोमृतःतत्संस्कारपाणि॥अंगिरसाप्युक्तं॥यस्य
संवत्सरादर्वाक्सपिंडीकरणंकृतं॥मासिकंचोदकुंभंचदेयंतस्यापिवत्सरं॥मिताक्षरा
यां॥सपिंडीकरणादूर्ध्वंयदाकुर्यात्तदापुनः॥प्रत्यब्दंयोयथाकुर्यात्तथासितान्यपि॥कात्याय
नः॥सपिंडीकरणादूर्ध्वंनदद्यात्प्रतिमासिकं॥एकोद्दिष्टविधानेनदद्यादित्याह॥ऊन
कनिषेधःपार्वणविधिविषय॥इत्यादिभिर्वचनैःसपिंडीकरणोर्ध्वमनुमासिकानां
कर्तव्यताप्रतिपादिता॥एतानिमासिकानिसपिंडीकरणात्पूर्वमपकृष्यकृतान्यपिवृ
द्धिश्राद्धेउपस्थितेपुनरप्यपकर्षःक्रियातदुक्तंतत्पूर्वमेवसमाधीयते॥शाट्यायनी
सपिंडीकरणादर्वागपकृष्यकृतान्यपि॥पुनरप्यपकृष्यंतेवृद्ध्युत्तरनिषेधानादितिनि

षेधः॥कात्यायनेनोक्तं॥निर्वर्त्यवृद्धितंत्रेतुमासिकानिसपिंडीकरेत्तथा॥अप
कृष्यापिकुर्वीतकर्तानांदीमुखंद्विजः॥तथा॥अंतरेचैववोवृद्धिंप्रेतश्राद्धानिकर्षति॥स
श्राद्धीनकरोघोरेपितृभिःसहमज्जतीति॥अतःसपिंडीकरणोर्ध्वंमासिकानामापक
र्षति॥तन्न॥तदाहशाट्यायनिः॥सपिंडीकरणादर्वाक्॥तथानिर्वर्त्यवृद्धितंत्रे॥त
थाप्रेतश्राद्धानिशिष्टानि॥तथत्रकात्यायनीयेनिषेधवचनेमासिकानीत्युक्तं॥नानुमा
सिकानीति॥सपिंडीकरणात्पश्चादनुष्ठेयान्यनुमासिकानि॥ततस्तेनतानुमासिका
नांनिषेधः॥उत्तरंकिंचनमपिप्रेतश्राद्धमपकर्षमाह॥तस्माच्छाट्यायनिवचनंयथाका
लकारणेसत्येवपुनरपकर्षविधायकंसत्येवतुनापकर्षः॥अतएवगरुडपुराणे॥अ
र्वाक्किल्हढेःकरणेस्यतात्क्षप्रसपिंडतांयःप्रकरोतिपुत्रः॥तथापिमासंप्रतिपिंडमेकं
मतूकुंभंसलिलंचदद्यादितिवृद्ध्युत्तरमप्यनुमासिकोक्तेः॥तस्मान्नापकर्षइतिसि

दं ॥ अथ ऊनमासिके विशेषः ॥ तानि चत्वारि ॥ ऊनमासिकं त्रैपक्षिकं न्यूनषण्मासं न्यू-
नाब्दं चेति ॥ मरणाद्द्वादशाहे स्यान्मासन्यूने तूनमासिकैरिति ॥ ऊनाब्दं द्वादशीतये तिथ्यां लवः ॥
उक्तोयं पक्षः सर्वसंमत ॥ अथवा ऊनत्वाब्दश्रावणा ॥ कियता ऊनेनेत्याह गोभिलः ॥ त्रिभि-
र्वा दिवसैरूनमेकेन द्वितयेन वा ॥ आद्यादिषु च मासेषु कुर्याद्दूनाब्दिकं द्विजः ॥ पक्षांतर-
माह गोतमः ॥ एकद्वित्रिदिनैरूने त्रिभागेनोन एव वा ॥ श्राद्धान्यूनाब्दिकादीनि
कुर्यादित्याह गौतमः ॥ तृतीयो भागस्त्रमासस्तेनोने ॥ विंशतिदिने युगे तेषु कुर्यादित्य-
र्थः ॥ अथवा मासिकान्यपि वान्यानि अष्टाविंशतिमेदिते ॥ अन्यानि ऊनमासिकानि ॥
तद्वादशकाद्याजिनि ॥ न्यूनान्यूनेषु विषमादेषुतातिवै ॥ त्रिपक्षिकं त्रिपक्षे स्यान्मृताहे-
ष्वितरात्रात्विति ॥ तथा मासिकानि आशौचाद्यंतरितानि ऊनत्रैमासिकपत्निदाहकृष्ण-
संग ॥ एकोद्दिष्टे तु संप्राप्ते यदि विघ्नः प्रजायते ॥ मासेन्यस्मिंस्तिथौ तस्मां तु यदि तंच १९

यत् ॥ आशौचाद्यभावे वा कुर्यादिति ॥ अत्रैव विशेषमाह ॥ त्रिपुष्करे चैव दांतेसु दशे निर्ग-
वासरे ॥ चतुर्द्विपां न कुर्वीत ऊनानि त्रीणि वह्निने ॥ द्वितीयासप्तमीद्वादश्यां नत्रितयानि ॥
पुनर्वसूत्तराफाल्गुनी विशाखोत्तराषाढ एवं नक्षत्राणां नानुमो मन्दार्कैश्च राणां च मेल-
ने त्रिपुष्करमिति काज्ञादशेष्णेषु गमं ॥ गा गिरिपि ॥ नंदायात्रा गवि द्दिने च तुद्विपात्रि-
पुष्करे ॥ न्यूनानि तु न वर्तितं गदीपुत्र घत क्षयादिति त्रिपुष्करेवाद्दोषि पुष्करमपि लक्षे-
यति ॥ त्रयं स्मिंज्जिते द्विपुष्करे गुरुवारे सोमेन्नेनेपि त्रिपुष्कर योगस्तदुक्तं रत्नमालायां ॥
विषमचरणविधिष्ण्ये नक्षत्रितिथ्यां द्विजायते सुरगुरुरविश्मापुत्राणां कं पंचनं वासरं
मुनिभिरुदितः सोयं योगस्त्रिपुष्करसंतकं ॥ स्तनतिथ्या वागतोयं योगेन दोषमावह-
ति तन्नश्राद्धं कुर्यादिति मासिक निर्णयः ॥ अथ संवत्सरमध्ये पतिते मलिम्लुचे एकं मा-
सिकं कुर्यादिती येमासि तु रेजन्यदधिकं कुर्यात्तिदाह वसिष्ठ ॥ श्राद्धीयाहनि सं-

नि०सिं० मासेअधिमासोभवेद्यदि ॥ श्राद्धद्वयं प्रकुर्वीत एकं कुर्वन्ति मुत्सृति ॥ श्राद्धद्वयमिति त्रैतं श्रा
१९९ द्धद्वयं अधिमासोन्नरमासयोरिति वेदितव्यं ॥ विशेषोमलमासप्रकरणे वक्ष्यते ॥ इति दै
वीदेतन्मंथे निर्णयदीपके ॥ उक्तोतितः समारभ्य मासिकोतिकर्णिय ॥ अथ सहगम
नमग्रोसाबाकादद्वुनिपूर्वकं ॥ तद्देहिकविषयोनिर्णयः प्रस्तूयते ॥ तत्र मनुः ॥ आ
र्तार्ते मुदिते हृष्टा प्रोषिते मलिना कृशा ॥ मृते म्रियेत या नारि सा स्त्री ज्ञेया पतिव्रता ॥
तथा हारीतः ॥ मृते भर्तरि या नारी समारोहेद्धुताशनं ॥ सारुंधतिसमाचारा स्वर्गलो
के महीयते ॥ तथा ब्रह्मघ्नो वा कृतघ्नो वा मित्रघ्नो वा भवेत्यति ॥ पुनात्यविधवा नारी तमा
दाय मृतातु या ॥ अंगिराः ॥ व्यालग्राही यथा व्यालं बिलादुद्धरते बलात् ॥ तद्वद्धर्त्तारमा ना १९९
रीतेनैवासहमोदते ॥ प्रेतकल्पे ॥ अग्निर्दहति गात्राणि नात्मानं नैव पीडयेत् ॥ दह्य
ते ध्मायमानानां धातूनां च यथा मलं ॥ तथा नारी दहेद्देहं हुताशे ह्यमृतोपमे ॥ दिव्या

हो दिव्यादेहरूपश्च शुद्धो भवेति यः पुमान् ॥ तथा सा पतिसंयुक्ता दह्यते न कदाचनेति
शंखः ॥ दिवर्षप्रमाणोततिस्रः कोट्योर्धकोटयः ॥ तावत्कालं वसेत्स्वर्गे भर्तारं यानुगच्छ
ति ॥ यथा ॥ मृते भर्तरि या नारी समारोहेद्धुताशनं ॥ सारुंधतीसमाचारा स्वर्गलोके
महीयते ॥ इति ॥ लक्ष्मीसुतान्परित्यज्य मातापित्रोस्तथैव च ॥ मृतं पतिमनुव्रज्य सा चि
रं सुखमाप्नुयात् इत्यादिपुराणादिषु स्मृतं माप्नुयते ॥ तदकरणे त्वेवायवाक्यमपि
एव नकुरुते नारी धर्मेणि पतिसंगमं ॥ प्रतिजन्मनि दुःखार्ता दुःखीत्याप्रियावादि
नी ॥ वल्गुनीग्रहमेधाच गोधावाह्निमुखीभवेदिति अन्ते ॥ इदं सहगमनं सर्वेषां ब्र
ह्मचर्यंतिदत्वारोधर्मं वेति विकल्पितमपि सर्वजातिस्त्रीणां पतिव्रतानां गर्भवास्तमात्म
नोमन्तुष्ट सर्वपापक्षयदं मोक्षदं चेति स्मृत्यर्थसारेपि ॥ ब्राह्मणस्तत्वादन्तुष्टयमेव ॥ सर्व
सा धारणायं धर्मआचंडालं ज्ञायावेत् ॥ स्मृत्यर्थसारे तु विशेषः ॥ तथा न्वारोहणगर्भिण्यो

नि॰दि॰ ब्रह्महत्यासमं॥ क्षत्रियादिजातिगर्भिण्याः क्षत्रीद्विजातिवधरावेत्युक्तं॥ विष्णुनाप्यन्वारो
हणप्रत्रासं॥ पुत्रपौत्रादिकं त्यक्त्वा स्वपतिं याधिरोहति॥ स्वर्गलोके तौ तौ चोभौ कल्पे स्थि
११२ निरंकतौ॥ कृतापापान्यनेकानि भर्तृलोके मतिः सुता॥ प्रक्षालयति सर्वाणि यास्वप
तिमनुव्रजेदिति॥ अस्यान्वारोहणस्य सैसर्वस्त्रीसाधारण्येपि यद्ब्राह्मण्या इति निषेधवच
नं॥ मृतानुगमनं नास्ति ब्राह्मण्या ब्रह्मशासना॥ यास्तु ब्राह्मणजातीयास्तत्प
श्चिं तिनुव्रजेत्॥ सा स्वर्गमात्मघातेन नापतिं नयेदिति॥ तदिदं पृथक्चित्यारोहणनिषेध
परं॥ यत्तु हेमाद्रौ॥ पृथक्चितिं समारुह्य न विप्रा गंतुमर्हति॥ अन्यासां चैव नारी
णां स्त्रीधर्मोयं परः स्मृत॥ एतदेवोक्तं स्मृत्यर्थसारे॥ सवर्णाभिः पत्या सह एकचित्यारो ११२
हणमुक्तं॥ यथा॥ देशांतरमृते पत्यौ ब्राह्मण्या स्तुत दक्षिणैः॥ नवेक्ष्य होतुगमनमन्या
सां पादुकादिभिरिति॥ पादुकावस्त्रीता मन्वारोहो लेपितः तत्तेन तन्नुज्यत्वात्॥ तथा

स्मृत्यर्थसारे॥ क्षत्रियादिस्त्रियस्तत्रिरदेशांतरमृते पृथक्चित्यारोहणं कार्यं॥ असवर्णा
याः पृथक्चित्यारोहणमेव॥ गरुडपुराणात्॥ दूरस्थापि च यां नारी मृतं श्रुत्वा तथा पति।
ज्ञातैः स्वजनवत्सला प्रतीक्षेत्सादिश्यादुक्तं॥ ततस्तत्पिंडमादाय प्रविशेद्धुताशनं॥ तस्या
श्चान्वारोहणाद्यावत्पाषोत्सर्गादिकाः क्रियाः॥ इति॥ अंतरात्मा मृते तस्मिन्मृतोप्येक
लमागत इति तत्रैवोक्तत्वात्॥ तथा यास्त्री सवर्णासिंधुसा मृतं पतिमनुव्रजेत्॥ सा मृता
स्वर्गमाप्नोति वर्षाणां पूर्वसंख्ययेति॥ त्रिकांड इत्युक्तो॥ संमुह्येतिवचनात्॥ रजो
दा य ददुषा चतुर्थेह्नि कुर्यात्॥ तदुक्तं प्रेतकल्पे॥ हुताशं या समारूढा च तुर्थेपि तिता॥
तस्य मत्र्तुर्दिना कार्यं वृषोत्सर्गादि सूतकमिति॥ ननु स्त्रधान्यापेक्षादेशांतरमृत्युना
ब्रह्मा अपि तदेवमरणां संकल्पेन मृत ज्ञापनात् न तर्मरणादिनप्रभृत्येव दिनपरि
गणनोक्त पाल्पिंडदानादिकर्माणि॥ अस्मिन्लोके दूरस्थापि च यातारास्त्रापि च॥ द

दशाहातिक्रमान्वारोहणे विशेषं वक्ष्याम इति॥ अथ निर्णयामृते मन्त्ररियानारायणा
१०५ ग्नेव परित्यजेत्॥ मन्त्रैर्बहिःसमंतस्या अग्निं कुर्यात्सपिंडनं॥ अग्निं चेताग्निअनेन मन्त्रेण क-
र्त्योक्तेन वचनेनाग्निसपिंडनं ये मन्त्राः सिद्धे क्वापि निधानात्॥ सपिंडनात्पूर्वं विहिता नोद
शाहपिंडादिश्राद्धानामप्यैकतंत्रं कार्या मन्वारोहणेन तस्त्रियामरणे सप्तिना तिपृथगि
ति तन्नैवोक्तं॥ पतिपत्न्योः सहैकत्वं कृत्वा नान्यास्थिरोहति॥ पुत्रैः पौत्रैर्वा पृथक् श्राद्धं सपिं
पतिना सहेति॥ एकत्वं तु सपिंडनादूर्ध्वं वेदितव्यं॥ ततः सपिंडनात्पूर्वं विहितस्यो दृष्टं हि क
स्य पृथगनिधानात्॥ पृथक्श्राद्धमित्येकवचनमविवक्षितं श्राद्धे संख्या हीति वत्तदर्शोता
नद्भ्यः स्नातः सवने भ्रश्चानारब्धातीति दर्शनात्तद्वदत्रापिति एतदुक्तम्यन्थेन कल्पे॥ एक १०३
पाके भक्तविनिपिंडान्दद्यात्पृथक्श्राद्धानि षोडशपृथक्॥ कादशं तु वृषोत्सर्गं पृथक्श्रा
द्धानि षोडश॥ घटादिपददानानि महादानानि यानि यानि च॥ पर्यायात्तत्पृथक्कु-

र्यात्पितुरेवं त्रयोरिति॥ अत एव वस्त्रमृत्यंयसारेपि॥ अन्वारोहणं करिष्यामीति संकल्प्य
पतिं नमस्कृत्य चितामारुह्य सर्वं प्रयोगं कारयेत्॥ यद्वा सर्वप्रयोगे कृते दह्यमाने मन्त्रैरे
तेन त्वाग्निं प्रविशेत् इत्युपक्रम्य॥ दाहदिने तु पिंडश्राद्धादौ पाकैक्यं एकतंत्रं किंचन॥ इति चो
क्तं पिंडौ कपि मिति नोक्तं॥ सर्वत्र पिंडादिदाने योग्यः पुत्रो दद्यात्॥ तथाह॥ चितास्थान
नैर्मोहात्स्त्री विप्रवर्जिता प्राजापत्यं चरेदिति चोक्तं॥ एवमन्वारोहणे सपिंडीकरणाप्य
पतिः सयुक्त गतिम्प्रदे॥ सपिंडनमपि पत्न्याः सपिंडनं कृत्वा तेन सह सपिंडनं कुर्यात्॥ मृ
तयानुमृता नाप्यमृतेन सह सपिंडता॥ अहनि सग्गर्वा संचयावदाहूतं संस्रवमिति प
त्याचैकेनकर्तव्यं सपिंडीकरणं स्त्रियाइत्यस्मिन् विषये प्रेतकल्पोक्तत्वात्॥ अथान्वा
रोहणविषये मृत्वेद्यदौ श्राद्धे॥ तावपि समस्यैकः पिंड इति गौडाक्षियोक्तं॥ मृताह
निसमासेन पिंडनिर्वपणं पृथक्॥ न वस्त्रादं दंपत्योरन्वारोहण एव तत्॥ मृताहनि

नि॰दि॰ दंपत्योरुद्देशेन समासत एक एव पिंडो दीयते॥ अद्य अमुकगोत्रौ अमुकदेवदा अ
१२४ मुकशर्माणावत्रावनेनिजाथां ये च युवामत्रानु एतांश्च पिंड इत्येवमूहनीयं॥ नवश्राद्धद्वय
मित्यन्वयः॥ एतदन्वारोहण एव भवति॥ अत्र मृताहश्राद्धानां सपिंडीकरणोत्तरोपलक्ष
णं॥ नवश्राद्धश्राद्धानां सपिंडीकरणांतोपलक्षणं॥ अन्यथा मृताहनिति परिसंख्यायां॥ स
र्वत्र पृथक्त्वापत्तिरित्यव्यवस्था स्यात्॥ यथा द्वयोः समासेन पिंडनिर्वपणं तथा॥ बह्वीनाम
प्येकचितारूढानां सवर्णानां स्त्रीणां सहदेशेन द्विपितृकश्राद्धवदेक एव पिंडो देयः॥ सपिंडी
करणोत्तरमिति पूर्ववत्॥ यथा गोत्राः अमुकदेवदा अमुकदेवदा अमुकशर्माणः अवनेनि
ग्ध्वं ये च युष्मानत्रानु वः पिंड एवं योजनीयं च॥ यत्तु कैश्चित् मृताहनि समासेन पिंडनिर्वपणं १२४
पृथक्॥ नवश्राद्धं तु दंपत्योरन्वारोहण एवेति जोगोक्षिवचनमन्वारोहणेन स्त्रियाम
रणे सति नवश्राद्धं पृथक् तद्व्यतिरिक्तदहानि मृताहवत्समासेन पिंडनिर्वपणमित्यन्ति

तथा॥ सवर्णानां समानधर्मिणां सपत्नीनां सहदाह॥ उदकपिंडादिकं पृथक् पृथगेव॥
तथा॥ पुत्रा जाता स्त्री वा आनानां दहने निखनने चैवं॥ भिन्नजातीयानां भ्रातॄणां पिता पुत्राणां
सपत्नीनां च दहनादि सर्वं पृथगेव॥ तथा चैव॥ स्त्रीपुरुषमरणे एकस्मिन्नहनि दहनका
ले प्राप्ते सवर्णानां समानधर्मिणां पत्या सह दहनं कृत्वा उदकपिंडादिकं पतिपूर्वं पृथक्
कार्यं॥ सपिंडनं तु पक्षः पूर्वं कृत्वा पत्या सह सापिंड्यं कार्यं॥ तथा एकचितां समारूढौ
दंपती निधनं गतौ॥ पृथक् श्राद्धं तयोः कुर्यात् ओदनं च पृथक् पृथक्॥ निधनं गतौ नान्वारोह
णमार्गेणापि मृताविति शेषः॥ ओदनं च पृथगिति नवश्राद्धाद्यभिन्नमोदनं तत्पृथगिति
केचिदूचुः॥ प्रेतकस्यैतस्यान्नराहेतु॥ एकपाकश्च कुर्वीत पिंडान्दद्यात्पृथक्पृथगि
ति॥ तथा॥ पाकैकेन पतिस्त्रीणामन्येषां तु विगर्हितमिति च॥ तत्र एकपाकेन भिन्नपा
केनैवेति शिष्टाचारः प्रमाणं॥ यत्तु कैश्चित्॥ अस्मिन् सहदहने विषये त्वाह या

समानधर्मत्वं शंकितं ॥ तदयुक्तं ॥ तत्र मृताहनिर्णयो दंपत्योः समासेन पिंडनिर्वपणम्
निहितं लौगाक्षिवचनेन ॥ अन्वारोहणसमये तिथिभेदेपि न त्वेकस्मिन्तदर्न्नेवाब्दिकमिति
निरूपितं प्राक् ॥ अत्र न बुधिपूर्वमिन्वारोहणधर्मकं सहदहनं ॥ किंतु काकतालीयेन
प्राप्तं ॥ तस्मात् न सहदहनमरणतिथिभेदेपि भेदेपि मृत्याब्दिकं न पृथक्पृथगिति ॥ नान्वा
रोहणसमानधर्मकमिति ॥ तथा प्रत्याब्दिकेन कर्तव्यं सपिंडीकरणं स्त्रियाः ॥ तथा ॥ म
न्त्रादिभिस्त्राग्निः कार्यं सपिंडीकरणं स्त्रियाः तथा पितामहश्वासमं मातुः पितुमहपिता
महैः ॥ सपिंडीकरणं कार्यमितितास्वपमं तं ममेत्यादिवाक्यविकल्पेन पत्या सह सापिंड्य
नापि मृताहनि समासेन पिंडनिर्वपणमिति ताशंकनीयं ॥ सहगमनवद्धामरणाभा
वात् ॥ किंतु ॥ मातुः पूर्वमरणे सति सह दहने तत्र किंवक्तव्यं ॥ अतो पि पृथक्पृथगा
ब्दिकमिति ॥ न पिंडादौ समासो हतीति सद्यातमरणे निर्णयः ॥ अथ सूतिकायां रजस्व

लायां वा मृतिश्चेत् विर्तितदा शुद्धिं कृत्वा दाहादीसंस्कारं कुर्यात् ॥ शुद्धिप्रकारश्चोक्तो मिताक्ष
रायां ॥ सूतिकायां मृता यां तु कथं कुर्वंति याज्ञिकाः ॥ कुंभे सलिलमादाय पंचगव्यं ततः क्षि
पेत् ॥ पुण्यर्ग्भिरभिमंत्र्यापो वाचा शुद्धिं लभेत्ततः ॥ तेनैव स्नापयित्वा तु दाहं कुर्याद्यथाविधि
धीति ॥ तथा ॥ अग्निर्गोपोमंत्रियानिर्वामिदेव्यान्निरेवच ॥ अन्यैश्च वारुणैर्मंत्रैः संस्नाप्य
विधिनादहेदिति स्मरत्युरेत ॥ वाचाब्राह्मणवचनेन ॥ तस्य प्रायश्चित्तपूर्वकोत्वात ॥ प्रा
यश्चित्तं तु त्रिदिनादर्वाक् त्र्यब्दं कुर्यात् षट्दिनादर्वाक् अब्दद्वयं ॥ तदूर्ध्वमेकाब्दं तदुक्तं गो
विंदराजेन ॥ स्मृत्यंतरात् ॥ सूतिकाले यदा साध्वी विस्नाता मरणं गता त्रिवर्षं परिपूर्यंति
शुध्येत्कृच्छ्रेण सर्वदा ॥ आजाप्र ॥ १० ॥ एतत्त्र्यमत्रयहविषयं ॥ तथा ॥ प्रसूतिकाले यदा
नारी रजसा च परिप्लुता ॥ म्रियते तत्र या नारी द्विवर्षं कृच्छ्रमाचरेत ॥ आ ॰ द ॰ ॥ एतत्त्र्यहपूर्वं
डाहं धंषद्दिनविषयं ॥ तथा सूतिकाले यदा सा ह्यस्नाता प्रेततां प्रेततां गता ॥ अब्द

नि॰सि॰ कृच्छ्रेणशुध्येतव्यासस्यवचनंयथा॥अ॰३०॥ततष्षड्गुणोह्युस्नानाहपर्यंतं॥तथा॥दशाह
१९८ हृतेतु॥प्रसूतिकाजेयदानारीप्राणांश्चैवपरित्यजेत्॥मासमेकावधिश्चैवतन्निमित्तंकृच्छ्रेवि
शुध्यतीतिअ॰३॥इतिसूतिकामरणेनिर्णयः॥रजस्वलायास्तुविशेषः॥पंचभिःकलशैः
पृथक्पृथक्पंचगव्यंक्षिप्त्वास्नापयेत्वस्त्रांतराहृतांदहेत्॥तदुक्तंवृद्धधर्मेन॥पंचभिः
स्नापयित्वातुगव्यैश्चैतांरजस्वलां॥वस्त्रांतराहृतांकृत्वादाहयेद्विधिपूर्वकमिति॥अ
त्रापिब्राह्मणवचनंकार्यमित्याह॥आपस्तंबस्तु॥प्रेतांतुतांसदानारीत्रिरात्रंछुद्धेविशु
ध्यतिप्रजापत्यानापद्भिर्वासस्तुदिरूक्षामतोषिभिरिति॥स्मृत्यर्थसारेतु॥रजस्वलांमृतां
स्नाप्याज्यपंचगव्यैःस्नापयित्वावस्त्रांतरावृतांदहेत्॥ब्राह्मणवचनंजप्यं॥सूतिकारं १९८
जस्वलांचमक्षाज्यस्नापयित्वाकाष्ठवद्दग्ध्वाब्राह्मणवचनंजप्यं॥अस्थीनिनिधनाद
हेत्॥इतिरजस्वलामृतौदाहनिर्णयः॥सत्रेविशेषः॥चतुर्थेमासिगर्भस्त्रावेतद्दवस्था

योनिवृत्तायांदाहार्थंरजस्वलावच्छुद्धिःकार्या॥गर्भस्यद्रवरूपत्वेनरजोविकारत्वात्॥पंचम
मासादिगर्भपातेसतिनिवृत्तायांदाहयोग्यासूतिकावच्छुद्धिः॥गर्भस्यकठिनत्वेनप्रसववि
कारत्वात्॥पातःसूतकविधानात्॥प्रसवविकार॥आचतुर्थाद्भवेत्स्रावःपातःपंचमषष्ठ
योः॥तथा॥पातेमातुर्यथामासंपित्रादीनांत्रिरात्रकमिति॥अथसगर्भमरणेदाहवि
धिरभिधीयते॥गोविंदराजनिबंधात्॥गुर्विणीमरणेकुक्षिंभित्वाबाल्यंसमुद्धरेत्॥ततः
बाल्यपृथक्कृत्वानिःक्षिपेद्वसुधातले॥तथा॥सबाल्यायामृतायास्तुकुक्षिंभित्वासमु
द्धरेत्॥उद्धृतेचततःबाल्येप्रायश्चित्तंसमाचरेत्॥तथा॥यदागर्भवतीनारीसबाल्यासंस्थि
तायदि॥कुक्षिंभित्वाततःबाल्यंनिर्हरेत्॥पद्भिर्जीवतो॥बाल्यंगर्भे॥संस्थितामृता॥प्रम
तनिःक्षिपेत्तंतुप्रायश्चित्तंततःपरं॥प्रायश्चित्तात्कृच्छ्रस्तुमुच्यतेबाल्यदोषइति॥सग
र्भदहनेतुदाहकर्तःप्रायश्चित्तमुक्तंस्वायंभुवमुनिना॥सगर्भदहनेतद्दूर्णिजंब

धपातकं ॥ प्रायश्चित्तं चरित्वा तु मुच्यंते पापकर्मिणः ॥ भ्रूणहत्या पतिघ्नैव मुनिः स्वायंभुवो
ऽब्रवीदिति ॥ तथा ॥ अंतर्गर्भमृतस्त्रीणां पापयक्ष्मगर्भेणा तिकृति ॥ दग्ध्वा तु गर्भसंयुक्तां त्रिरब्द
कृच्छ्रमाचरेदिति प्रायश्चित्तं ॥ सगर्भमरणे दाहनिर्णयः ॥ अथ निंदितमार्गमृतानां पा
खंडिप्रभृतीनां दाहादिविषयो विचारः प्रस्तूयते ॥ पाखंडप्रभृतीनां पुत्रघ्निकारिनिरं
पितृदानी दाहोदकदानादिकं न कार्यं ॥ तदाह याज्ञवल्क्यः ॥ पाखंड्यनाश्रिताः स्तेना भर्तृघ्
न्यः कामगादिकाः ॥ सुराप्य आत्मघातिन्यो नाशौचोदकभाजनाः ॥ पाखंडी वेदबाह्यलिंगधा
री ॥ अनाश्रिताः सत्यधिकारे अनाश्रमिणः ॥ कामगाः कुलटाः ॥ आदिग्रहणात्स्वगर्भभ्रा
मणघातिन्यो गृह्यंते सुराप्य इति लिंगमविवक्षितं ॥ अनुपायदेयगतत्वात् ॥ एषां सु
मा ॥ आशौचाद्यौर्ध्वदेहिकस्य भाजना न भवंति ॥ तेषां दाहादि न कार्यमित्येव प्रायश्चि
त्तं कृत्वा कार्यमिति वक्ष्यति ॥ तथा स्मृत्यंतरे विशेषादप्याशौचादि निषेधमाहांगिराः ॥ चं

डालादुदकात्सर्पाद्ब्राह्मणाद्वैद्युतादपि ॥ दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्मिणां ॥ उदकं पिंड
दानं च प्रेतेभ्यो यत्प्रदीयते नोपतिष्ठति ॥ तत्सर्वमंतरिक्षे विनश्यति ॥ अयं पिंडादानादिनि
षेधः ॥ पोदयादिना चंडालादीन्हंतुंगतस्य मरितः स्तद्विषयः ॥ अबुद्धिपूर्वं चंडालोदकादिभ्यो
मरणे तु तद्दैवतदाहादिविधानं वक्ष्यते ॥ मनुरपि ॥ वृथासंकरजातानां प्रव्रज्यासु च ति
ष्ठतां ॥ आत्मनस्त्यागिनां चैव निवर्तेतोदकक्रियेति ॥ आत्मनस्त्यागिनामिति विषो
द्बंधनादिनिरविहितमार्गेण ये आत्मानं व्यापादयंति ते आत्मत्यागिनः ॥ तेषामाशौचं
न कर्तव्यं तदुक्तं मिताक्षरायां ॥ हतानां नृपगोविप्रैरन्वक्षं चात्मघातिनां गोब्रह्मणां शृं
गदंष्ट्राद्युपलक्षणं विप्रइतिकोमृत्येनाल्पजोपलक्षणं ॥ आत्मघातिग्रहणं पापाखंडादि
पतितमात्रोपलक्षणं तेषामन्वाक्षमनुगतं सद्यः शौचं पुनर्दशाहादिकं ॥ एतेषां पाखं
डादीनां शरीरं गंगायां नोपेक्षिपेत् ॥ आत्मनस्त्यागिनां नास्ति पतितानां तथा क्रिया ॥ तेषां

नि०दि०
२००

मपि तथा गंगातोये संस्थापनं हितमिति स्मरणात्॥ एतेषां निषिद्धमपि दाहोदकदानादि
कं संवत्सरादूर्ध्वमनुज्ञातं षड्त्रिंशन्मते॥ गोब्राह्मणहतानां तथैव च॥ ऊर्ध्वं संवत्सरात्कुर्यात्स
र्वमेवौर्ध्वदैहिकं॥ तद्विधिं विधुवज्जि पूर्वकं कुर्यात्॥ तदुक्तं पात्र वच्छपछागलेयाम्यो॥ ना
रायणबलिः कार्यो लोकगर्हाभयान्नरैः॥ तथा तेषां भवेच्छौचं नान्यथेत्यब्रवीद्यमः॥ एतेदं ते
षां पाखंडादीनां कालांतरे दाहोदकादानादि विधानमशक्तप्रायश्चित्ता समर्थपुत्राद्य
धिकारिविषयं॥ अथ ते मति विनश्चाप्रायश्चित्तसमर्थपुत्राद्यधिकारिणः संनि
चेत्तदानमेव कुर्युरिति स्मृत्यर्थसारे स्पष्टमेवोक्तं॥ प्रायश्चित्तं तु चांद्रायणद्वयं॥ तप्तकृ
च्छ्रचतुष्कं च कृत्वा॥ यद्वा त्रिंशत्कृच्छ्रान्कृत्वा॥ यद्वा पोष्यं सर्वप्रायश्चित्तं कृत्वा तद्देवदहना
द्येव कुर्युः एतत्तु बुद्धिपूर्वदर्पादिना मरणविषयं॥ यदाह गौतमः॥ प्रायोनाशकशस्त्राग्नि
विषोदकोद्बंधनप्रपतनैश्चेच्छतामिति॥ प्रायोमहाप्रस्थानं॥ प्रपतनं गिरिवृक्षादिभ्यः॥ २००

श्य॥ अत्र इच्छतामिति विशेषणोपादानात्॥ अबुद्धिपूर्वं विषशस्त्रादिभ्यो मृतानां बालात्कारे
ण वा चांडालाद्यैर्मारितानां च दाहादीन्येव। शौचादिकं दुर्मरणदोषेणास्तीत्युक्तं अंगिरसा॥
अथ कश्चित्प्रमादेन म्रियते घुदकादिभिः॥ तस्याशौचं विधातव्यं कर्तव्या चोदकक्रियेति॥
अत्रापि वैधमरणनिमित्तप्रायश्चित्तं कृत्वेति विशेषः॥ प्रायश्चित्तं तु जलाग्न्याद्युद्बंधने॥
श्च विषशस्त्रौ हि दश्मिक॥ एषु षट्सु निमित्तेषु त्रिंशत्कृच्छ्रं विशोधनमिति गोवि
दराजात्॥ तथा स्मृत्यर्थसारे तु॥ चंडालगोब्राह्मणपशुदंष्ट्रिसर्पाम्बुदकादिभिः प्रमाद
मरणे तु चांद्रं तप्तकृच्छ्रद्वयं च कृत्वा यद्वा पंचदशकृच्छ्रान्कृत्वा विधिना दाहशौचं सर्वं का
र्यमिव॥ अत्रैव स्मृत्यंतरे विशेषः॥ चंडालेन हतायेच अग्निदाहविवर्जिता॥ कलमस्व
शरीरेतु कारयेत्प्रतिमाकृतौ॥ विधिमाने शरीरे च अस्थीनि विनिधिनाहे दहेत्॥ अस्पर्शे
कृतदाहाये प्रायश्चित्तविधिं शृणु॥ चांद्रायणद्वयं चैव तप्तकृच्छ्रद्वयं तथा॥ सांतपनं तथा

नि॰ दि॰ कृच्छ्रेणत्वार्येप्रकल्पयेदिति॥ अशौचंचांद्रायणकायपि दक्षायीस्तमछके॥ यौतु सांतपनेकार्यौ
२०१ प्रत्यास्नायात्तदारीता:कामा:प्राजापत्या॥ इतिचांद्रादिहतनिर्णय:॥ अथानुष्ठानासमर्थ
जीर्णवानप्रस्थादीनांतुविधिनोमुदकादिनामरणेफलविशेषप्रतिपादितोविष्णुना॥
समा:सहस्राणिचसप्तवैजलेदशैकमग्नौपतनेचषोडश॥ महाहवेषष्टिरशीतिगो
ग्रहेअनाशकेभारतचाक्षयागति॥ तथाशातातप:॥ वृद्ध:शौचक्रियालुप्त:प्रत्याख्या
तभिषक्क्रिय:॥ आत्मानंघातयेद्यस्तुभृग्वग्न्यनशनांबुभि:॥ इत्यादि॥ एतेषांमौर्ध्वदै
हिकविषयोविचारोनिरूपितस्मासिकाप्रकरणे॥ अथाहिताग्नेर्निषिद्धविध्यादिहतस्यम
रणेविशेष:॥ यथा॥ नाशौचंनोदकेनाश्रुनदाहाद्यंत्यकर्मच॥ ब्रह्मदंडहतानांचनकार्यं २०१
कटधारणं॥ ब्रह्मदंडहता॥ ब्राह्मणादिहता॥ पमसस्यत्वक्रोपदाहनिषेधआहिताग्नि
विषयोनभवेत्॥ कुत:आहिताग्निमग्निभिर्दहंतियज्ञपात्रैश्चेत्येतच्छ्रुतिविहिताग्नि

यज्ञपात्रादिप्रतिपत्तिलोपप्रसंगात्॥ श्रुतिस्मृत्योर्विरोधेश्रुते:प्राबल्यात्॥ सत्यं॥ वैतानं
प्रक्षिपेदप्सुआवसथ्यंचतुष्पथे॥ पात्राणितुदहेदग्नौयजमानेवृथामृते॥ इत्यनेनांगिरं॥
स्मृतिवचनेनवृथामृतेवृथावैदिकमार्गपरित्यज्यान्यमार्गाश्रयणात्॥ मृतेऽन्ता॥ चंडाला
दिहताग्निसंबंधिनांपुत्रपात्राणामप्सुप्रक्षेपादिलक्षणप्रतिपत्यंतरविधानादयंस्मा
र्तोपदाहादिनिषेधश्चंडालादिहताग्निविषयेनप्रवर्ततइतिनाशंकनीयं॥ अथयत्र्यत्रि
याद्याहिताग्नौपापकर्मणि॥ स्मार्तोदाहनिषेध:॥ ब्राह्मणादिहताग्निदग्धेतिविषयेष्वुतेष्वरिनै
धते॥ अतोब्रह्मणापेयाकर्मविस्रवाग्निभिर्दहेदित्याद्यायेनाहपराशरं॥ चंडालेनश्वपा
केनगोभिर्विप्रैर्हतोयदि॥ आहिताग्निर्मृतोविप्रोविषेणात्मघातकेन॥ दहेत्तंब्राह्मणं
प्रेतंलोकाग्नौमंत्रवर्जितं॥ दग्ध्वास्थीनिगृहीत्वाचक्षीरेणक्षालयेत्तत:॥ स्वाग्निनास्वसमृ
धिनाप्ययोगेतत्पुनर्दहेदिति॥ एतत्तुनदहेदेविधानमत्रेतनिषिद्धाचरणेपतत्संवितिष

नि॰दि॰ याग्निप्रायं॥यदाग्निसंनिधानागमनाशक्यदूरदेशांतरमृतिविषयं॥अग्नीनासांनिध्येतुदग्म
रणायोग्यंप्रायश्चित्तंकृत्वास्वाग्निभिरेवदहनंकार्यंस्वगृह्यविधिना॥तथाचस्मृत्यर्थसा
२०२ रे॥नाक्तोमक्तःपुत्रःपित्रादेःपापिनःसर्वात्मनाशुद्धिमिच्छेच्चेत्प्रायश्चित्तप्रकारेणोक्तप्राय
श्चित्तानामन्यतमयोग्यंकृत्वातदानेनैवतांशुद्धिंसंपाद्यदहनादिकंकुर्यात्॥इतिनिर्णय
तथा॥प्रवासस्थमृतानांतुप्रायश्चित्तंकथंभवेत्॥प्राजापत्यात्षडब्दंवाशुद्धिकृत्स्मरनीषि
भिरिति॥अथयद्यपिसर्वसपिंडविषयमाशौचंरथकृअग्रेतिपाष्यितं॥तथापि॥संवत्सर
तीतेपिपित्राराशौचंपुत्राणांस्यादितिमतिःपादः नार्यअब्देनीतेसपिंडमृतस्वणात्तन्नि
मित्ताशौचंसपिंडानांतस्यान्नदादशदृक्वसिष्टः॥मासत्रयेत्रिरात्रंस्यात्षण्मासेपक्षिणीअ २०२
हस्तुनवमादर्वाक्पूर्णेदत्तोदकंशुचिः॥इदंसपिंडानांमृतौताशौचंस्याशौचंवनक्ताला
दूर्ध्वंलक्षणादीनांसर्वेषांवर्णानामुपनयादूर्ध्वं॥स्त्रीशूद्राणांविवाहादूर्ध्वंभवतितिस्मृ

प्रायेणव्याख्यातंयथातत्रालिखितं॥अत्रमृतादिनीतिविशेषोपादानात्तिथिभेदेतुपृथग्गे
वश्राद्धेकपतिसमासेनेतिगम्यते॥किंचमृताहनिसमासेनकुर्यादितिविशेषाभिधाना
देवसांवत्सरीकव्यतिरिक्तनवश्राद्धषोडशश्राद्धसपिंडीकरणगयास्वशादिश्राद्धेषुवच
नांतरैश्चपृथग्विहितेषुपृथक्कर्तव्यतायांप्राप्तायांनवश्राद्धंपृथगिति॥परिसंख्या
नवश्राद्धस्यैवपृथग्विधानात्नवश्राद्धव्यतिरिक्तेषुषोडशश्राद्धादिषुसांवत्सरीकवदेव
समासेनेवविधानमितितिल्पितं॥एतद्युक्तं॥यद्यान्वारोहणेमृतानांसर्वेषामेकस्मि
न्नहनिइतिविवक्षितंतदा॥पत्न्यान्वारोहणेमरणेन॥किंतुपूर्वेतिनासंगतेस्यात्॥त
तःस्त्रीणांमन्वारोहणेसतिपूर्वमृतस्यपत्न्यादहनंदंपत्योरित्येतद्युक्तं॥अन्वारोह
णासतिमृताहतिसमासेनपिंडनिर्वपणमित्युक्तौतिथिभेदेपिसमासःसिद्धानिवेपरी
त्यंतुक्तः॥द्वयोःदंपत्योर्मदाह्यादेरुद्भ्यंप्रसक्तो॥तत्रैवदेवतात्वंसममेतेस्यो॥इव

रूपं च समस्यते॥ अतोऽग्निषोमयोरिव सहोद्देशः सहप्रदानं चेद्द्विपितृके तु पृथक्। द्वैतनिर्णये
सहप्रदानं च॥ एवं देवताभेदे यथा समासः स्यात् तथा भिन्नेऽपि समासः स्यादेव वचनात् नव
श्राद्धं तु नैतच्छ्राद्धोपलक्षणं सपिंडतं तु॥ तदाह गरुडपुराणे॥ एकपाकप्रवृत्तिपिंडावद्द
धात्स्पृथक् पृथक् एकादशाहं षोडश एपृथक् श्राद्धानि षोडश तथा दिनानत्वश्राद्ध विषयणी
परिसंख्या वा धिमृताहनीति॥ सपिंडीकरणोत्तरोपलक्षणोयं॥ पुत्रेणैव पृथक् श्राद्धं
सपिंडीकरणं पापितिना सहैतो सपिंड नोत्तरं पति पत्न्योस्सदैकत्वं त्रिषु स्थानेषु वै पृथक्
कन्याद्यानेतथा द्यते पिंडसंयोजनं तथेति विष्णुवचनेन त्रिषु एव पृथगभिधानादन्यत्र समा
सेन श्राद्धतर्पणादिकमिति सिद्धं तस्मात् सपिंडनात् पूर्वं सर्वं पृथगेवेति निर्णयः॥ अथान
र्तमरणा॥ तत्र रं चिरं कालव्यवधानेऽप्यनुगमनं नस्मृतायां अपि पत्न्याः विशेषो विधीय १९५
ते ब्रह्मपुराणात्॥ देशांतरस्थे यत्नात् साध्वी तत्पादुकाद्वयं॥ निधायोरसि संशुद्धात्रवि

शेज्जातवेदसं॥ ऋग्वेदवाक्यात् साध्वी स्थानमवेदात्मघातिनी॥ अत्यौ हाशौचेतु निर्हत्य श्रा
द्धं प्राप्नोतिशास्त्रवत्॥ तस्याश्च हाशौच धर्मे पिंडं ध्व दैहिकं कुर्यात्॥ शास्त्रवदिति तत्सि
मकालमरणवदेवाब्दिकादीति॥ मन्तुमनुगुवचनं यास समारोहणं कुर्यात् त्रिस्थितां पती
व्रति॥ मृता हनि तु संप्राप्ते पृथक् पिंडे नियोजयेत्॥ मृत्यब्दे च नवश्राद्ध युगपत्तु समाचरे
दिति॥ तदिदं मृता हनि पृथक् पिंड श्राद्धा भिधायकं विजातीय स्त्री विषयं॥ मनुत्थित्वान्
नुमृता हनीत्यन्वयः॥ विजातीयत्वेन एकचित्यारोहणान्निषेधानात्॥ अथ रजस्वला
यास्ज्ञोदाघयुक्तायाअपि सहगमन प्रकारस्तत्वं तरोत्॥ यदा स्त्रियास्तुदक्यायां पति
प्राणात्ययेत्स्यजेत्॥ द्रोणमेकं तदुजानाम वहन्यां हि पे॥ श्राया प्रमाणं तु पलद्वयं तु श्रु
प्रस्थं तद्द्विगुणं कुडवं स्मृतं॥ चतुर्भिः तु कुडवैः प्रस्थः प्रस्थाश्चत्वार आढकः॥ चतुर्भिराढ
कैर्द्रोणा एत द्रोणस्य लक्षणं॥ मुशलादिघातैस्तद् सकस्त्र वतेयोनिमंडला त॥ विर॰

जस्कामन्यमानास्वेचेन्नेतदसत्कृत्यम्॥ दृष्टाश्रौचंप्रकुर्वीतपंचमतिकमादृष्यकं॥ त्रिं
रात्रिंत्रपिंचनरवोदत्वा त्वहः क्रमात्॥ विप्राणां वचनं लब्ध्वासमारोहेद्धुताशनं॥ नारिणां
सरजस्कानामियंशुद्धिरुदाहृतेति॥ सरजस्कायेतदुक्तं प्रायश्चित्ताचरणेनतदैवस
मारोहणंकुर्यादपि वा चतुर्थेह्निरजोस्कानिवृत्तौवाशिष्टाचाराविरुद्धमार्गेणकुर्यादि
ति॥ तथा॥ कृतात्रियासमारूढाचतुर्थेह्निपतिव्रता॥ तस्यामनुदिनान्कार्यंविषोमगादि
सूतकमिती॥ तथा॥ अन्वष्टकासुयच्छ्राद्धंवृद्धिहेतुकं॥ पितुः पृथ्वाकर्तव्यंस्त्रीषुपिंडं
सपिंडात्कुतेइतिगारुडात्सहगमनेतिपथि॥ अथाएकस्मिन्नहनिपितृपुत्रादीनां
मरणेदहनादौविशेषः॥ स्मृत्यर्थसारात्॥ पितापुत्रयोःसवर्णयोःसमानधर्मयोःकृपा
याग्निनादाह्ययोर्दाहःसहैववा॥ उदकदानादिकंपितृपूर्वंपृथक्पृथगेव॥ तथा॥ नान्दयोस
मानधर्मणोःकपालाग्निनादाह्यानांसहवादाहः॥ उदकपिंडादिकंज्येष्ठपूर्वंपृथगेव।

त्यर्थसारे॥ मनुरपि॥ संवत्सरे व्यतीतेतुस्पृष्ट्वैवापोविशुध्यतीति॥ संवत्सरेपूर्णेयदिप्रोषित
सपिंडमरणंस्रवगतंस्यात्तदासर्वेब्राह्मणादिवर्णाःस्नात्वोदकंदत्वाशुद्धिःस्यात्॥ एतच्च
शुद्धिविधानंमातापितृव्यतिरिक्तविषयंतद्विषयेश्रवणमात्रादेवाशौचंचवातस्मात्त
दुक्तंपैठीनसिना॥ पितरौचेत्मृतौदूरस्थोपिहिपुत्रका॥ श्रुत्वातद्दिनमारभ्यदशाहंसूत
कीभवेत्॥ तथास्मृत्यंतरेपि॥ महागुरुनिपातेतुआर्द्रवस्त्रोपवासिना॥ अतीतेब्देपिकर्तव्यंप्रे
तेकार्येयथाविधि॥ महागुरुःपिता॥ तदानीप्रेतकार्यंपिंडादिकंतुमारेनेतथाविधीतियद्य
नेनकेनाप्यधिकारिणाविधिदशाहादिनेकृतंतादास्यात्तदाहएवकिंकुर्यादिति॥ कृतेत्वान्नेवि
त्वोत्रेपिवासमात्रमिति॥ पितृपत्न्यामपिमातृव्यतिरिक्तायांस्मृत्यंतरेविशेषोदर्शितः॥ पि
तृपत्न्यामपेतायांमातृवर्जंद्विजोत्तमा॥ संवत्सरेव्यतीतेतुत्रिरात्रमशुचिर्भवेदिति॥ एवमे
वोक्तंस्मृत्यर्थसारेपि॥ मातापितृमरणेचोदेहादूरमपिदूरेदेशेपिसंवत्सरादूर्ध्वमपि

नि॰दि॰ पुत्रः श्रुत्वा मरणश्रवणदिनमारभ्य दशाहादिकं यथावर्णमाशौचं कुर्यात्॥ उदकपिंडा
२०३ दिकं च॥ महागुरुमरणे दूरे देशेऽब्दे पि आद्यं त्रिरात्रोपवासिना॥ तथैवाशौचादिकं कार्यं।
स्त्रीपुरुषयोः परस्परं चैवं॥ सवर्णाहीनवर्णसपत्नीषु चैवं॥ देशांतरे कालांतरे च हीनवर्णाया
मातुः सपत्न्या मरणे॥ पुत्रस्यैकरात्रं॥ हीनवर्णासपत्नीषु चैवं॥ संवत्सरातीतेपि सपत्न्योः
परस्परं चैवं॥ इदं चाशौचं सवर्णविषयसमं॥ तथा देशांतरस्तानां मात्राशौचकालादूर्ध्वं श्रुते
सत्याशौचं न भवति॥ तदुक्तं॥ देशांतरमृतं श्रुत्वा क्लीबे वैखानसे यतौ॥ मृते स्नानेन शुध्यं
ति गर्भस्रावे च गोत्रिणः इति॥ मनुरपि॥ बाले देशांतरस्थे च पृथक्पिंडे च संस्थिते॥ सवासा
जलमाप्लुत्य सद्य एव विशुध्यतीति॥ तत्र देशांतरमनेकधोक्तं॥ देशांतरं किसक्षयंद २०३
दस्मृतिनोक्तं॥ महानद्यंतरं यत्र गिरिर्वा व्यवधायकः॥ वाचो यत्र विभिद्यंते तद्देशांतर
मुच्यते॥ देशांतरं केचिदेके षष्टियोजनमायतं॥ चत्वारिंशद्वदंत्यन्ये त्रिंशदन्ये तथैव चेति।

स्मृत्यर्थसारे तु॥ स्मृतिपुराणतीर्थकिल्योक्तानेकप्रकारदेशांतरनिरूपणावसरेऽनंतयोमहा
नद्यंतरं यत्रेत्यादिवचनयोरप्ययोर्निरूपितः॥ मासाशौचिनः शूद्रस्य षष्टियोजने देशांतरं॥
तथा॥ वैश्यस्य त्रिंशद्योजने॥ क्षत्रियस्य त्रिंशद्योजने॥ ब्राह्मणस्य विंशतियोजने देशांतरं।
तथा॥ वैश्यस्य त्रिंशद्योजने॥ क्षत्रियस्य चतुर्विंशतियोजन इति पक्षांतरं चोक्तं॥ एतानि
योगपत् या व्यवस्थितानीति केचित॥ देशकालदुर्गमार्गभूपर्यालोचनया सर्वेषामविरोधोऽन्वेष
ण भवतीत्यन्ये॥ आशौचे यथा पक्षांतरेण विशेष इति तथा॥ नायामेद विशेषः महागिरिव्य
वधानं॥ महानदीव्यवधानमिति॥ षड्वाष्टचतुर्योजनानि त्रीणि देशांतराणि तानि समा
न्यकाति॥ तानि त्रिरात्रादिविषयाण्येव भवंति॥ विषयश्चोक्तस्तत्रैव ब्रह्मस्मार्ते यास्यपूर्वतर
ग्रंथे॥ तद्देशांतरं त्रिधा विभज्य आद्यस्य समीपभागे त्रिभागं ततो दूरं भागे पक्षिणी ततो दूर
भागे त्वेकाहं स्यात्॥ एवं देशकालादि पर्यालोच्य यत्राप्याशौचं तदेव ग्राह्यं॥ आद्या॥

तिनवर्द्धयेत्॥ तथा भाषा यत्र गिरिव्यवधानं नदीव्यवधानानि च त्रीणि देशांतराणि स्मृ-
तानि॥ एवंभूतान्यपि देशांतराण्येकत्रानि तानि त्रिरात्रादिविषयाणि भवंति पूर्ववत्॥ ए-
वं दूरदेशांतरस्थे मृते चाशौचकालाद्धूर्ध्वं सर्वेषां सपिंडानां सचैलं स्नानं न त्रिरात्रादीति
निरूपितं॥ सत्यसारे॥ इदं सर्ववर्णसमं॥ अथ देशांतरात्सपिंडमरणादेशमागतः स-
पिंडमृतिं शृणोति॥ तदा देशांतरस्थितेन मृतिश्रुतेर श्रवणात् मासत्रये त्रिरात्रं स्यात् षण्मा-
से पक्षिणी तयेत्यादि स्मृतकोऽभवेत्॥ अन्यथा गृहस्थे प्रोषिते यत्र कश्चिद्भूमिप वदेः॥ त्रस्याग-
तस्येक्षकान्तातितद्वहुतनगरहीतदा॥ आशौचं मरणादिहीणो स्पर्शेन तद्व्यादस्नादाभवेत्॥ तथा
देशांतरेतिक्रांते दशाहे तु पश्चाज्ज्ञाते चेन्नद्वी॥ त्रिरात्रसूतकंतस्यानतद्व्यस्यकदिचि-
दित्यादिवचनात्संगतानिस्फः॥ योजनप्रमाणमुक्तं पुराणांतरे॥ तिर्यग्यवोदराण्यष्टौ
वृद्धीवाष्टौ द्रापरस्त्रीयः॥ प्रमाणमंगुलस्योक्तं वितस्तिर्द्वादशांगुला॥ वितस्तिद्विगुणारत्नि- २०४

स्तत्किष्कुस्ततो धनुः सहस्रे द्वे क्रोशस्त्वतुःक्रोशं तु योजनं॥ अथास्थिनिक्षेपनिर्णयः॥
अस्थीनि गंगादितीर्थे निक्षिपेदित्युक्तं॥ तद्विधिः स्मृत्यंतरात्॥ स्नात्वा ततः पंचगव्ये-
न सिक्त्वा हिरण्यमध्वाज्यतिलैश्च संयोज्य॥ ततः स्कम्मृत्पिंडपुटे निधाय पश्यन्दिशं प्रे-
तगणोपगूढं॥ नमोस्तु धर्माय वदन्प्रविश्य जलं समे प्रीत इति क्षिपेच्च॥ उत्थाय भास्वं-
तमवेक्ष्य सूर्यं सदक्षिणं विप्रमुखाय दद्यादिति॥ मंत्रांतरं॥ यावदस्थि त्वदीयान्यस्मि-
न्तीर्थे वसंति हि। तावद्वर्षसहस्राणि वैकुंठे वसते मृतेति॥ इति पित्र्याशौचादिनिर्ण-
यः॥ अथ पुनःसंस्कारार्थकालादिकं निरूप्यते॥ तत्र संवत्सरादूर्ध्वं तूत्तरायणकाले
श्रेष्ठं तत्रापि नंदा नवयोदशा चतुर्दशी दिनक्षयं न वर्जयेत्॥ शुक्रवारशनिश्चरवारौ वर्ज्यौ
नक्षत्रेषु भरणी कृत्तिका अश्लेषा मघा मूलं धनिष्ठा। नंदे पंचकं त्रिपुष्कराणि सर्वथा वर्ज्या-
नि॥ व्यतीपाते परिघे वैधृते च योगे विष्टीकरणे नवम चतुर्थाष्टम भौमंद शास्थे चंद्रे चातिरो-

नि०दि० षा।रोहिणीपुनर्वसुपूर्वोत्तराचित्राविशाखानुराधापूर्वभाद्रोत्तराणिनिषिद्धत्रिपुष्क-
२०५ राणि च द्विपुष्कराणि संभवे वर्ज्यानि शिष्टानि ग्राह्याणि॥सर्वथा दिनशुद्ध्यभावेऽतिदुष्टम-
त्यां॥युगादिमन्वादिसंक्रांत्यमास्यासु प्रेतकार्ये किंचिदपि नैव शोध्यमिति स्मृत्यर्थसागर-
तथा आशौचदिनमध्ये पुनःसंस्कारे तु दुष्टवाधादिनादिसंभवे शोध्यं॥सा स्नादेकादशा-
हे किंचिदपि नैव शोध्यं प्रेतकार्ये॥पुनःसंस्कारविधिस्तावन्मिताक्षरायां॥यदा तु प्रोषि-
तमरणे शरीरं न लभ्यते।तदा अस्थीनि प्रतिकृत्वा तेषामप्यलाभे पर्णशरैः शौनकादि-
गृह्योक्तमार्गेण प्रतिकृतिं कृत्वा संस्कारः कार्यः॥स्मृत्यंतरात्॥अस्थीनि चेन्न लभ्यंते
प्रोषितस्याग्निहोत्रिणः॥पालाशवृंतैर्वृहतानां षष्ट्याधिकशतत्रयं॥तान्यस्थिस्थानानि कृ- २०५
त्वेति शेषः॥तथाश्वलायनः॥शरीरविदहनासाष्टौ पुत्रीणि षष्टिशतानि च॥पलाशवृंता-
नि।तेषामाकारपर्यस्तानेच चत्वारिंशच्छिरसि ग्रीवायां दश जान्वोस्मयोर्बाह्वोः शतमूरसि-

त्रिंशज्जठरे विंशतिः षड्वृषणयोः शिश्ने चत्वारि ऊरौ शतं त्रिंशज्जानुजंघायावतोः पादांगुली-
षु विंशतिरेवं त्रीणि षष्टिशतानि भवंति पुरुषाकृतिं कृत्वोर्णसूत्रैः परिवेष्ट्य यवचूर्णैः प्रलि-
प्य सर्पिषाभ्यज्याग्निभिः संस्कुर्वंतीति॥आशौचं चात्र दशाहादिकमेव॥आहिताग्निश्चेत्प्र-
वसन्म्रियेत पुनःसंस्कारे प्रत्यक्षशवाद् दशाहादिकं संपूर्णाशौचं पयावर्णं कार्यं।तथा॥
दाहादूर्ध्वं प्रकर्तव्यमेषां वैतानिको विधिरिति॥वारवसंस्मरणात्॥आहिताग्निविषये ता-
स्मिन्दशाहत्वाद्यमिति दत्वाकं॥तस्मादाहिताग्नेराशौचं मध्यमेकेन दाहप्रभृतीति निर्ण-
यः।अनाहिताग्नेः प्रतिकृतिविधानमेतद्देवस्वतकादौ विशेषः॥अनाहिताग्नेः पुनःसंस्कारे
त्रिरात्रमिति वसिष्ठः॥सुपिष्टैर्जलिसमिश्रैर्दग्धव्यस्तथाग्निना॥आनाहिताग्नेः पुनः
संस्कारस्तत्त्रकामध्ये च कृतस्तत्सूतकशेषेणैव शुद्धिः॥अतीते सूतके पुनःसंस्का-
रे तु पूर्वमगृहीताशौचस्य पुत्रस्य पत्न्याश्च दशाहाशौचं॥गृहीताशौचस्य पुत्रस्य पत्न्याश्च

त्रिरात्रं॥ पत्नी पुनःसंस्कारे पत्न्यश्चैव॥ सपत्न्या मिथः चैव॥ अगृहीताशौचानां सपिंडानां
त्रिरात्रं॥ गृहीताशौचानां सपिंडानां पुनराशौचं नास्ति॥ त्रिरात्राशौचे पिंडोदकादानप्रका
रो निरूपितश्चाद्यश्राद्धप्रकरणे इति पुनःसंस्कार इति निर्णयः॥ अथ पुनर्दाहप्रायश्चित्तं॥
तेषु हत्वाद्यसंस्कारे पुनःसंस्कारे च कर्तव्ये कृत्वोच्छिष्टेनयोच्छिष्टस्पृष्टमरणात्वकं
मरणादिषु सत्सु॥ नीत्कृच्छ्रान्त्वा दशकृच्छ्रान्वा चरेत्वा प्रायश्चित्तं निमित्तानुसारे
णकृत्वा दहेत्॥ विप्रवचनं गृह्णतेति॥ तथा हत्यन्तकर्त्रापि किंचिदात्मनं शुद्धिकयते॥ त्र
तस्यात्मनं प्रशुद्धिमनुत्पाद्यकृते नोपतिष्ठति॥ उभयो नरकं ध्रुवमिति स्मृत्यर्थसार
त्॥ तथा प्रवासमृतानां तु प्रायश्चित्तं कथं भवेत्॥ प्राजापत्यं सकृद्विप्रा शुद्धिमनीषि २०६
भिरिति॥ दुर्मरणनिमित्तप्रायश्चित्तमकृत्वा स्नेहादिना चेदौर्ध्वदेहिकं कुर्यात्तदा कर्तु
र्दोषः॥ तदुक्तं माम्नाये॥ कृत्वाग्निमुदकं स्नानं स्पर्शनं वहनं क्रियाः॥ रज्जुच्छेदाश्रुपात

चतप्तकृच्छ्रेण शुध्यतीति॥ अबुद्धिपूर्वेपि संवर्तः॥ एषामन्यतमं प्रेतं यो वहेत दहेत वा॥ कौ
टोदकक्रियां कृत्वा कृच्छ्रं सांतपनं चरेत्॥ एषामात्मघातमृतानामिति॥ अतस्तेषां प्रा
यश्चित्ते शुद्धिकृत्वैव दाहः कार्य इति दुर्मरियोदाहनिर्णयः॥ साग्नेः सूतकविचारः॥ आ
हिताग्नेर्दाहात्सूतकमुक्तं॥ मरणादेव कर्तव्यं संयोगो यस्य नाग्निभिः॥ दाहादूर्ध्वं कर्त
व्यमेष वैतानिको विधिः॥ तथा सती साग्ने देशांतरे मरणापराधे तत्कालांतरेणाग्निप्राप्ते
सत्यां दाहे सति संनिधाने स्थितानां पुत्रादिसपिंडानां मरणमिति त्रिंसूतके न भवेत् भवे
इति विज्ञायते॥ विगते तु विदेशस्थे शृणुयाद्यो ह्यनिर्दशं॥ यच्छेषं दशरात्रस्य तावदेवाशु
चिर्भवेत्॥ तथा प्रोषितेकाले चोषः स्यात् दशोपेदशाहातिक्रांते मासत्रये त्रिरात्रं स्यात्
षण्मासे पक्षिणी स्मृतेत्यतेः॥ न समानाधमिति न देशांतरमृते श्रुत्वा स्त्री वैवैखानसे यते
मृते स्नानेन शुध्यंतीत्यत्र न देशांतरास्थितानां अहमपि न भवति॥ यदुक्तं माहिता

ग्नौ पितरि प्रेते देशांतरमृते तत्पुत्रादिनामासंस्काराच्छ्राद्धादिकर्मलोपो नास्तीति॥ तदिदं
विधिवद्दहनाभावेनच्छदनस्यापि योग्यताभावात्॥ उक्तं तिद्वा दाहातिक्रमाच्च विधिव
त्संस्कारार्थमस्थिप्रतीक्षापवं॥ पत्नुपितृमरणश्रवणादेव प्रेतकार्यं कर्तव्यमिति वच
नं तदस्थिप्रतीक्षारहितविषये॥ अनग्निमत उक्तं ते आशौचं हि द्विजातिषु॥ दाहादग्नि
मतां विद्याद्विदेशस्थे मृते आहिताग्नौ त्रेताग्निसंनिधानाभावे। न वैश्वदहनाभावे सति सं
निहितस्थितेः पुत्रः स्नातः सपिंडैरुक्तं तिद्वाहमध्ये मातृभ्रातृपितृव्यकादीनामागते
त्र्याहिकं कर्तव्यं तच्चेति अथवा संनिधानस्थितेरन्येऽस्तपितृक्षयाहादिश्राद्धेऽपवेत्ता
नीयानचेति अपवेत्तानं तु लोकविगीतत्वानादरणीयं॥ यथा गर्वविगीतं तथापि मधुपर्के
पशुआलंभनवद्धोकविद्विष्टत्वानानुष्ठेयं॥ तथा च मनुः॥ अस्वर्ग्यं लोकविद्विष्टं धर्म
मप्याचरेन्न तु किंच॥ इदमाशौचं मरणनिमित्तं दाहनिमित्तं वा॥ दाहानिमित्तं तु

साग्नेर्मृते आशौचं दाहादितितु॥ अथ पितृक्षयाहः श्राद्धण भोजनकालापर्यंते दाहो
त्तकार्यं इति कश्चिद्वदेत् इत्यादि लोके उपहासतास्यात् मरणनिमित्तं चेदुक्तं तिद्वा
दे प्राप्ते॥ तस्मादुक्तं तिद्वा दाहापरिहारेण साग्निकनिमित्तत्वेनाधिकाशौचं विधान
मिति॥ अतः अनग्निमत उक्तं ते साग्नेः संस्कारकर्मणः शुद्धिरित्येतत्॥ यथा कथंचिद
धिकाशौचविधिपरं व्याख्येयमिति निर्णयः॥ अथ देशांतरमृते साग्नौ अस्थानागते पत्नी
मरणे निर्णयः प्रस्तूयते॥ देशांतरगते प्रेते यजमाने अक्षते सति दाहार्थं रक्षिते वह्नौ पत्नी
यदि गृहे मृता॥ तदा पुत्रेण कर्तव्या तस्या दहनं तु कागति॥ अत्रोत्तरं विवक्ष्यते॥ यज
मानास्थ्नो दाहार्थं रक्षितैरग्निभिर्यदि गृहे पत्नीमरणं देमदेति॥ तदानुया रक्षणीयास्ततः प
त्नी दहेत इति संप्राप्ते नेमितिक्रियोधिन्युत्तरोत्पन्ने पूर्वोत्पन्नं तु बलं॥ जैमिनिमुनिराह
वंत्याय व्याख्यानसम्मितं॥ उत्तरोत्पन्नं पत्नीमरणं पूर्वोत्पन्नास्थिदाहविरोधि॥ अत:

नि०दि० प्रबलत्वादुत्तरंस्यादिति॥तथापौर्वापर्येपूर्वदौर्बल्यमितिन्यायादध्यायास्त्रेउत्तरंप्रबलमि
२०८ तिप्रतिपादितंन्यायरत्नमालायां॥न्यायेतु॥ज्ञनरत्नमणिमंत्रादिबाधकसंनिधानेपूर्वाग्ने
दाहिकशक्तिर्बाध्यतइति॥ननुयेपुरोदंचोदर्भास्तानुदक्षिणाग्रान्स्तृणीयात्॥तथा॥अय
धस्तात्समिधंधारयन्॥उपरिष्टाद्देवेभ्योधारयतीत्यादिश्रोषितमृताग्निहोत्रहोमविधि
नाहोमेक्रियमाणेऽप्यतियजमानसंबंधिनोऽन्यःसंपन्नाइतिपत्न्याअपरोधर्मःकात्तत्रे
त्तरं॥प्रवासमृतविधिनाक्रियमाणेऽग्निहोमके॥तत्रापिपत्नीसंनिस्यादनालंभुकावि
ना॥यतउभयोरसमक्षंचेद्धुतमप्यहुतंभवेदितिवचनात्संनिधानं॥सविधस्तनि
ष्ठमप्यदितिपाणिनिस्मरणात्॥अनालंभुकारजस्वला॥तथाचमिताक्षरायां॥द्यस्म २०८
त्लैअह्निनिपत्न्यनालंभुकास्यात्तामपरुध्ययजेतेतिश्रुतिश्च॥नोपवासःप्रवासेस्या
त्पत्नीधारयेव्रतं॥तथा॥पत्नीमासामतिक्रामेद्यजमानोगृहेयदि॥आहोमाद्दिना

गच्छेत्पुनराधानमर्हति॥तथा॥आदधीयातामितिद्विवचनदर्शनादित्यादिश्रुतिस्मृति
कात्यायनपत्नीवत्पत्नीयजमानयोराधानमेग्निषुतुल्योधिकारइतिगम्यते॥तथा
सतिसपत्नीमरणसमयेयद्यस्त्रीतिपितुरागच्छेत्पुनस्तदासतदादहइति॥अथकाटक
शाखायां॥मुमूर्षुःपुनःसंस्कारइति॥एतद्गृह्येअग्निहोत्रसद्भावविषयं॥पत्नीसदा
ग्निहोत्रेदग्धपश्चाद्यागनान्यस्त्रीतिपुनःसंस्कारविधिनाज्ञौकिकाग्निनादहेत्॥अग
तिकत्वादिति॥तथा॥अथपत्नीरग्निनिर्यजमानंसंस्थापयंतिदेवयोवाअग्नयइत्यादि
श्रुति॥यजमानमितिद्विपत्नीव्याप्तिकवत्कत्वाभिप्रायेणैकवचनं॥यथाग्निषोमयोर्देव
तात्वं॥अतएवमृतांपत्नीमग्निभिर्दहेदितिश्रुतिस्मृतिसिद्धं॥अग्नयोयजमानस्या
पिदेवत्वंकुर्वंति॥अग्निहोत्रकर्मजनितताप्पूर्वस्यविद्यमानत्वात्॥सर्वकर्मपुर्व
कर्त्तारितिश्रुति॥तेनापूर्वेणशरीरांतरेस्वर्गस्यात्॥तथाचकौषीतकि॥सएतेनदेव

रयेन स्वर्गं लोकमेति कृतं यात्र लोक इति मुक्तो पुण्यवतां लोकः निरंतरं सुखं तदुक्तं यन्न

दुःखेन संभिन्नं न च ग्रस्तमनंतरं॥ अभिलाषोपनीतं च सुखं स्वर्गपदास्पदं॥ अत्र विशेषः
मातृमृताशौचमध्ये पूर्वेक्षितानि पितुरस्थीन्यागच्छेयुः॥ तदा मातुराशौचांते सपिंडनात्
प्राक्पितुर्दाहादि सपिंडनांतं कृत्वा मातुः सपिंडनं कुर्यात्॥ अपनूनमरणं चेत्स्थ्य
ते तदा पितुराशौचस्य प्रबलत्वात्॥ पुनस्तदानीं पितुर्दाहादि कुर्यात्॥ पिंडोदकदा
नं तु पितृपूर्वं अत्र वचनं॥ लौगाक्षिराह॥ पितर्युपरते पुत्रो मातुः श्राद्धं निवर्त्तते॥ वी
शेषस्तु संघातमरणे ऊर्ध्वदैहिकनिर्णये वक्ष्यत इति निर्णयः॥ अथाकालांतरमृताया
पत्न्या दहने विशेषः कारिकायां॥ पत्नी चेद्विधवा तस्या अग्नियेन तदा दहन॥ तदग्नेरता
निःशून्यत्वान्निर्मथ्ये नैव दह्यते॥ निर्मथ्यः किंचित् क्षितेनारणिकाद्येनेति शेषः॥ पुरुष
स्तु सत्यां सादिग्त्यादहनाभावे संभाव्यत इति॥ अथ गर्भादारभ्य जननपर्यंतं सूत

कं क्रियायते॥ तदाशौचं द्विविधं॥ सूतकं मृतकं च॥ सूतिनिमित्तं सूतकं॥ मृतिनिमित्त
सूतकं॥ मृतिनिमित्तं मृतकं वाकदापि आशौचेनतु तत्रापमुच्यते सूतकाधिकारिणः
सपिंडाः समानोदकाश्च यतः प्रभृति संतानविस्मृषः सकूटस्थाः तमारभ्य गणिताः सप्तपु
रुषा॥ सपिंडाः ऊर्ध्वं समानोदकाः॥ तदाह बृहन्मनुः॥ सपिंडता तु पुरुषे सप्तमे विनि
वर्त्तते॥ सप्तमे अतिक्रांते॥ समानोदकभावस्तु निवर्तेताचतुर्दशात्॥ जन्मनाम्नोः स्मृ
तेरेके तत्परं गोत्रमुच्यते॥ सुत॥ दशाहं शावमाशौचं सपिंडेषु विधीयते॥ जननेप्येव
मेव स्यान्निपुणां शुद्धिमिच्छतेति॥ शावं शवनिमित्तं॥ यत्र सपिंडानां दशाहं तत्र समानो
दकानां त्र्यहं जननेप्येवं॥ मिताक्षरायां॥ गर्भस्रावे यावंतो गर्भग्रहणमासाः समसंख्या
निरात्रैः शुद्धेः कारणं॥ एतच्च स्त्रिया एव॥ गर्भस्रावे मासतुल्या रात्रयः स्त्रीणां॥ स्नानमात्र
मेव पुरुषस्येति वसिष्ठस्मरणात्॥ आचतुर्थाद्भवेत्स्रावः पंचमषष्ठयोः॥ पातः॥ ऊर्ध्वं प्रस

तिरितित दुक्तं स्मृत्यंतरे॥आचतुर्थाद्भवेत्स्रावः पातः पंचमषष्ठयोः॥आतऊर्ध्वं प्रसूतिः
स्यात् दशाहं सूतकं भवेदिति॥ मरीचिरपि॥ स्रावे मातुस्त्रिरात्रं स्यात् सपिंडाशौचवर्ज
नं॥पाते मातुर्यथामासं पित्रादीनां दिनत्रयमिति॥पित्रादिसपिंडानां त्रिरात्रमाशौचं
गर्भनाशप्रयुक्ताशौचं सद्यविपस्तिमं वसिष्ठः॥ऊनद्विवार्षिके प्रेते गर्भपतने वा सपिंडा
नां त्रिमाशौचमिति॥यत्तु गर्भपाते सद्य॥स्नानविधानं॥सद्यः शौचं सपिंडानां गर्भस्य
पतने सतीति तच्च न तत्र तु मासित्र्यंतरे ड्वरूपगर्भपतने वेदितव्यमिति विज्ञानेश्वरेणैव
व्याख्यातं॥ पितुः प्रथमे मासि स्नानं न वेति॥ अतएव मासाद्रूर्ध्वं सूतकविधिर्दशरात्र
मेव॥मिताक्षरा॥सप्तममासप्रभृति जाते वा सपिंडानां जननिमित्तं परिपूर्णमाशौचं जा
तम्रुते मृतजाते वा सपिंडानां दशाहमिति हारीतस्मरणात्॥मृते जाते तु पारस्करः॥
गर्भे यदि विपत्तिः स्याद्दशाहं सूतकं भवेत्॥ सपिंडानां प्रसवनिमित्त स्याविधा

मानत्वात्॥प्रसवनिमित्तं दशाहं सपिंडानां समानोदकानां त्रिरात्रं॥जननेतनिमित्त स्
स्पृश्यत्वं मातुरेव न पितुः तस्य स्नानानंतरं मस्पृश्यत्वं नास्ति॥जाते पुत्रे पितुः स्नानं सचैलं
मभिधीयते॥माताशुध्येद्दशाहेन स्नानात्तु स्पर्शनं पितुरिति मनुस्मरणं॥स्नानमपि त्री
तजवारिणाति॥यद्विसुवचनं॥जाते मृते मृतजाते वा कुलस्य सद्यः शौचमिति तत्तछिशु
मरणनिमित्तस्नानाच्छुद्धिपरं प्रसवनिमित्ताशौचं भवत्येव॥पञ्च जीवन् जातो यदि प्रे
यात् सद्य एव विशुध्यतीति तत्रैनाशौचाद्यापत्तिन्यायं॥यजैःस्मृतिवचनं॥यावन्न छिद्यते ना
लं तावन्नाप्नोति सूतकं॥छिन्ने नाले ततः पश्चात्सूतकं तु विधीयत इति अस्यायमर्थः॥ना
लच्छेदात् पूर्वं शिशुमरणे सूतकदशाहं॥नालच्छेदात्पूर्वं शिशुमरणे त्रिरात्रं॥तदुक्तं स्मृ
त्यर्थसारे नालच्छेदात्पूर्वं शिशुमरणे तु जननिमित्ताशौचं सर्वेषां पित्रादि सपिंडानां त्रि
रात्रं॥मरणनिमित्तं सद्यः शुद्धिः बृहन्मनुः॥जीवन्जातो यदि म्रियेत सतः सूतक एव तु॥स्म

ति॰ दि॰ तकं सकलं मातुः पित्रादीनां त्रिरात्रकमिति यद्बृहस्पतिवचनं । मुहूर्तं जीवितो बालः
२०९ पंचत्वं यदि गच्छति । मातुः शुद्धिर्दशाहेन सद्यः शौचास्तु गोत्रिणां । मुहूर्तमिति कालाद्
नो रिति द्वितीयो । मुहूर्तमध्ये मृते त्रिरात्रं ऊर्ध्वं तु दशरात्रं । ऊर्ध्वं तु दशरात्रं प्राक्छंतं एतद:
नुरोधेन नालच्छेदनकालेपि मुहूर्तमुध्येराव । नालस्य गर्भक्लेदनपक्षोपनिपातान् मु
हूर्तादूर्ध्वं छिन्ने अछिन्नेपि दशरात्रं गोत्रिणां सद्यःशुद्धिरग्निहोत्रार्थमिति नेयं व्यवस्था मि
ताक्षरायां कृता । जननानंतरं नालवर्धनात्प्राक् मृते पित्रोर्दानं जननिमित्तमाशौचं दि
नत्रयं । सद्यःशौचं तु अग्निहोत्राद्यर्थं स्नानोपस्पर्शनान्तकालं शौचमिति शंखस्मर
णात् । ततः अंतर्दशाहमरणे पारस्करः । अंतःसूतके चेदुत्थानादाशौचं सूतकवदिति । २०९
उत्थानात्सूतिकायां दशरात्रमिति यावत्सूतकवदिति मरणनिमित्तोदकदानरहितं । वृ
हन्मनुः दशाहाभ्यंतरे बाले प्रमीते तस्य बांधवैः । शावाशौचं न कर्तव्यं सूत्याशौचं विधीय
यते । अंतर्दशाहोपरतस्य सूतकाहोभिरेवाशौचमिति स्मृत्यंतरात् । अंतर्दशाहे यदि शि
शूपरतस्तदा तत्प्रेताशौचं । यदि तत्सपिंडजनने । तदा सूतकमपि न कार्यं किंतु पूर्वाशौचे
नैव शुद्धिरिति । यत्तूक्तं । माता शुध्येद्दशाहेनेति तत्संव्यवहारयोग्यता मात्रं । अदृष्टार्थे
कर्मणि पैठीनसिः सूतिकां पुत्रवतीं विंशतिरात्रवतीं विंशतिरात्रेण मासेन स्त्रीजननीमिति ।
एतद्विंशतिरात्राद्यभिधानं सूतिदशाहातिरिक्तं । यत्तु पैठीनसि । अस्य शांतिर्दश
दिनानि स्पर्शांति विंशति दिनानि । अत एव वृद्धार्के । मासं पुंस्त्र सर्वे तु मातुः परत्रैतद्
दशाहाधिकमिति । लोकेपि मासीकं स्नानं सूतिकायां इति प्रसिद्धिः अततया । अपत्र
कन्याजन्मन एतन्मासरक्षायां दशाहाधिकं । चत्वारिंशद्दिनानीति । व्यासः प्रथमे
दिवसे षष्ठे दशमे चैव सर्वदा । त्रिष्वेतेषु न कुर्वीत सूतकं । पुत्रजन्मनीति यस्मिन्दिने
कुमारजन्म तद्दहन — ग्रदुष्येत् । तत्र तन्निमित्तं हेमधान्यादि कुर्यादिति । जन्मद

श्वासूतकनिर्णयः॥ अथ बालस्य जातमात्रादारभ्योपनयनपर्यंतं मृतसंस्कारविधिः॥ सूतकं
च निर्णीयते॥ नाम्नः प्राक्कर्क दिपैतिमृतक व श्यात्॥ एकाहस्तोऽद्ध तिनामेतिम्ब तियोगीश्वर॥
ततः प्राक् दन्ताह मध्ये मृते जन्मसूतकदन्तान्मरणान्निमित्तं शावं गच्छति॥ यदाह वृद्ध
मनुः॥ दशाहाभ्यंतरे बाले प्रमिते तस्य बांधवैः॥ शावाशौचं न कर्तव्यं सूत्याशौचं विधीयते
प्राक् नामकरणान्मृते सद्यः शौचमेव॥ तदाहांगिराः॥ प्राक् नामकरणात्सद्यः शुद्धिरि
स घइति मातापितृव्यतिरिक्तविषयं॥ तयोस्तु दशाहं॥ यदाह पैंग्यः गर्भस्थे प्रेते मातुर्द
शाहं नातेतमयोः कृते ताम्नि सोदराणां चेति॥ याज्ञवल्क्यः॥ ऊनद्विवर्षे उभयोः सूत
कामनुरेव हि॥ अस्यार्थः मातुरेव दशाहमध्ये ततो दशरात्रमुभयोरित्यर्थः॥ पारस्करः
ऊनद्विवर्षे प्रेते मातापित्रो रात्रौ चंद्रशौचमेवैतेरेषामेकरात्रं त्रिरात्रं चेति॥ अतः सूत
केचेन्मृति रान्छौ नाहशौचं सूतवदिति॥ अत्रोन्छानादि तिदत्तारात्रं सूतकं वदिल्प॥

दकुदानरद्वित मितिमिताक्षरायां व्याख्यातं॥ संग्रहविषयेतु॥ अदंतजातमरणे पित्रो
रेकाहमिष्यते॥ दंतजाते त्रिरात्रं स्याद्यदि स्यातांतु निर्गुणौ इति कचनात्रिरात्रं॥ तदाह क
श्यपः॥ बालानामदंतजातानां त्रिरात्रेण शुद्धिरिति॥ तथा वैजिकादभिसंबंधादनुरुध्या
दघंत्र्यहमितिवैजिकादभिसंबंधादित्युक्तं तेन बीजसंबंधेऽत एव निर्गुणयोर्मातापि
त्रोरुपनयनपर्यंतं त्रिरात्रमेव॥ स —— वानौरसपुत्रविषये प्रजापतिनापि पितुः त्रिरा
मुक्तं॥ अन्याश्रितेषु दारेषु परपत्नीसुतेषु च॥ गोत्रिणः स्नानशुद्धास्तु त्रिरात्रेणैव त
त्पितेति॥ चंद्रिकानिबंधेन तु॥ अनौरसेषु पुत्रेषु जातेषु च मृतेषु च॥ त्रिरात्रे इति विलिख
बैजिकादभिसंबंधादिति लिखितं॥ स्वैरिण्यादिपुत्रविषये त्रिरात्रं स्थापितं च॥ तस्मा
त्स्वैरिणीतस्यापुत्रे संस्थिते पैत्र्योक्तं दशरात्रं पित्रोः सोदराणां स्यादेवेति सिद्धं॥ मिता
क्षरायामपि त्रिरात्राशौचपक्षस्तु पाधिसंबंधिविषयो जितः॥ नमुख्यधमुपलीजा

र्यन्यसंबधितयेतितन्नोक्तंनिपुणतयाविज्ञोकनीयांसपिंडानांतुनामकरणादनंतरंदंते॰
भ्यःप्राक्अकृतेअग्निसंस्कारेसद्यःशुद्धिरिति॥कृतेग्निसंस्कारेएकरात्रंतदुक्तंस्मृत्यंत
रेअदंतजातेतनयेशिशौगर्भच्युतेतथा॥सपिंडानुसर्वेषामेकरात्रमशौचकमीति॥अदं
तजाइत्ययंनियमः॥अत्यंतन्नातइत्यं॥याज्ञवल्क्योपि॥आतजन्मनःसद्यआचूडान्नैशिकी
स्मृतात्रिरात्रमाव्रतादेशाद्दशरात्रमतःपरमिति॥कृतेग्निसंस्कारेकृतद्विवर्षादूर्ध्वंत्रिरा
त्रं॥यद्यप्यकृतचूडोवैजातदंतस्तुसंस्थितः॥दाहयित्वातथाप्येनमाशौचंत्र्यहमाचरेदिति
वचनात्॥यत्तुपित्रैन्यूनत्रिवर्षेतुमृतेशुद्धिस्तुनैशिकीतितन्नैतेवाग्निहिते॥नहिन्यूनत्रिवर्ष
स्यदंतानुत्पत्तिःसंभवेति॥तस्माद्दाहादाहाभावाभ्यांव्यवस्थादाहेत्र्यहमितिपूर्ववाक्ये॰ २११
स्पष्टमेवोक्तं॥तथास्मृत्यर्थसारे॥दंतजननादूर्ध्वंत्रिवर्षपर्यंतंअकृतचौलस्यमरणेख
ननेदहनेवाकार्ये॥खननेएकाहमाशौचं॥दहनेत्रिरात्रं॥त्रैवार्षिकचूडाकालेनदू

र्ध्वंसंस्कारेपित्रिरात्रंचूडाचाब्देनमवतृतीयवार्षिकेकालावधेरपेक्षणात्॥यत्तुनद्वि
वर्षस्यसंस्काराभावेपित्रिरात्रमुक्तं॥अरण्येकाष्ठवत्त्यक्त्वाक्षिपेत्त्र्यहमेवत्विति॥तच्चे
षांकुलेप्रथमवर्षेएवानीतेचूडानियमस्तेषांदेवाचूडाकालेकालातिक्रमेबोद्धव्यं॥चूडाः
कालःप्रथमेवर्षेतितृतीयेपंचमेवर्षेस्मृतिषूक्तः॥नामकरणादूर्ध्वमग्निदानादिकम
प्रविकल्पेक्यपत्॥तदाहमनुनात्रिवर्षस्यकर्त्तव्याबांधवैरुदकक्रिया॥जातदंतस्य
वाकुर्यान्नाम्निवापिकृतेसतीति॥अत्रोदकदानस्याग्निदानस्यानुलक्षणंतत्त्वमेवो
दकेकपत्तिस्त्रीसंस्कारमेवचेतिलौगाक्षिरिति॥कृतद्विवार्षिकस्यनिखननमेवचो
क्तमनुना॥कृतद्विवार्षिकंप्रेतंधृताकृतिखनेद्भुवि॥यामस्यायोगोपमानोयमस्यम
स्त्वकमनुस्मरन्॥तथाकृतकन्द्विवर्षेतिखनेत्लक्तपदुदकेतत॥कृतेअपरीष्ट
पेद्विवर्षस्यकृतद्विवर्षेतिप्रेतिखनेत्॥तमाववटाकृत्वानिदध्यान्नपुनर्दहेदिति

घः॥ तथा त्र्यब्दमवर्षे कृतचूडस्याग्निसंस्कारे सत्यहोरात्रं॥ तदाह विष्णुः॥ दंतजातेऽप्यकृत
चूडेऽप्यहोरात्रेण शुद्धिरिति॥ अकृतचूडस्योनद्विवर्षस्य दाहो न स्यात्॥ कर्तुः स्नानात्॥ अ

नतीतोनवर्षः त्रितायत्रापि दह्यते॥ अतिमाद्दानिन्हते स्य देहे सा धर्म्यमीदवादितिवचना
त् चूडस्य संस्कारस्त्रिरात्रं च सर्वदा नियतं॥ अत एव त्र्यब्दमवर्षे कृतचूडस्य चूडाकरणानंत
रमग्निसंस्कारं प्रकल्प्य त्रिरात्रमेव॥ कृतद्विवर्षे ऽतीते गर्भेऽपि तत्र नैवास पिंडानां त्रिरात्रमेवेति
वसिष्ठस्मरणात्॥ वर्षत्रयादूर्ध्वमकृतचूडस्यापि संस्कारनिमित्तत्वात् त्रिरात्रमाशौचं॥
उपनयनादूर्ध्वं सर्वेषां ब्राह्मणादीनां दशरात्रादिकमिति॥ तथा च मरीचिः॥ आ मौंजीबंध
नाद्द्विजः क्षत्रियस्य धनुर्धरात्॥ आप्रतोदग्रहाद्वैश्यः शूद्रो वस्त्रस्य ग्रहादिति॥ मौंजीबं
धनधनुर्धरणाधनंतरं ब्राह्मणादिवर्णपूर्णाशौचं मौर्ध्वदैहिकं च तत्पंक्तिर्यादिति वयो
वस्थाकृताशौचं॥ अथ स्त्रीपुंवयोवस्थाशौचमुच्यते॥ अकृतचूडायां तु कन्यायां संघः शौ

चं विधीयत इत्यापस्तंबः॥ कन्यात्वाहुतिराछुरादिति दत्वा कंच॥ चूडाकार्मत्रिकं जाचा
रतोगत्यते॥ चूडाकर्मकालो द्विवाग्दानाद्वाग्गहोरात्रं॥ अहस्त्वदत्तकन्यासु बालेषु च वि
शोधनमिति याज्ञवल्क्यवचनात्॥ कृतचूडासु वाग्दानात्प्राग्गहोरात्रं विशुद्धिकारणं स
पिंडानां मातापित्रोस्तु पैंगपाक्रां दशरात्रं अदत्तानां पैगपवाकस्यापत्यमात्रे प्रवृत्तत्वा
त् समपि कन्यानां त्रिपुरुषपर्यंतमेव॥ अदत्तानां कन्यानां त्रिपुरुषी विज्ञायत इति वसि
ष्टस्मरणात्॥ पुरुषवाब्दतिष्ठन्तिः पूरयति पूरुषः पूरयात् अपत्यमात्रेण भवति॥ अत्र
समाहारे द्विगुसमासे तिङादिपुंत्रिपुरुषी एवं संतिपुरुष त्वापरित्यापैरीतस्त्री विषयि
णीस्तुतिर्भवति॥ अतः कन्यात्रस्तौ कन्यापितामहसंततेः सपिंडता॥ ऊर्ध्वं समानोदक
ता इति वसिष्ठवचानाघस्मिरणमपि॥ आत्मपुत्रपितुर्भ्रातुः पितृव्यस्त्री प्रसूयते द
रा हे सुतके ते पास्मि तिकात्यायनोऽब्रवीत्॥ वाग्दत्तायामविवाहितायां स्मृतिपितृप

ति०दि० श्वयोरुभयोस्त्रिरात्रं॥यदाह मरीचिः॥वारिपूर्वं प्रदत्तानु याने व प्रतिपादिता॥असंस्कृ
२१३ तातु सा ज्ञेया त्रिरात्रं त्रिरात्रमुभयोः स्मृतमिति॥अत एव दक्षः॥दाने अद्भिर्यो न यो॥वा
ग्दाने सप्तपदं गयन्त्यां विहितायामित्यर्थः॥दत्ता वर्षादूर्ध्वं निःस्वले कच्यते॥तदवरूढा याम वि
वाहितायां मृतायां पितृकुलस्य सजाति विहितं परिपूर्णं सूतकं॥अष्टवर्षा भवेद्गौरी
नववर्षा तु नग्निका॥दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला॥जातकर्मा तु संभवे पी
तृकुलस्येति दक्षोक्तेः॥विवाहादूर्ध्वं विष्णुनाविशेष उक्तः॥संस्कृतासु स्त्रीषु ना
शौचं पितृपक्षे॥तत्प्रसवमरणे चेत्पितृगृहे स्यातां॥तदा एकरात्रं त्रिरात्रं चेति॥प्र
सवे एकाहः॥मरणे त्रिरात्रं॥स्मृत्यर्थसारे॥मातापितृगृहे ऊढकन्यायाः पुत्र्याः प्रसवे मा २१३
तापित्रादिकानेकाहमेकाहाशौचं॥तत्र तस्या मरणे मातापित्रोरत्रं॥ग्रामांतरे प
क्षिणी॥तस्या मातापितृमरणे सपिंडेषु ऊढकन्यपुत्रा त्रिरात्रं॥पित्रोरुपरमे स्त्रीणाम्

नतां तु कर्थं भवेत्॥त्रिरात्रेण विशुद्धिः स्यादित्याह भगवान्यमः॥बौधायनः॥दत्तस्त्रीणां पि
त्रोरुपरते त्रिरात्रं॥विश्वरूपस्तु परिणीतस्त्रीणां पितृमातृमरणे त्रिरात्रमाशौचमिति मि
इदं वयोवस्थाशौचं सर्ववर्णसाधारणं॥यथापिंडायत्ता दत्ता देयं इति पिंडोदकदानवि
धिः॥समानोदकाशौचं इत्यादिवर्णविशेषानुक्तत्वात्साधारणं तथा॥अविशेषेण व
र्णानामर्वाक्संस्कारकर्मणः त्रिरात्रात्तु भवेच्छुद्धिः कन्यास्वहो विधीयत इत्यांगिरसो
वचनस्यायमेयं॥संस्कारकर्मति पतयत॥ततो वाग्विशेषोपा आहतजननात्सद्य
इत्यादि विशेषव्यतिरेकेणैव त्र्यहाच्छुद्धिः॥कन्या सुविवाहाद्वाग्दानादि वसेनसुद्धि
यत्नेक्ता॥वैवाहिको विधिः स्त्रीणामौपनायनिकः स्मृत इति॥अत्रापि चूडाकरणा
दर्वाक्सद्यः दाने त्र्यह मित्यादि विशेषव्यतिरेकेण एषा शुद्धिः सपिंडानां पितृत्वादिवि
षयं पैंपोरुदकं त्रमिति निर्णयः॥अथ समानोदकानामाशौचकालविधिर्निरूप्य

ते॥ मूलावधितः सप्तपुरुषपर्यंतं सपिंडाः ऊर्द्ध्वं समानोदका॥ इति प्रागुक्तं॥ सपिंडतानुपु-
रुषे सप्तमे विनिवर्त्तत इति॥ सप्तमे ऽप्यतिक्रांते गोत्रमस्तु॥ पिंडनिवृत्तिः सप्तमे पितृकुले
पिंडनिवृत्तिः पंचमे मातृकुले इति विवेक्तव्यं॥ त्रिरात्रं दशरात्रं वा ऽत्राप्याशौचमिष्यत
इति॥ यथाशावं तथा जनना ऽऽशौचमपि त्रिरात्रं चेति॥ मन्वादिनिरुक्तं तत्सपिंडसमानो-
दकरूपभेदप्रदर्शनार्थं॥ तथाहि॥ जन्मन्येकोदकानां च त्रिरात्राच्छुद्धिरिष्यते॥ शावसू-
तौ विशुध्यंति त्र्यहात्तूदकदायिन इत्यादिना वाक्येन त्रिरात्रदशरात्रयोः समानोदक-
सपिंडविषयत्वेन व्यवस्था कृता॥ जनने मरणे वा ऽऽशौचे सपिंडानां दशाहे समानोदकानां
त्र्यहमिति॥ तथा॥ दशाहं शावमाशौचं सपिंडेषु विधीयते॥ अर्वाक् संचयनादस्थ्नां
त्र्यहमेकाहमेव चेति दशाहसंबंधिनां न्यूनन्यूनतरभेदचतुष्टयदर्शनात् समानोद- २१४
कानामपि न्यूनन्यूनतराशौचभेदा वक्तव्याः॥ तथाहि यस्य सपिंडविषये दशाहेन

शुद्धिः॥ तस्य समानोदकविषये त्र्यहेण शुद्धिः॥ त्र्यहात्तूदकदायिन इति वचनात्॥ चतुर्दशे
संबंधे न पक्षिण्या शुद्धिः॥ पक्षिणी असपिंडे योनिसंबंधे इति॥ गौतमवचनात्॥ एकाहसं-
बंधेन सद्यः शौचं॥ यथा बाले देशांतरस्थे च पृथक्पिंडे च संस्थिते॥ सवासा जलमाप्लुत्य
सद्य एव विशुध्यतीति मनुवचनात्॥ त्र्यहः संबंधेन एकाहेन शुद्धिरित्येतद्वाक्यमस्ति॥ दशा-
हे संबंधिनां भेदचतुष्टयदर्शनादेतद्भेदवाक्यमत्र द्रष्टव्यं॥ अत एव मिताक्षरायां॥ स-
मानोदकविषया त्र्यहसंकोचविकल्पाः पक्षिण्येकाहसद्यःशौचरूपाः स्मृत्यंतरदृष्टा इति
इयं च व्यवस्था समानोदके ऽपरमे द्रष्टव्या॥ दशाके तु विशेषो ऽक्तो विज्ञानेश्वरेण॥ उत्पन्ने त्रि-
दिने ऽतीते पक्षे तथा ऽप्यूर्ध्वं समानोदके उत्पन्ने जाते त्रिदिनं उपयाद्धूर्ध्वं मृते त्रिदिनमिति
वदंतैतन्नस्वितं॥ जातमात्रः शिशुः स्याद्यावदष्टौ समा ध्रुतं॥ सतु गर्भसमो ज्ञेयो व्यक्ति-
मात्रप्रदर्शकः इति वचनाच्च॥ यथा सपिंडानामादंतजननात्सद्य इत्याने न दंतान्या क-

सद्यःशुद्धिस्तथा समानोदकानां मौंजिन्नतात्पूर्वं सद्य इति॥ मौंजीनिबंधनात्पूर्वं म्रियते पंचवर्षकृत
चूडो वैजनदंतस्कसंस्थितः॥ दाक्षिणात्यतत्वे तु समानाशौचं त्र्यहमाचरेदिति सपिंडविषये
त्र्यहसंबंधे सति समोदकविषये आशौचाभावप्रतिपादनात्॥ अतिक्रांताशौचं तु कृतं तःस
मानोदकानामिति॥ एवं चातस्मान्नादिनामृतविषये सपिंडैस्त्र्यहात्परत आशौचे क्रियमाणे
समानोदकेन एकाहः कार्यः॥ यथा सपिंडविषये त्र्यहमुपबंधेन त्र्यहादूर्ध्वं एकाहेन शु
द्धिरित्युक्तं स्मृतिकंडिकायां॥ तथा स्मृत्यंतरे॥ यत्र शुद्धिः सपिंडानां त्रिरात्रान्कृतिजन्म
नि समानोदकभावानामहोरात्रेण सा भवेत्॥ तद्वदिति जन्मनि सपिंडानामतिक्रांताशौ
चं नास्ति॥ नाशुद्धिः प्रसवाशौचे व्यतीतेषु दिनेष्वपि इति देवलवचनात् निर्दशेऽपि पुत्रजने २१५
नेऽस्तु तेपितुः स्नानमस्त्येव॥ श्रुत्वा पुत्रस्य जन्म च इति वचनात्॥ तथोपनीतोपरमे एव अतिका
लजं अतिक्रांताशौचं भवतीति व्याघ्रः॥ जन्माशौचमनुपनीतमृताशौचं चातिक्रांतं नास्ती

त्युक्तं मित्राक्षरायां॥ इति समानोदकविषयाशौचे निर्णयः॥ अथापुनुपनीते मृते कृत्यमुच्य
ते॥ प्रेतकल्पात्॥ गर्भे नष्टे क्रिया नास्ति दुग्धं देयं त्रिरात्रौ मृते॥ परं च पायसं क्षीरं दद्याद्बालु
विपत्तितः॥ यष्टोपजीवते बालस्तद्विप्राय प्रदीयते॥ किंचित्समानवयसे सक्तद्दानं यथावि
धि॥ भक्ष्यभोज्यं च दातव्यं तथा च सुखभक्षिका॥ तद्वस्त्राणि देयानि सोपानत्कानि तत्स
मे इति॥ शिशुरादंतजननाद्बालः स्याद्यावद्वाशिषः॥ कथ्यते सर्वशास्त्रेषु कुमारो मौंजी
बंधनात्॥ ततः पूर्वमिति न घा विशेषः॥ स्मृतिसारे चूडाकर्मणि संजाते विपत्तिस्तु यदा भ
वेत्॥ तत्र दाहः प्रकर्तव्यस्तु दकं तत्र निश्चयः॥ मृतकोते प्रकर्तव्यं वृषस्योत्सर्जनं बुधैः
प्रदानि षोडशा दत्वा तु सपिंडीकरणं विनेति॥ त्र्यब्दमवर्षपरिवृक्तत्सूडस्यदाहस्तद्विष
य आशौचनिर्णयश्च निरूपितः॥ प्राक् बालसंस्कारनिर्णये वृषोत्सर्गादिकं तु पंचव
र्षात्पूर्वं न भवेत्॥ यत उक्तं गरुडपुराणे॥ मृतस्यैवत्सरस्य च मे वर्षे अव्रतः सव्रतोऽपि वा॥ पूर्वे

नि०सिं० क्तमेवकर्तव्यमाह तेदग्रपिंडनं॥ जन्मतःपंचवर्षाणि मुक्तोदन्नमसंस्कृतं॥ पंचवर्षाधिके बाले
२१६ विपन्नेयदिजायते॥ वृषोत्सर्गादिकंकर्मकर्तव्यमुदंततः॥ अहन्यहनिसंस्कारात्सेतुकयच्छ्राद्धा
विषोडशा॥ उदकुंभप्रधानंचपदानां तियांतिच॥ पंददानादियत्किंचित्पंचवर्षादिके
सदा॥ आचारतिलके पि॥ पंचमेवर्षसंस्कारंकुर्यादुदकतर्पणं॥ तयापिंडप्रदानव्याःसं
पिंडिकरणं विनेति॥ अनुपनीतस्यतेकल्पनिर्णयः॥ कृतेत्वलदि वेदे नग्रंथेनोपायदीपके
विशेषनिर्णयोपेतःसगोत्राशौचनिर्णयः॥ अथसपिंडीकरणस्यकालोविधिश्चरत्नपते
तदकरणेपुत्राणामशुचित्वमुक्तंदेवलेन पितरीदिमृतोयस्यदेहस्तस्याशुचिर्भवेत्॥ न
दैवतापिपित्र्यंचयावत्सूत्रपूर्णोनवत्सरं॥ स्नानेचैवमहादानेस्वाध्यायेचाग्नितर्पणं॥ २१६
प्रथमाब्देनकर्तव्यंमहागुरुनिपातइति॥ अकृतेसपिंडेनश्राद्धेयंतिषधः॥ प्रेतकत्वा
त्॥ मृतेपितर्यब्दमध्येलुप्यतेमातृकीक्रिया॥॥ अयमातुर्विपत्तिःस्यात्पालकार्यनलुप्य

ते॥ अब्दमध्येनकुर्वीतमहागुरुविपत्तितः तयानिक्षिप्तानगच्छातिपाककुर्यात्सपिंडनं॥
सगोत्रेप्यचिस्नावघावत्पिंडनमेलयेत्॥ इत्यादिवाक्यैःसपिंडनश्राद्धाभावेपुत्राणामशु
चित्वंप्रतिपादितं॥ अतोशुचित्वनिवर्तनात्मकस्यसपिंडनश्राद्धकालाअभिधीयंते॥
कात्यायनः॥ अथसपिंडीकरणंसंवत्सरेपूर्णेत्रिपक्षेवायदहर्वावृद्धिरापद्येत॥ द्वाद
शाहेवेति॥ आश्वलायनः॥ अथासपिंडीकरणंसंवत्सरांतेपूर्णत्रिपक्षेततीयेमासिषष्ठे
ष्टमेचैकादशेमासिद्वादशोवाएकादशेकिवा॥ अथसपिंडीकरणंत्रिमासेद्विमासेएक
मासेअर्धमासेचेनिरत्वादिरगत्यात्॥ बोधायनः॥ अथसपिंडीकरणंसंवत्सरेपूर्णेत्रिप
क्षेवायदहर्वावृद्धिरापद्यतेतिचिनिरूतःपक्षस्त्रिपक्षोद्वादशान्हस्तत्रापीति॥ तथास्मृ
त्यंतरं॥ द्वादशाहेहनिषष्ठेवात्रिपक्षेवात्रिमासिवा॥ एकादशेपिवामासिमंगलंस्यादु
पस्थितमिति॥ षष्ठेचेतिषष्ठेमासीत्यन्वयः॥ मंगलमुपस्थितमितियदिचविवाहादि वृ

द्विश्राद्धं ततः प्राक् सपिंडनं कुर्यात्॥ तथा कात्यायनः॥ एकादशेऽह्नि द्वादशेऽह्नि त्रिपक्षे वा त्रि
मासि वा॥ षष्ठे वैकादशे वाब्दे संपूर्णे वा शुभागमे॥ षष्ठे एकादशे मासि त्रयश्च शुभागमे वृ
द्धिश्राद्धे एते कालास्तत्र व्यवस्था॥ एकादशाहे दर्शाग्निप्ते सत्यां साग्निकेन पितुः सपिंडीक
रणं कार्यं॥ सपिंडीकरणं विना पिंडपितृयज्ञासिद्धेः अतः सपिंडनं कृत्वैव पिंडपितृयज्ञः
कार्यः॥ तत्र वृद्धवसिष्ठः॥ अयमास्याद मावास्या मृताहाद्द्वादशमहनि॥ सपिंडीकरणं
तत्र कुर्याद्देव सुतोऽग्निमान्॥ मृताहादिनिमयदा पांचमी॥ मृताहाद्दूर्ध्वं दिनमारभ्येस
र्प्यः॥ अमावास्यायां साग्निमान्॥ मृताहादिनि मयदायां पंचमी॥ मृताहात्पक्षितायां
मेकादशेऽह्नि कार्यमिति हारितेनाप्युक्तं॥ यातु पूर्वमुक्तममावास्या मृताहाद्द्वादशमेन वे
त्॥ सपिंडीकरणं तस्यां कुर्याद्देव सुतोऽग्निमान्॥ मृताहादूर्ध्वं द्वितीयां दिपरिगणाते
दशमे एकादशाहो भवति॥ तस्मिन्नित्यर्थ॥ गाजवोपि॥ सपिंडीकरणां त्येते पैतृके २१७

कपदमास्थिते॥ आहिताग्नेः सिनीवाल्यां पितृयज्ञः प्रवर्तत इति॥ सिनीवाल्यामिति दर्शोपि
लक्षणं॥ कात्यायनिनि॥ पिंडीकरणं कुर्यात्पूर्वं वाग्निमान् कुर्यात्॥ इतरो नाग्निरब्दोप
रीति संवत्सर त्रिपक्षादौ कुर्यात्॥ एकादशाहे दर्शापाते मातुरपि सपिंडनं कार्यं॥ सुतत्वाब्द उ
स्य पितृमात्रोरुभयोः साधारणत्वात्॥ न सपिंडाग्निमान् पुत्रः पितृमर्त्तं समाचरेत्॥ पा
पीत्वेदकुर्वन् पितृमर्त्तापि जायत इति वचनात् मातापित्रोः सपिंडतामिति कात्याय
नेनोक्तं एकादशोऽह्नि दर्शाभावे साग्निरपि द्वादशाहे कुर्यात्॥ तदाह गोभिलः॥ साग्नि
कस्तु यदा कर्त्ता प्रेतो वाप्यग्निमान् भवेत्॥ द्वादशाहे तदा कार्यं सपिंडीकरणं पितुरिति
यजमानोऽग्निमाननुराजनु प्रेतश्चानग्निमान् भवेत्॥ द्वादशाहे तदा कार्यं सपिंडीकरमुते
रिति॥ सुमन्तुः॥ प्रेतश्चेदाहिताग्निः स्यात्कर्त्ता चानग्निमान् भवेत्॥ सपिंडीकरणं तस्य कु
र्यात्पक्षे त्रितीयके॥ एकादशेऽह्नि दर्शापाते साग्निस्तत्र सपिंडनं कुर्यात् तदाह का

ल्यायनः ॥ एकादशाहं निर्वर्त्य अर्वाग्दर्शाद्यथाविधि ॥ प्रकुर्वीताग्निमान्विप्रो मातापि-
त्रोः सपिंडनमिति ॥ दशाहादूर्ध्वं वैकादशाहं कृत्वा यथाविधीति षोडशश्राद्धान्यपि कृ-
त्वेति ॥ श्राद्धानि षोडशादत्वा न तु कुर्यात्सपिंडनमिति वचनात् ॥ यद्यपि एषु वचनेषु कु-
र्युः अत्र सर्वसाग्निकनिरग्निकविषयाणीति नियमविधिरूपाव्यवस्था निर्दिष्टा ॥ तथापि दे-
शकुलाचारतोनुसरणीया ॥ साग्नेस्तु एकादशेह्नि सपिंडीकरणविधाने पिंडपितृयज्ञा-
र्थं दर्शापातेवेदितव्यं ॥ अन्यथा साग्निरपि द्वादशाहेकुर्यादिति गोभिलवचनेन अनग्निः कु-
र्याच्चैकादशाहादिकालेषु कुर्यात् ॥ सपिंडनं द्वादशोह्नो वा विदध्यात् ॥ तदाह व्याघ्रः ॥
आनंत्यात्कुलधर्माणां पुंसां चैवायुषः क्षयात् ॥ अस्थितेश्च शरीरस्य द्वादशाहं प्रशस्यते
विष्णुः ॥ निरग्निकः साग्निकोवा द्वादशाहे सपिंडयेत् इति ॥ तत्रासंभवे पित्रादिःकाल
कालादर्शेपि मासादादद्धतेतस्मिन्त्रिपक्षे द्वादशोह्निवा ॥ उत्तरोत्तरकालेषु यथासंभव

माचरेत् ॥ चं स्मृतिनिबंधे ॥ द्वादशाहे पूर्णेइत्यानि ग्रायेपात्रयोदशाहे पि स्यादित्युक्तं ॥ स-
पिंडनविषये विशेषोक्तो वृद्धमनुना ॥ द्वादशेहनि विप्राणामावैश्यानां तु त्रयोदशे ॥ वैश्या
नां च त्रिपक्षाद्वा वर्षाद्वा स्यात्सपिंडनमिति ॥ अथवा विप्रक्षत्रियविशामुक्तकालेषु स-
पिंडनं स्यात् ॥ शूद्राणां द्वादशोह्न्येवेति ॥ तदाह विष्णुः ॥ मंत्रवर्जं हि शूद्राणां द्वादशे-
हि सपिंडनमिति तथा सर्वेषामेव वर्णानां मासि चांते सपिंडनमिति ॥ कात्यायनः ॥ अत्रा-
शौचांते सपिंडनमिति ॥ वदतैनक्त्वाचितं ॥ वैधानवानादिनामृतस्य पंचमेहनि सपिं-
डनं स्यादिति ॥ तद्विषयेच्च तु येहन्याद्यश्राद्धविधानात् ॥ तदुत्तरदिने इति ॥ सपिंडनं पं-
चमेह्नि कुर्यादिति त्रिपक्षे सपिंडनमित्यस्यार्थः ॥ तृतीयो भागः त्रिभागः संख्यतः पू-
रणप्रत्ययस्तलुक् त्रिभागहह्निनो मास्यैरित्यादौ दृष्टाः तत्स्त्रिभागोयं पक्षश्च त्रिप-
क्षः पक्षोर्द्धमास ॥ उपमितं व्याघ्रादिभिः समासः पार्श्विवचंद्रवदिति तापकपाप्यवा ॥

त्वेनोत्तरपदलोपइति॥ अथपक्षसमयोगाग्निपक्षः॥ एकदेशीसमासः॥ उक्तंचहेमाद्रौ॥
संख्याविसायपूर्वस्येतिज्ञापकादन्यत्रापिसर्वेणैकदेशिनासमासोनभवति॥ यथामध्यरा
त्रस्यापिश्रेविशेषः॥ सतक्राकालेवृक्तंचेदेयुनक्षत्रेयुक्तप्यत्रिंदाहरुष्यमृगः॥ सपिंडी
करणश्राद्धमुक्ताकालेनचेत्कृते रोहहस्वयरौहिण्यामैत्रभेवासमाचरेत्॥ इतिसपि
डनेकालः॥ अथनिर्णयः॥ तत्रसपिंडनेकृतमहेत्याद्याकायांसुमंतुराह पितापितावाम
हेयोज्यःपूर्णेसंवत्सरेसुतैः॥ पितामहइतिपितामहप्रपितामहाद्दत्प्रपितामहेष्विति
आद्यर्घंपितृपात्रेषुप्रेतपात्रंप्रसेचयेत्तथाआद्यंपिंडंत्रिषुविनजेदित्यादिलिंगात्॥
तदाहब्रह्माण्डपुराणे॥ मृतेपितरियस्यस्याद्विद्यतेचपितामहः॥ तेनदेयस्त्रयःपिंडाःप्र २११
पितामहपूर्वकाः॥ तेभ्यश्चपैतृकःपिंडोनियोक्तव्यश्चपूर्ववत्॥ विष्णुरपि॥ यस्यपिताप्रे
तःस्यात्पितामहोजीवतिसपितृपिंडंनिधायपितामहात्पराभ्यांद्वाभ्यांदद्यात्॥ मनुः॥ पि

तायस्यतुवृत्तःस्याज्जीवेच्चापिपितामहः॥ पितुःसनामसंकीर्त्यकीर्तयेत्प्रपितामहं॥ कात्यायन
व्यक्तमाह्यमृतेदेयंयेभ्यएवददात्ययमितिइति॥ असौपितापित्रादिवाक्येसंबंधिवचनाइ
ति॥ अतःपितामहेध्रियमाणेमृतेचपितरिपितुरेकंपिंडंनिधायपितृपर्यःपितामहस्ततःप
राभ्यांद्वाभ्यांदद्यात्॥ पितामहास्तुआत्मनःप्रपितामहःसंप्रदानमतस्तिनाएवेतिप्र
पितामहायततःपराभ्यांचेद्धाभ्यांचदद्यादिति॥ एवंत्राद्धप्रयोगंतिपमइतिपिताम
हप्रतितायोदपिजीवतोरेकस्मिन्वाजीवति एवंश्राद्धप्रयोगतःसपिंडीकरणात्कपति
प्रपितामहहृदरुप्रपितामहाइतिपितामहादित्रयाणांमध्येएकोनापिंडनेपितृत्वमु
केसुमंतुनात्रयाणामपिंडा॥ नामेकेनापिसपिंडनेपितृत्वमश्नुतेप्रेतइतिधर्मोव्यव
स्थितइति॥ यत्तुविष्णुवचनेसंवत्सरांतेप्रेतायतत्पित्रेतत्पितामहायतत्प्रपितामहाय
चैवपूर्वकंमात्मयांनामजयेदित्यनेनप्रेतसंबंधेनपित्रादिनिधानमुक्तंसपिंडनश्रा

न्नकर्त्तुः॥ प्रेतस्य पित्रादिभिः सह संबंधाभावविषयं॥ अन्यथा संबंधित्वाद्देः प्रपौत्रकार्यमि-
तिमिताक्षरोत्क्रमसंगतं स्यात्॥ यत्तु व्युत्क्रमाच्च प्रमीतानां नैव कार्या सपिंडतेति वचनान्नि-
षिद्धं॥ तन्मातृपितृव्यतिरिक्तविषयं॥ उक्तं स्कंदपुराणे॥ अक्रमेण मृतानां तु सपिंडीकृ-
तिरिष्यते॥ यदि माता यदि पिता भ्राता व्युत्क्रमान्मृत॥ मातृपितृव्यतिरिक्तस्यापि व्युत्क्र-
मेण मृते सपिंडनं कुर्यादिव॥ तदाह गोभिलः॥ अनुक्तकालेपि तु व्युत्क्रमेण मृतावपि॥
आमेन वापि श्राद्धं अहेन्ना वापि प्रकल्पयेदिति॥ अथ पितृमरणे सति पितामह प्रपिताम-
ह प्रपितामहायोर्प॥ कस्मिंश्चिद् संस्कृतस्य संस्कारं कृत्वा ताभ्यां सपिंडनं कुर्यात्॥ अथ पौत्रा-
दिना पितामहादेः सपिंडीकारणं तु पितामहः संबंधिनः पितुरारभ्य त्रिपुरुषं कर्तव्यं॥ अ-
पौत्रादिना पितामहादेः संपिंडीकरणं तु पितामहः संबंधिनः पितुरारभ्य त्रिपुरुषं कर्त-
व्यं॥ अथ मातुः सपिंडीकरणं पितामह्यादिभिः दिक्कुर्यात्तदाह खे ख॥ मातुः सपिंडी-

करणं कथं कार्यं भवेत्सुतैः पितामह्यादिभिः सार्द्धमीतुः कुर्यात्॥ सपिंडिनं कर्तुः पुत्रस्य पिताम-
हीप्रपितामहीति॥ पितामहीनां वत्यं प्रपितामह्यादिभिरितितदुक्तं ब्रह्मपुराणे॥ मातुर्यथा
मृता या च विद्यते च पितामही॥ प्रपितामही पुर्वंतु कन्या पतित्रा प्ययं विधिः त्रयाणां सपिपिंडाना
मिति द्वयोर्यः कश्चिदसंस्कृतस्तस्य संस्कारं कृत्वा ताभ्यां सह सपिंडनं कुर्यात्॥ अथ पौत्रादि-
 ना पिपितामह्यादेः सपिंडीकरणं कार्यं मिति विमित्यत्यितु सपिंडनोक्ता वृत्तं यं॥ पितामह्यादिभि-
तुः पितुः सह पितामहैः सपिंडीकरणं कार्यमिति॥ ताक्ष्यमतं ममेति गरुडपुराणे॥ अथ
स्त्रीणां सहगमने विशेषः॥ तत्र शातातपः॥ मृता यानुगता नाथं सा सपिंडता॥ स्वर्गलोकग
वासे तया वदाहृतं सञ्जवं॥ तेन पत्या सहेति॥ तथा॥ पत्न्या कुर्यात्पुत्राः पितिर्मात्रा
दिभिः सह॥ सापिंडमनुयाते तु जनेकेन सहाभज॥ मात्रादिभिः मातृपितामही प्रपि
॥ महीभिः कुर्यात्॥ अनुयाने तु यम॥ पत्न्याश्चैकेन कर्तव्यं सपिंडकरणं स्त्रियो॥ सामृता

पिंडितेनैकांगतामता मंत्राकृतिव्रतैरिति॥ अत्र पत्येति पितृवर्गोपिलक्ष्यते॥ यतः सपिंडनस्य
पार्वणैकोद्दिष्टात्मकत्वात्॥ गरुडपुराणे मन्वादिभिः स्त्रीभिः कार्यं सपिंडीकरणं स्त्रियाः
इत्यभिधाय सापिंड्यं पतिपिंडेन सहेत्यन्वयेनाभिहितं॥ तत्रैव॥ पतिपत्नी सहैकत्वं कृ
तान्वारोहति पुत्रेणैव एव कस्माद्धि सपिंडपतिना सह अतश्च सुरेण सहाभिहितात्
या॥ पतिपत्न्योः सहैकत्वं त्रिषु स्थानेषु वै पृथक्॥ कन्यादानेप्यापत्तौ पिंडयोजने तथेति॥
एवंभिन्नं सपिंडनं कृत्वा ततः॥ मन्वादिमनुयाज्ञवल्क्याभ्यां तस्याः सपिंडनं॥ तत्र विवेकेनक
त्वंभिन्नाद्यंतत्पूर्वणेनैवेदिति॥ शिष्टाचारोप्येतादृश एव॥ यत्तु स्मृत्यर्थसारे अन्वारोहणे
एकचित्यारोहणैकदिनमरणे स्त्रिया पृथक्सपिंडीकरणं न कार्यं निर्णीतं ते स्त्रिया २२१
स्वतंत्रवति॥ ततपत्न्या मित्यादिवाक्यैः एतद्विधानदर्शनात्प्रामाण्यासंभवः परं॥ यतस्तत्रै
वाग्नेपित्रैकैन सापिंड्यं कृत्येकिन्नातं न स्यादित्युक्तं॥ दिनांतरमरणमप्येकदिनमरणे

मिति सहगमने निर्णये सविस्तरमभिहितं॥ अथ मातुरौर्ध्वदैहिके असुरगांधर्वराक्षः
पैशाचाख्यविवाहभेदेन पुत्रिकापुत्रभेदेन च॥ तथा॥ ब्राह्मदैवार्षप्राजापत्यविवाहभेदे
नैवासं वृद्धवाक्यदर्शनान्मोत्रसंयोजनयोर्विप्रतिपत्तेष्वनिर्णीयते॥ मातुः पिंडदानादौ
गोत्रे विप्रतिपत्तिपर्या॥ भर्तृगोत्रेण पितृगोत्रेण वा दातव्यमिति॥ उभयत्र वचनदर्श
नात्॥ स्वगोत्राद्भ्रश्यते नारी विवाहात्सप्तमे पदे॥ स्वामिगोत्रेण कर्तव्या तस्याः पिंडोद
कक्रियेत्यादि भर्तृगोत्रविषयं वचनं॥ पितृगोत्रं समुद्धृत्य न कुर्याद्भर्तृगोत्रतः॥ जन्म
न्यदाविपन्नो च नारीणां पैतृकं कुलमित्यादि पितृगोत्रविषयं॥ एवं विप्रतिपत्तौ आ
सुरादिविवाहेषु पुत्रिकाकरणेषु च पितृगोत्रमेवेतत्र विशेषवचनात्॥ दानस्याति
द्धत्वेष्व॥ ब्राह्मणादिषु विवाहे पुत्रादिय वदत्॥ भद्धांज्यंतरवद्विकल्प एव॥ तत्र वचे
नास्या पितरो यांतायेन याताः पितामहीः तेना यायास्वं तामागतिं नगच्छन्नदुष्यति

तिवचनाद्देशपरंपरायातसमाचारेणव्यवस्था॥ एवंविधविषयव्यतिरेकेणास्यवचनस्यवि
षयांतराभावात्॥ यत्रपुनःशास्त्रतोनव्यवस्था॥ तत्रात्मतुष्टिरेवव्यापिका॥ यथागर्भाष्टमेवा
ब्दे इति॥ मातुःसपिंडीकरणेविरुद्धानीववाक्यानिदृश्यंते॥ तत्रपितामात्यादिभिःसार्द्धस
पिंडीकरणंस्मृतं॥ तत्रमतेत्रापिमातायाः स्वमात्रादिभिःसहसपिंडीकरणंकर्तव्यमिति
पैठीनसिराह॥ अपुत्रायांमृतायांतुपतिःकुर्यात्सपिंडनं॥ स्वश्र्वादिभिःसहैवास्याःस
पिंडीकरणंभवेत्॥ पत्न्याःसपिंडीकरणेयतः॥ पुत्रश्चैकेनकर्त्तव्यंसपिंडीकरणंस्त्रि
याः॥ सामृतापिहितेनैक्यंगतामंत्राहुतिव्रतैरिति॥ उशनामातुः॥ मातामहेनसपिंडी
करणंउक्तं पितामहेयद्वत्पूर्णेसंवत्सरेसुतैः॥ मातुर्मातामहेतद्वदेषाकार्यासपिं
डना॥ तथापितामहेयोज्यःपूर्णेसंवत्सरेसुतैः मातामहेतद्वदित्याहमनोर्गतंत्रावहु
ष्वेवंविधेषुवचनेषुसत्सुअपुत्रायांभार्यायांप्रमीतायांभर्त्रास्वमात्रैवसपिंडंकुर्यात्॥

अन्वारोहणेतुपुनःस्वपित्रैवसापिंड्यंकुर्यात्॥ आसुरादिविवाहोत्पन्नःपुत्रिकापुत्रश्च
मातामहेनैव॥ ब्राह्मादिविवाहोत्पन्नःपितापितामहेनपितामह्यावावाकश्चिन्नकुर्यात्॥ अ
त्रापियदितियतोवंशसमाचारस्तदानीतयैवकुर्यात्॥ वंशसमाचाराभावेतुपतेःस्वदात्म
तुष्टिरेवेतियथारुचिकुर्यात्॥ तत्रचयेनकृतापिमातुःसापिंड्यंपियत्राःन्वाकादिषुमा
तृश्राद्धंपृथग्विहितं॥ अन्वष्टकासुवृद्धौचगयायांचमृतेहनि॥ मातुःश्राद्धंपृथक्कुर्याद
न्यत्रपतिनासहेतत्रपितामह्यादिभिरेवपार्वणश्राद्धंकर्त्तव्यं॥ अन्वारोहणेतुपृथक्पा
र्वणोपिसमुदितयोर्ग्रहणंपतिपत्न्योःसहैकत्वमितिवचनात्॥ पतिसापिंड्येनतद्गोत्रगामि
त्वात्॥ पितृसापिंड्येनतद्गोत्रगामित्वात्॥ तेनसहैवयथादृष्टानातपा॥ एकमूर्त्तित्वमायाति
सपिंडीकरणेकृते॥ पत्नीपतिपितृणांतुतस्मादंशेषुभागिनीतिनिर्णयः॥ एतच्चप्रेतश्राद्धस
हितंसपिंडीकरणंसंविभक्तधनेषुबहुषुभ्रातृषुसत्स्वेकेनैवकृतेनालंनसर्वैःकर्तु

र्वं॥ नवश्राद्धं सपिंडीत्वं श्राद्धान्यपि च षोडश॥ एकेनैव तु कार्याणि संविभक्तधनेष्वपीति वच
नात्॥ वायुपुराणे॥ श्राद्धानि षोडशादत्वा नतु कुर्यात्सपिंडनं॥ प्रोषिते वासिते प्रवासाव्यसाते
चिरकालमपि पुत्र एव कुर्यात् यदि श्राद्धानि कनिष्ठभ्रात्रादिना कृतानि तदा सपिंडनं कुर्या
त्॥ पुत्रोपि ज्येष्ठ एव॥ ज्येष्ठेन यदि श्राद्धानि कनिष्ठभ्रात्रादिना कृतानि तदा सपिंडनं कुर्यात्
पुत्रोपि ज्येष्ठ एव॥ ज्येष्ठेन यत्कृतं तस्य वैरं कृतं भवतीति वचनात्॥ अत्र विशेषः॥ अपुत्रस्या
पि कुर्वीत मंत्रैः पत्न्यास्सपिंडनमिति॥ ननु अपुत्रपरेतस्य नैव कुर्यात्सपिंडनं॥ आशौचमु
दके पिंडं एकोद्दिष्टं न पार्वणं॥ अपुत्रा ये मृताः केचित्पुरुषा वा स्त्रियोपि वा॥ तेषां सपिंडन
माबादेकोद्दिष्टं न पार्वणमिति॥ वचनद्वयेनापुत्रस्य सपिंडीकरणाभावः प्रतीयते॥ मैव॥ २२३
सवर्णा वे स्वयं पत्न्यः स्वभावे स्वपमंत्रवर्णां मुमंत्रकं॥ सपिंडीकरणं कुर्यात्ततः पार्वणमेव
वा॥ अपुत्रे संस्थिते कन्यानिम वे छाद्यं कर्मणि॥ तत्र पत्न्यपि कुर्वीत स्वापि प्रपार्वणांत येति

जोगा॥ अस्मत्तु वचनान्यो सपिंडविधानादौ द्वैदैहिकस्याप्यवश्यकर्तव्यतां प्रतीयते॥ अ
तश्च ऋजा श्लात्पादयितव्या इति विध्यर्थवादतया वर्णनीयं॥ तद्वचनमस्मिति॥ तथा प्रासंगिके
ब्राह्मादिषु विवाहेषु आरूढा कन्यका भवेत्॥ भर्तृगोत्रेण कर्तव्या तस्याः पिंडोदकक्रिया॥ असु
रादिविवाहेषु पितृगोत्रेण धर्मवित्॥ पितृगोत्रेण मातुः पितृगोत्रे पोति मार्कंडेय॥ तथा
माता मद्दस्य गोत्रा मातुः पिंडोदकक्रिया॥ कुर्वीत पुत्रिकापुत्र एवमाह प्रजापतिः एषु
वचनेषु व्यवस्था प्रतिपादिता वष्पाक॥ सपिंडीकरणं कृते प्रेतलोकान्विलज्योकं गच्छत
भामेन पार्वणविधिना पार्थिपश्चो माकृकुर्यादिति स्मृत्यर्थसारात्॥ इति सपिंडीकर
णनिर्णयः॥ अथ सपिंडनविधिरुच्यते॥ तदकारणे श्राद्धादावदनधीकार॥ तदुक्तं॥ ना
सपिंड्याग्निमान्पुत्रः पितृयज्ञं समाचरेत्॥ न पार्वणं नाभ्युदयिकं कुर्विल्लभते फ
लं॥ निरग्निकोप्यनधिकारी कर्मणि यतः॥ नासपिंडीकृते प्रेते पितृकार्ये प्रवर्तते॥

ग्रहोपरागाष्टकयोः पांचयतेष्वपि पार्वणे॥ पित्रोरसंसृजेति यो नैव रेभ्यो दानैंतु कश्चिदपि सं
भवति मार्कंडेयः पितृलोकेतु वसतिर्नृणां वर्षं प्रकीर्त्तितं॥ क्षुत्तृषे प्रत्यहं तत्र भवेताम्भृगु
— —नेति॥ अतो वर्षपरिमितमन्नादि दत्वा कर्त्तव्यं सपिंडनं॥ स्कंदे अन्नं चैव यथा चात्मा
संख्या कृत्वाह्निकस्य च दातव्यं ब्राह्मणे स्कंदे घटादीनि ःकृतेंचयेत्॥ तेन सकृत्प्रदातव्याः
प्रेतस्याप्युदकुंभकाः॥ आमश्राद्धानि दत्वा नित्यं तेतत्र मानवैः॥ अन्नेन सक्तुल्यो विक
ल्पः॥ अथ एकोद्दिष्टसहितेन सपिंडीकरणेन प्रेतत्वनिवृत्त्या पितृत्वं प्राप्नोतीति॥ याज्ञ
वल्क्यः॥ सपिंडीकरणं श्राद्धं दैवपूर्वं नियोजयेत्॥ पितृन्नेवाशयेत्तत्र पुनः प्रेतं तु निर्दि
शेत्॥ अत्र काजो विश्वेदेवाः वसुरुद्रादित्यरूपाः पितर इति त्रयः॥ प्रेते नव मिश्रे एकोद्दिष्टव
त् पित्र्ये पार्वणवदिति च॥ तथा गंधोदकतिलैर्युक्तं कुर्यात्पात्रचतुष्टयं॥ अर्घार्थं पितृपात्रेषु
प्रेतपात्रं प्रसेचयेत्॥ ये समाना इति द्वाभ्यां शेषं पूर्ववदाचरेत्॥ शांखायनगृह्ये॥ अथ सपि २२४

डीकरणं चत्वार्युदपात्राणि रयित्वा पितुः प्रेतनिनयेत्पिंडान्कल्पयित्वा॥ ये समानाः समन
सः पितरो यमराज्ये॥ तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्पतां॥ ये समानाः समनसो जी
वाजीवेषु मामकाः॥ तेषां श्रीर्मयि कल्पतामस्मिंल्लोके शतं समाः॥ समानो मंत्र इति द्वाभ्यां
आद्यपिंडं त्रिषु दिजेन्नये वार्घपात्राणि॥ अर्घप्रमरणांतं श्राद्धं कृत्वा नतः प्रेतपात्रं पि
तृपात्रेषु संयोजयिष्ये इति पृष्ट्वा संयोजयेत् ये समाना इत्यादिना॥ पवित्रं च त्रिधा कृत्वा तेत
चैतु निबधे॥ अत्र प्रेतार्घदानं पूर्वं पश्चात्तद्या अर्घं दत्वा संयोजनं संयोज्यचार्घदा
नं तत्रापि सपवित्रसंयोजनमपवित्रस्य वेति पक्षाः संति तत्र निबंधस्थाप्यति तन्नि
ष्टं वानुसृत्यैकमन्येन्रुपगंतव्य इति॥ कौटको॥ ये समाना इति द्वाभ्यां निदिष्टे च निषि
येत्॥ पितृभ्यस्तु ततो दद्याद्देयं दैवं संसज्यनैर्विधि॥ विष्णुः॥ तत्राग्नौकरणमावाहनं
पार्घं चकुर्यात्॥ तद्वदग्नौकरणं कारिकायां निषिद्धं॥ यथा॥ सपिंडीकरणे वापि ताते

 स्रौकारणाद्यपि॥अतइतिएकोद्दिष्टेअग्नौकरणंनिषिद्धं॥अत्रैकोद्दिष्टमिश्रितत्वात्सपिं
 डीकरणेअग्नौकरणंनकार्यमित्यभिप्रायः॥आदित्यावादुल्मुकहानं॥तदुक्तं॥सपिं
डीकरणांतानिप्रेतश्राद्धानियानिवै॥तानिस्फलौकिकिवत्कुर्यादितिशातातपोऽब्रवीत्॥
याज्ञवल्क्यः॥चतुरोनिर्वपेत्पिंडान्पूर्वंतेषुसमावपेत्॥ततःप्रभृतिवैप्रेतःपितृसामान्य
मश्नुते॥सुवर्णंरूप्यदर्भैस्तुतस्मिन्पिंडंतुतंत्रिधाकृत्वाद्यपिंडोतेषुसंयोजयेत्॥ब्राह्मे
एवंवृतपार्वणवदाचरेदिति॥पुनःप्रेतेनततनिर्दिष्टं॥पितृत्वात्समवायादित्यय
मर्थः॥तत्राप्येकोद्दिष्टश्राद्धेपिंडसंप्रदायः॥स्मृत्यर्थसारे॥प्रेतोद्दिष्टोनैकपिंडपिं
डेसमंत्रेनत्रीन्पिंडान्मंत्रेणोदत्वाप्रेतपिंडंपितृपिंडेषुसंयोजयिष्यइतिसृष्टाप्रेतपिं
डंत्रिधाविभज्यपूर्वमित्रान्प्रत्यापितामहादिपिंडेषुनिदध्यात्॥समानोमंत्राइतिमंत्रद्वय॰
मधिकएवंमंत्रचतुष्टयंयाज्ञवल्क्यपारस्करआह॥अनुमंत्रणादिसर्वंपार्वणवत्॥तथा॥ए

तत्सपिंडीकरणंमेकोद्दिष्टंस्त्रियाअपिमातुरप्येवंपितृवत्सपिंडीकरणमितिमि॰
ताक्षरायां॥एतदुक्तवचनजातमेकोद्दिष्टानंतरंपार्वणविधायकं॥आद्यपिंडंत्रिषु
विभजेत्॥तथापूर्वंतेषुसमावपेदितिनिगमात्॥अथैतद्विरुद्धं॥श्राद्धद्वयमुपक्रम्य॰
कुर्वतिसहपिंडतां॥तयोस्त्रिपुरुषंपूर्वमेकोद्दिष्टंततःपरं॥तथा॥दत्वापिंडान्पितृभ्य॰
स्तुपश्चात्प्रेतस्यपार्श्वतः॥ततुपिंडंत्रिधाकृत्वाचानुपूर्वेणसंततिं॥निदध्यात्त्रिषुपिं
डेषुएवंसंसर्जनेविधिरितिकाठकात्॥एवंविरोधेत्रपार्वणात्पूर्वमेकोद्दिष्टंपश्चादे
कनयथावचनदर्शनाच्छिष्टाचारपरंपरावात्मतुष्टिर्वातियामिकायद्यप्यस्ति॥तथा
पितुःप्रभृतितद्वत्पिंडानुकल्प्यपित्रातया॥त्रीणिपिंडानामेकंप्रेतस्येतिस्कंदउद्दये॰
तन्निन्तरूमतिदधातावास्थापनेनपितृविषयेष्वन्यविषयेपरइतिव्यवस्थापित
मिवप्रतीमोति॥एवंयाप्यारुचिकार्यमिति॥तथाप्रेतकल्पे॥अस्त्रानिकाञ्चयाम्यूता

वैरूपाया स्त्रिया पिता॥ यापत्नीवै पितुः काम्यं कुर्यात्पुत्रः सपिंडनं॥ इति सपिंडनश्राद्धवि
धिः॥ कृतेत्वनलद्धिवेदेन संपेनिर्णयदीपके॥ सकालः सविधिर्जातिः सपिंडनंविधि
निर्णयः॥ अथैकोद्दिष्टश्राद्धं हत्युच्यते॥ यद्यप्येतन्निरूपितं क्षयाहनिर्णयप्रकारणे
तथापि किंचिद्वविशिष्टं॥ सपिंडीकरणादूर्ध्वं यत्र यत्र प्रदीयते॥ भ्रात्रेभगिन्यै पुत्राय स्वा
मिने मातुलाय च॥ मित्राय गुरवे श्राद्धमेकोद्दिष्टं न पार्वणं॥ हेमाद्रौ भ्रातुः सहोदरायैव
पिष्ठः सहन्मा वाश्रये॥ तेषां चैव न कुर्वीत पार्वणं पिंडनादृते॥ पिंडनात्सपिंडीकरणात्॥
कालादर्शे॥ महालयइतिते योगजच्छायाक्षयस्तथा॥ आषाढीमवधिंकृत्वा यः पक्षः पंच॰
मोभवेत्॥ कालनिर्णयेतु नभोवाथनभस्योवामलमासोयदाभवेत्॥ सप्तमः पितृपक्षः २२६
स्यात् अन्यत्रैव तु पंचमः॥ अतो मलमासाभिधे पंचपक्षे मृतस्य महालयेक्रियमाणमपि
त्राब्दिकं पार्वणविधिना न कार्यं॥ पितृपक्षे मृतानां वा॥ तथा मातरि जीवत्यां महालये

पि पितामह्याः प्रत्याब्दिकमेकोद्दिष्टविधिना कार्यं॥ तथा एकोद्दिष्टं न कर्तव्यं पितामह्या
कथंचन॥ एकोद्दिष्टं च कर्तव्यं यदि माता च जीवति॥ तथा॥ सापत्नमातुः कुर्वीत एको
द्दिष्टं न पार्वणं॥ अपुत्राया विशेषेण पार्वणं सद्ययास्मृता॥ तथा॥ आनाथाकमृतातो
च क्षयाहे पित्र्यपार्वणं॥ मन्या सषष्ठिमत्यंते केचिद्कुर्वैदिकाम्निति॥ सुमंतु॥ य
स्मै मंत्रप्रदाता स्याद्यस्मै विद्यां प्रयच्छति॥ गुरुः तावपि कुर्वीत तयोर्नैवतुपार्वणं॥ अ
तश्च माता पितृव्यतिरिक्ताना मेकोद्दिष्टमेवेत्युक्तमन्यत्रापि॥ मातापितृविषये पि॥
क्षयाहे एकोद्दिष्टं कुर्यादित्युक्तं गरुडपुराणेपि तराव्धकृत्य॥ सपिंडीकरणादूर्ध्वं
यत्र यत्र प्रदीयते॥ तत्र तत्रयकार्यं विज्ञेयं पित्रा क्षयेहनीति॥ यत्र अपुत्रयेमृता केचि
दित्यादिना पुत्रा पापा वृणी निषिद्धं तत्पत्नी व्यतिरिक्त विषयं॥ अपुत्रा पुत्रवद्घ्ध्यादि
निवचनेतेनपत्न्या पार्वणं कर्तव्यं॥ अपुत्राणामपि सन्यासिनां सदैवेदिकारितिः॥ पा

नि॰सि॰ र्षेणैव तूष्णीं कार्यमिति वक्ष्यते॥ इत्येकोद्दिष्टश्राद्धनिर्णयः॥ अथ देशान्तरगतस्य मृ
२२७ तातनिर्णयः प्रस्तूयते॥ तस्य पुनः जीवच्छ्रवणमारभ्य पंचदशाब्दादूर्ध्वंक्रियाक्रि
मति। तदुक्तं॥ अनाकर्णितवार्त्तस्य प्रोषितस्य पितुः ऊर्ध्वं पंचदशाद्वर्षात्कृत्वा तत्प्रतिरू
पकं॥ कुर्यात्तस्य च संस्कारं यथोक्तविधिना ततः॥ तदानीमेव सर्वाणि प्रेतश्राद्धानि कार
येत्॥ तदानीमिति दाहादारभ्येति सुतो दशाहं कुर्यात्॥ पितृव्यतिरिक्तानां पितृव्यभ्रात्
पुत्राणां द्वादशाब्दादूर्ध्वं संस्कारं कुर्यात्॥ तदाह बृहस्पतिः॥ यस्य न श्रूयते वार्ता द्वादशव
र्षं॥ कुलपुत्रकाद्दाहं तत्तस्य स्यादवधारणमिति॥ तेषामाशौचं त्रिरात्रं॥ उक्तं कालादूर्ध्व
मौर्ध्वदैहिके कृते यदि जीवन्स मागच्छेत्तदा कथमित्याह वृद्धमनुः॥ जीवन्यदि समागच्छेद्घृत २२७
कुंभे नियोजयेत्॥ उद्धृत्य स्नापयित्वास्य जातकर्मादि कारयेत्॥ द्वादशाहं व्रतं कुर्यात्त्रि
रात्रमथवास्य तु॥ स्नात्वोद्वहेत्तां भार्यां पत्न्यां च तदनावृत॥ अग्नीनाधाय विधिवद्व्रात्यस्तो

मेन वा यजेत॥ अथैंद्राग्नेन पशुना गिरिं गत्वा च तत्र तु॥ इष्टिमायुष्मतीं कुर्यादीप्सितांश्च
क्रतूंस्तत इति॥ अग्नये आयुष्मते इष्टाकथालं कुर्यात्॥ य एवाहिताग्नेः पुरोडाशास्त एवता
हि संस्कारवइति प्रगृह्य गायत्र्या त्री॥ गिरिं गत्वा तत्राष्टादशरात्रं त्रिरात्रं चा पोषणव्रतेन
नोऽजातकर्मादीनि कालादशानि॥ एतद्देवोक्तं स्मृत्यर्थसारे॥ दूरे देशान्तरगते जीवद्वार्ता
पुनः पुनः॥ पर्यालोच्य जीवद्वार्त्तापि न श्रूयमाणा पापूर्ववयस्के विंशत्यब्दादूर्ध्वं मध्यम
वयस्के पंचदशाब्दादूर्ध्वं अपरवयस्के द्वादशाब्दादूर्ध्वं चांद्रायणत्रयं त्रिराकृच्छ्राणि
वा कृत्वा पालाशवृन्तैः कुशैर्वा प्रतिकृतिं कृत्वा दशाहाशौचोदकपिंडश्राद्धानि कार्या
णि॥ एवं कृते पुनः स आगतश्चेत्तं घृतकुंभे निमज्य तस्य जातकर्मादिसंस्कारान्कृत्वा
पूर्वपत्न्या विवाहः कार्यः॥ इति मृतास्नाने विधिः॥ अथाज्ञातमरणाहनिर्णयः॥ तत्रैव स्मृ
तिः॥ न ज्ञायते मृताहश्चेन्मासो ज्ञायते मासि सति॥ मासश्चेदप्यपरिज्ञातस्तद्वत्स्यान्मृताह्निकं

मदामासोनविज्ञातोविज्ञातंदिनमेवतु॥तदामार्गशिरेमासिघौमेवातद्दिनेभवेत्॥आषाढे
पिकुर्यादितिग्रंथांतरे॥गारुडे॥दिनमासः स्वविज्ञातोमरणस्ययदापुनः॥प्रस्थानदिनमा
सौतुग्राह्यौप्रोक्तमयोदितो॥प्रस्थानस्यापिनज्ञातौदिनमासौयदापुनः॥मृतिवार्त्ताश्रुतौ
ग्राह्यौतौपूर्वोक्तक्रमेणतु॥प्रवासमंतरेणापिस्यातांतौविस्मृतौतदा॥मपितौग्राह्यौपू
र्वविन्मृतादिके॥तौस्मरणादिनमसौ॥श्रावणासंबधिनि इत्युक्तियोनित्तदाद्यप्रचेता॥
अपरिज्ञातेआमावास्यायांश्रावणदिनेचेति॥मरीचिः॥प्रविप्रसमुत्पन्नेअविज्ञातेम
तेहनि॥एकादश्यांतुकर्तव्यंकृतान्हापक्षे विशेषतइति॥विष्णु॥इत्यक्तोनुक्रमेरणयः
कुर्यान्मृतवासरं॥अविज्ञातेमृतादुस्सम्मृतेवारयत्नसे॥इतिमृताहाज्ञानेनिर्णयः॥सं
न्यासिमृतेनिर्णयः॥सन्यासिनमधिकृत्यसंस्कृत्येतरात्॥सर्वसंगनिवृत्तस्याध्यानयोग
रतस्यच॥नतस्यदहनकार्यंनैवाशौचंनोदकक्रियेति॥अतोब्रह्मप्राप्तिबुध्यातिदत्तो २२८

नोयतीनांषोडश्राध्यादिनिसपिंडीकरणंचनकार्यं॥तथाचोक्तं॥सपिंडीकरणंतेषांनक
र्तव्यंसुतादिभिः॥त्रिदंडग्रहणादेवप्रेतत्वंनैवाजायते॥त्रिदंडइत्येकदंडस्याप्युपलक्ष
णं॥तदुक्तंप्रचेतसा॥दंडग्रहणमात्रेणनैवप्रेतोनवेद्यति॥अतःसुतेनकर्तव्यंपार्वणंत
स्यसर्वदेति॥सुतइत्युपलक्षणं॥सर्वैरधिकारिभिरिति॥चतुर्विंशतिमतेपि॥चतुर्थ
माश्रमंगत्वाब्रह्मविद्यापरायणः॥एकदंडीत्रिदंडीवासर्वसंगविवर्जितइति॥तस्याशौ
चादिनकार्यमितिशेषः॥आचाराजितिको॥बालेप्रेतेचसंन्यासेनघृःशौचंविधीयते॥स्म
त्यर्थसारे॥यतीनांत्रिदंडिनांस्त्रिमेतत्वंनास्तिएकादशोक्रियापार्वणंकार्यं॥दंडग्रहणो
त्तरकालमरणेज्ञातव्यं॥एकाद्दिष्टंजलंपिंडमाशौचंप्रेतसत्क्रियां॥नकुर्यात्पार्वणा
न्स्यासर्वदैत्येकोद्दिष्टंतिषिध्यप्रचेसाःपार्वणंविति॥तत्रान्त्रास्कयतिमतिविषयेणएको
द्दिष्टनिषेधपूर्वमेकादशाकरुपार्वणाधानमाहोसः॥एकोद्दिष्टंनकुर्वीतयतीनांचै श्री

व सदा॥ आहन्येकादशे तेषां पार्वणं तु विधीयत इति॥ तथा च स्मृतिः॥ वहनस्य त्रिनादाने
स घः शौचं विधीयते॥ पदे पदेऽश्वमेधस्य फलं प्राप्नोति पुरुषः॥ यतीनां प्रेतेनवपनं बंधूनां गो॥
त्रिणामपि॥ नाशौचं नोदकं नाश्रु यतौ प्रेते सत्क्रिया॥ एकोद्दिष्टं न कुर्वीत यतेश्चैव कदाचन॥
त्रिदंडधारणान्नित्यं तेषमाद्योन्नानामुनिः॥ सपिंडीकरणं तस्य न कर्तव्यं सुतेन तु॥ अहन्ये
कादशे प्राप्ते पार्वणं तु विधीयते॥ एतत्सन्निधानं विषयं॥ दशाहमध्ये मृतिश्चेत्तिविषयं वा॥
एकादशाहोर्ध्वं यतेः पितुर्मृतिश्रवणे श्रवणानंतरं न किंतु श्रावणादारभ्य एकादशाहे पा
र्वणं कुर्यादित्युक्तं॥ संन्यासिनः पितुर्मृतिश्रुते रेकादशेऽहनि॥ पुत्रादिपार्वणश्राद्धं कुर्यात्
श्रवणानंतरं॥ एवं श्राद्धरात्रिके॥ तथा च संन्यासिनोऽस्तोर्ध्वविधानं पद्धतावुदाहृतास्मृति २२९
रति॥ स्नानं पुत्रस्यावस्यबुद्ध्या नाशौचोदकक्रियोपघिर्यं॥ सोपि वर्त्तस्मिलास्त्वा नायं गिरिछन्ना
गच्छन्विवाहादि गुरुस्तं वत्सरं धर्माव्यं तां बुजंमुयन्तुन्यमहांतमुक्तं कुर्यान्निशात्रानु

सारेण॥ संनिहितश्चे अहन्येकादशेऽमासे भासंतिहितश्चेत्श्रवणानंतरैकादशेह्नि पार्व
णश्राद्धं कुर्यात्॥ पितरं विष्णुरूपं ध्यात्वा चेति॥ शौनको विशेषमाह॥ नारायणबलिं कुर्या
त्सुजपेत्तत्रवैयतीन्॥ यादवाद्य मनध्याये पुत्रः कुर्यात्समाहितः॥ रानइदमुक्तं भवति॥ सं
न्यासिनि पितरि मृते आशौचाद्यभावेप्येकादशेऽह्नि तत्पार्वणश्राद्धकारणादर्वाक् संन्या
सिसंस्कारान्नारायणबल्यादिकं नकार्यं पुत्रेणेति॥ संन्यासिमृतिश्रवणादप्यारभ्यैका
दशाह एव पार्वणविधानं वेलादिति॥ तथा॥ यतौ मृतार्दोर्ध्वदैहिकग्रंत्यामृतायेविहितमे
कादशाहे पार्वणं श्राद्धं॥ आकृतं विष्णुजनीनमोर्ध्वदैहिकं संवैनिवर्त्यति॥ यथा वानप
येरयघोपेणमाहे कृस्ता तुमुपाकरोतात्पात्रोपाकारयोसाधनतयाविनियुक्तो विनियु
क्तोरथघोषः आकृतसार्वसाधनं विवर्त्यतितद्वत्॥ अतो विहितश्राद्धाकरणात्तदु
द्देशेन किंचिन्न कार्यं॥ अथ संन्यासिनां देहपातानंतरं नारायणबलिविधानमुक्तं

तस्यां पदातौयया॥ यो न्निणो वा संवेधिन॥ शिष्यो वा पुत्रो आपुत्रो वा स्वात्मनो वृद्धिकामो वा द्वादशेह्नि
द्वादशेह्नि दद्यात्स्यां तिथ्यावतिनायोमन्यस्मिन्क। स्मिंश्चिद्दिवसे वा नारायणबलिं बुधा सिद्धिं प्रासेकृत
कृत्ये संन्यासिन्यासिनिद्र मंनारायणबलिं एकादशेह्नि द्वितीयदिवसे वाऽनुयु॥ तत्र सं
न्यासिनो मुख्या ब्राह्मणा॥ तेषामभावे सदाचारा गृहस्था वा त्रयोदश्यावरा॥ सत्यां वा कौ
द्रा तमिह स्यादयो पा॥ ते ब्रकाविश्वरूपमहाविष्णुश्चाथ अपरास्तु केशवादिमन्त्रिबुधा
केशवनारायणमाधवगोविंदविष्णुमधुसूदनत्रिविक्रमवामनश्रीधरहृषीकेशप
द्मनाभदामोदरपृथक्॥ पुरुषसूक्तेन षोडशोपचारैः सममभ्यर्च्य पायसं प्रधानमाह्वाप
ये॥ दत्वा ब्राह्मणानां व्या सपूजा वस्त्रवृत्तिं त्वां ग्रणम्य वितापयति॥ अदंब्रह्मभोक्ता ब्रह्म अ २३०
न्नं च ब्रह्मैव ब्रह्म इति॥ एवं तत्सत्पार्पणं ब्रह्म हविर्ब्रह्मह विर्ब्रह्माग्नौ ब्रह्मणा हुतं॥ ब्रह्मैव
तेन गंतव्यं ब्रह्मकर्मसमाधिना॥ गीतापाठः॥ स्वशाखानुसारेण वमन्ताञ्जंकरयांदि

कं दत्वा गोपीरंदन कटिसूत्र कौपीनादिकं च भोजनांते समाचरेत्॥ सर्वैरपि तत्रैव वस्त्रा
तव्यं। कर्त्रापि वेत॥ ब्रह्मैव नायते सृष्टिः सृष्टं ब्रह्मणि विष्यति॥ तस्मात्संसारिणः सर्वे ब्रह्मै
वेति श्रुतिस्थितं॥ ब्रह्म हव्यं मवेश्वरष्टि ब्रह्मवित्यक्तोगतः॥ यत्किंचित्सूज्यते लोके तेन ब्र
ह्मैव पूजितं॥ देवदत्तया काश्चिद्ब्रह्मैव विकृतिं गतः॥ पुनर्ब्रह्मैव संजातं ब्रह्मब्रह्मतदुच्य
ते॥ ततः संन्यासिनि ब्राह्मणकर्पयित्वा उच्छातव्यं इति॥ दधाच्च दक्षिणां त्वाक्सानमस्कुर्वीत
मंत्रयेत्॥ यतीनांमृते विष्णुबलिरयं श्राद्ध॥ च पार्वणमिति मृत्यो मृते यतो वेत द्विधानं॥ नय
स्तत्यर्थसारे॥ संन्यासे विष्णुबलिरयं श्राद्ध॥ च पार्वणमिति लक्ष्मी मृते यतावेतद्विधीं कु सं
ग्र वक्ष्याम्यतु पूर्वकैः॥ गोविंदराजस्मरते श्रद्धायनमतं तथा॥ एकोद्दिष्टविधानेतक
र्याद्धादानि षोडश॥ अग्निमान्पार्वणेनैव विधिना निर्वपेत्स्वयं॥ स्वयं कुर्छात्स्त चतुरः कु
चापा वनायमितात्मनी॥ आश्रमी चेत्तु पक्ष्यातु तेना सौ योग्यताम्लजेत॥ चौवश्वापर्दिव्ययि

नि॰दि॰ ऽमात्कामनुषे॥ नैतिकांसतु क्षेप्यात्मनस्त्यांते तद्दैश्राद्धानिति वर्षे दित्यादिकं सर्वं सं॰
२३१ न्यासग्रहणविधिमभिधाय॥ ततः संन्यासिनिमृते सतिचोक्तं॥ एकोद्दिष्टं च निषिध्य पार्व
णं विहितं॥ तत्रोयघस्यस्थाने विधीयते तत्रास्य धर्मान्तिरम तद्गति॥ स्थानप्रमाणेनासपिंडी
करणश्राद्धार्थसंयोजन धर्ममेकोद्दिष्टं च विवाहाद्यान्यांस्तद्वा मर्मिन्नमते॥ दंडग्रहणमात्रे
सावैव प्रेतोमवेद्यतिरिति प्रेतत्वाभावाद्यतिग्रमुरवं पार्वणं सुते कार्यं॥ अथारेकादशा
हे सपिंडनश्राद्धविधानाभावेन तत्स्थाना पत्तिरिति नाशंकनीयं॥ एकादशाऽपि सपिंडन
श्राद्धविधानवचनाभिसेति॥ न तु पौत्रैरपीदपार्वणंस्वपितृपूर्वजानां कार्यं॥ पितामहे तु वै
श्राद्धे पितरं न परित्यजेदिति वचनात्॥ नंदनेवच॥ नं॥ पत्याश्रमान्वितपिता मत्ती निमि २३१
त्तैकादशाहपार्वणश्राद्धव्यतिरिक्तेन तान्याब्दिकादौ सावृकार्यश्राद्धकाहा निरवकाश्ये
निरवकाशाविधिर्बलिवानिति परिभाषया पौत्रैरपीदं पार्वणं पिता महयति प्रमतिनाक

त्र्यं॥ किंच स्थाना प्रमाणा दपि यतेरूर्ध्वं विशिन्यो सदृकार्यसपिंडनश्राद्धवत्सपिंडनश्राद्धे
वकौदैनैवकर्त्तताचं किं तु यतेः प्रेतत्वाभावान्न कार्यमितश्राद्धोपक्रमे एकेनैव कार्यायाऽक
क्तत्वात्॥ इति निर्णयः॥ अथ स्यक त्मना हाय स्तव॥ न्यस्त्वाकर्मण्य शेषाणि यआस्ते संय॰
तो यतिः॥ तच्छरीरस्य पंचत्वे भस्मीन्तस्तस्य चैव घते॥ व्यूह पूजादिकं कर्म कारे येकुरुते यथा॥
तयोः पुराप फलं तु ल्यं शृणु वक्ष्याम्यशेषत॥ प्रतिलौकाधिपस्थाने प्रतिमन्वंतरे वसेत्॥
ततो विष्णुपुरं प्राप्य कल्पकोटिशतं वसेदिति यतौ मृते कर्तेति निर्णयः॥ अथानुपनीताधि॰
कारिणश्चंते॥ पित्रोरनुपनीतो विपिंडध्यादौरसः सुतः॥ ऊर्ध्वंदोहिकमन्यैतु संस्कर्ता
श्राद्धकारिण॥ अन्यैन्मात्तनतुत्रादयः संस्कृता उपनीताः श्राद्धाधिकारिणः स्मृ॥ पुत्रो ज
न्मत अधिकारी॥ चौलादाघाब्दिकर्दवर्दिः कर्यात्पितृमेधिकमिति॥ आब्दिकाद्यपव
र्गान्नूर्ध्वं॥ तदा इ सुमंतु॥ पुत्रस्योत्पत्ति मात्रेण संस्कुर्यादृणमोचनात्॥ पितरं नाब्दि॰

कथौत्यैत्समे धेनकर्मणा॥ तृतीयवत्सरादूर्ध्वंमंत्रवत्तसमाचरेत्॥ पुनःसुमंतुः॥ अनुप
नीतोपिकुर्वीतमंत्रवत्पैतृमेधिकं॥ यद्यसौकृतचूडःस्याद्यदिस्यात्त्रिवत्सरः॥ तथाकृतचू
डस्तुकुर्वीतउदकंपिंडमेवच॥ स्वधाकारंतुकुर्वीतवेदोच्चारंनकारयेत्॥ अमिनापितृके
र्णोनादिष्टव्रतस्तुयः॥ स्वधाशब्देनसोतस्यायुज्यतेपैतृकीक्रिया॥ नत्वस्यविद्यतेकिं
चित्कर्मआमौंजीबंधनात्॥ नचाभिव्याहरेद्ब्रह्मस्वधानिनयनादृते॥ स्वधानिनयनं
मातापित्रोःश्राद्धंव्याघ्रः॥ कृतचूडोनुपेतस्तुपित्रोःश्राद्धंसमाचरेत्॥ उदाहरेत्स्वधाकारंने
वेदाक्षराण्यसौ॥ वेदाक्षरानुच्चारंणंतदकृतचूडविषयं॥ कात्यायनः॥ असंस्कृतेनएका
चत्वग्निदानंसंततंसमंत्रकं॥ कर्तव्यमितरत्सर्वंकारयेदन्यमेवहि॥ इति॥ स्कांदपुराणे॥ पते २३२ २३३ २३४
षुमंत्रवत्कुर्यात्किमन्यत्तूष्णीमविधि॥ तदौर्ध्वदैहिकेसाग्निमेवाहासिंस्कृतातथा॥ यद्वु
सर्वाभावेस्त्रियःस्वभर्तृणाममंत्रकं॥ अमंत्रकमितितदधर्म्यासुरादिविवाहोढास्त्री

विषयं॥ इत्यनुपनीताधिकारः॥ अथविधवास्त्रीपत्युःश्राद्धंसमंत्रकंकुर्यादित्युक्तं।
पुत्राभावेपतिश्राद्धंपत्नीकुर्यात्समंत्रकं॥ समंत्रकमितिवेदमंत्रसहितं॥ स्त्रीयाणामुप
नयनाभावेनवेदमंत्राधिकाराभावात्॥ एतद्विषयेगुरुडपुराणेस्त्रीशूद्राणाममंत्रकं
अपसव्यंकरंस्त्रीणांवामंप्रावरणंचयदितिकारिकायां॥ स्त्रीनतुःपार्वणंकुर्यादित्या
हसुमंतुः॥ अपुत्रेसंस्थितेकर्त्तानित्यमेवश्राद्धकर्मणि॥ तस्यएन्यपिकुर्वीतसापिंड्यंपार्व
णंतथैहि॥ अपुत्रायेमृताःकेचित्स्त्रियोवापुरुषाश्चवा॥ तेषांसपिंडनाभावादेकोद्दि
ष्टंनपार्वणमितिनिषेधात्कथंपार्वणमितितिषेधःस्त्रीव्यतिरिक्तकर्तृविषयः॥ प
त्नीकर्तृत्वेतुगालवेनपार्वणमुक्तं॥ सर्वाभावेस्वयंपत्न्यःस्वभर्तृणाममंत्रकं॥
सपिंडीकरणंकुर्युस्ततःपार्वणमेवच॥ पत्न्याःपुत्रवदधिकारोस्मत्संतरात्॥ अ
पुत्रापुत्रवद्दद्यात्पिमर्त्तरि॥ श्राद्धंपिंडंजलंचैवजलमेवपुत्रिणी॥ आत्याब्दि

कं पुत्र एव कुर्यात्॥ पार्वणे विषये विधवा तु सर्वदा चतुर्भिः पार्वणैः॥ श्राद्धं कुर्यात्तदुक्तं स्मृति
संग्रहे॥ चत्वारः पार्वणाः प्रोक्ता विधवायाः सदैव हि॥ स्वभर्तृश्वशुरादीनां मातापित्रोस्तथैव
च॥ ततो मातामहानां च श्राद्धं दद्यात्तथा तयेति॥ तथा॥ श्वश्र्वाश्चापि विशेषेण माता मत्वा अ
पि स्मृतं॥ विशेषेण कालनीर्यविशेषोत्यथ॥ विधवायाः पूर्वं मातुः पार्वणं पश्चात् पितुः॥
कथमात्रेरित्यन्वयघेकाद्दोषः स्यात्तदाक्रमो न प्रतीयेत मातापित्रोरिति मातृत्वाद्वस्य पूर्व
श्रवणात्पठाक्रमादेवार्थक्रमो वगम्यते॥ अग्निहोत्रं जुहोति यवागूं पचतीतिवद्विरुद्धत्वा
भावात्॥ संबंधे पितृमायेक्षायां प्रतीतक्रमातुराधेरानैव प्रथमं मातुः श्राद्धं नाकृतः पित
ति गम्यते॥ किंच श्रोणितातिरेके स्त्री भवतीत्युक्त्या मातुरवयवानां स्त्रियामाधिक्य प्रतिपाद
नादेव स्त्रीकर्तृके मातापित्रोर्मातुरेव प्रथमं श्राद्धदानं युक्ततरं॥ विस्तरासंभवो विधावापा २३५
र्वणद्वयं कुर्यात्॥ तदुक्तं स्मृतिसमुच्चये॥ भर्तृहीना तु या नारी कुर्वीत पार्वणद्वयं॥ एकं तु भ

र्तुः पितुः सापित्र्यपक्षस्य वा परं यदा तु अपुत्रा पत्नी पत्युः प्रत्याब्दिकादि श्राद्धं स्वयमेव कुर्वी
त॥ रजस्वला भवति तदा पंचमेऽहनि श्राद्धं कुर्यात्॥ तदाह गौतमः॥ अपुत्रा तु यदा पत्नी
संप्राप्ते भर्तुराब्दिके॥ रजस्वला भवेत्सा तु कुर्यात्तत्पंचमेऽहनीति॥ तथा च आब्दिके समनु
प्राप्ते यस्य भार्या रजस्वला॥ पंचमेऽहनि च श्राद्धं न कुर्यात् मृतेऽहनीति॥ यस्य मृतस्य कर्त्री
भार्या रजस्वलेत्यर्थः॥ यत्तु वचनं समाहोत्यितृदेवानां भवेद्योग्या व्रताचनइति स्मृह पर्यु
तमसमुचितमुक्तं॥ तद्रजोनिवृत्त्यभावविषयं॥ रजोनिवृत्तौ तु पंचमेऽहन्येव दोषाभावात् तदुक्तं
मनुना॥ सद्यस्नानान्तु चतुर्थेऽह्नि स्नानेन स्त्री — — बलादैवे कर्मणि पित्र्ये च पंचमेऽहनि शु
द्ध्यतीति॥ अतः कनिनि मितमृता पत्नी भर्तुः श्राद्धं पंचमेऽहनि कुर्यादिति सिद्धं इति विधवा
श्राद्धनिर्णयः॥ अथ पुत्रादिः कर्ता स्वभार्यायां रजस्वलायामपि पित्रादीनां प्रत्याब्दिक
कुर्यात्तदुक्तं कालादर्शे॥ जरं स्वलागतो न ग्निर्विदैष्ठास्तोयवाब्दिके॥ दर्शादाविव ना

ति॰ दि॰ मेन तत्त्वेन श्राद्धमाचरेत्॥ रजस्वलांगना यस्य सतथाविधो द्विजः आब्दिके अन्नेनैव श्रा
द्धं कुर्यात्॥ तथा यौगाक्षिः॥ ऋतुमत्स्वपि दारेषु विदेशस्थोप्यनग्निको॥ अन्नेन प्रकुर्वन्ते नान
२३६ श्राद्धविघ्ने द्विजातीनामामश्राद्धं प्रकीर्तितं॥ अमावास्यादिनियतं माससंवत्सरादृते॥
मासं मासिकं सांवत्सरमाब्दिकं॥ ऋतुमज्जायादिनाश्राद्धविघ्ने सति आमश्राद्धमुक्तं॥
एषु वचनेषु दर्शमासिकादिकमन्नेन सिद्धान्नेन कुर्यादिति प्रतिपादितं॥ ननु॥ आ
पद्यनग्नौ तीर्थे च प्रवासे पुत्रजन्मनि॥ आमश्राद्धं प्रकुर्वीत यस्य भार्या रजस्वला॥ तथा॥
आहिताग्निकाजातां विप्र वै समुपस्थिते॥ आमश्राद्धं द्विजैः कार्यं शूद्रः कुर्यात्सदैव हि॥
इति कात्यायनव्याघ्रपादवचनाभ्यां पुत्रादिकर्तॄणां मृताहादावामश्राद्धं प्रतीयते॥ मै २३६
वं॥ मृताहादौ सिद्धान्नश्राद्धविधायकविशेषवचनबलात्॥ सामान्यवचनयोः नयोरा
ब्दिकादिव्यतिरिक्तविषयत्वमध्यवसाय यत इत्यविरोधः॥ किंच मरीचिना ह्याद्रेआ

मश्राद्धनिषेध उक्तः॥ अत एव श्राद्धप्रवासादौ यस्य भार्या रजस्व— — — रामश्राद्धं प्रकुर्वीत म
तत्कुर्यान्मृतेहनीति॥ अतः पितृमृताहे नैव क्षयाहे श्राद्धं कर्तव्यं आपन्ने— याब्दिकं नैव कुर्या
दामेन न कर्हिचित्॥ कादम्बर्यां जितिना पित्र्याब्दिकमामेन निषिद्धं॥ रजस्वलानायाश्राद्धनि
र्णयः॥ सूतकादिविघ्नेनातीतमाब्दिकं कालान्तरेपि अन्नेनैव कुर्यात्॥ तदाह मरीचिः
श्राद्धविघ्ने समुत्पन्ने त्वविज्ञाते मृतेहनि॥ कुर्यात्तन्नकृष्णायामेकादश्यां विधुक्षये
इति॥ कार्ष्णाजिनिरपि॥ आपन्नोप्याब्दिकं नैव कुर्यादामेन कर्हिचित्॥ अन्नेनेदं समा
पातु कृष्णो वा हरिवासरे इति॥ देशान्तरगत्याद्यादिनिमित्तापदा तदितमाब्दिकं वचन
प्रतिपादितकाले चान्नेन कुर्यात्॥ आपद्यपि च तामेन तन्मासि हरिवासरे॥ कृष्णेति
दुक्षये वापि कुर्यादिति तेन वार्षिकी निर्णयः॥ इदं प्रत्याब्दिकादि श्राद्धं सिद्धान्नेन विहित
मपि तत्राग्रहणसंभावे मोक्षद्विजावेद्विजोपि आमश्राद्धं कुर्यात्॥ तदाह गोभिलः॥ द

नि०सि० वैरि विग्रहे पित्रोः प्रत्याब्दिक मुपस्थिते ॥ अन्नेनासंभावे हेम्नाकुर्यादामेन वासुत ॥ दक्षइ
२३१ ति पौणपास्फ पलस्तकः ॥ यद्यपि चंद्रसूर्यग्रहे नाद्यादिति ग्रहणे भोजननिषेधस्तथापि स
क्रुद्देशेन दातुरस्तु दयइति मिताक्षरायां ॥ अमावास्यामासिकं मृताहस्य भोक्तृद्विजसंभवे
अन्नेनैव कार्याणि ॥ असंभवे समे न हेम्ना वेति निर्णयः ॥ अथ आमश्राद्ध काल ॥ बौ
धायन ॥ संक्रमेन्न द्विजाभावे प्रवासे पुत्रजन्मनि ॥ आमश्राद्धं संग्रहे च द्विजः शूद्रः समा
चरेत ॥ शूद्रस्य तु सदैव ॥ तथा च सुमंतुः ॥ पाकाभावेधिकारः स्याद्विप्रादीनां नराधिप ॥
अपत्नीनां महावादे विदेशगमनादिषु ॥ सदा चैव तु शूद्राणां आमश्राद्धं विदुर्बुधाः ॥
उत्थानाः ॥ आपद्यनग्नौ तीर्थे च चंद्रसूर्यग्रहे तथा ॥ आमश्राद्धं द्विजो दद्याच्छूद्रो दद्यात्स २३७
दैव हि ॥ स्त्रीशूद्रः स्वपचश्चैव जातकर्मणि चाप्यथ ॥ आमश्राद्धं तथा कुर्याद्विधिना पा
र्वणेन तु ॥ स्वपच ॥ स्वयं पचतीत्यपत्नीक इत्यर्थः ॥ आमश्राद्ध पक्वान्न तत्तने आमयान्न

विशेषः ॥ व्यासः ॥ सिद्धान्ने तु विधिर्यः स्यादामश्राद्धेप्ययं विधिः ॥ आवाहनादि सर्वं स्यात्पिं
डदानं च भारत ॥ दद्याद्द्विजातिभ्यः शृतं यायदि वामृतं ॥ तेनाग्नौकरणं कुर्यात्पिंडांस्तेनै
व निर्वपेत् जमदग्निः ॥ आमश्राद्धं यदा कुर्यात्पिंडास्तेनाग्नौकरणं भवेत् ॥ हस्तेग्नौकरणं निर
ग्निक विषयं ॥ आमं दद्यात्तु कौन्तेय दद्यादामं चतुर्गुणमिति पुरुषाद्यारोपेक्षया ॥ व्यासः ॥ द्वि
गुणं तु अत्रान्न विषये समं तिमरीचिः ॥ आवाहये स्वधाकारं मंत्राजल्यो विसर्जनं ॥ अ
न्यकर्मणि मंत्राः स्फ रामश्राद्धे विधिः स्मृतः ॥ गालवः ॥ आमश्राद्धं तु पूर्वाह्णे सुमंतुः ॥ न प
क्वं भोजयेद्विप्रान्मत्रछ्द्रोपिकादाचन ॥ भोजयन्नत्यवायी स्यान्नच तस्माफलं लभेत ॥ म
ध्याह्नात्पारतो यात्तु कृतपः समसतदाकृत ॥ आमश्राद्धे नैतत्रैव पितृणां दत्तमक्षयमि
ति शूद्र विषय ॥ आमश्राद्धं तु पूर्वाह्णे इति तद्विजविषय ॥ इति आमश्राद्धनिर्णय ॥ अथ
स्त्रीणां पृथक्श्राद्धं ॥ स्त्रीणां क्षयाहादि व्यतिरिक्तश्राद्धेषु पत्न्या सहैव श्राद्धं कार्यं ॥ त

नि॰सिं॰ दाह जातूकर्ण्यः॥ क्षयाहं वर्जयित्वैकं स्त्रीणां नास्ति पृथक् क्रिया॥ केचिदिच्छंति नारीणामन्य
त्रापि मदृष्टयः॥ अन्यत्राष्टकादिष्वपि॥ तदुक्तं॥ अन्वष्टकं तथा वृद्धिमातुःश्राद्धं मते इति॥
२३८ राकोद्दिष्टं तथा मुक्ता स्त्रीणां नापि पृथग्भवेत्॥ वृद्धौ तीर्थे त्वाब्दिके श्राद्धे गयायामष्टकासु च
पितामह्यादिभिः सार्द्धं मातुः श्राद्धं समाचरेत्॥ शातातपः॥ नांदीमुखेऽष्टकेश्राद्धे गयायां
मृताहकासु च॥ पितामह्यास्तथैव हि पितामह्यादिभिः सार्द्धं मातुः श्राद्धं समाचरेत्॥ कात्या
यनिः॥ अन्वष्टकासु वृद्धौ च गयायां च क्षयेऽहनि॥ मातुः श्राद्धं पृथक्कुर्यात् अन्यत्र पतिना
सह॥ — रिति स्त्रीणामुपलक्षणं॥ मातृपितामहीप्रपितामहीनामित्यर्थः॥ मृताहे
तु मातुरितास्मृत्यंतरात्॥ अन्वय — — नवभिः पिंडैः श्राद्धमुदाहृतं॥ पित्रादि मातृमध्य २३८
स्थं ततो मातामहांतिकं॥ नवभिः पिंडैरिति नवपिंडश्राद्धं प्राधान्याभिप्रायपरं॥ अत्र मातृपि
डादन्यादिवत्कान्वष्टक्यधर्मेणाभवति किंतु प्राधान्येपः॥ मातृणां प्रत्येकपिंडदानेतु नव

संख्याधिकपिंडेनेन अन्वष्टक्यभंग इति॥ एतद्वृद्धादिवद्दृष्टपिंडिकाविधानवैमूल्यं व्या
ख्यातं॥ तच्छिष्टाचारविरुद्धं॥ शिष्टैस्तत्र सापत्नमातुः पृथगेकोद्दिष्टः पिंडश्च क्रियते॥
किंच॥ मातृप्राधान्येऽन्वष्टक्यश्राद्धे मातामहाद्याः पिंडानामपि निषेधान्निधानमसमं
जसा पिंडान्यस्मिंमेन तत्पत्नीनामितीश्रां स्थापने चोक्त एव स्तुतिविरुद्धत्वात्॥ अपि
च नैवं दैवत्यश्राद्धोपलक्षणार्थपितृशब्दश्रवणैः सामान्यविशेषन्यायेऽपि निरस्तः॥
अत्र सापत्नमातुरेकोद्दिष्टं॥ तदाह जातूकर्ण्यः॥ सापत्नमातुश्च पितरौ कोद्दिष्टं न पा
र्वणमिति॥ तथा महालये मातृणां श्राद्धं पितृभिः सह पृथग्वा कुर्यात्॥ तदुक्तमपरार्के
गयायां महालये पादौ तु पृथक् सह वा समाचरेदिति॥ स्मृत्यर्थसारे॥ तत्र मातृश्राद्धं पृथ
क् हा स्नं मातामहानां सपत्नीकमेव॥ अन्यत्राप्येकं मातृमध्यं महालयः॥ तथा वृद्धा
वादौ गयेचांते मध्ये त्वन्वष्टकासु च॥ मातृश्राद्धं पृथक्कुर्यादन्यत्र पतिना सहेति॥ अन्व

नि॰ दि॰ काश्राद्धं मातृणां सदैवतं॥ तदुक्तं॥ पितृणां मध्यकाश्राद्धं तत्स्त्रीणां च सदैवतं॥ वृद्धावदैवतं तेना
सां पितृणां च सदैवतं॥ अन्वष्टक्यं पितृपार्वणं विनोद्दिष्टवदेव॥ मात्रे पितामह्यै च प्रमा
णान्भोजयेदिति॥ अत्र मात्रादित्रयमुद्दिश्य पादान्वष्टक्यं पितृपार्वणं॥ विनाकेव
लं मातृपार्वणमित्युक्तं तथा स्मृतेर्मंजर्यां॥ मान्द्यामेव तद्यस्मात्मातृश्राद्धं तदुच्यत इति॥
नवैकं पार्वणं जीवत्पितृकस्य युक्तं॥ शाकेनापरपक्षमिति कामे द्वितीयवचनादपरपक्षाष्ट
कायां श्राद्धं निरग्नेरपि नियतं॥ अन्यास्त्वनियता॥ साग्नेः पिंडपितृकस्य यत्तोत्तरविधानात्स
र्वास्तु नियताः॥ श्रौतन्वष्टक्यं पिंडपितृयज्ञवत्ते तज्जीवत्पितृकस्य॥ अष्टकाश्राद्धाधिकाराभा
वेपि अस्मिन्मातृश्राद्धे विकार॥ अन्वष्टकायां मातृश्राद्धं पूर्वं कृत्वा दिनेत्रिमातृणां २३०
यकश्राद्धनिर्णयः॥ अथ जीवत्पितृकस्य श्राद्धकालाः॥ तत्र सपितुः पितृकृत्येषु अधिका
रोन विद्यते॥ न जीवंतमतिक्रम्य किंचिद्दद्यादिति श्रुतिरिति कात्यायनवचनेन जीवत्पि

तृकस्य श्राद्धाधिकारेनाषिद्धेपि गत्यपरिशिष्टे तदपवाद उक्तः॥ गयायां महाले पुत्रजनने पित्र्ये
ष्ट्यां सौ किंमिश्रुरेवतीयेत्रिशतायां आयाने षडेते जीवतः पितुः॥ पित्र्येष्ट्यां पितृयज्ञे च तथा मातुर्मृ
तेहनि॥ वृत्रघ्नपदितीर्थेषु सोपि श्राद्धं समाचरेत्॥ मैत्रेयगत्यपरिशिष्टे॥ महानदीषु स
र्वासु तीर्थेषु गयामृते॥ जीवत्पितातु कुर्वीत श्राद्धं ह्रहनि॥ मातुः श्राद्धं सुतः कुर्यात्पितर्यपि जीव
ति॥ तथा पितरि पातित्यादिदोषयुक्ते सन्यस्ते वा उक्ता काम्यातिरिक्तकालेष्वपि श्राद्धं कुर्यादिति॥
स्मृत्यर्थसारे॥ ब्राह्मणादिहते ताते संगवर्जिते॥ येभ्य एव पिता दद्यात्तेभ्य एव स्वयं सुतः॥ सुमं
तुः॥ न जीवत्पितृकः कुर्याच्छ्राद्धमग्निमृते द्विजः॥ येभ्य एव पिता दद्यात्तेभ्यः कुर्वीत साग्निकः॥
साग्निका आहिताग्निरनाहिताग्निरपि॥ अनग्निकोपि कुर्वीत तज्जन्मादौ वृद्धिकामणि॥
येभ्य एव पिता दद्यात्तेनैवोद्दिष्टपार्वणं॥ मनुना विशेष उक्तः॥ ध्रियमाणे तु पितरि पू
र्वेषामेव निर्वपेत्॥ विप्रवद्वापि तं श्राद्धं स्वकं पितरमाशयेत्॥ पितामहस्तु हतः स्यात्तजी

वेद्वापिपितामह॥ पितुः सनामसंकार्य्यंकात्त्र्यं पितामहं॥ पितामहो वा तंश्राद्धंनुजीवेत्प्र
वीन्मनुः॥ तथा साग्निकमृतककुर्वीत नावतिष्ठयितामहे इति सुमन्तुवचनेन पितृपितापितामः
हमोर्द्वयोर्जीवतोः पूर्वोक्तेषु निमित्तेषु श्राद्धं कार्यमित्यंगच्छंते॥ तथा पितुर्यादेवताः ओ
कास्ता एवापि देवता॥ तथा चात्र विशेषस्मृत्यंतरे॥ कुर्यात्तु पादा पुत्रः श्राद्धं पितरि जीवति॥
पितामहं समारभ्य यजेन्मातामहान्स्वकान्॥ इति जीवत्पितुः श्राद्धकाल॥ अथानिवृत्पि
तुः श्राद्धनिषिद्धाः॥ दौर्गाक्षि॥ आमश्राद्धं चापरपाक्षिकं॥ तन्नातिव्रतात्पितृकः कुर्यात्तिलैः क
र्षणितेभ्र तर्पणं॥ कातुरपि॥ अष्टकासु च संक्रांतौ मन्वादिषु युगादिषु॥ चंद्रसूर्यग्रहे पाते स्वेच्छ
प्रज्मृयोगतः॥ जीवत्पिता नैव कुर्यात् श्राद्धं काम्यं तथाखिलं॥ आमश्राद्धं गयाश्राद्धमिति तुश्रा
द्धोहेयं न गत्वा तत्र श्राद्धं न कार्य्यमित्येवपरं॥ अथा पुत्रिप्रतिपत्श्राद्धं जीवत्पितृकः॥ सु
क्ताश्विप्रतिपदि मातामहश्राद्धं कुर्यात्॥ तदुक्तं॥ प्रतिपद्याश्विने शुक्ले दौहित्रस्त्वेकपार्वणं

श्राद्धं मातामहं कुर्यात्सपिता संगवे सदा॥ अन्यच्च॥ जातमात्रेतु दौहित्रे जीविते मातुलेपि
च॥ प्रातः संगवयोर्मध्ये आर्यस्य प्रतिपद्भवेत्॥ तथा॥ गमत्वकतोपि दौहित्रः कुर्यात्पितरि
जीवति॥ श्राद्धं मातामहानां च पक्षोनादपरेहनि॥ तथा॥ मातुः पितरमारभ्यात्रयो मातामः
हास्मृताः॥ तेषां पितृवच्छ्राद्धं कुर्युर्दुहितसूनव इति॥ आयत्रिमिपछ्राद्धं॥ अथ श्राद्धदिने द्र
व्याभावे तु पिंडमात्रं प्रदातव्यमन्नाभावे कव्यविषयो॥ श्राद्धाहनि तु संप्राप्ते भवेन्नि स्नानेपि
वा॥ स्मृत्यंतरे तु॥ पाचानोंवे तु कलैव पितृयज्ञो विधिंनरः॥ निर्दिश्यैपम्पन्नमुद्धृत्य यत्र पात्रेत
नानयेत्॥ पितृयज्ञविधिश्राद्धविधिं अन्यत्रापि सर्वाभावे निषेदये गवे दद्यात्तथापुवा॥
ननु प्राप्तस्य लोपोस्ति पैतृकस्य विशेषतः॥ अतिकृत्य तपसोत्र तिलाघनावेतु॥ हाग्रावसि
ष्ठः॥ अग्निनावाहहेत्कक्षं श्राद्धकाल उपस्थिते॥ तस्मिन्नोपतसेदन्निजं पैत्राश्राद्धसंहि
तां॥ कक्षं तथा संमुहं॥ विस्तुरायो॥ सर्वाभावे वगत्वा कक्षां मूलप्रदक्षिकि॥ स्पर्ह्वीदिलो॰

नि॰सि॰
२४१

कपालानामिदमुच्चैः पतिष्यति॥ न मेऽस्ति वित्तं न धनं च नान्यच्छ्राद्धोपयोगि स्वपितॄन्नतोऽस्मि।
तृप्यंतु भक्त्या पितरो मयैतौ भुजौ कृतौ वर्त्मनि मारुतस्य॥ इत्युक्त्वा पितृन्निगतिं नाव्यं नावश्यो
जको यः करोति कृतं॥ तेन श्राद्धं भवेदिति भारते॥ इति व्यासोक्तश्राद्धनिर्णयः॥ आशौचाति
क्रांते श्राद्धकालः॥ मरीचिः॥ श्राद्धविघ्ने समुत्पन्ने अविज्ञाते मृतेऽहनि॥ कुर्याद्दिनेऽनक्षत्रायामेद
र्शे विधुक्षये॥ आशौचे तु व्यतिक्रांते तेन तस्य श्राद्धं प्रतीयते॥ आशौचानंतरं कारणात्मेनैव
दर्शे वा कुर्यात्॥ तथा हि गोभिलः॥ दैवेनाप्यविके श्राद्धे अंतरा मृतसूतके॥ आशौचानंत
रं कुर्यात्मासे तु क्षये पिवा॥ त्रयोदश्यादिश्राद्धं मृतके जन्मन्येकादश्यां तथा॥ रजस्वलायदामर्षा
श्राद्धं कुर्यात्तु पंचमे॥ त्रयोदश्यनंतरं संबंधिमृतविषयं॥ पित्र्यकृष्टे तु सूत्यंतरात्॥ जन्म
न्येकादश्यादि स्यान्मृतके द्वादशेऽहनि॥ आशौचांतद्वितीयेऽह्नि कृतं कुर्यादि श्राद्धिकं मनु २४१
रब्रवीत्॥ तथा॥ एकादशाद्धिक कर्तव्यमाब्दिकं जातसूतके॥ मृतके द्वादशाहे तु विधि

रेषः सनातन इति॥ यत्तु वचनं॥ स्वगृहे जातकं जातं द्वादशेऽहति कारयेत्तके॥ वदंति शुद्धौ त
त्कार्यं दर्शे वापि विशेषतः॥ तथा श्राद्धविघ्ने समुत्पन्ने मृते रजसि सूतके॥ तस्यांतेनैव कर्तव्यं
मित्येवं मनुरब्रवीत्॥ व्यासः॥ श्राद्धविघ्ने समुत्पन्ने अंतरा मृतसूतके॥ अहन्यहनि च यच्छ्राद्धं
तन्नित्यमिति कीर्तितं विश्वदेवविहीनं तदशक्तावुदकेन तु इति॥ तथा स्मृतिसारे॥ एकमप्य
शये दद्यात्पितृयज्ञे च यस्तके॥ न चैवात्राशये त्किंचिद्वैश्वदेवं प्रति द्विजं नचैवेति॥ वैश्वदेवर
हितमित्यर्थः॥ चेद्रुत्तिबंधेति तच्छ्राद्धे मदैवश्राद्धं॥ तथा स्मृत्यंतरे॥ नित्यश्राद्धेऽदैवं श्र
श्राद्धं चर्यां॥ अपिंडश्राद्धकात्ये॥ नामंत्रणं न होमं च नावाहनं न विसर्जनं॥ न पिंडदानं वि
कारं न दद्याद्दत्तदक्षिणां॥ पर्युषितं न दातव्यं श्राद्धे नैमित्तिके क्वचित्॥ नित्ये तदास्यनुज्ञा
तं शाकमक्षादिकं चयेत्॥ गार्ग्यः श्राद्धे तथा नित्ये भोजनं बालिपूर्वकं॥ इतरेषु च सर्वेषु
न बलिर्नैव चाकृतिः॥ भतकल्पे नित्यश्राद्धे द्विजमभ्यर्चयेच्छक्तितः॥ सर्वान्पितृगणान्स

नि॰ सि॰ न्युक्तसहैर्वै द्विकफनोजयेत्॥ आवाहनं स्वधाकारं पिंडाग्नौकरणादिकं॥ ब्रह्मचर्यादिनियमा
२४२ विश्वेदेवास्तथैव च॥ नित्यश्राद्धे त्यजेदेतान् भोज्यं चान्नं प्रकल्पयेत्॥ स्मृत्यर्थसारे॥ नित्यश्रा
द्धमदैवं षट्पुरुषं च भवति॥ तत्र अर्घ्यदेशकालकर्तृनियमाः॥ कर्तृनियमाश्च न संति
नमस्कारेण विसर्जनमिति॥ तथा कपर्दिहरदत्तः॥ श्राद्धमन्नाद्येनोदकेन वा॥ के मूलफलै
र्वापि पितृणां प्रीतिमाहरन्॥ चमत्कारखंडे नित्यश्राद्धं नक्तवृत्तिः संगाद्यत्र सिध्यतीति॥ श्री
रामायणे॥ इंगुदं बदरं बिल्वं राजेन्द्र इंगुदीपिंडमुत्तमं॥ यदन्नः पुरुषो लोके तदन्नास्तस्य देवताः॥
इति नित्यश्राद्धं॥ अथ संकल्पश्राद्धं॥ पद्धतौ गृह्यते॥ अथ अपार्वणश्राद्धं यथा वल्कलं तु भस्म
पिंडादि विहीनं तत्संकल्पश्राद्धमाचरेत्॥ स्मृतिसंग्रहे॥ अंगानि मितत्यत्तस्य प्रदाकर्ता २४२
न तत्कुर्यात्॥ संकल्पश्राद्धमेवासौ कपदिघादिवर्जितं॥ आदिग्रहणादावाहनादि आप
स्तंबः॥ संकल्पश्राद्धे आवाहनाग्नौकरणस्वधावाचनानि वर्जयेदिति॥ तथा आवा

हनाग्नौकरणं विकिरं पात्रपूरणं॥ पिंडहीनेन कर्तव्यमेतच्छ्राद्धे चतुष्टयं॥ पात्रपूरणं॥
अर्घपूरणं॥ तथा स्मृतिः॥ संकल्पं च यदा कुर्यान्न कुर्यात्पात्रपूरणं॥ नावाहनाग्नौकरणे
पिंडांश्च वनितिर्वपेदिति॥ व्यासः॥ त्यक्तश्रेयः पार्वणं नैव नैकोद्दिष्टं सपिंडनं॥ अन्यकार्ये
त्तपिंडोक्तिस्तस्मात्संकल्पं नो जपेत्॥ नास्ति क्षात्त्या क्षार्ये॥ इति संकल्पश्राद्धं॥ अथ तीर्थ
श्राद्धं॥ अर्घ्यमग्नौकरणं स्वधावाच॥ तथावनेजनं पिंडदानं प्रत्यवनेजनं॥ अर्घ्यसंक
ल्पनं चैव तीर्थश्राद्धमुदाहृतमिति तीर्थखंडात्॥ मत्स्यः॥ स्नात्वा नदीषु सर्वासु पितॄन्संत
र्प्य तत्र तर्पितः॥ अकाले प्यथवा काले तीर्थश्राद्धं तथा नरैः॥ प्राप्तैरेव सदा कार्यं कर्त
व्यं पितृतर्पणं॥ तीर्थे पुत्रा लक्षणैर्न परीक्षेत कथंचन॥ सक्तुभिः पिंडदानं स्यात्संयवैः पाय
सेन वा॥ गोधूमानां च पिष्टेन पिष्टतण्डाकेन गुडेन वा॥ प्रयत्नतः कर्तव्यमर्घावाहन
वर्जितं॥ अर्घमावाहनं चैव द्विजांगुष्ठनिवेशनं विकिरं तृप्तिप्रश्नं च तीर्थश्राद्धे विवर्जयेत्

नि॰दि॰ दितिस्मृत्यंतरं॥ तथा॥ ध्वांक्षगृध्रकाकाद्या घ्नंति दृष्टेन ते क्रियां॥ चंडाला अपि यद्दृष्टं ब्राह्मते
२४३ आमश्राद्धं यदा कुर्यात्पिंडदानं कथं भवेत्॥ गृहपाकात्समुद्धृत्य सक्तुभिः पायसेन वा॥ ते
नामौकरणं कुर्यात्पिंडांस्तेनैव निर्वपेत्॥ स्मृत्यंतरे च॥ तथा॥ मुंडनं चोपवासश्च सर्वतीर्थे
ष्वयं विधिः॥ वर्जयित्वा कुरुक्षेत्रं नैमिषं पुष्करं गयां तेनेति॥ इति तीर्थश्राद्धनिर्णयः॥ अ
थ जीवच्छ्राद्धं॥ स्मृत्यंतरे असति आत्मनः जीवाय स्वयं श्राद्धं दद्यात्॥ तदुक्तं ब्रह्मपुराणे॥
देकाद्वालेध तथाश्राद्धं व्यवसायसमुच्छितं॥ जीवितसन्निजीवाय दद्याच्छ्राद्धं स्वयं नरः॥ त
द्विधिः पुराणांतरात्॥ कृतोपवासः सुस्नातस्त्रयोदश्यां समाहितः॥ कृत्वारि मध्ये मो
कारं विष्णुं सर्वेश्वरं यजेत्॥ वाक्क्रियैः षष्ठजलधेनं दद्यात्तत्र विधानतः॥ अग्नये कव्यवाह २४३
नाय सोमाय पितृमते यमायांगिरस्वते पितृमते इति त्रयो देवान धेनुत्रयमदानं॥ धेनु
त्रिकमध्ये च मुरुजादित्या नामैक पार्वणे तथा इं॥ ततो धेनुत्रयं दद्यात्॥ अग्नेयी

तु सौम्या च याम्या च याम्या धेनुर्यथाक्रमं॥ विश्वेषां चैव देवानां तिलपात्रे ददेत्ततः॥ विसर्ज
येत् स्मरन् विष्णुं देवं त्वाष्टाक्षरं विभुं॥ चतुर्दश्यां ततो गच्छेद्यथात्रा पांसरिद्वरां॥ मार्गेय
वलोह वस्त्रं विकिरयां॥ जितं ते पुंडरीकाक्ष नमस्ते विश्वभावन॥ नमस्तेस्तु हृषीकेश मह
हापुरुष पूर्वज इत्यादि विष्णुस्तोत्रं जपेत्॥ जपानंतरं दक्षिणाभिमुखं वह्निं कालयेत्त
त्रं च स्वयं॥ पंचाशतां कुशैर्ब्राह्मीं कृत्वा प्रतिदहेत्॥ यथोक्ताग्निषु वैस्तसिंधमंत्रश्च
सस्मरन्॥ कृत्वा त्राधान्तिकेस्थाने पश्चात्त्रानितिकृतिं हेत॥ यथोक्तानिए तदष्टमहाव
नानि मृन्मिश्रायनादीनि कृत्वाकपालि॥ क्रव्याद वह्नितां यै नमस्येन मरतिस्मरन्॥ क्षीर
कृत जलकुंभं तु विकरेत्र सन्धान ये॥ नाभिमात्रं ततस्तोयं स्वविरूप पमदिक्सुखः॥ यमाय ध
र्मराजाय मृत्यवे चांतकाय च॥ वैवस्वताय कालाय सर्वभूतक्षयाय चेति सप्तांजलीन् यः॥ त
तं कंनमस्त्वंडरुद्राय स्मशानपतये इति जात्वोदकाभ्यो पूर्णकुंभं निक्षिपेत् दृढं इति॥ जी

नि०दि० वृद्धाज्ञाविधिः॥अथमृतस्य सपिंडनोर्ध्वं श्राद्धविशेषमाह॥मृतोद्देशेन संवत्सरपर्यंतंश्रा
२४४ द्धं कुर्यादित्युक्तं॥द्वादशाहत्रिपक्षादौ कृतं यस्य सपिंडनं॥कुर्वीत पार्वणश्राद्धं सोदकुंभ
मधर्मकं॥संकल्पेन तु नियमं प्रत्यहं त्वाब्दिकावधि॥अधर्मकं आवाहनादिधर्मरहि
तं॥संकल्पश्राद्धविधिना॥विधिरुक्तः संकल्पश्राद्धे॥आब्दिकावधि सपिंडनोर्ध्वं क्रियते।
संवत्सरे पूर्णे विहितमाब्दिकं तत्पर्यंतं॥तदपि वैश्वदेववर्जितं कुर्यादित्याहगौतमः॥औदे
वं पार्वणश्राद्धं सोदकुंभमधर्मकं॥कुर्यान्नित्याब्दिकं श्राद्धं संकल्पविधिनान्वहमिति॥
अधर्मकं कर्मोक्तनियमरहितं॥आब्दिकमितिमर्यादोक्तिः॥याज्ञवल्क्यः॥अर्वाक्सं
वत्सराद्यस्य सपिंडीकरणं भवेत्॥तस्याप्यन्नं सोदकुंभं दद्यात्संवत्सरं द्विजे॥तथा॥यस्य सं
वत्सरादर्वाक्सपिंडीकरणं कृतं॥उद्दिश्य तं सोदकुंभं दद्यादन्नं द्विजेन्वहं॥अत्र २४४
यस्य तस्य तमुद्दिश्येत्येकवचनान्निर्देशादेकस्यैव देवतात्वमिति वदंती॥तथा सपिंडी

करणे एकस्यैव तु दापयेद्वर्षपावदिति गुरुडपुराणमुदाहरंति॥पुरस्त्वत्रैवाग्रेतेनग्रंथे
सोदकुंभमासिकयोः संपाते मासिकं कुर्यात्॥तेन सोदकुंभं सिध्यतीत्युक्तं॥अतः सोदं
कुंभश्राद्धेप्येकस्य देवतात्वमित्यंगीकृतं॥कालादर्शादौ पितृपितामहप्रपितामहानुद्दि
श्यैकपार्वणविधिनोक्तधर्मकमित्युक्तं॥तथा गतदुदकुंभान्वितं॥श्राद्धं वर्षं यावन्मातु
रपि कुर्यात्॥तदुक्तं पितुर्यथा मासिकानि प्रतिमासं मृतेहनि॥मातुः कुर्यात्तद्वदेवाच्छ
दकुंभं तथैव हीति॥एतेनाब्दपर्यंतं श्राद्धविधानेन क्रियाद्विरावर्त्यत इति सिद्धं॥कु
र्मे॥अन्नं चैव यथाशक्त्या संख्या कृत्वाब्दिकस्य च॥दातव्यं ब्राह्मणेभ्यस्तु वृद्धौ निष्क्रयेन
यदिति सपिंडनात्पूर्वं वृद्धौ तातः सपिंडनमित्युक्त प्रथमाब्दिके वृषोत्सर्गः कार्य इत्यधि
करणे प्राप्त॥तथा ब्राह्मणान्भोजयेदप्सु होतव्यमनलेथवा॥पुनश्च भोजयेद्विप्रान्द्विरा
वृत्तिर्नविदिति॥तथाऽर्वाक्संवत्सराद्यस्य सपिंडीकरणं कृतं॥षोडशानां द्विरावृत्ति

नि॰सि॰ कुर्यादित्याह गौतमः॥ तथा॥ सापिंड्येन्दादधस्तान्निकर्षकालेऽसकेपुनरिति गालववगौतमेन
गौतमवचनमासिकामपि द्विरावृत्तिरुक्ता॥ एवं वृषोत्सर्गोपि द्विरावृत्तिर्भवतीति॥ तद्युध्यात्र
२४५ प्रथमाब्दिकात्पूर्वकरणासंभवे आब्दिके कार्य॥ तत्रामलमासादिसंभवे निषेधः काम्यविषयः
यदुक्तं व्यासादिभिः॥ आश्रमस्वीकृतिः काम्यवृषोत्सर्गश्चविक्रमः॥ व्याख्यातं च काम्यो वृषो
त्सर्गेनितुनैमित्तकः॥ तदाह बोधायनः॥ अयं वृषोत्सर्गेनिषिद्धं॥ तत्र मासकाम्यान्नैमित्तके
काम्यः कात्तिक्यादौ नैमित्तकएकादशाहादौ॥ अतः प्रथमाब्दिके निषिद्धकालेऽसतिपू
र्वमकृतश्चेद्विवाह विवाहविधिविहायद्विरावृत्तिबुध्यात्तत्रागत्योक्तो वृषोत्सर्गः कार्यइ
ति॥ इति श्राद्धविशेषनिर्णयप्रकरणं॥ छतेचलद्विवेहेनग्रंपेनिर्णयदीकों पं॥ नानाविधे २४५
पुश्राद्धेषु निर्णीतानि चकानिचित्॥ अथ महालयश्राद्धनिर्णयः॥ नाभस्यस्यापरपक्षो
महालयः गजच्छायाकृपश्चेति॥ तदुक्तं कालादर्शे॥ नभस्यस्यापरः पक्षो यत्र कन्यां

व्रजेद्रविः॥ समहालयसंज्ञः स्याद्गजच्छायाक्षयतिस्तथा॥ यमोपि॥ आषाढीमवधिंकृत्वा यः
पक्षः पंचमो भवेत्॥ तत्र श्राद्धं प्रकुर्वीत कन्यास्थोर्कोनवेत्तवेति॥ यदाश्रावणभाद्रपदयो
रन्यतरे मलमासो भवति तदा सप्तमः पितृपक्षः॥ तदुक्तं कालनिर्णये॥ नभो वाथ नभस्यो
वामलमासो यदा भवेत्॥ सप्तमः पितृपक्षः स्यादन्यत्रैव तु पंचमः॥ पित्र्यपक्षो महालय॥
सारवायति॥ कन्यास्थे केसतिपक्षस्य श्राद्धास्त्यमस्तिधात्रे॥ पुण्यः कन्यागतः सूर्यः पुण्यः
पक्षश्च पंचमः॥ कन्यास्थार्कान्वितः पक्षः सोत्यंतंपुण्यमुच्यते॥ जाबालिः॥ कन्यार्कोन्
नि॰दि॰ प्याद् विज्ञानेश्वरः॥ अशुद्धिः पूर्वसमाप्तितः सदृशायो योगेग्निदः स्मृतिकौदित्वेति॥ अग्निदंये
२७६ नप्रेतस्य अग्निदत्त्वं तं विना॥ अग्निदः पुत्र इति केचिदाहुः॥ तन्न युक्तं॥ यतः पुत्रस्य पित्रो
राशौचं तावदाशौचांतरेण न निवर्त्तत इति स्मृतियुक्तं॥ तस्मादग्निदः पुत्रोन्यगोत्रो वा॥ त
थाच अन्यगोत्रोन्यगोत्रस्याचार्यादि रतेष्टिं करोति तदा दशरात्रं मुक्तं मिताक्षरायां॥
गुरोः प्रेतस्य शिष्यस्तु पितृमेधं समाचरेत्॥ प्रेताहारैः समं तत्र दश
रात्रेण शुध्यतीति॥ मनुस्मरणात्॥ अत्र शिष्यग्रहणात् तुल्यन्यायत्वादाधिक्रियते स
यदि अन्त्येष्टिं करोति तदा दशरात्रमिति चंडुतिवधे विशेषव्याख्यानं॥ तदाद्यादशा
कनाष्येपि॥ गोत्रान्तरे अग्निदाता सपत्नश्चेत संपन्नादि दशरात्रमेवाशौचं वात्॥ य २७६
द्यपि पूर्वत्रिगोत्रे तपस्त्रिमाशौचमुपरतं॥ तथापि पक्षिमाशौचादग्निः सूतकाधव
दशरात्रमेवाशौचं भवतीति नया॥ अन्यगोत्रोन्यगोत्रस्य प्रेतस्याग्निदश

तिथु॥ उदकं पिंडदानं च सद्यश्चाद् समाप्येदिति॥ करंडिकायां तथा पुत्रासंनिधा
ने येनासगोत्रादिना सदाह संस्कारः कृतस्तेनोवादशाहादात्प्रेतकर्मकर्तव्यमिति मि
ताक्षरायां॥ एतदन्निभेतस्य हिनिोत्रालणस्य दशरात्रेमाशौचमिति शंखस्मरणमा
तापित्रोराशौचं संपातिपातेत्वं गिरसा विशेषयुक्तं॥ मातर्यग्रे प्रमीतायामशुद्धौ म्रियते
पिता॥ पितुः शेषेण शुद्धिः स्यान्मातुः कुर्याच्च पक्षिणीति॥ अयमर्थः॥ मातरि पूर्वमृता
यां तन्निमित्ताशौचमध्ये यदि पितुर्मरणं स्यात् तदा पित्राशौचेनैव शुद्धिः कार्या न मात्रा
शौचेन॥ पितृमृताशौचमध्ये यदि मातुर्मरणं तदापि पितुराशौचं समाप्याधिकं मातुः प
क्षिण्याशौचं कुर्यात्॥ न पित्राशौचेन शुद्धिरिति॥ इदं मातुः पक्षिण्याशौचं रतिमित
पिंडक्रियाद्यं तेष्टिनिमित्तं न भवेत॥ पूर्णमाशौचं॥ अन्यथा वाक्यांतरविरोध इति॥
एवं सन्निपाताशौचे वर्षात्सुध्यन्निधाने पियोतमेन विशेषयुक्तं॥ एकत्रिशेषम पितृ

नि॰सि॰
२७७

ताभ्यां प्रभाते तिसृभिरिति॥ अयमर्थः॥ पूर्वाशौचे रात्रिमात्रशेषे यद्यशौचांतरं निपतेत् तर्हि
पूर्वाशौचं समाप्यानंतरं द्वाभ्यां रात्रिभ्यां शुद्धिः प्रभाते तस्या रात्रेः पश्चिमे यामे यो जन-
नाशौचांतरं संनिपाते सति तिसृभिः रात्रिभिः शुद्धिः पुनः पूर्वाशौचशेषेण॥ स्ना-
तानपीष्येवमाह॥ रात्रिशेषे द्व्यहाच्छुद्धिर्यामशेषे शुचिस्त्र्यहात्॥ अत्राशौचप्रकरणे
रात्रिग्रहणे अहर्गणं वाहोरात्रोपलक्षणार्थं॥ तथा॥ आद्यभागद्वयं यावत् सूतकस्य सूत-
के॥ द्वितीये सूतके चाद्ये सूतकाच्छुद्धिरिष्यते॥ अतऊर्ध्वं द्वितीयात्तु सूतकात्ताच्छुचिः स्मृ-
ता॥ इति कूर्मपुराणे॥ स्नानीयपूर्वाशौचं समाप्यानंतरमधिकाशौचानि धार्याणि॥ त-
थापि देशाचारापेक्षा तत्र व्यवस्था॥ अथ प्रेतानुमते निर्हरणे च मनुना विशेष उक्तः॥ २७७
असपिंडं द्विजं प्रेतं विप्रो निर्हृत्य बंधुवत्॥ विशुध्यति त्रिरात्रेण स विप्रोन्नं दद्यदि॥ अ-
सपिंडमिति असगोत्रजं मातृसपिंडादिकं॥ पितृसपिंडानां तु विहितत्वान्निर्हर-

णस्य निर्हरणस्य च प्राप्तेः प्रतिवदनं॥ बंधुवदिति स्नेहेन यदि तद्गृहे संविशेत्तदा त्रि-
रात्रमाशौचं॥ तथा स्मृत्यर्थसारे॥ स्नेहादिना सजातिप्रेतं निर्हृत्य तद्गृहे स्थितौ त्रिरात्रा-
शौचं॥ पुनरपि मनुः॥ यद्यन्नमत्ति तेषां तु दशाहेनैव शुध्यति॥ अनदन्नन्नमह्नैव चेन्न तस्मि-
न् गृहे वसेत्॥ यदि तद्गृहे न वसेत्तदा एकाह इति॥ एवं स्मृत्यर्थसारे प्रतिपादितम-
स्ति॥ अत एव वृद्धशाकं॥ निर्हरिसूतवन्नरतान्नूर्ध्वं दिने श्रीएपन्यवासेदिनमिति॥ एतत्स-
जातीयप्रेतनिर्हरणविषयं॥ विजातीयनिर्हरणे तु यज्जातीयप्रेतं निर्हरति तज्जातीय-
माशौचमुक्तं गौतमेन॥ अवरश्चेद्वर्णः पूर्ववर्णमुपस्पृशेत्॥ पूर्वो वावरं तत्र तच्छ-
वोक्ताशौचमाचरेत्॥ तथा ब्राह्मणस्येदमबुध्या अनाथब्राह्मणं प्रेतं निर्हरति तत्राह-
वमानमाह पराशरः॥ अनाथं ब्राह्मणं प्रेतं ये वहंति द्विजोत्तमाः॥ पदे पदे यज्ञफलमानु-
पूर्व्यं लभंति ते॥ न तेषामशुभं किंचित्पापं वा शुभकर्मणां॥ जलावगाहनात्तेषां सद्यः

शौचं विधिमतइति॥ तथाब्राह्मणेन क्षत्रियादीनां संस्कारोन कर्त्तव्यः॥ तदुक्तं ब्रह्मपुराणे
ब्राह्मणस्त्वन्यवर्णानां तत्करोति कदाचन॥ कामाल्लोभाद्भयान्मोहात्कृत्वा तज्जातितां
व्रजेदिति॥ अथानुगमनमात्रविषये मनुः॥ अनुगम्येच्छया प्रेतं ज्ञातिमज्ञाति
मेव च॥ स्नात्वा सचैलः स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यतीति॥ ज्ञातिः पितृपक्षः॥ अज्ञातिरस
पिंडः॥ तथा॥ ब्राह्मणेनानुगन्तव्यो न शूद्रो न द्विजः क्वचित्॥ अनुगम्याम्भसि स्नात्वा स्पृष्ट्वाग्निं
घृतभुक्छुचिः॥ द्विज इति वैश्यपरः॥ यदि स्नेहादिनानुगच्छति तदा तडागादिस्थे जले स्ना
त्वाग्निं स्पृष्ट्वा घृतं प्राश्य शुचिर्भवेत्॥ एतद्घृतप्राशनं प्रायश्चित्तमसपिंडद्विजानुगमनवि
षये॥ सपिंडानां तु विहितत्वान्न दोषः॥ घृतप्राशनं शुध्यर्थमेव तद्भोजनस्थाने शूद्रानु
गमने त्रिरात्रं वक्ष्यते॥ तद्वादि कर्मचि॥ एतद्घृतादि कृत्यं सचैलस्नानाकरणे वेदित
व्यं॥ यत्तु रोदे स्नानं इति विज्ञानेश्वरः॥ स्मृतस्य बान्धवैः सहाश्रुपातं कृत्वा अकृत्वा अस्थि

संचयने सचैलस्नानेन शुद्धिरिति विष्णुः॥ कृते संचयने स्नानमप्यवाचमंतं चेति॥ शं
खः तथा॥ पादकृच्छ्रः सपिंडस्य प्रेतालंकारयोः कृते॥ अज्ञानादुपवासः स्याद्धत्वाक्रोस्त्वा
नमिष्यत इति शंखेनोक्तं॥ स्मृत्यर्थसारे यावन्ति हरिणास्थीनालंकारवहनदहना
दिके कृते सचैलस्नानात्प्राणायामैः शुद्धिः॥ सचैलस्नानप्राणायामैः शुद्धिरिति वा॥ ब्राह्म
णविषयं॥ शूद्रानुगमने तु॥ प्रेतीभूतं तु यः शूद्रं ब्राह्मणो ज्ञानदुर्बलः॥ अनुगच्छेन्नी
यमानं स त्रिरात्रेण शुध्यतीति॥ त्रिरात्रे तु ततस्तीर्णे नदीं गत्वा समुद्रगां॥ प्राणायाम
शतं कृत्वा घृतं प्राश्य विशुध्यतीति पराशरः॥ क्षत्रियानुगमे वैश्यानुगमने च॥ मानुषा
स्थि स्निग्धं स्पृष्ट्वा त्रिरात्रमाशौचं अस्निग्धे त्वहोरात्रमिति वसिष्ठः॥ तथा क्षत्रियस्य वै
श्यानुगमने त्वेकाहं॥ शूद्रानुगमने पक्षिणी॥ वैश्यस्य शूद्रानुगमने त्वेकाहमिति स्मृ
त्यर्थसारादित्यनुगमनाशौचनिर्णयः॥ सापिंड्येऽपि द्विरात्रमात्रावः॥ क्षेत्रजादि

पुत्रेषु मृतेष्वहोरात्राशौचमाह मनुः ॥ अनौरसेषु पुत्रेषु भार्यास्वन्यगतासु च ॥ मृतासु अ
होरात्रं शौचं स्मार्त्तास्त्रिमनुवर्त्तन्ति ॥ एतद्द्विप्रयेसपिंडानामाशौचाभावे प्रजापतिराह ॥ अन्या
श्रितेषु दारेषु परपत्नीसुतेषु च ॥ गोत्रिणः स्नानशुद्धाः स्युस्त्रिरात्रेणैव तत्पितेत्युक्तेति
॥ विष्णुः ॥ अनौरसेषु पुत्रेषु जातेषु च मृतेषु च ॥ परपूर्वासु भार्यासु प्रसूतासु मृतासु च त्रिरात्र
म् परपूर्वयोः ॥ एकाहस्तु सपिंडानां त्रिरात्रं यत्र वै पितुरिति ॥ यदा पुनर्ब्राह्मणस्य क्षत्रि
यादयः सपिंडा भवंति तदा बौधायनः पृथक्कल्पोनुसरणीयो यथा ॥ क्षत्रविट्शूद्र
जातीया ये स्युर्विप्रस्य बांधवाः ॥ तेषामाशौचे विप्रस्य दशाहाच्छुद्धिरिष्यते ॥ हारीतोपि
॥ दशाहाच्छुध्यते विप्रो जन्महानौ स्वयोनिषु ॥ षड्भिस्त्रिभिरथैकेन क्षत्रविट्शूद्रयो २७१
निषु तोविष्णुः ॥ क्षत्रस्य विट्शूद्रेषु सपिंडेषु षड्रात्रत्रिरात्राभ्यां वैश्यस्य
शूद्रे सपिंडे षड्रात्रेण शुद्धिः ॥ हीनवर्णानां त्वकृष्टेषु सापिंडेषु जातेषु मृतेषु वा तद

शौचव्यपगमे शुद्धिः ॥ तथा भिन्नजातीया येन्यातरः ॥ धर्मेत्यित युपरते स्वकीयं स्वकीयं
स्वकीयमाशौचं कुर्युः ॥ तदाह वारवः ॥ असवर्णास्तु ये पुत्रा द्विजातीनां प्रकीर्तिताः ॥ पृ
थक्धर्मसमाचाराः पृथक्शौचादिने स्मृताः ॥ कश्यपः ॥ चातुर्वर्ण्यामेकवंशजनितिष्टा
तां ॥ सर्वेषां पैत्रकं शौचं विभक्तानां स्वकं भवेत् ॥ स्वकीयमातृवर्णानामिति ॥ एकपिं
डाः पृथक्शौचाः पिंडस्त्वावृत्ततित्रिद्वितिः ॥ पृथक्जाता भिन्नजातीयाः ॥ प्रतिलोमातां
तु तास्वेवाशौचमिति ॥ प्रतिलोमा धर्महीनाः पाषंडमाश्रितास्तेना स्तेनास्तुघ्यः कामं
गास्तथा ॥ सुरापा आत्मघातिन्यो नाशौचोदककाजधर्महीनाता नादति एतेषामपि
विधिवद्दहने सत्याशौचं निरूपितं ॥ म्लेच्छचंडालादिहनसंस्कारप्रकरणे ॥ इतिन
एकजातीयसपिंडाशौचनिर्णयः ॥ अथासगोत्राशौचं ॥ असगोत्रेषु पितृमातामहा
चार्यमातुलादिषु तिद्दहेशोमानमाशौचमुच्यते ॥ बृहस्पतिः ॥ अहं मातामहाचार्य

श्रोत्रियेऽप्युपरिमवेत्॥ अहस्त्रिदिनं॥ मातामहे मातुः पिता॥ उपनयनपूर्वकं वेदाध्या
पक आचार्यः॥ तस्य पुत्रे पत्न्यां वा अहोरात्रं॥ तदाह मनुः॥ त्रिरात्रमाहुराशौचमाचार्ये चैव
संस्थिते॥ तस्य पुत्रे च पत्न्यां च दिवारात्रमिति स्थितिः॥ एकशाखास्वाध्यायी श्रोत्रियः॥ श्रो
त्रिये तूपसंपन्ने त्रिरात्रमशुचिर्भवेदिति॥ मनुः॥ उपसंपन्नो गुणयुक्तः॥ एकाहं सब्रह्म
चारिणि समानग्रामीणे श्रोत्रिये इत्याश्वलायनः॥ एकाचार्योपनीतः सब्रह्मचारी॥ ए
तत्संनिधाने एकाहः संनिधानमहमिति॥ तथा याज्ञवल्क्यः॥ गुर्वंतेवास्यनूचानमा
तुलश्रोत्रियेषु चेति वेदाध्यापकः मंत्रदाता उपदेशको वा गुरुः॥ अंतेवासी शिष्यः॥ अ
नूचानो वेदांगवक्ता॥ एतेषु संनिधाने पुनरहोरात्रं॥ यस्तु मुख्यो गुरुः पि
तात्तदुपरमे दशरात्रं दाध्यपतेवर्जनीय इत्याश्वलायनः॥ तथा प्रचेताः॥ मृते चर्त्वि
जि याज्ये च त्रिरात्रेण विशुध्यतीति॥ स्मृत्यर्थसारेपि॥ मातामहगुरुवाचार्यदौहित्र

स्वस्रीयबंधुश्रोत्रियपञ्च उपनेतृ ऋतुकर्मकृत्विग्याज्येषु गुणी चेकग्रामे मृतेषु त्रिरात्रं
ग्रामांतरे पक्षिणी॥ अगुणीषु एकग्रामे पक्षिणी॥ ग्रामांतरे त्वेकाहमिति॥ तथा मातु
लादौ पक्षिणीमाह मनुः॥ मातुले पक्षिणीं रात्रिं शिष्यर्त्विग्बांधवेषु च॥ पक्षिणीलक्षणं
मनयतोपि अहनी पक्षौ इव यस्याः रात्रेः सा पक्षिणी॥ तथा श्वसुरयोः श्वश्रूमित्याच्
मातुलान्यां च मातुले॥ पित्रोः स्वसरि तद्वच्च पक्षिणीं क्षपयेन्निशां॥ श्वसुरयोः॥ पित्रोः श्व
कशोषः॥ तथा॥ मातुले श्वसुरे मित्रे गुरौ गुर्वंगनासु च॥ आशौचं पक्षिणीं रात्रिं मृता
मातामही यदीति॥ मातुल इति मातृबांधवग्रहणे तात्पर्यं बांधवाः॥ पितृबांधवाश्च यो
निसंबंधात्पक्षिण्यंते॥ तथा च गौतमः॥ पक्षिणीमसपिंडे योनिसंबंधे सहाध्यायिनि
चेति॥ योनिसंबंधा मातुलेयमातृष्वस्रेयपैतृष्वस्रेया इति मिताक्षरायां॥ त
था॥ आत्मपितृष्वसुः पुत्रा आत्ममातृष्वसुः सुताः॥ आत्ममातुलपुत्राश्च विज्ञेया आ

स्वबांधवाः॥ पितुः पितृष्वसुः पुत्राः पितुर्मातृष्वसुः सुताः॥ पितामातुलपुत्राश्च विज्ञेयाः पि
तृबांधवाः॥ मातुः पितुः स्वसुः पुत्रा मातुर्मातुः स्वसुः सुताः॥ मातुर्मातुलपुत्राश्च विज्ञेया
मातृबांधवाः॥ मातुः पितृव्यकसुता मातृबांधव ईरिता॥ पितुः पितृव्यकसुताः पितृ
बांधव ईरिताः॥ एतेषु मृतेषु पक्षिण्याशौचं॥ दत्तकेत्वन्यत्र पक्षिण्युक्तं॥ त
था मातृष्वसृपतिः पितृष्वसृपतिश्च तयोरप्युक्तं॥ तत्र शिष्टाचारान्निर्णयः॥ स्व
स्य संबंधेस्त्वनमिति स्मृत्यर्थसारे॥ तथा वृद्धप्रचेताः संस्थिते पक्षिणी रात्रिर्दौहित्रे
भगिनीसुते॥ संस्कृतेषु त्रिरात्रं स्यादिति धर्मो व्यवस्थित इति॥ स्मृत्यर्थसारे॥ याज्ञ
ऋत्विजदौहित्रसहाध्यायिसहोपनीताताऽत्मबंधुपितृबंधुमातृबंधुपुत्रश्वशुर
मातुलपत्नीशिष्योपाध्यायाश्च॥ नगुरुपुत्राचार्यपुत्रसुमित्रभागिनेयेषु श्वश्रूननांदृभगि
नीमातामहीपुत्रमातृष्वसामातुलानीगुर्वाचार्यपत्नीषु मरणे एकग्रामे पक्षिण्या

शौचं॥ ग्रामांतरे त्वेकाहं॥ अगुणवत्सु एकग्रामे एकाहं ग्रामांतरे स्नानं॥ तथा च वृद्ध
प्रचेताः॥ भगिन्यां संस्कृतायां च भ्रातर्यपि च संस्कृते॥ मित्रे जामातरि प्रेते दौहित्रे भ
गिनीसुते॥ शालके तत्सुते चैव सद्यः स्नानेन शुध्यतीति॥ एषु सद्यः इत्युक्तं तागुणादि
षुयमिदमिति स्मृत्यर्थसारे॥ विष्णुः॥ असपिंडे स्ववेश्मनि मृते एकरात्रमि
ति॥ वृद्धमनुः॥ ग्रामेश्वरे कुलपतौ श्रोत्रिये च तपस्विनि॥ शिष्ये पंचत्वमाप्तेषु शुचिर्नक्ष
त्रदर्शनादिति॥ तथा प्रेते राजनि सज्योतिर्यस्य स्याद्विषये स्थितिः॥ ज्योतिषा सह वर्त्त
त इति सज्योतिराशौचं॥ अग्निवेधावच्छर्यदिवानिरात्रौ मृतश्चेद्यावन्नक्षत्रदर्शनं॥ त
था ग्राममध्यगतो यावच्छवस्तिष्ठति कस्यचित्॥ ग्रामस्य तावदाशौचं निर्गमिशुचि
तामियादिति॥ एवमाशौचविशेषा अतिपादश्च स्मृतिवचनान्यन्वेषणीयानीत्यल
सगोत्राशौचनिर्णयः॥ अथ सगोत्रशावादिसंसर्गनिमित्ताशौचे तत्रांगिरसा विशे

नि·सि·
२८२

पतन्ति ॥ आशौचं यस्य संसर्गादापतेद्गृहमेधिनः ॥ क्रियास्तस्य न लुप्यन्ते गृह्याणां च न
तद्भवेत् ॥ इति ॥ तदाशौचे केवलं गृहमेधिन एव ॥ न पुनस्तद्गृहे वर्तमानानां मात्रादीनां तद्
आशौचं भवेदित्यर्थः ॥ तथा मासत्रये त्रिरात्रं स्यात्षण्मासे चैव पक्षिणी ॥ अहस्तन
वमादर्वाक्सपिण्डे तोदकं मुचिरित्यनेन त्रिरात्राद्यतिक्रान्ताशौचेऽपि अयमेवार्थः अस्मि
न्नेव देशे इति ॥ अतिक्रान्ते दशाहे तु पश्चाज्ज्ञानाति चेद्गृही ॥ त्रिरात्रं सूतकं तस्य न तु
कव्यस्य न तु द्रव्यस्य कर्हिचिदिति ॥ अनेन त्वेण पंचमहायज्ञादिकार्यं पुत्रादिना
अविच्छेदो गरुडपुराणात् ॥ गृहस्थे प्रोषिते यत्र क्वचिद्विघ्नं भवेत्त्रिपते गृहे ॥ आशौ
चे चायगमे यत्र प्रारब्धे यज्ञकर्मणि ॥ प्रत्यागतस्य ज्ञानात्तेन दत्तं च गृहीतं दानं ब २८२
हुत्वा स्याच्छौचं ॥ आशौचात्परं क्रियास्तेन त्याज्यास्तदा न वेत् ॥ पुत्रादिना दिसादार
ब्ध्याद्वै तत्वे न चारिविच्छेदं ॥ समापतायं चाते ने वगरुडात्तिष्ठेन्न हरत इति ॥ अत्र सा

विषये त्वारब्धपादोपादानात् ॥ गृहिणोऽधिकारिविषये ॥ श्राद्धं मारब्धं चेत्पुत्रादिः कु
र्यात् ॥ अनारब्धं तु शुद्धो ध्यनन्तरं सूत्याग हाहाग्रक पति ॥ ससगाशौचे तिक्रान्ताशौ
चे निर्णयः ॥ अथाशौचे कर्मनिर्णयः ॥ सूतके कर्मणां त्यागः संध्यादीनां विधी
यते ॥ दानं प्रतिग्रहो होमः स्वाध्यायश्च निवर्तते इत्यादिना सर्वकर्माधिकारे निवृत्ते सोऽप्र
मत्तो यामेषु चित्तेष्वनुतापेषु वर्तते ॥ अत्र सूतकेन शावमप्युपलक्ष्यते ॥ अमु
चित्वस्यात्र यो स्तप्यत्वादुन्नय माशौचं ॥ पुत्रजन्मनिमित्ताशौचेऽपि श्राद्धे विहितं ॥
उक्तो हि पुत्राज्जनने पुत्रेष्ट्यामासिके मखे ॥ इत्यादिना ॥ वत्सरं तद्वसः पुण्यः पित
णां वंशवर्धनं इति ॥ अहरगांगिराभ्युपलक्षणार्थं ॥ पुत्रजन्मनि रात्रावपि श्राद्धदा
नादिकं कार्यं ॥ तदाशौचान्तसमरं निपातेऽपि कार्यमेव ॥ यथाह प्रजापतिः अ
शौचे तु समुत्पन्ने पुत्रजन्म यदा भवेत् ॥ कर्तुस्तत्कालिकी शुद्धिः पूर्वाशौचेन तु

नि·दि·
२८३

शुध्यतीति ॥ सूतके मृतिविशेष ॥ तथा व्यासः ॥ सूतिकावासनिलया जन्मदा नाम देवताः ॥
तदा यागनिमित्तं तु शुद्धिर्जन्मनि कीर्तिता ॥ प्रथमे दिवसे षष्ठे दशमे चैव सर्वदा ॥ त्रिषु
तेषु न कुर्वीत सूतकं पुत्रजन्मनीति ॥ मार्कंडेयोपि ॥ रक्षणीया तथा षष्ठी निशा तत्र वि
शेषतः ॥ रात्रौ जागरणं कार्यं जन्मदानां तथा बलिः ॥ पुरुषाः शस्त्रहस्ताश्च नृत्यगी
तैश्च योषितः ॥ रात्रौ जागरणं कार्यं नैव सूतकमिति ॥ तथा पुत्रजन्मनि हिरण्यादि
प्रतिग्रहेपि न दोषः स्मृत्युक्तं याज्ञवल्क्ये ॥ ता कुमारजन्मदिवसे विप्रैः कार्यः प्रतिग्रह
ष्पलगवाश्वाजवासः शय्यासनादिषु ॥ तथा पुत्रजन्माशौचे सिद्धान्नग्रहणे दोषः
स्तेनैवोक्तः ॥ तत्र सर्वत्र तिष्ठन्त्याद्याः कृतान्नं तु न नग्नः स्पृशेत ॥ न स्पृशाननुत न्यासा द्विज
स्वां प्रायश्चाचरेत् ॥ कृतान्नं सिद्धान्नं ॥ जननिमित्ते मरणनिमित्ते वा आशौचे मृ
तिसूतकान्नभोजननिषेधः स्कन्दपुराणेप्युक्तः ॥ उभयत्र दशाहानि कुलस्यान्नं न २८३

भुज्यत इति ॥ उभयत्र जननमरणयोः ॥ कूर्मेपि स्यात्सूतकिकुलस्य दशाहानीति आशौ
चे द्वौ पक्षौ पलस्पृणे ॥ यतश्च ब्राह्मणाशौचे योन्नमश्नाति तस्याशौचावधौ चैतया वदेषा
रितिविष्णुः ॥ मनुरपि ॥ उभयत्रान्नमन्त्रितेषां तु दशाहे नैव शुध्यतीति ॥ एतद्बुद्धिपूर्वविष
यं यच्च बुद्धि ॥ ज्ञात्वा पूर्वमाशौचितो गृहे तस्य यावदन्नं जीर्यति तावदाशौचमुक्तमं
गिरसा ॥ अन्तर्दशाहे ह्यन्नं सूतके मृतके पि वा ॥ असंस्पृश्यो भवेत्तावद्यावदन्नं प्र
जरयतीति ॥ सूतकान्नभोजने दोषाभिधानमसकृद्विषयं ॥ सकृद्भ्यासे पुनर्न
दोषः ॥ सूतके तु कुलस्यान्नमदोषं मनुरब्रवीत् ॥ स्मृत्यर्थसारेपि ॥ सूतकान्नभोज
नमसकृद्भ्यासे न कार्यं ॥ सकृद्भ्यासे न दोष इति ॥ दातृभोक्त्रोरविज्ञाते सूतके दो
षो न चैव न स्याद्दुष्टं षट्त्रिंशन्मते ॥ उभाभ्यामपरिज्ञाते सूतके नैव दोषकृत् ॥
एकेनापि परिज्ञाते भोक्तुर्दोषमुपावहेत् ॥ दातृभोक्त्रोरन्यतरेण ज्ञाते सूतकान्न

भोजनदोषोनेत्युक्तरेव॥ सूतकान्नभोजयितुर्नदोषो दातुर्न्नभोजनदोष इति गरुडपुराणे
दीक्षान्नोक्षा चतस्मात्तं सूतके मृतके तथा॥ अन्नयोरपि नदोषेणारोपयति कर्हिचिदिति ब्रा
ह्मपुराणे॥ अपि दातृगृहीत्रोश्च सूतके मृतके तथा॥ अविज्ञानेन दोषः स्याच्छ्राद्धादिषु
कर्हिचनेति॥ तथा षड्विंशन्मते विशेषः॥ भुंजानेषु तु विप्रेषु अंतरा मृतसूतके॥ अन्य
गेहोदकाचांताः सर्वे ते शुचयः स्मृता इति॥ तथा सूतकिनां केषुचिद्द्रव्येषु दो
षाभावात्॥ तदुक्तं मरीचिना॥ लवणे मधुमांसे च पुष्पमूलफलेषु च॥ शा
ककाष्ठतृणेष्वप्सु दधिसर्पिःपयःसु च॥ तिलौषधाजिने चैव पक्वापक्वे स्वयंग्रहः॥ पु
ण्येषु चैव सर्वेषु नाशौचं मृतसूतक इति॥ पक्वं भक्ष्यजातं॥ अपक्वं तंडुलादि॥ स्वयं
ग्रह इति स्वाम्यननुज्ञातः स्वाम्यनुज्ञातः स्वयमेव ग्रहणीयादिति॥ तदपक्वान्नादिग्रह
णमन्त्यसत्रप्रवृत्ते देवाशौचवतो ग्राह्यं॥ नान्यस्मात्॥ तदाहांगिराः॥ अन्त्यसत्रप्र २८५

वृत्तानामाममन्नमगर्हितं॥ भुक्त्वा पक्वान्नमेतेषां त्रिरात्रं तु पयः पिबेदिति॥ अत्र
पक्वान्नं भक्ष्यान्नविषयं॥ एवं धर्मशौचेऽन्नसत्रिणामपि न भोज्यं सिद्धान्नादि
कं किमुतान्येषामिति॥ तथा आपस्तंबः सकृदन्नं भुंजानोपि यतः स्वतनिलिप्यते
नसा विशोध्य द्वलनाकस्मोदिमइति॥ अथ जन्माशौचे सिद्धान्नभोजननिषेधप्र
सक्तानुप्रसक्त्या मन्निधाय पुनः कर्माण्यनुसंधियते॥ यद्वोक्तं स्मृत्यादिषु॥ सूतके क
र्मणां त्यागः संध्यादीनां च विधीयत इति॥ तथा॥ सर्वकालमुपासीत संध्यां पार्थि
वेष्यते॥ अन्यत्र सूतकाशौचे विभ्रमातुरभीतित इति आदिना दोषेच संध्योपासन
दीनां निषेधान्निषेधात्॥ तत्कुत्र॥ जन्मइत्यादि विधिपूर्वकं नोपासीतेत्यभिप्रायपर॥
पतेः सूतके मृतके चैव रोगात्यत्रौतपाध्वति॥ मानसं तु जपेत्संध्यां कृत्वा वारिविर्जि
तामित्यनेन स्मृतिवचनेन कुर्यादिवर्जितं संध्योपासनं विधीयते॥ न च विहितत्र

नि॰सि॰ निषिद्धत्वादिति रात्रौ षोडशिग्रहणवद्विकल्पत्वं कार्यं॥ संध्यास्नानपरित्यागः स्वप्ना
२८५ द्दाघ्रकृताद्व्रजेत्॥ तस्मात्स्नानं च संध्यां च सूतकेऽपि न त्यजेदिति स्मृतिसारवचनेन
संध्योपासनं विना शूद्रत्वं प्रासनिधानात्॥ अतः संध्यां न त्यजेदिति॥ अमुमेवार्थं
पुलस्त्य आह॥ सूतके मृतके चैव संध्याकर्म समाचरेत्॥ मनसोच्चारयेन्मंत्रान्प्रा
णायाममृते संध्योपासने द्विज इति॥ यद्यपि दिवोदासीये निषिद्धं तथापि गायत्रीमुच्चा
र्यांजलिप्रक्षेपयादिकं कार्यमिति पैठीनसिराह॥ सूतके सावित्र्याचांजलिं प्रक्षि
प्य प्रदक्षिणं॥ कृत्वा सूर्यं ध्यायन्नमस्कुर्यादिति॥ अत्र विशेषः स्मृत्यर्थसारात्॥
सूतकेऽपि संध्यायां गायत्र्या जलिदानं कार्यं॥ मार्जनं कार्यं न वा॥ प्राणाया २८५
मं मनसा मंत्रमुच्चार्य मार्जनं कृत्वा वा गायत्रीमुच्चार्यांजलिं दद्यादिति॥
संध्यात्यागे पुलस्त्यः॥ संध्यामिष्टिं च होमं च यावज्जीवं समाचरेत्॥ न त्यजे

त्सूतके वापि त्यजन्गच्छेदधोगतिं॥ तथा सूतके अग्निहोत्रहोमादिकं कार्यं॥ तदुक्तं
मिताक्षरायां॥ वैतानोपासनाः कार्याः क्रियाश्च श्रुतिचोदनात्॥ वितानोऽग्नीनां विस्ता
रस्तत्र भवा वैतानास्त्रेताग्निसाध्या अग्निहोत्रदर्शपूर्णमासाद्याः क्रियाः प्रतिदिनमु
पास्यते इत्युपासनो गृह्याग्निस्तत्र भवा॥ उपासनाः सायंप्रातर्होमक्रिया उच्यंते॥ वैता
नोपासना वैदिक्यः क्रियाः कार्या एव सौपासनहोमोऽपि श्रौत इति प्रतिपादितं तत्रैव॥
अत एव स्मृत्यर्थसारे॥ उपासनाग्निसाध्याः सायंप्रातर्होमपार्वणस्थालीपाकाद्यास्ते
ऽन्यैर्नित्रिकाः कृतिनो दिनलाल्का परिवा॥ श्रौतानां च कार्यत्वाद्विधानं त्यनैमित्ति
काभिप्रायेण॥ यथाह पैठीनसिः॥ नित्यानि निवर्त्तेरन्वैतानवर्ज्जं शालाग्नौ चैक
इति॥ वैतानस्त्रेताग्निस्तत्संबंधीनि वर्जयित्वा नित्यानि निवर्तेरन्॥ शाला
ग्नौ चैक इति शालाग्निर्गृह्याग्निः तत्र न वा॥ न निवर्त्तेरन्निति सूतके आहुः॥ आत

नि॰दि॰ स्ते घाशौचं नास्तीति नित्याग्निहोत्रादौ नित्यधर्मे वक्ष्यामीति ॥ अत एव वैयाघ्रपाद
२८९ स्मार्त्तकर्मपरित्यागो राहोरन्यत्र सूतके ॥ श्रौतकर्मणि तत्कालं स्नातः शुद्धिमवाप्नुया
त् ॥ श्रौते तु विशेषणोपादानात् ॥ स्मार्त्तक्रियाणां दानादीनामनुष्ठानं गम्यते ॥ सर्वक
र्मस्वेव वर्ज्यमेवेति ॥ स्मार्त्ततोपि पिंडयज्ञादिकमन्यः सगोत्रेण कारयेत् स्वयं न कुर्यात् ॥
होतृदत्तात्तकर्णः ॥ सूतके तु समुत्पन्ने स्मार्त्तं कर्म कथं भवेत् ॥ पिंडयज्ञं चरुं होमं अस
गोत्रेण कारयेत् ॥ पिंडयज्ञः पिंडपितृयज्ञः ॥ श्रवणाकर्माश्वयुज्यादिकः स्थालीपाका
श्चैतेनान्येन कारयितव्यानि ॥ श्रौतमपि पिंडयज्ञादिकमन्येन कारयितव्यं ॥ अ
न्य एतानि कुर्युरिति पैठीनसिः ॥ बृहस्पतिनाप्युक्तं ॥ सूतके मृतके चैव अशक्तौ २८९
श्राद्धभोजने ॥ प्रवासादिनिमित्तेषु हावयेन्न तु हापयेत् ॥ अन्यकर्तृकेपि स्वद्रव्य
त्यागात्मके प्रधाने दृष्टिविषये याजमानं च स्वयं कुर्यात् ॥ तस्यानन्यानिष्पाद्य

त्वात् ॥ यत्तु दर्शनं प्रति महाहोमः स्याद्याप्यमपि वर्ज्यत इति होमप्रतिषेधः स काम्य
निमित्तयोर्वैश्वदेवाग्निहोत्रयोर्वा ॥ अत एव संवर्त्तः ॥ विप्रो दशाहमासीत वैश्वदेवविवर्जि
त ॥ पंचयज्ञविधानं तु न कुर्यान्मृत्युजन्मनोरित्याशौचे पूर्वमहायज्ञानां वर्जन
मग्निहितवान्नित्यहोमविषये होमं तत्र प्रकुर्वीत शुष्कान्नेन फलेन वेति तेनैवोक्तं ॥ आ
शौचे दानादिप्रतिषिद्धं तदुक्तं स्मृत्यर्थसारे ॥ दानप्रतिग्रहपंचमहायज्ञनित्यश्राद्धस्वा
ध्यायादीनां स्नात्वाह्निकानां त्याग एव निषिद्ध आह्निकं स्नानादिकं कार्यमित्युक्तं तत्रैव ।
नित्यस्नानशौचाचमनभोजननियमात् ॥ अस्पृश्यस्पर्शिस्नानं च कुर्यादेव ॥ आशौचे
क्रियामाणो नित्यस्नानांगतर्पणं न कार्यं ॥ अस्पृश्यस्पर्शस्नानादावदृष्टेन तस्या
नियतांगत्वात् ॥ आशौचविषये अग्निहोत्रादौ कर्मणि स्वल्पकाल्पेपि शुद्धिरुक्ता स्मृत्य
न्तरे ॥ एकाहाद्ब्राह्मणः शुध्येद्योग्निवेदसमन्वितः ॥ अहात्केवलवेदस्तु विहीनो दश ।

न्निर्दिनैः॥ ननु इत्यादिना वचनेनाध्ययनिज्ञानानुष्ठानयोगिनोस्यदाग्निः सर्वस्मिन्नाशु
द्धिरित्येवंकारमन्तेष्यते॥ उच्यते॥ दशाहं शावमाशौचमिति सामान्यशास्त्रापुरःसरमेवत्र्य
काहादशाहबाधपुरःसरमेवत्र्येकाहोच्छ्वसनणाः शुध्येदित्यादि विधायकमेवेत्येव॥ बाध
स्य चानुपपत्तिनिबंधनत्वाद्यावृत्यबाधिते अनुपपत्तिप्रमाणोऽनवकाशत्वाद्वाधनीयं॥
मतः किं यदनेन बाध्यमित्यपेक्षायां विशेषण समर्पणक्षमस्याग्निवेदसमान्वित
इति वाक्यशेषस्य दग्धनादग्निवेदविषये अग्निहोत्रादौ कर्मणि स्वाध्याये च व्यवतिष्ठते॥ न
पुनर्दातिप्रति महादौ॥ एवं चाग्निवेदयदार्थयोः कार्याकार्यत्वविकल्पं भवति॥ तच्चेदमा
शौच संकोचविधानं सर्वसंव्यवहारगोचरमित्युक्तं॥ तथा॥ जन्ममरणाशौचे विद्य २८७
माने चंद्रसूर्यग्रहणं चेत्स्यात्तत्र स्नानतर्पणश्राद्धदानादि कुर्यात्॥ अस्नाने दोष
माह बृहस्पतिः॥ ग्रहणेऽकमेवापि स्नायाद्यदि न मानवः॥ सप्तजन्मानि कुष्ठी स्यात्
दुःखभागी च जायते॥ वृद्धवसिष्ठः॥ चंद्रसूर्यग्रहे स्नायात्सूतके मृतकेऽपि वा॥ अस्नायी
मृत्युमाप्नोति॥ अंगिरा अपि॥ सर्वे वर्णाः सूतकेऽपि मृतके राहुदर्शने॥ स्नात्वा श्राद्धं प्रकुर्वी
रन् दानं चात्र विवर्जितं इति॥ चाद्वा भिन्नविषयं॥ ब्रह्मांडपुराणे॥ आशौचं जायते न
णां ग्रहणे चंद्रसूर्ययोः॥ राहुस्य दर्शने तयोः स्नानादानादौ कल्प्यते नरः॥ कल्प्यः कल्प्य
योग्यो भवति॥ यथा जातमरणे न बाध्यते॥ तथा मरणजन्मनी दिव्येन ग्रहणात्सूत
के न बाध्यते॥ एतदपि प्रेत्य ब्रह्मापुराणे॥ सूतके मृतके चैव न दोषो राहुदर्शने॥ ता
वदेव भवेच्छुद्धिः यावन्मुक्तिर्न दृश्यते इति॥ षड्विंशन्मते॥ सर्वेषामेव वर्णानां सूतके राहु
दर्शने॥ स्नात्वा कर्माणि कुर्वीत शृतमन्नं विवर्जयेदिति॥ शृतमन्नं सिद्धान्नं॥ सिद्धान्नवि
शेषः स्मृत्यंतरात्॥ उपरागोषितं चान्नं न भोक्तव्यं कदाचन॥ ग्रहणं तु क्षिपेद्येनेत
न मुक्तेनं दुष्यतीति॥ ग्रहणे कर्मनिर्णयः॥ तथा॥ विवाहादिषु सूतकोत्पत्तेः प्राक्स्था

नि॰ सिं॰ सणात्पूर्वं पृथक्कृतमन्नं भोक्तव्यमेव॥ तदाह बृहस्पतिः॥ विवाहोत्सवयज्ञेषु त्वन्तरा मृत
२८८ सूतके॥ पूर्वसंकल्पितार्थेषु न दोषः परिकीर्तित इति॥ तत्रापरो विशेषः॥ द्विजान्मतेद्व
विवाहोत्सवयज्ञेषु त्वन्तरा मृतसूतके॥ परैरन्नं प्रदातव्यं भोक्तव्यं च द्विजोत्तमैः॥ परैः सूतकेत
रहितैः॥ तथा विवाहाद्युपक्रमस्य॥ शेषमन्त्रं परैर्देयं दातुर्नोक्तं भवेन्न स्वरेणेत॥ सूतकमिति
शेष इति मिताक्षरा॥ तथा पैठीनसिनाप्युक्तं॥ विवाहदुर्गयज्ञेषु यात्रायां तीर्थक
र्मणि न तत्र सूतकं तद्वत्कर्म यज्ञादि चेति॥ तथा॥ आरब्धव्रतादिकर्मान्तरा सूतकापाते
पि कर्तव्यं॥ तदाह विष्णुः॥ व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे॥ आरब्धे सूतकं न स्या
दनारब्धे तु सूतकमिति॥ सूतकस्याप्युपलक्षणं॥ व्रतादितेषु ये आरम्भास्तेनैवोक्ताः॥ आ २८८
रंभो मधुपर्कयरोकर्क्यो व्रतसत्रयोः॥ नांदीमुखं विवाहादौ श्राद्धे पाकपरिक्रिये इति॥ तथा॥
एकविंशत्यहः पूर्वे विवाहे दशवासरात्॥ चूडोपनयने त्रीणि श्राद्धे पाकप्रवेशनमिति॥

स्मृत्यन्तरे॥ तथा॥ अंगादि विवाहेषु दश वासराद्वा पुत्रस्योपनयनेऽपि च॥ अनारब्धेऽप्यवश्यं
कर्तव्ये विवाहादिकमत्रापि धान्यवान्स्यात् तदा कूष्मांडमंत्रैराज्यं हुत्वा वृद्धिश्राद्धादि विवा
हसंगे जे कुर्यादिति तदाह विष्णुः॥ अनारब्धविशुद्ध्यर्थं कूष्मांडैर्जुहुयाद्घृतं॥ गां दद्यात्पंचग
व्यं प्राश्य ततः शुध्यति सूतकी॥ कूष्मांडमंत्रा यद्देवादेवहेडनमित्यादि यजुर्वेदे प्रसिद्धाः॥ इदं
विधानं वृद्धिश्राद्धाधिकारार्थं सूतकिनः नांदीमुखं विवाहादावित्युक्तं॥ तदकारणे अ
नारंभः॥ करस्यकन्यायाश्च वरणकलक्षणाद्यागादिविधातेन आरब्धत्वात्॥ वरणाक
लक्षणाद्यंगाद्यकरणे विवाहानुष्ठानं लोकविरुद्धं॥ अतः वृद्धिश्राद्धाधिकारी सूतकि
त॥ दुदेकत्वाद्वृद्धिश्राद्धादि कुर्यादिति॥ पत्रके विस्तारंमाभावोपि कन्याविवाहविषय एव इदं वि
धानमुक्तं तद्युक्तं वा च नमध्ये विशेषादर्शनात्॥ तथा॥ निमंत्रिते तु प्रारब्धे श्राद्धे क
र्मणि॥ निमंत्रितस्य विप्रस्य स्वाध्यायाद्विरतस्य च॥ देहे पितृषु तिष्ठत्सु नाशौचं विद्य

नि॰ दि॰ तेकश्चिदिति॥ यद्यपि निमंत्रितविप्रस्याशौचाभाव॥ प्रतिपादितः तथापि शिष्टैः परंपरा
२८९ नुसर्तव्या॥ तथा॥ दाने च पूर्वसंकल्पितद्रव्यस्य नाशौचं॥ दीयमानं न दुष्यतीति॥ क्रतु
स्मरणात्॥ तथा॥ विवाहाद्युत्सवमात्रे नाशौचं न स्यात्॥ तदुक्तं स्मृत्यर्थसारे॥ विवाहोत्स
व यज्ञेषु त्वंतरा जन्ममरणाशौचे पूर्वसंकल्पितद्रव्ये पूर्वदत्त दृष्टोत्सर्गादिपाकयज्ञेषु च यु
द्धेषु दायविहितश्रांतिकमस्तु च॥ स्फोटकादिनिरूपसर्गेभिजनयेन वा देशविवाहो
त्सवदुर्गयज्ञतीर्थयात्रातीर्थयुद्धकर्मसु च सद्यःशौचं॥ तत्र हृयेविंशांतिकर्मणि च सद्यःशौचं
व्याध्यादिना मुमूर्षावस्थायां तदुपकारमनार्थदानेन च सद्यःशौचमिति मिताक्षरायामपि
आपद्यपि च कष्टायां सद्यःशौचं विधीयत इत्यापदि मुख्याशौचकल्पानुष्ठानासंभवे न २८९
सद्यःशौचानुकल्प उक्त इति॥ कष्टायां व्याध्याद्यसंभवेन मरणावस्थायां॥ तथा॥ ऋ
त्विजां दीक्षितानां च यज्ञियं कर्म कुर्वतां॥ सत्रिव्रतिब्रह्मचारिदातृब्रह्मविदां तथा॥ दा

ने विवाहे यज्ञे च संग्रामे देशविप्लवे॥ आपद्यपि च कष्टायां सद्यःशौचं विधीयत इति॥ ऋ
त्विजो वरणसंस्कृताः कर्तुं विप्रोषा॥ दीक्षणीयसंस्कृता दीक्षिता॥ तेषां यज्ञियं यज्ञे एव वैक
र्मकुर्वतां सद्यःशौचं॥ सत्रिणां व्रतिनां च सत्रे व्रते च शुद्धिर्न कर्ममित्रैः संव्यवहारे वा॥ तथा
नित्यमन्त्रग्रहस्यापि कृच्छ्रचांद्रायणादिषु॥ निर्वृत्तकृच्छ्रहोमादौ ब्राह्मणादिषु भोजने
निवृत्ते प्रवृत्ते इत्यर्थः॥ गृहीतनियमस्यापि न स्यादन्यस्य कुत्रचित्॥ तथा॥ ब्रह्मचारी वान
प्रस्थः यतिश्च॥ एषां त्रयाणामाश्रमिणां सर्वत्र शुद्धिः॥ विशेषप्रमाणाभावात्॥ एत
दपि स्मृत्यर्थसारे॥ ब्रह्मचर्यादिव्रतिनां यत्किंचिन्नियमस्थानं॥ नित्यदानरूपमेतेषां
यावद्व्याधिस्तावन्नास्त्येव॥ कृत्विगादीनां तदानीं स्नानमस्ति॥ यजमानस्तु स्नात्वा वा च
स्यत्र दृष्ट्वा त्यागं कुर्यात्॥ तथान्यंत क्षुधया पीड्यमानानां क्षुधार्ता धान्यक एव वा॥ अह
काहिको वापि स्यादथ स्वस्तिक एव च॥ अस्यार्थः॥ कुसूलधान्यस्य द्वादशाहं॥ कुंभी

धान्यस्याच्चतुरहः॥ त्र्यहं संचितधनधान्यस्य॥ त्र्यहः॥ एकाहसंचितधनस्यैकाहः॥ अ
श्वस्तनिकस्य सद्यःशौचं॥ अयमाशौचसंकोचो यस्य प्रतिग्रहं विना क्षुधा न निवर्तते॥ त
द्विषयो न सर्वत्रेत्यवगंतव्यं॥ आशौचावांतरं सर्ववर्णाः स्नातियस्य यावत्कालमाशौचं वि
हितं तस्यानंतरं स्नानं॥ अत्रैव विशेषमाह मनुः॥ विप्रः शुध्यत्यपः स्पृष्ट्वा क्षत्रियो वाह
नायुधं॥ वैश्यः प्रतोदं रश्मीन्वा यष्टिं शूद्रः कृतक्रियः॥ कृतक्रिय इति प्रत्येकमभिसंबध्य
ते॥ कृतस्नान इत्यर्थः॥ अथ राज्ञां व्यापारे राज्ञामाशौचं नास्तीत्युक्तं मनुना॥ राज्ञो माहा
त्मिके स्थाने सद्यःशौचं विधीयते॥ प्रजानां परिरक्षार्थमासनं चात्र कारणमिति॥ पंचमहा
यज्ञादौ सद्यस्तेषां शौचं राज्ञां॥ तथा च वृत्ता॥ कारवः शिल्पिनस्तद्वत्कारुश्चैव निर्णेजिकाद
यः॥ एतेषां स्वकीयकर्मणि नाशौचं शौचं तात्पर्य॥ मूलकर्मकराः शूद्रा दासीदासास्तथै
व च॥ स्नाने त्वाचारसंस्कारे गृहकर्मण्यदूषिता इति॥ चिकित्सकोपि यत्कुरुते तदन्येन न
क्रियते॥ तस्माच्चिकित्सकः स्पृष्टेप्यशुद्धो न भवतीति तात्पर्यम् इति॥ एतैः साध्यमानकर्मणि अमी॰
स्याद्वेति पौरपाः तेषु तद्भावादिविति॥ इति च पतनयानोद्दिष्टं हत्याधिकारे नातस्तकानि
र्णयः॥ अथ रजस्वलाशुद्धिरभिधीयते॥ दिवा रजःस्रावे जननमरणे वा तद्दिनादिक
मशुचित्वं स्यात्तदाह कात्यायनः॥ उदिते तु यदा सूर्ये नारीणां दृश्यते रजः॥ जननं वा वि
पत्तिर्वा यदहस्तस्य तदहः॥ रात्रिं कुर्यात्त्रिभागं तु द्वौ भागौ पूर्व एव तु॥ उत्तमांशः प्रभा
तेन युज्यते ऋतुसूतके॥ इत्येतस्मिन्पक्षांतरे विद्यमानेपि केचन॥ एतावेव समुत्पन्ने
मृते रजसि सूतके॥ पूर्वमेव दिनं ग्राह्यं यावन्नाभ्युदितो रविरित्युदाहरंति संव्यवहर
ति च॥ तथापि देशाचारतो व्यवस्था॥ रजस्वला त्रिरात्रमशुचिः स्यात् चतुर्थेऽह्नि स्ना
ताच्छुध्येत्॥ तदुक्तं मनुना॥ चतुर्थेऽहनि संशुद्धा भवेति व्यावहारिकीति॥ व्यावहा॰
रोपि भर्तुः स्पर्शनविषये दैवपित्र्यकर्मणि तु पंचमेऽह्नि योग्येति॥ तथा स्मृत्यंतरे॥ शु

सा मतुस्नातुर्थेह्निस्नाने तस्नारजस्वलादैवे कर्मणि पित्र्ये च पंचमेह्नि शुध्यतीति॥ पं
चमेह्नीति रजोनिवृत्तिकालोपलक्षणमिति मिताक्षरोक्तस्यापमत्यभिप्राय॥ रजोनिवृत्य
भावे तु॥ स एवाह॥ त्यक्तदेवातो न वेधोऽप्यात्र तावत्॥ इति गारुडवचनात्॥ दृष्टव्यमिति॥
साध्याचारोऽत्र तावत्स्याद्रजो यावन्न वर्त्तते॥ वृत्ते रजसि गम्या स्यात् गृहकर्मणि चैवहि
येति॥ वृत्ते निवृत्ते॥ अत्र विशेषः स्मृत्यर्थसारात्॥ अस्नाते रजःस्रावे चतुर्दिनेषु स्नाते तु
रजःस्रावादिकामशुचित्वं स्यात्॥ जननादौ तु स्नानादिकमशुचित्वं स्यात्॥ अतो स्नाना
त्वंचिरस्वल्पस्पृष्टं दुष्टमेव॥ एवं सर्वथापि निमित्तं स्वत्वादि पापादकं॥ स्ततके तु स्नाना
दिकमेव॥ सर्वथा अस्नातं चेत् तच्छुचित्वमेव तथा॥ रजस्वलायाः स्नातायाः पुनरपि रजो
दृष्टौ अष्टादशादिनादर्वागशुचित्वं नास्ति॥ अष्टादशादिने रजो दृष्टौ एकरात्रमशुचित्वं॥
नवदशादिने द्विरात्रं॥ यथाहात्रिः॥ रजस्वला यदा स्नाता पुनरेव रजस्वला॥ अष्टा
दशादिनादर्वागशुचित्वं न विद्यते॥ एकोनविंशाते रवागेकाहं स्यात्तोद्व्यहं॥ विंशात्प्र
भृत्युत्तरे पुत्रिरात्रमशुचित्वं विदिति॥ यत्तु चतुर्दशादिनादर्वागशुचित्वं न विद्यत इति स्मृ
त्यंतरं॥ तच्च नातप्रवृत्तिक्रमनियमेन सतो न विरोधश्च॥ मिताक्षरायां॥ यस्या विंशतिदि
नोत्तरकालमेव प्रायशो रजोदर्शनं॥ तद्विषये विंशतितमेदिने त्रिरात्रं॥ यस्याः पुन
रारूढयौवनायाः प्रागेवाष्टादशादिनात् प्रावृषेण रजोनिर्गमस्तस्या रजोदर्शने त्रिरा
त्रमेव॥ स्मृत्यर्थसारे तु विशेषः॥ त्रयोदशादिनात् हृष्टा यद्योरजःस्राविणी नामेका
दशादितादर्वागशुचित्वं नास्ति॥ एकादशादिने रजो दृष्टे एकरात्रमशुचित्वं॥ द्वादशे
द्विरात्रं॥ त्रयोदशादिषु त्रिरात्रमेव तयो वयावच्चिरात्रस्नानादिरक्षितयास्थातव्यं॥ त
थाहि॥ प्रथमेऽहनि चांडाली द्वितीये ब्रह्मघातिनी॥ तृतीये रजकी प्रोक्ता चतुर्थेऽहनि शु
ध्यतीति स्मृत्यंतरादेवं विज्ञेयं॥ तथा गिरसो विशेषः॥ हस्तेनाथाया वारन्मयेवाहविमुक्त

क्षितिश्राविनी॥ रजस्वला चतुर्थेह्नि स्नाता शुद्धिमवाप्नुयादिति॥ स्मृत्यर्थसारात॥ रज-
स्वला चतुर्थेह्नि पञ्चमृत्तिकाभिः शौचं कृत्वाक्षत्रादिस्त्रीपदपात्स्नानमृत्तिकाभिर्विधि-
वा द्विगुणमृत्तिकाभिः शौचं कृत्वा मलं प्रक्षाल्य दंतधावनपूर्वं संगवे सचैलं स्नायात्॥
अथ रजस्वला धर्मे पराशरः॥ स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला पात्रांतरित-
तोयेन स्नानं कृत्वा व्रतं चरेत्॥ जामित्र रात्री भवेद्विंसां गोपांगा कथंचन॥ नवस्त्रपी-
डनं कुर्यान्नान्यद्वासश्च धारयेदिति॥ व्रतेरजस्वलाव्रतं॥ तच्च स्मृत्यर्थसारे॥ रजस्वला
त्यजेन्ताम्येजन स्नानमग्न्यावास दंतधावनजनस्त्र निकृंतनरज्जुस्य र्व्यापारतांबूलमधु-
मांसंगंध॥ पुष्पदिवास्वापग्रहनक्षत्रनिरीक्षणादि वर्जयेत्॥ वसिष्ठः॥ रजस्वला न २१२
ह सेवन्न किंचिदाचरेत्॥ भक्तेन सेतरखर्वेण पात्रेणापः पिबेदंजलिना वापात्रेणलोहि-
तायसेनखर्वेण पात्रेवेति धर्मः॥ जन्मनस्याप्यत्र विशेषोदर्शितः॥ दुराग्निहुतायाना॥

रा रजस्वा च परिप्लुता॥ कथं तस्यास्तु वै शौचं शुद्धिः स्यात्केन कर्मणा॥ इत्यादौ कपोतं॥ च-
तुर्थेह्नि तिसंप्राप्ते स्पृशेदन्यां तु तां स्त्रियां॥ सा सचैलावगाह्यापः स्नात्वास्नात्वा पुनः स्पृ-
शेत्॥ दश द्वादश कृत्वो वा आचामेत्पुनःपुनः॥ अंते च वाससां त्यागस्ततः शुद्धा भ-
वेत्तु सा॥ दद्याच्छक्त्या ततो दानं पुण्याहेन विशुध्यतीति॥ अयं चातुरमात्रे स्नानप्रका-
रो नुसरणीय इति पराशर माधवे॥ आतुरे स्नान उत्पन्ने दशकृत्वो ह्यनातुरः॥ स्ना-
त्वास्नात्वा स्पृशेदेनं ततः शुध्येत्स आतुरः॥ इति रजस्वलाशुद्धिनिर्णयः॥ अथ रजस्वला-
नां रजस्वलादिस्पर्शे प्रायश्चित्तमुच्यते॥ तत्र वृद्धवसिष्ठः॥ स्पृष्टे रजस्वलेन्योन्यं
सगोत्रे त्वेकभर्तृके॥ कामादकामतो वापि सद्यः स्नानेन शुध्यतः॥ असपत्न्योः स-
वर्णयोर्निगोत्र संबद्धयोरन्हि पूर्वस्पर्शे स्नानमात्रं॥ तत्राह मार्कंडेयः॥ उदक्या-
तु सवर्णो वा यः स्पृष्ट्वा चेत्स्पृशेदुदक्यया॥ तस्मिन्नेवाह्नि स्नाता शुद्धिमाप्नोत्यसंशयं

यं॥ बुद्धिपूर्वस्पर्शविकराद्दरलं॥ योनिगोत्रासंबंधयोः सवर्णायोरबुद्धिपूर्वस्पर्शेस्नात्वा एक
रात्रं निराहारस्तं तदादकच्छ्रपं॥ रजस्वलानुसंस्पृष्टा ब्राह्मणी यदि॥ एकरात्रं निराहारा पं
चगव्येन शुध्यतीति॥ पंचगव्यप्राशनं शुध्युत्तरकाले॥ अशुद्धेतत्तिषिद्धं॥ बुद्धिपूर्वस्पर्श
नेत्वाशुद्धे तच्छ्रियात्॥ इति स्मृत्यर्थसारे उक्तं॥ असवर्णयोस्त्वाहारेत्स्पर्शे तु दृवे दृवसिष्टः॥
स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी क्षत्रिया तथा॥ कृच्छ्रं दहिध्यते पूर्वा त्रिरात्रेण तु तदुत्तरेति॥
स्पृष्टा रजस्वलान्योन्यं ब्राह्मणी वैश्यजापि च॥ पाददीनं चरेत्पूर्वा कृच्छ्रपादं तथोत्तरा॥ स्पृष्ट्वा
रजस्वलान्योन्यं ब्राह्मणी शूद्रजापि च॥ कृच्छ्रेण शुध्यते पूर्वा शूद्री दानेन शुध्यतीति॥ दा
नेन पादकृच्छ्रप्रत्याम्नायं निष्कचतुर्थांशेनेति॥ क्षत्रियादिस्त्रीविषये तु॥ स्पृष्ट्वा रज
स्वलान्योन्यं क्षत्रिया वैश्यजा तथा॥ त्रिरात्राच्छुध्यते पूर्वा अहोरात्रेण चोत्तरा॥ तथा॥ क्ष २०३
त्रियाशूद्रयोः स्पर्शे क्षत्रिया या या॥ त्रिरात्रं शुद्धा अहोरात्रं इति॥ तथा हीनवर्णास्पृष्टाश

शुद्धेन्नाश्रीयात्॥ यदि नुक्रमश्नात्यतिभोजनमुपवासः॥ तावद्दानं चेति स्मृत्यर्थसारे॥ रज
स्वला तु नाश्रीयान्न स्पृष्टा चेदन्यवर्णया॥ यावन्न शुद्धिमाप्नोति शुद्धस्नानेन शुध्यतीति॥ प्र
चेता॥ तथा पतितचांडालादिस्पर्शविशेषत उक्तो वृद्धवसिष्ठेन॥ पतितान्त्यश्वपाकेन संस्पृ
ष्टा चेत्स्याद्रजस्वला॥ तान्यहानि व्यतिक्रम्य प्रायश्चित्तं समाचरेत्॥ तान्यहानि व्यतिक्र
म्य अनाशकेनेति॥ मार्कंडेयोपि॥ अंत्यजातिश्वपाकेन स्पृष्टा चेत्स्याद्रजस्वला॥ चतुर्थेह
नि शुद्धायाः प्रायश्चित्तं स्मृतं बुधैः॥ प्रायश्चित्तमुक्तं वृद्धस्मृतिना॥ प्रथमेह्नि त्रिरात्रं स्याद्द्वि
तीये द्व्यहमेव च॥ अहोरात्रं तृतीयेह्नि परतो नक्तमाचरेत्॥ एतत्तु बुद्धिपूर्वस्पर्शनविषयं॥
अबुद्धिपूर्वस्पर्शने तु बौधायनः॥ बौधायनः॥ रजस्वला तु संस्पृष्टा चांडालांत्यश्ववायसैः॥
तावत्तिष्ठेन्निराहारा यावत्कालेन शुध्यतीति॥ अंत्यजाश्च स्मृता वाचीसत्यपि अंत्यजास्तु
पंचसक॥ ते चोक्ता मनुना॥ रजकश्चर्मकारश्च नटो वरुड एव च॥ कैवर्तमेदभिल्लाः॥

नि॰सि॰ श्वमत्स्यैते अंत्यजाः स्मृताः॥ अयस्कारश्चर्मकारस्तक्षा पाषाणवर्द्धकी॥ कांस्यताम्रकारौ तं-
२९४ तुवायश्च ध्वजिनोंत्यजा इति॥ चन्द्राब्दे नष्टकसृगालावानरखरोष्ट्रविङ्वराहादयः॥ वाय-
सशब्दे नकाककुक्कुटगृध्रश्येनादय॥ एतेषां स्पर्शे निःशुद्धिपर्यंतं निराहारत्वं॥ एवं च स्मृत्य-
र्थसारे॥ अमत्याचंडालरजकादिस्पर्शे अतिदीनामेध्यादिमलोच्छिष्टस्पर्शे निरंमेके चेत्तदा
घटादन्यामुंजानैवकालेनेमुध्येत्॥ अत्रत्रयमादिदिनेभुक्तौ कायो पाद पादन्यूनं तत्कुर्या-
त्॥ मत्यामत्ततया॥ मत्या स्पर्शनितुतदहान्यमुंजानातिक्रम्य॥ त्रयमेकित्रिरात्रमित्या-
दि॥ प्रायश्चित्तं कल्पनीयमिति स्मरणेनेति॥ यत्तु तत्तस्यवचनं॥ रजस्वलांतुसंस्पृश्य
ग्राम्यकुक्कुटवायसे॥ श्वनिः स्नात्वा क्षिपेत्तावद्यावत्सूर्यस्य दर्शनमिति॥ ग्राम्यशब्देनस्पृ- २९४
कर सूकरादिग्रहणं॥ कुक्कुटादेः पृथग्विधानात्॥ एतदज्ञानिविषयं॥ बालस्याविष-
यंवा॥ यत्तु कौस्सरत्यर्थसारे॥ सर्वत्र स्पर्शे बालाय पत्या या अनिषेके कृते तु निः स्यात्॥

यच्याद्दनंज्ञातञ्चलस्याय॥ इतरस्याशौचे सुरभोजनं॥ भुक्तौ प्रतिभोजनसुवासः कृत्या
क्त्रायोवा॥ तथा॥ चंडालरजकादिसंस्पृष्टस्पर्शेनपितदाघस्युक्तौ चक्रिरादितथा॥ अत्रा
कौकाचवेदयाद्दिर्भोवापि भोजनमिति सर्वत्रसंबध्यत इति॥ अयोच्छिष्टयोः परस्पर
स्पर्शेति अत्रिराह॥ तुच्छिष्टोच्छिष्ट संस्पृष्टा कदाचित्स्त्री रजस्वला॥ कृच्छ्रेण शुध्यते पूर्वं
शूद्रादानेरूपोषिता॥ पूर्वब्राह्मणानुज्ञानायाः शूद्रस्पर्शे निविशेषः॥ स्मृत्यंतरे॥ जेरं-
स्वलांतुमुंजानाश्वत्यजादीन्स्पृशेद्यदि॥ गोमूत्रयावकाहारा षड्रात्रेणैव शुध्यत इति॥
इदं गोमूत्रादिविधानं शुध्युत्तरकाले द्रष्टव्यं॥ उच्छिष्टद्विजादिस्पर्शे तु मार्कंडेय॥ द्वि-
जान्कथंचिदुच्छिष्टान् रजः स्त्रीयादि संस्पृशेत्॥ अधोच्छिष्टे तु कोरात्र मूर्ध्वोच्छिष्टे त्र्य-
हं क्षिपेदिति॥ उच्छिष्टस्य ब्राह्मणस्य रजस्वलास्पर्शे निप्रायश्चित्तं तदर्धोच्छिष्टानामनत्या
स्पर्शेतीति॥ मत्योच्छिष्टया स्पर्शेनितत्र द्विगुणं॥ तयोरजस्वलायां विप्रे पः पुलस्त्येन द

न्नात॥ रजस्वलायादा दृष्टा शुनां जंबुकवायसैः॥ पंचरात्रं निराहारा पंचगव्येन शुध्यतीति
ऊर्द्ध्वं तु द्विगुणं नाभेर्वक्त्रे तु त्रिगुणं तथा॥ चतुर्गुणं स्मृतं मूर्ध्नि दृष्टे स्नात्वा शुचिर्भवेत्॥ अ
न्यत्र रजस्वलायाः इति॥ अथ अशुचिरजस्वलादिस्पृष्टे रजोदृष्टौ विशेषः॥ स्मृत्यर्थसारे
॥ सपत्नीरस्पृ रजोदृष्टौ सद्यः स्नात्वा शुध्येत॥ असपत्नी सवर्णमिथिकवर्णा वा स्पृष्टा
रजोदृष्टौ एकरात्रं निराहारत्वं॥ हीनवर्णा रजस्वला स्पृष्टा रजोदृष्टौ आशुद्धेरभुक्ता
पंचगव्यप्राशनं च॥ चंडालसूतिकाशवतत्परिचारकास्पृष्टादिश्वविष्ठाहादिस्पृष्टौ
रजोदृष्टौ आशुद्धेरभुक्ता॥ पश्चात्त्रिरात्रादिप्रायश्चित्तं अत्यास्पृष्टौ पदतो रजोदृ
ष्टावुपवासः॥ तथा॥ जातांशौचे मृतांशौचे वा मध्ये ऋतुदर्शने तु स्नात्वा भोजनं शुद्धा
वुपवासः॥ आर्तवमध्ये जातमृतांशौचे तु स्नात्वा भोजनं॥ अथ प्रारब्धव्रते रजोदृष्टौ स
त्यव्रतः॥ प्रारब्धदीर्घतपसां नारीणां यद्रजो भवेत्॥ न तत्रास्य व्रतस्य स्यादुपरोधः क २९५

दाचनेति॥ स्मृत्यर्थसारे॥ प्रारब्धव्रते रजोदृष्टौ व्रतलोपो नास्ति॥ देवार्चनादिकं कारयेत्
कृच्छ्रादिव्रतस्य तु विष्णुभोजनादि कुर्याद्रजोदुष्टा॥ पतिं वान्यं नियोजयेदिति कालाद
र्शाति॥ अत्र विशेषः॥ रजस्वलाश्वादिदृष्टा॥ पंचरात्रं निराहारा पंचगव्येन शुध्येत्॥ ना
भेरूर्ध्वं वक्त्रे मस्तके च द्वित्रिचतुर्गुणमिति स्मृत्यर्थसारे॥ अथ रजस्वलागमने प्राय
श्चित्तं॥ यो रजस्वलां नारीं गच्छति स त्रिरात्रमुपोष्य घृतं प्राश्य शुध्येत्॥ तदाह मनुः॥ त्रि
रात्रांते घृतं प्राश्य उपगम्योदक्यां विशुध्यतीति॥ उदक्या रजस्वला॥ इदमबुद्धिपूर्वं सकृद्गम
नविषयं॥ बुद्धौ वाभ्यासे सप्तरात्रं प्राजापत्यमेतोक्तं॥ मतिपूर्वं सकृत्त्वापि सप्तरात्रं॥ अ
भ्यासे तिकृच्छ्रः॥ तदाह संवर्तः॥ रजस्वलां च यो गच्छेद्गर्भिणीं पतितां तथा॥ तस्य पाप
विशुध्यर्थमतिकृच्छ्रं विशोधनमिति॥ अत्यंताभ्यासे त्रैवार्षिकमिति स्मृत्य
र्थसारात्॥ मत्या सकृद्गमने सप्तरात्रं॥ तथा॥ रोगेण यद्रजः स्त्रीणामत्यर्थं च प्रवर्त

ते॥ अमुष्मान्नैव तेन स्याद्यतो वैकालिकं हितदिति स्मृत्यंतरं॥ इति रजस्वलाविषयो निर्णयः
कृतेच लक्ष्मीवेदेन ग्रंथे निर्णयदीपके॥ रजस्वलाविशुध्यर्थे निर्णयोत्र निर्णयोत्र निरूपि-
तः॥ अथ ग्रहणनिर्णयः॥ राहुणा चंद्रस्य सूर्यस्य च ग्रसनं ग्रहणमिति॥ राहुः पूर्णि-
माप्रतिपदोः संधौ चंद्रं ग्रसते॥ दर्शप्रतिपदोः संधौ सूर्यं च॥ तदाह वृद्धगार्ग्यः॥ पूर्णिमा-
प्रतिपत्संधौ राहुः संपूर्णमंडलं॥ ग्रसते चंद्रमर्कं चा दर्शप्रतिपदंतरे॥ यावद्दृष्टिक-
लाके ग्रहणे पर्वणि कालः स्पर्शकालं॥ प्रतिपदादिगतो मोक्षकालः स पुण्य इतद्दुक्तं
वत्स। सिद्धांते॥ यावान्कालः पर्वणोस्ते तावान्प्रतिपदादिषु॥ रवींदुग्रहणे तद्वत्पुण्यमि-
प्रणाद्भवेत्॥ पर्वशब्देनात्रामावास्या पौर्णमासी चेति॥ अनेन कालः सर्वस्य ग्रहण-
कालस्य समाहात्म्यस्य॥ तात्र चंडद्य पर्वणि संक्रांते स्कापरेणव॥ राहोस्तु दर्शनं
यावत्तु कालस्तावदारूत इति॥ अथ ग्रहणात्पूर्वं भोजनकालनिषेधकवचनेषु॥ तावन्म २९६

हाभारते॥ अर्वाग्यामत्रयादिंदोर्ग्रहणे नु निमाचरेत्॥ चतुर्यामादधश्चैकराहुग्रस्ते दिवा-
करे॥ चांद्रग्रहादधः यामत्रयात रात्नभुंजीत॥ सूर्यग्रहादधश्चैकराहुग्रस्ते दिवाक-
रे॥ चांद्रग्रहादधः यामत्रयातरात्नभुंजीत॥ सूर्यग्रहादधः यामचतुष्टयात रात्नभुंजी-
तेत्यर्थः॥ बालवृद्धातुरेष्वेवि शेषः कालादर्शे॥ चंद्रग्रहादधोयामत्रयो यामचतुष्ट-
ये॥ सूर्यग्रहात्तन्नुजीत बालादि प्रहरद्वये इति॥ वृद्धवसिष्ठोपि॥ सूर्यग्रहेतु नाश्नी-
यात्पूर्वं यामचतुष्टये॥ चंद्रग्रहेतु यामांस्त्रीन् बालवृद्धातुरैर्विनेति॥ बालवृद्धातुरा अ-
ह रात्नभुंजीरन्नित्यस्मिन्नर्थे मत्स्यवचनं प्रदर्शितोयं पंचधादिनविभागमाह॥ मु-
हूर्तत्रितयं प्रातस्तावानेव तु संगव॥ मध्याह्नस्त्रिमुहूर्तः स्यादपराह्णोपि तादृशः॥ सा-
याह्नस्त्रिमुहूर्तः स्यात्सर्वधर्मबहिष्कृता इति॥ वचनं तु॥ सायाह्ने ग्रहणेचेत्स्यादप-
राह्णे न भोजनं॥ अपराह्णे न मध्याह्ने नतु संगवे॥ भुंजीत संगवे चेत्स्यात्न पूर्वं भोज-

नक्रिया॥ एतद्बालवृद्धातुरविषयं दीपिकापि॥ वृद्धातुरस्त्रीभिर्भुक्ता॥ ग्रासाद्वा घुस्रयामतः॥
प्रहर इति॥ अपराह्णे प्रथमप्रथमप्रहरादुपरि ग्रहणं चेत्॥ मध्याह्नात्प्राग्भुंजीत रा
त्रिपश्चिमप्रहरे चेद्ग्रहणं रात्रिपश्चिमप्रथमप्रहरादर्वाग्भुंजीत॥ तदाह वसिष्ठः॥ ग्र
हणं तु भवेदिंदोः प्रथमादधियामतः॥ भुंजीतावर्त्तनात्पूर्वं पश्चिमे प्रथमादधः॥ आवर्त्त
नं मध्याह्नः यामः प्रहर॥ अत्र विशेषः॥ चंद्रस्य ग्रस्तोदये दिवैव ग्रहणमिति पूर्वमि
हर्भोजनं नाचरेदित्युक्तं कालादर्शे॥ ग्रस्तोदये विधोः पूर्वं नाहर्भोजनमाचरेत्॥ दृष्ट्वा
ग्नि ति भुंजीत पूर्वदिनस्यान्यहानि॥ अहरिति कालाध्वहतोरिति हिताया॥ यदा राहु
णा ग्रस्तो रविरस्तमियात्तदा पूर्वेद्युर्दिवा न भुंजीत॥ ग्रस्तास्तानंतरं रात्रौ च॥ तथा चंद्रमा २०७
यदा ग्रस्तोस्तंगच्छेत् मदा ग्रहास्तानंतरं दिवा न भुंजीत॥ किंतु परतिथौ तयोरुदये मु
क्तिस्नात्वा भुंजीतेत्यत्र कालादर्श्यपि वचनं॥ ग्रस्तावेवास्तमभ्युपेत्य रवीन्दू प्राप्नुतो यदि

तदा परेद्युरुदये स्नात्वाभ्यवहरेन्नर॥ नुर इति सर्वविषयेपि लक्षणे॥ मनुरपि॥ अमुक्त्यो
रस्तंगतयोरदृष्ट्वा स्नात्वा परेहनि॥ भुंजीतेति शेषः॥ अमुमेवार्थं मार्कंडेयोप्याचष्टे॥ चं
द्रसूर्ये दिवानातो यस्मिन्नहनि मागभवा॥ ग्रहणं तु भवेत्तस्मिन्न पूर्वं भोजनं नरः॥
नाचरेत्स्नमहेच्चैव नैव वास्तमुपागते॥ यावत्त्रयोन्नोदयः स्नात्वा मुक्तौ प्राप्याव देवतु॥ मु
क्तिं दृष्ट्वा तु भुंजीत स्नानं कृत्वा ततः परमिति॥ तथा गार्ग्यः॥ संध्याकाले यदा राहुर्ग्रसते
शशिभास्करौ॥ तदहर्नैव भुंजीत रात्रावपि कदाचनेति॥ रात्रिनि ग्रस्तास्तमितेऽहनि
न भुंजीत॥ भास्करे ग्रस्तास्तमितेऽहनि न भुंजीत॥ भास्करे ग्रस्तास्तमिते रात्रौ न भुंजी
तेत्यर्थः॥ कादाचन इति धारणपारणाव्रतस्थस्य यो यस्मिन्नप्यादितिथिनक्षत्रनिमित्तका
म्योपवासव्रतस्थस्य च निषेधः॥ इति कालादर्शे व्याख्यातं॥ साग्निकस्य तु पत्नी यजमानाव
त्यमश्नीयातां॥ तथा॥ नद्यवाज्यव्रतस्य देवादविरश्नंति त्यादिक्षतिस्ति॥ माघे॥ स्मृतिस्म

भोविरोधश्रुतेः॥ आवश्यकेपि ग्रहणे भोजनं तावन्निरोधादिदन्त्रिशा नाकार्यमिति॥ तत्रैव॥ संध्यायां ग्रस्
ते राहुरविचंद्राग्निनां यदा॥ तदा दिवा न भोक्तव्यं मातुरस्तु निशि न तु विनेति स्मृतिवचनेन यथातुरा
णां भोजनमुक्तं तथा सात्विकैरपि प्रातिबला स्वल्पं किंचिद्भक्तसिद्धिकं न्यात्रमवितव्यं युक्तो अ
थवा नृत्तमप्यपि ग्रहणकालतत्परस्थितेन भुजिकार्यं अपोस्मातितिनतत्र तत्सिद्धिर्यन्नदृति केचिद्
कुन्तिरिः॥ सूर्ये ग्रस्तास्तगे ग्रहणात्पूर्वस्मिन्नहनि परस्यां रात्रौ॥ चंद्रे ग्रस्तास्तमिते परमिते
परस्मिन्नहनि पूर्वरात्रौ च एवमहोरात्रं न भुंजीत॥ तदुक्तं विष्णुधर्मे॥ अहोरात्रं न भोक्त॰
व्यं ग्रस्तावेवास्तगौ तु तौ॥ मुक्तिं दृष्ट्वा न भोक्तव्यं स्नात्वा न कृत्वा ततः परमिति॥ रवौ ग्रस्तास्तगे
ग्रहणात्पूर्वं भोजनं वक्ष्यामः॥ ननु मेघादिना बिंबादर्शने विंदुराहुविमुक्तो दृष्टुं न पार्यते तदा भो
जनं न स्यात्॥ शृणु॥ नात्र दर्शनस्य मुख्यापि रत्नं॥ किंतु दृष्टस्येत त्र विनाशोपलक्षणं॥ तदाह	२९८
हृहद्गोतमः॥ चंद्रसूर्योपरागे नाद्यादह्नि अस्मिन्नहनि पूर्वतः॥ राहोर्विमुक्तेर्विज्ञाय स्नात्वा नाक्र

र्वीत भोजनमिति॥ न चैवं ग्रस्तास्तमने त्वाग्नास्ततो विमुक्त्यनंतरमेव भोजनं स्यादेवं॥ अहोरात्र
न्न भोक्तव्यं॥ तथा॥ यावत्स्यान्नोदयः स्यादिति॥ वचनद्वयादुदयानंतरमेव भोजनं न विमुक्त्यनं
तरमिति॥ रविग्रहणे विशेषः॥ रवौ ग्रस्तास्तमिति नोपवासस्त्वदुक्तः सर्वतरे॥ सायाह्ने संगवे
श्रीपा छारदे संगवादधः॥ मध्याह्ने परतो श्रीपान्तोपवासो रविग्रहे॥ नारदोऽपराह्णः॥ यदा
पराह्णेत्वार दितिश्रुतः॥ दिनशेषे ग्रहणं निहत्यो न दानंतरं भुंजीत नपूर्वमिति उपवासनिषे
धः पुत्रगृहिविषयः॥ तदाह जैमिनिः॥ आदित्येहनि संक्रांतौ ग्रहणे चंद्रसूर्ययोः॥ पारणं चो
पवासं च न कुर्यात्पुत्रवान्गृही॥ अथवा स्त्रावगतोपि रात्रौ सूर्यग्रहो दिवा चंद्रग्रहश्च दे
तरस्तत्वा हिफलं इति तत्र स्नानादिकं न कार्यं॥ तदुक्तं षट्त्रिंशन्मते॥ सूर्यग्रहो यदा रात्रौ दिवा
चंद्रग्रहस्तथा॥ तत्र स्नानं न कुर्वीत दद्याद्दानं च न क्वचिदिति॥ अत्र रात्रौ दिवेत्युपादानात्
तद्विपरीते दिवा कासूर्यग्रहे रात्रौ च चंद्रग्रहे ज्योतिःशास्त्रावृत्तिश्चापावगमे सति मेघछाद

नादिवर्ज्यादृष्टेपिस्नानादिकंकार्यमितिगम्यते॥ यत्तु॥ चंद्रेचयदिवासूर्येदृष्टेरात्रौमहाग्रहे
अक्षयंकथितंपुण्यंतत्राकेचिद्विशेषतइतिअक्षस्मिन्माकेंडेयवचनेदृष्टइत्तिचक्षुषाराहु
दर्शनेएवस्नानादिविधानं॥ ननुशास्त्रादितोवगतेरितिकेश्चिन्निरूपितं॥ तन्निरस्तादि॰
केनम्लसियोगपेक्ष्यदर्शनविषय॥ शास्त्रतःसंदिग्धविषयंचेतिमाव॥ तस्माद्यावतिकालेचंद्र
सूर्ययोरुपरागःशास्त्रप्रतीतस्तावत्कालेपुण्यकालइत्यर्थः॥ अथग्रहणकालेतुयाम्यायाव:स्ता
याम्यायान्तुमुक्तयो:॥ स्नात्वाहद्वापरेन्द्र्घ्यदत्त्वामितधोरितिअप्यग्रहणाकालभोजनेतु॰
गतातपआहा॥ नवश्राद्धंश्चामयाजकान्तग्रहणेभोजने॥ नारीणांप्राजापत्येनशुध्यति॥ त॰
स्मिन्नेवदिनेमुक्तान्निरान्नेणैवशुध्यतीति॥ प्राजापत्यत्रिरात्रंरायो:स्मणदुणसन्तिहृष्टवि
प्रकष्टकालाघवस्था॥ पुत्रवत्प्रदिव्यतिरिक्तस्यग्रहणात्पूर्वेत्रिपवासेगाच॥ यस्त्रिरात्र
मुमुपोष्यैवग्रहणेचंद्रसूर्ययो॥ स्नात्वादत्वाचविधिवन्मोदतेब्रह्मणासह॥ एकारात्रामुपोष्य १९९

वस्नादत्वाचश्चाक्तितः॥ कंचुकादिनसपर्स्मिति:हन्ति:पापकोटिशतइति॥ ग्रहणेविशेषमाहव्या
स॥ सूर्यवारेरवेर्ग्रासःसोमवारेविधोग्रहे॥ चूडामणिरितिख्यातस्तत्रानंतफलंभवेत्॥ वारे
ष्वन्येषुयत्पुण्यंग्रहणेचंद्रसूर्ययो॥ तत्पुण्यंकोटिगुणितंग्रासेचूडामणौस्मृतं॥ अथान्यवि॰
शेषमाह॥ दक्षःश्राद्धआब्दिकंचसिद्धान्तेनप्राप्त॥ तत्रग्रहणसंभवेसोत्कृद्विजाभावेसानिल:
दर्वेरिविग्रहेपित्रोःप्रत्याब्दिकमुपस्थितं॥ अन्नेनासंभवेदेयात्कुयदामेनवासुतः॥ द्विजा
संभवेतुतेनकुर्देषोवातुरस्युदयइतिमिताक्षरायां॥ दर्शइतिपूर्णमास्युपलक्षकइतिग्रह
णाभोजनेनिर्णय॥ आपकर्त्तव्यमुच्यते॥ ग्रहेणेआदौपूर्वस्नानकुर्यान्तुकंवस्त्रवैवत्री॰
स्नानंस्याद्दुपरगादौमध्येहोमंसुरार्चनं॥ तथावचनांतर॥ ग्रास्यमानेभवेत्स्नानंग्रस्तेहो
मोविधीयते॥ मुच्यमानेभवेद्दानंमुक्तेस्नानंविधीयते॥ अस्नानेदोषा॥ यदाबद्धवसिष्ट॥
ग्रहणेसंक्रान्तिवा:पिनस्नायाघदिमानव॥ सप्तजन्मानिकुष्ठीस्याद्दुःखभागीचजाय

ते॥ स्नाने स्पर्शकालेऽग्र्यः मध्यकालो मध्यमः मोक्षकाले स्वधामस्तदाह व्यासः॥ त्रिदशाः स्प
र्शसमये तृप्यंति पितरस्तथा॥ मनुष्या मध्यकाले तु मोक्षकाले च राक्षसाः॥ सर्वस्मिन्ग्रहणकाल
स्य पुण्यत्वेपि स्नानादौ स्पर्शकालोऽग्र्य इति भावः॥ ग्रहणे गंगादिमहानदीषु स्नानं कुर्यात् त
दाह बृहस्पतिः॥ इंदोर्लक्षगुणं प्रोक्तं रवेर्दशगुणं स्मृतं॥ गंगातोये तु संप्राप्ते इंदोः कोटी र
वेर्दश॥ गवां कोटिप्रदानेन सम्यक् दत्तेन यत्फलं॥ गंगास्नानेन तद्देव स्याद्राहुग्रस्ते नि
शाकरे॥ दिकरे पुनस्तद्द्वासंख्यमुदाहृतमिति॥ कोटिः कोटिगुणं॥ दशाख्यं दशकोटि
गुणं॥ तथा मत्स्यपुराणे॥ गंगाकनखले पुण्यं प्रयागं पुष्करं तथा॥ कुरुक्षेत्रं तथा पुण्यं रा
हुग्रस्ते दिवाकरे॥ ब्रह्मपुराणे॥ तिस्रो नद्यो महापुण्या गंगा गोदा च जाह्नवी॥ गंगाद्वारे त्रि
गतः प्राप्ता गंगा इति हि कीर्तिता॥ तदसंभवे महानदीष्वन्यासु तीर्थेष्वपि महोदधौ॥ १००
तदसंभवे वाप्यादौ॥ तदाह दक्षः॥ वापीकूपतडागेषु गिरिप्रस्रवणेषु वा॥ नद्यां नदे दे

वखाते सरसी स्रद्गनोबुनि॥ उष्णोदकेन वा स्नायाद्ग्रहणे चंद्रसूर्ययोः॥ उष्णोदकमातुरबालविषयं
तदाह व्यासः॥ आदित्यकिरणैः पूतं पुनः पूतं च वह्निना॥ अतो व्याध्यातुरः स्नायाद्ग्रहणे उष्णवा
रिणा॥ ग्रहणे यत्र कुत्रचित्स्नानं गंगास्नानसमं तदाह व्यासः॥ सर्वं गंगासमं तोयं सर्वेविधु
समा द्विजाः॥ सर्वं भूमिसमं दानं ग्रहणे चंद्रसूर्ययोः॥ स्नात्वा स्नानं कुर्यात्॥ तदुक्तं लिंगपुरा
णे॥ व्यतीपाते क्षयायां वा श्राद्धं चंद्रसूर्यग्रहक्षणः॥ गजच्छायानुसक्तो श्राद्धं पितॄणां दत्तमक्षयं॥ म
हाभारते॥ सर्वस्वेनापि कर्तव्यं श्राद्धं वै राहुदर्शने॥ अकुर्वाणस्तु नास्तिक्यात्पंके गौरिव सी
दति॥ कूष्मांडेपि॥ चंद्रसूर्यग्रहे यस्तु श्राद्धं कुर्यात्॥ सूतके मृतके चैव न दोषो राहुद
र्शने॥ तावदेव भवेच्छुद्धिर्यावन्मुक्तिर्न दृश्यते इति॥ जन्ममरणसूतके सत्यपि ग्रहणश्रा
द्धं दानं च कुर्यादिति निरूपितं प्राक् सूतके पुकर्माधिकारप्रकरणे॥ ग्रहणे संध्याकाले रा
त्रौ च श्राद्धं कुर्यात् तदाह विष्णुः॥ संध्यारात्र्योर्न कर्तव्यं श्राद्धं खलु विचक्षणैः॥ द्वयोरपि च क

त्र्यंपदिस्याद्गुहदर्शनमिति॥ देवलोपि॥ यथास्नानं च दानं च सूर्यस्य ग्रहणे दिवा॥ सोमस्यापि
तथा रात्रौ स्नानं दानं विधीयत इति॥ सूर्यग्रहणे कुरुक्षेत्रे कृते श्राद्धे दानं चानंतं द्रष्टव्यम्॥ त
दाह सुमंतिः चिंतामार्कंडेय॥ सूर्यग्रहणसंयोगे कुरुक्षेत्रे तु यो नरः॥ स्नात्वा श्राद्धं यदि कं कु
र्याद्दानत्वार्यकिव्यत इत्युक्त्वा पुनः श्रान्तः किमद्यपदिचेतस्मिंश्चित्रसादं सादं तिमर्त्यगृहते
द्धिधनाय मर्त्याः॥ पात्रापात्रे रणि संनिहत्यापच्छकणिकामपि कांचनस्य॥ पात्रयेति विष्
तपोवृत्तसंपन्नो विप्रः पात्रं॥ तदाह याज्ञवल्क्यः॥ न विद्यया केवलया तपसा पि पात्रता॥ य
त्र वृत्तमिमे चोभे तद्धि पात्रं प्रकीर्तितं॥ एवंविधाय ब्राह्मणाय स्वल्पस्य कणिकामपि देहं तु
क्त्वा पुनः स एवाह॥ ग्रहोपरागे तिथिपर्वणि संनिहत्यां तीर्थे द्विजाय मनुजैर्विषयेकरूणां॥ या
वत्त्रपादत्रादिनानिदिनतदानं त्रयोदशगुणं समुपैति वृद्धिमिति॥ तथा ग्रहणे भूम्या
दिकं दद्यात् तदुक्तं महाभारते॥ अयने विषुवे चैव ग्रहणे चंद्रसूर्ययोः॥ पात्रभूताय वि ३०१

प्राय भूमिं दद्यात् स दक्षिणामिति॥ हेमाद्रौ गावः सुवर्णं वा धान्यं वा यद्यदीप्सितं॥ तत्सर्वं ग्रहणे द
द्यादात्मनः श्रेय इच्छता॥ दानपात्राण्यत्रैव दक्षेणोक्तानि॥ सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रु
वे॥ श्रोत्रिये शतसाहस्रं पात्रे चानंत्यमश्नुते॥ लक्षणानि चतुर्विंशतिमते॥ ब्रह्मवीर्यसमुत्प
न्नो मंत्रसंस्कारवर्जितः॥ जातिमात्रोपजीवी च स भवेद्ब्राह्मणः स्मृतः॥ तथा अनधीतवेदो
ब्राह्मणब्रुव॥ गर्भाधानादिसंस्कारैर्वेदोपनयनैर्युतः॥ नाध्यापयति नाधीते स भवेद्ब्राह्मण
ब्रुव इति॥ ऋग्यजुःसामाथर्वणान्यतमशाखाध्यायी श्रोत्रियः॥ एकां शाखाम
धीत्य श्रोत्रिय इति बौधायनः॥ गृहीतगायत्रीमात्रो वेदाध्ययनरहितो नामधारकः॥ तदु
क्तं॥ गायत्रीसारमात्रापेन्न ध्यमात्रामुपासकाः॥ आत्तानाः कृषिकर्मणो ब्राह्मणा नामधा
रकाः॥ पात्रासंभवे तु॥ अश्रोत्रियः श्रोत्रियो वा अपात्रं पात्रमेव वा॥ विप्रोपि वा अविप्रो वा
ग्रहणे दानमर्हति॥ इति दाने मत्स्यपेक्षया गोसुवर्णादि नृति लिंगपुराणे॥ अग्नेरपत्यं

ष्यमं धरित्रीं गाव सुवर्णं चरमं च तान्यं ॥ श्लो॰ शुक्रमादन्नवतात्विमानिजौकादिदत्तानदि
संज्ञापोत्रेति ॥ सर्वेषिर्णः ग्रहणे स्नातकी स्यान्तदुःकांहद्रवमिष्टेन ॥ सर्वेषामेव वर्णानां सूतकं
राहुदर्शने ॥ सचैलं च सवेक्ष्ला नंभृतमन्नं विवर्जयेत् ॥ सूतपके ॥ क्रान्ते ग्रहणे दर्वाकिस्ते
पेद्धनीस्तगोनदुष्यतीति ॥ ग्रहणे स्नानदानश्राद्धादि कर्तव्यमिति ॥ मार्गादिमासेषु विशेषः
देवीपुराणात् ॥ मार्गे तु ग्रहणं पुण्यं वेदिका यामा दामुने ॥ पौषे तु नर्मदा पुण्या माघे सन्नि
हितासुत ॥ फाल्गुने वरुणा पुण्या चैत्रे पुण्या सरस्वती ॥ वैशाखे वंचन्नागा चन्येष्टे पुण्या तु कौ
शिकी ॥ आषाढे तापिका पुण्या सिंधुः स्याछ्रावणे तथा ॥ भाद्रे वगच्छकी श्रेष्ठा आश्विने सरयू
स्तथा ॥ कार्त्तिके ग्रहणे श्रेष्ठं गंगायमुनसंगमे इति ॥ अथ नक्षत्रविशेषेणशुभाशुभमाह गर्गः
ज्येष्ठे भस्त ग्राल्मं तथा मेत्रे श्रावेस्ववासंवनथा ॥ वैष्णवं वैश्वदेवं दैवं स्वदेवं च पुरुहूतस्यमं
डले ॥ मंडले स्मिन्समुत्पन्ने ग्रहणे जगतां शुभं ॥ आनंदः सर्वभूतानां नांविशोषत इति ॥ ३०२

अथ गर्गः ॥ त्रिपमार्जपदं चैव याम्यं मार्गं चपैत्रक ॥ एतान्यग्निदैवं च सपैतान्यानलोगणः
आनलेमंडलेदोष ग्रहणेर विसोमयोः ॥ राष्ट्रानयेकरविद्यान्त्रनानाबहुदोषकृत ॥ न्छो ॥ अ
हिर्बुध्न्यं तथा पौष्णमूलमाप्यं च शाकरं ॥ वारुणं सपदैवत्यं वारुणमंडलं स्मृतं ॥ एतस्मिन्तु
पूरागे स्यान्मंडले सोमसूर्ययोः ॥ दुर्भिक्षायामितावास्क प्रजानामितितिस्मय ॥ कृत्तिकाणि अ
पूर्मादीनि चत्वारि च पुनर्वसु ॥ सौम्यं चैवाश्विदैवत्यं वायव्यमंडलं स्मृतं ॥ समरंगयंचैवदु
र्भिक्षं कुरुते ऽचिरात ॥ व्याधिशास्त्रादिकोयः स्यान्मंडले स्मिंस्तु पजाव इति ॥ छ ॥ राष्ट्रमंड
लेषु ग्रहणे सतिराज्ञा शांतिः कार्या ॥ तथा च काश्यपः ॥ आग्नेये कारयेच्छांतिं शांतिकं सर्ववा
रुणे ॥ वायव्ये शांतिकं कुर्यान्माहेन्द्रे न तु कारयेत् ॥ तथा ॥ यस्य जन्मराशौ जन्मनक्षत्रे ग्र
हणं भवति तेन शांतिः कार्या ॥ तथा चोक्तं ॥ होरायां ग्रस्यते यस्य तक्षत्रे वा तिराकरः ॥ प्राण
संदेहमाप्नोति स वा मरणमृच्छति ॥ होरा लग्नं तथा ॥ यस्या जन्मनक्षत्रे ग्रस्यते रात्रिमा

स्करौ॥ तत्कालातीतमेवेत्पीडायेनराः शांतिवर्जिताइति॥ तत्रशांतिकर्मणि मत्स्यपुराणात्॥ पूजये
द्रस्त्रगोदानैर्नत्विणा नतिग्राक्तितः॥ होमं चैव प्रकुर्वीत तिलैर्व्याहृतिभिस्तथा॥ दानं च वा कितो द
घाद्वाछेहात्मनो हितं॥ सूर्यहिरण्यमित्रे सोमं चैव प्रकुर्वीत सोममंत्रं जपेदिति॥ तथा चंद्र
रविग्रहे सति मांगल्यकर्मणि दिनानां नवकं वर्ज्यं॥ यथाहुः॥ नयोदयपादितो वर्जयेद्दिनानां न
वकं ध्रुवं॥ मांगल्येषु च सर्वेषु ग्रहणे चंद्रसूर्ययोरिति॥ प्रकारांतरं स्मृतिरत्ने॥ सोदयपा
दित्रयीतीयानेवे षड्दु ग्रहे स्मृतः॥ एकादश्यादिकं सौरे च तुष्यतिः प्रकीर्तितइति॥ खंडग्र
हेतु त्र्यहं प्राक्पश्चाच्च दिनग्रहदिनं ग्रहदिनं चेति निषेधः॥ ग्रस्तोदस्तखंडग्रहे तयोरिति वचनान्त्वि
न त्यनैमित्तिकादोग्रहवेधोन्नवेति॥ तथा च वचनं॥ नित्ये नैमित्तिके जाप्ये होमे यज्ञक्रियासु च॥ उ ३०३
पाकर्मणि चोत्सर्गे ग्रहवेधो न विद्यत इति॥ अथपाकर्मनिर्णय॥ इतिग्रहणनिर्णयः॥ कृतेन
लब्धिंवदेतं ग्रंथे निर्णयदीपके॥ इच्छेमाग्यं तेषेन कृतो ग्रहणनिर्णयः॥ अथपाकर्मेति

र्णयः॥ वेदध्ययनवेनोद्दिश्य शुद्धसाय॥ तथा॥ —— दोषनिवृत्तये श्रावणे मास्योषधिप्रादुर्भावप
र्णादिविहितकालेषु पाकर्मकुर्युः॥ कालमहायात्तवल्क्य॥ अध्यायानामुपाकर्मश्रावण्यां
श्रावणेन वा॥ हस्तेनोषधिभावे वा पंचम्यां श्रावणस्य तु इति॥ अध्यायानामिति ग्रारत्ना
प्रायवकुवचनं॥ अत्र सर्वेशाखीनां मेषुक्तत्वेन विशेषेणोपाकर्मप्राप्ते विशेषमाह॥ अतो
ध्यायोपाकर्मोषधीनां प्रादुर्भावे श्रवणेन तु श्रावण्यां पौर्णमास्यां॥ श्रावणस्य पंचमीं हस्तेन वे
तिपारस्करः॥ बहृचाः श्रावणसंतु हस्तेसामवेदिन इति गोभिलस्मरणं॥ तु वाक्यात् ब
हृचा हस्तनक्षत्रे पि कुर्युः॥ अपोपाकरणमोषधीनां प्रादुर्भावे हस्तेन श्रवणेन वेति शांख्या
यनगृह्योक्तत्वात्॥ सामगाः हस्तनक्षत्र एव कुर्युः॥ ओषधिप्रादुर्भावेः सर्वेषां तुल्यः॥ श्राव
णशुक्लपक्षे हस्तनक्षत्रयुक्तकालेषु पाकर्मकार्यं॥ तदुक्तं निगमे॥ श्रावण्यां श्रवणो क
र्मयथाविधि समाचरेत्॥ उपाकर्मतु कर्तव्यं कर्कटस्थे दिवाकरे॥ हस्तेन शुक्लपंचम्यां

श्रावण्यां श्रवणे नवेति॥ उपाकर्मकालः पूर्वाह्णः॥ तथा च प्रचेताः॥ नवेत्या कृतिः पूर्णिमायां पूर्वा
ह्ण एव तु विधिवद्द्विजाः॥ अपराह्णे तु पाकर्मेति॥ वक्ष्यमाणे समग्रविषये॥ विष्णुपुराणे॥ श्राव
ण्यां श्रवणे हस्ते पंचम्यां वेदवादिनः॥ वेदोपाकर्म कुर्युः॥ पूर्वाह्णे न॥ उत्सर्गस्य कालोंतरमाह॥
...त कल्पः॥ पौषमासस्य रोहिण्यामष्टकायामथापि वा॥ जलांते छंदसां कुर्युरुत्सर्गं विधिवद
द्विरिति॥ तथा॥ माघशुक्लस्य वा प्राप्ते पूर्वाह्णे प्रथमेऽहनि॥ इति मनुः॥ माघशुक्लप्रतिपद्युत्सर्गमिवा
दीत॥ एतदुत्सर्जनमुपाकर्मदिने विकल्पेन कृत्यमिति दूक्तं रत्नादिग्रंथे॥ एतदु[illegible]र्जनं कुर्याद्यदु
पाकर्मदिने न्यदेति॥ तथा एतदुपाक्रियामुत्सर्जनक्रियां विधिदिने उपाकर्मदिने विकल्पेन
कुर्यादित्याशयेन॥ दीपिकायां॥ कुर्यादित्युपक्रियां विधिदिने इति॥ आंतरोत्सर्गिकीं क्रियां॥ ३०४
विधिमिति गोभिलवचनात्॥ उत्सर्गस्य कालः पूर्वाह्णः॥ अथ निर्णयः॥ हस्तश्रवणपौर्णमा॥
सीनां दिनद्वये पूर्वोक्तकालव्याप्तित्वे परविद्धे युक्तपत्रिया चोक्तं निगमे॥ तथाह स्मृत्यंतराषाढा

उपाकर्मणि वै स्मृते॥ धनिष्ठामिश्रिते कार्यमुपाकरणसंज्ञितमिति॥ व्यासोपि॥ श्रवणेन तु यत्
कर्म उत्तराषाढसंयुते॥ संवत्सरकृताध्यायस्तत्क्षणादेव नश्यति॥ धनिष्ठासंयुतं कुर्याच्छ्राव
णं कर्म यत्नवत्॥ तत्कर्म सफलं विद्यादुपाकरणसंज्ञितमिति॥ तथाह स्मस्य हृधे चित्रायुक्तेऽ
पत्रिदुक्तं परिशिष्टे॥ धनिष्ठाप्रतिपद्युक्तं त्वाष्ट्रऋक्षसमन्वितं॥ श्रावणं कर्म कुर्वीरनृग्यजु
साम्नपावकाः इति॥ त्वाष्ट्रऋक्षसमन्वितं चित्रासंयुक्तं हस्तमित्यर्थः॥ धनिष्ठायुक्तं श्रवणाय
पि प्रतिपद्युक्तं पर्वेत्युक्तं तथापि पौर्णमासीदिनद्वये तत्कालव्याप्तौ तदा तैत्तिरीयाणाम
रात्रौ तरेषां पूर्वातिततदाहुर्गार्गिलः॥ पर्वण्यौदयिके कुर्युः श्रावणं तैत्तिरीयकाः॥ बह्वचाः श्र
वणे शेतु हस्ते तु हस्ते सामवेदिनः॥ तथा गार्ग्यः॥ पूर्वाण्हौदयिके कुर्युः श्रावणं तैत्तिरीयकाः॥ ब
ह्वचाः श्रवणे चैव ग्रहसंक्रांतिवर्जिते इति॥ अत्र तैत्तिरीयकापदमन्येषामपि यजुःशाखि
नामुपलक्षणमिति केचित्॥ तद्युक्तं यतो दीपिकाकारेण कालनिर्णयकारास्त्रिश्रायमनु

निदि॰ ३०५ ध्वैद्वामाषिपि॥ अहगातु कर्मसमये व्याप्नोति॥ सा चेन्नवाषष्ठकायपीति त्तिरिशारिवस्मि॥ परदि
नेषूद्वैतारोयजुषे॥ साप्रणिमाऽतरैयजुषेः यजुर्वेदिभिः पूर्वीकार्येतिभाव॥ एतेन च तुर्दशीयुक्त
स्यपर्वणो निषेधाभिधायकं निर्णयामृतोदाहृतं कालिकापुराणवचनमपि॥ तैत्तिरीयक
शाखाविषयमितिसूचितं॥ अत एवाम्नवतु वा कालिकापुराणवचनं सर्वयजुःशाखापरं वि
हितमातिषिद्धं च विकल्पितं भवतीति न्यायादिकल्पेनैते त्तिरीयव्यतिरिक्तयजुःशाखिनां च
तुर्दशीविधमाप्तमुपाकरणं॥ तथापि श्रवणानुसारविहितमुपाकर्मके वर्ततां तच्चतुर्दशीवे
धकं कार्यमिति॥ पार्वणोवेधाभिधानात्॥ अयं हस्तश्रवणपर्वसु ग्रहणसंक्रान्तियुक्तेषु हस्त
श्रवणपर्वसु॥ अथ चेद्दोषसंयुक्तेषु पर्वणि स्यादुपक्रिया॥ दुःखदा कामयत्र स्तारा पूतस्मिंव
द्विजातयः इति॥ उपक्रियाऽपाकर्मपर्वणि हस्तश्रवणायोरप्युपलक्षणं॥ दोषयुक्ते काले ३०५
न कुर्यात् कालान्तरे कुर्युरिति भाव॥ अथ शाखाभेदेनोक्तस्योपाकर्मणः कालेग्रहसंक्रान्ती

नवेयातां तदा कालान्तरमाह॥ यदि स्याच्छ्रवणं पर्वग्रहक्रांतिदूषितं॥ स्यादुपाकरणं शुक्लपंचम्यां
श्रवणस्य तु॥ संक्रांतिर्ग्रहणं वापि यदि पर्वणि जायते॥ तन्मासे हस्तयुक्तायां पंचतद्विष्यते॥
एतद्य यजुःशाखिषु वा सनेयाभिप्रायं॥ यत उक्तं स्मृतिमहार्णवे॥ संक्रांतिर्ग्रहणं वापि यौर्ण
मास्यां यदि भवेत्॥ उपाकृतिस्तु पंचम्यां कार्या वाजसनेयिभिरिति॥ अत्रोक्तचोपलक्षणार्थ
स्कन्दे॥ श्रावणशुक्लपंचम्यां वह्वृचा अपि कुर्युः तथा चोक्तं दीपिकायां नभोमासः सितापं
चमी॥ यद्या वाजसनेयिवह्वृचमुख्यैर्हस्तान्विता केवला वा न्याहस्तयुतातिथिरिति॥ हस्तेनयु
क्तेन्यस्मिन्नहनि चेतिभाव॥ अत्र केचिदाहुः॥ हस्तेनौषधिभावे वा पंचम्यां श्रावणस्य तु इति
सर्वशाखासू [illegible] प्रहत्तत्पात्तवल्क्यवचनात्॥ सर्वेषां शुक्ल श्रावणशुक्लपंचम्यां श्रावण
शुक्लपं [illegible] न॥ एवं चेज्ज्ञानपदे विधायकानि कृषिवाक्यानि अनर्थकानि स्युः॥ कि
च॥ श्रावणपंचमी तैत्तिरीयाणां निषिद्धेति॥ तदुक्तं॥ श्रावणशुक्लपंचम्यां न कुर्युस्तैत्तिरी

यका॥ श्रावण्यां दुष्टायां तैत्तिरीयकैः प्रौष्ठपद्यामुपाकर्म कार्यमिति। कालनिर्णयेप्युक्तिरस्ति
अतः श्रावणोक्तकाले ग्रहसंक्रांतिदूषिते तत्करणासंभवे वा सर्वैर्भाद्रपदे कार्यं॥ तदुक्तं च
वृद्धपरिशिष्टे॥ ओषध्यश्च यस्मिन्काले नतु संभवंतीति चेत॥ तदा भाद्रपदे मासि श्रवणे
न तदिष्यते॥ अत्रौषध्यभावः संक्रांत्यादिदोषाणामुपलक्षकं॥ अथातः स्वाध्यायोपाकर्म श्राव
ण्यां प्रौष्ठपद्यां चेति वसिष्ठः॥ अत्र पाठक्रमनिर्णयकारैरुपसंहृतं। तस्माद्ग्रहसंक्रांतिदूषित
यां श्रावण्यां प्रौष्ठपद्यामुपाकर्म कार्यमिति॥ मनुरपि। श्रावण्यां प्रौष्ठपद्यां वाप्युपाकृत्य यथा
विधि॥ युक्तश्छंदांस्यधीयीत विप्रो मासान्सार्द्धपंचमानिति॥ अर्द्धपंचमामासोपघाते अर्द्धपंचमाः
उपाकर्मप्रभृति सार्द्धांश्चतुरो मासान्स्वाध्यायदिने वधीयीतेत्यर्थः॥ अपित्वाब्दाद्भाद्रपदसंबंधि
हस्तश्रवणपंचमीनामुपसंग्रहः॥ एषु कालेषु कुर्यादित्याचोक्तं॥ निमित्तात्श्रावणे मासि न कृता
चेदुपाकृतिः॥ स्वाचारविहिते काले भाद्रे कुर्यादुपाकृतिं॥ उपाकृतिमुपाकर्म भाद्रेभाद्रप

दे॥ अतः स्वशाखाविहितकालेकरणासंभवे श्रावणभाद्रपदयोः कस्मिंश्चिद्दिने ग्रहणसंक्रां
तिवर्जिते अन्यत्र॥ स्वोक्तेपि कार्यापारक्यमविरोधि यदितिन्यायात्कामपि। न लोपः कार्य इति॥
समवृद्धिषूपाकर्म हस्तेन सत्रेमावेत्युक्तत्वात्॥ अत्र विशेषमाह॥ अध्यायानां भाद्रपदमिलिता
श्रावणेन तथा॥ कुर्यादारंभं छंदोगा हस्तयुक्ते विसर्जनं॥ छंदोगाः सामवेदिनः हस्तेन क्षत्रे अध्या
यानामारंभं कुर्युः। ततः एव पुष्ये न हस्ते कुर्युः॥ श्रावणभाद्रपदयोः मध्ये तथा तदाह गोभि
लः॥ छंदोगा मिलिताः कुर्युः प्रातरेव समिक्रियां॥ अपराह्णेप्युपाकर्म पुष्ये हस्ते क्षयेद्विज
हस्तर्क्षेपि पाकर्म पुष्ये पुष्ये हस्तेऽपि सर्गेन कुर्युः॥ तथा च परिशिष्टे॥ मासि प्रौष्ठपदे हस्ते पुष्ये पु
ष्येणि वेषदा॥ तदा तु श्रवणेऽक्ताय दिदुसर्गं छंदसामिति॥ प्रौष्ठपदे प्राप्य हस्तेनोपाकारणमिति
गोभिलः॥ उपाकर्मापराह्णे स्यादुत्सर्गः प्रातरेव तु॥ तदाह गोभिलः॥ अध्यायानामुपाकर्म
कुर्यात्कालेपराह्णके॥ पूर्वाह्णे तु विसर्गः स्यादिति वेदविदो विदुः॥ कालहेमाद्रावपि तेषा

नि॰सि॰ छंदोगानां सिंहस्थे रवावेवोत्सर्जनं कृत्वोपाकर्म हस्ते स्यात्॥ तदाह गर्ग:॥ सिंहे रवौ तु पुष्यर्क्षे पू
३०७ र्वाह्णे विमले दिने॥ छंदोगा मिलिता: कुर्युरुत्सर्गं नित्यच्छंदसां॥ शुक्लपक्षे तु हस्तेन उपाकर्मापरा
ह्णिकमिति॥ अत्र कालादर्शे नोत्कर्ष इति॥ अत: इच्छाहरायुतोत्कर्षस्तु वृद्धिष्वपि युगादिषु॥ उपा
कर्ममहालये तदिष्टव्यादितइति कृष्णभट्टवचनमुपाकर्मानुत्कर्षविधायकं॥ छंदोग
विषयं॥ तेषां कालादर्शावपि गर्गवाक्येन सिंहकेऽपि वोत्सर्गविधानादिति भाव:॥ छंदोगव्यति
रिक्तविषये उत्कर्ष: स्यात्तदाह कात्यायन:॥ उत्कर्ष: कालवृद्धौ स्यादुपाकर्मादिकर्मणि॥ अधि
रेकादिवृद्धीनां न तूत्कर्षो युगादिषु॥ इदं युगादिषु अनुत्कर्षाभिधानं तत्र वारादिति॥ सं
पादितालस्य योगविषयं॥ तत्रालभ्ययोगोक्तं व्रतदानादिकं प्राप्ति॥ श्राद्धमप्येवमेवत्येक॥ ३०७
मन्वादौ च युगादौ च तन्मासोरुभयोरपि इति वचनात्॥ यत्तु श्रावण्यां पौर्णमास्यामाषाढ्यां चो
पाकृत्य छंदांस्यधीयीतेति बौधायनवचनं तच्छ्रावण्यां ग्रहपातसंक्रमग्रहणादिदुष्टायां सत्यां

बौधायनेनाषाढ्यामपि निरायासादुपाकर्तव्यमित्येवं मेये परं॥ केचित्तु एकवाक्याधिकरणन्याये
न यजु:शाखिनामाषाढ्यां विधानमित्याहु:॥ अत्र विशेष:॥ सूर्यग्रहे दिनचतुष्टयं पूर्वं पश्चाद्
रात्रं चन्द्रग्रहे दिनत्रितयं वेध इति निरूपितं ग्रहणनिर्णये॥ तथा सति चतुर्दश्यां
वणश्च ग्रहवेधदूषितत्वात्तत्कथं उपाकर्म न कार्यमिति चेत्॥ न॥ उपाकर्मणि वेधदोषो नास्
तीति॥ न हूक्तं॥ नित्ये नैमित्तिके जाप्ये होमे यज्ञक्रियासु च॥ उपाकर्मणि चोत्सर्गे ग्रहवेधो न
विद्यते॥ इत्युपाकर्मेतिकर्तव्यं॥ उपाकर्मणि चोत्सर्गे ऋष्यादर्भमिदर्षय:॥ दर्भमया नामद
र्षय: पूज्या:॥ तदाह कात्यायिनि:॥ उपाकर्मणि चोत्सर्गे यिया काले समेत्य च॥ ऋषीन्द
र्भमयान्कृत्वा पूजयेत्तर्पयेत्ततइति॥ बौधायनोऽपि॥ गौतमादीनृषीन्सप्त कृत्वा दर्भम
यान्पुन:॥ पूजयित्वा यथाशक्ति तर्पयेद्वासुदेवज॥ अत्र गौतमादीति तिस्त्रस्त्रया॥
स्त्री कर्मषणामुपलक्षणं॥ नवीनास्तु॥ संप्राप्ते श्रावणस्यान्ते पौर्णिमास्यां दिनोदये॥ स्ना

वि० दि० नेकुर्वीतमतिमानकृतिस्मृतिविधानतः ॥ इत्याद्युपाकर्मरक्षाबंधननिर्णयः ॥ श्रावण्याः पौ
३०८ र्णमास्यानिर्णयो निरूपितः ॥ अथोत्सर्जनकालः ॥ पौषमासस्य रोहिण्यामष्टकायामथापि वा ॥
जलांते छंदसां कुर्यादुत्सर्गं विधिवद्द्विजः इति याज्ञवल्क्यः ॥ प्रकारांतरं ॥ पुष्ये तु छंदसां कुर्याद्बहि
रुत्सर्जनं द्विजः ॥ माघशुक्लस्य वा प्राप्ते पूर्वाह्णे प्रथमेहनि मितु ॥ माघशुक्लप्रतिपद्यप
राजितायां दिशि वृक्षस्य धिके देशादिति गार्ग्यायनः ॥ अत्रोपाकर्मकालभेदादुत्सर्जनस्य कालभे
दयुक्तः छंदांस्यधीयीत विमोमासार्धपंचमानित्यपेक्षया इति ॥ अथवा उपाकर्मदिन एवोत्स
र्गं कृत्वोपाकर्मकार्यमित्युक्तं प्राक् ॥ कात्यायनः ॥ प्रत्यब्दं यदुपाकर्मसोत्सर्गं विधिवद्द्विजैः ॥
क्रियते छंदसां तेन पुनराप्यायनं भवेत् ॥ इत्युपाकर्मोत्सर्जननिर्णयः ॥ अथ चातुर्मास्यव्रतं ३०८
नस्यारंभकालो महाभारते ॥ आषाढे तु सिते पक्षे एकादश्यामुपोषितः ॥ चातुर्मास्यव्रतं
कुर्याद्यत्किंचिन्नियतो नरः इति ॥ यत्किंचिदिति एकभक्तनक्तायाचितपर्णभोजनं किंचि

दृष्यद्रव्यवर्जनादिना व्रतारंभं मंत्रेण कुर्यात् ॥ मंत्रमाह सनत्कुमारः ॥ इदं व्रतं मया देव गृही
तं पुरतस्तव ॥ निर्विघ्नं सिद्धिमायातु प्रसन्ने त्वयि केशव ॥ गृहीतेस्मिन्व्रते देव यद्यपूर्णे म्रिये
ह्यहं ॥ तन्मे भवतु संपूर्णं त्वत्प्रसादाज्जनार्दन इति ॥ तथारंभे कालविशेषमाह सनत्कुमारः ॥
श्रावणे वर्जयेच्छाकं दधि भाद्रपदे तथा ॥ दुग्धमाश्वयुजे मासि कार्त्तिके द्विदलं त्यजेत् ॥ एका
दश्यां तु गृह्णीयात्संक्रांतौ कर्कटेपि वा ॥ आषाढ्यां वा नरो भक्त्या चातुर्मास्यादिकं व्रतं ॥ एषु का
लेष्वारंभे सर्वत्र तुलार्के कार्त्तिके कुर्यात् ॥ तदुक्तं महाभारते ॥ वार्षिकांश्चतुरो मासान्व्रतं कि
चित्समाचरेत् ॥ असंभवे तुलार्केपि कर्तव्यं तत्प्रयत्नतः ॥ वार्षिकांश्चतुरो मासान्वाहयेत्के
न चित्तरः ॥ व्रतेन तां समाप्नोति कल्मषं वत्सरोद्भवं ॥ वाराहपुराणे ॥ चातुर्मास्यव्रतं कश्चि
न्नरः किंचिन्नदापते ॥ नान्यथा द्विकं पापं विति हत्यत्र प्रयत्नतः इति ॥ तथा ॥ चतुर्भिरप्यथैवे चे
पंचा चातुर्मास्यव्रतं नरः ॥ कार्त्तिकशुक्लपक्षे तु द्वादश्यां तत्समाचरेत् ॥ चतुर्दशीति एषु चतु

नि·सि· कालेऽप्युपक्रांतंतद्व्रतंसमुद्रयानिमित्तंवर्जंतद्व्यंगोग्रस्तविधानेनमंत्रेणसमापयेत्॥ मंत्रस्तु॥
३०२ इदंव्रतंमयादेवकृतंप्रीत्यैतवप्रभो॥ न्यूनंसंपूर्णतांयातुत्वत्प्रसादाज्जनार्दनेति॥ तथा॥ गुरौशुक्रे
चास्तगेपिबालेवृद्धेचखंडतिथावपिचचातुर्मास्यव्रतप्रारंभंनकुर्यात्॥ तदाहवृद्धगार्ग्यः॥ न
शैशवेनामौढ्येचशुक्रगुर्वोस्तिथौवार्द्धके॥ खंडेनचिंतयेच्चातुर्मास्यव्रतविधौनरः॥ तन्नमाधवीये
प्रतिष्ठांचेतिमार्कंडेयेनव्रतनिषेधात्कथंचातुर्मास्यव्रतारंभः॥ उत्तरंविशेषवचनबलात्सा
मान्यवचनानामितरव्रतविषयमितिनिर्णयः॥ विशेषोमत्स्यपुराणे॥ शेतेविष्णुःसदाषाढेभाद्रे
चपरिवर्त्तते॥ कार्त्तिकेचप्रबुध्येतशुक्लपक्षेहरेर्दिनेइति॥ चातुर्मास्यव्रतनिर्णयः॥ अथन
दीनांरजोदोषनिर्णयः॥ कर्कटेसरितःसर्वाभवंतीहरजस्वलाः॥ अप्रशस्तंततःस्नानंवर्ष्यो
दोननावारिणीति॥ तत्स्नासुमार्कंडेयोपि॥ नमोतस्ययोर्मध्येसर्वानद्योरजस्वलाः॥ तासु ३०१
स्नानंनकुर्वीतदेवर्षिपितृतर्पणमिति॥ याज्ञवल्क्यः॥ स्नातोदुष्टेनसिस्नानंवर्ज्यंनद्या

दिषुद्विजैः॥ कर्कटादिरजस्तासांसंध्योपास्तिव्रतपर्ययांकर्कटादितत्कृसितंगार्ग्यः॥ अथषडहंस
रितःसर्वाभवंतीहरजस्वलाः॥ तासुस्नानंनकुर्वीतवर्जयित्वातुगौतमीम्॥ गौतमीतिसमुद्र
गामितरयोपलक्षणं॥ अतस्तासुरजोदोषोनास्ति॥ तदाहव्याघ्रपादः॥ सिंहकर्कटयोर्मध्येस
र्वानद्योरजस्वलाः॥ तासुस्नानंनकुर्वीतवर्जयित्वासमुद्रगा इति॥ समुद्रगाव्यतिरिक्तास्वपि
विशेषेणरजःस्रौनदीविशेषेयाकालविशेषाभिधानमुच्यते॥ तावत्स्मृत्यर्थसारे॥ धनु
र्घ्यंतिग्यः॥ कुसरितोग्रीष्मकालेनवादके॥ ऋपतिश्चैववर्षासुदशाहंतारजस्वलाः॥ तथा॥ ए
कयोजनगादिषड्योजनगोत्ताःसरितःकुल्याः॥ ततोधिकदशयोजनगानाअल्पनद्यः॥ तद
धिकयोजनगांतानद्यइति॥ कुल्याल्पनद्योनद्यश्चसप्ताहंतारजस्वलाः॥ पक्षंमासंचेत्यन्य
आहुः॥ महानदीसमाख्यातायास्त्रिंशत्सुमहानदीमिति॥ महानदीषुविशेषोमहाभारते॥
महानद्योवेदिकाचकावेरीवंजरातथा॥ एनमाचप्रदुष्टास्युःकर्कटादौस्मृहन्यपेति॥

महानद्यस्त्र्यहं त्रीणि दिनानि रजस्वलास्सु॥ तथा च स्कान्दे विष्णुपुराणे॥ आदौ कर्कटके देवि महा
नद्यो रजस्वला॥ त्रिदिनं तु चतुर्थेऽह्नि शुद्धाः स्युः जाह्नवी यथेति॥ जाह्नवी गंगा॥ न तु सुद्धा चतुर्थेऽह्नि शुद्धाः
स्युर्यथा जाह्नवीति अस्माच्च नात्र गंगाया रजोदोषः प्रतीयते॥ मैवं॥ शुद्धमात्रे दृष्टांतोयं॥ न तु
रजोदोषेपि॥ अत्र सर्वमहानदीषु प्रसक्तावपि गंगादिमहानदीषु रजोदोषो न भवति॥ तदाह
निगमः॥ गंगा धर्मद्रवी णा च यमुना च सरस्वती॥ अंतःस्रजोदोषास्सोरस्रोत इवामलाः॥ मा
र्कंडेयोपि॥ कालिंदी गौतमी गंगा वेणिका च सरस्वती॥ सामर्थ्यादिन्निजात्याश्च रजोनाभिभव
त्यमूः॥ आग्निजात्यं देवसंभृतत्वं॥ मरीचिः॥ आदित्यदुहितांगमाश्च ब्रह्मजाता सरस्वती॥ रज
सानाभिभवंते वेणा च नदसंततिना॥ आदित्यदुहिता यमुना॥ ब्रह्मजाता गौतमी॥ नदसंतति
ता इति नदाः॥ युग्मोभाः॥ इति रजोदोषो नास्तीत्यर्थः॥ एवं भस्त्रवणादिषु॥ नदीरा च वाच्येष्वपि
स्वल्पत्वाद्रजोदोषो न भवति॥ अत एव स्मृत्यर्थसारे॥ क्षुद्रनद्यः सदा रिक्ता स्रवणा इति॥ का ३१०

दंबेपि॥ आसिंहं कर्कटान्नद्यः सर्वा एव रजस्वला॥ त्रिदिनं स्युर्महानद्यो गोदा वेणा सरस्वती॥
भागीरथी च कालिंदी नर्मदा शोणादिकास्तिना॥ कात्यायनः॥ जाह्नव्यादित्यसंभूता ब्रह्मजाता
सरस्वती॥ रजसा नैव दुष्यंते नद्यः कृष्णा च वेणिकेति॥ ब्रह्मपुराणे॥ गोदावरी भीमरथी तुंगभद्रा च
वेणिका॥ तापी पयोष्णी विंध्यस्य दक्षिणे तु प्रकीर्तिताः॥ भागीरथी नर्मदा च यमुना च सरस्व
ती॥ विशोका च वितस्ता च विंध्यस्योत्तरतः स्थिताः॥ द्वादशैता महानद्यो देवर्षिक्षेत्रसंभवाः॥
पात्रास्ताना दियोगेन पापिनः पावयंति ताः इति॥ स्मृत्यर्थसारे तु विशेषः॥ स्मृतिपुराणादिषु
यत्र गंगा यमुना सरस्वती शब्दोस्ति॥ तत्रापि रजोदोषो नास्त्येवाद्भुः॥ अतीरनिवासिनां पि
तीरनिवासिनां तु रजोदुष्टेपि न तिष्ठ इति व्याघ्रपादः॥ अन्नाद्वे कूपवापीनां नद्यपि पयो न्र
ताः स्नाद्रुष्टेपि यस्मिन्नास्मनो गोन दुष्यतीति॥ रजोदुष्टमपि तोयं पुण्यनदी संगमं दृष्टमवलि
न दुक्तं मत्स्यपुराणे॥ पुण्यानां समायोगादुष्टमप्यनुपावनमिति॥ महाभारते॥ आपवित्र

पि प्राप्य गंगां यांति पवित्रतामिति॥ काशादर्शे॥ रजोदुष्टं नदीतोयं गौतमाद्यंबुसंयुतं॥ न दूषयति तत्रा
पत्यस्वमदुष्टाद्दिसागते॥ अन्यनदीसंगतं स्वं अदुष्टं भवति नान्यनदीवारि दूषयतीति भावः॥ र
जसा दुष्टेन चाद्विवारिणि संध्योपासनं स्नानं देवर्षिपितृतर्पणं च न कुर्यात्॥ तदुक्तं॥ न स्ना
नं न कुर्वीत देवर्षिपितृतर्पणमिति॥ नदीरजोदोषप्रसंगात्तडागादिषूच्यते॥ वर्षाकालेन वोद
कं त्रिदिनमशुचि॥ अकाले दशाहमशुचि॥ तदुक्तं स्मृतिसंग्रहे॥ कालेन वोदकं शुद्धं न पिबेच्च
त्र्यहं तु तत्॥ अकाले तु दशाहं च पीत्वा नाद्याद्दहर्निशं॥ तथा काशादर्शे॥ तडागादिस्थितं तोयं प्र
सन्नमशुचि त्र्यहं॥ कालेऽकाले दशाहमन्यवर्षवारिणीति॥ समेन मृदं तावा पूर्ववारिणामि
श्रं चेत्तत्तोदकं शुद्धं॥ तदुक्तं भविष्यत्पुराणे॥ मृद्धदंबुसमं चापि यदि तिष्ठेत्पुरातनं॥ नवां
बुमिश्रितं तेन न दुष्टमिति सुरयइति॥ रजोदुष्टवारिणि संध्योपासनं देवर्षिपितृतर्पणं तत्का
र्यमिति दोषः॥ अत्र विशेषः ख्याप्यपदः॥ उपाकर्मणि चोत्सर्गे प्रेतस्नाने तथैव च॥ चंद्रसू

र्यग्रहे चैव रजोदोषो न विद्यते॥ तथा॥ आजीवने वाप्यगतौ रजोदोषो न विद्यते॥ आजीवनं ग्रामो
पांतोगः॥ अगतौ गत्यंतराभावे आजीवने च रजोदोषो नास्ति॥ इति नदीनां रजोदोषनिर्णयः॥ अ
थागस्त्यार्घविधिः॥ मत्स्यपुराणात्॥ अगस्त्यः समायो विंध्ये संहतो मलयाचलस्यैकदेशे तप
स्येप॥ समुद्रं च पीतवान्॥ ततः संतुष्टैः शंकरब्रह्मादिनिर्वरं दत्तं चेत्युक्तो गस्त्यमुक्तवान् च॥ याव
अस्त्र सहस्राणि पंचविंशतिकोटयः॥ वैमानिकानविष्यामि दक्षिणापथवर्त्मनि॥ मद्विमानो
दयेकुर्याद्यः कश्चित्पूजनं मम॥ स सप्तलोकाधिपतिः पर्यायेण भविष्यति॥ एवमस्त्विति तेप्यु
क्ताजग्मुर्देवा इति॥ सपूज्यार्घः प्रदातव्यो ह्यगस्त्याय सदा बुधैः॥ उदयात्सप्तरात्रोर्द्धे कन्यासंक्रांति
तः पुरा॥ अगस्त्यार्घः प्रदातव्यः पूजां कृत्वा सदा बुधैः॥ पूजाविधिरुक्तः॥ प्रत्यूषसमये विद्वान् कु
र्यादस्योदये निशि॥ स्नात्वा शुक्लतिलैः कृत्वा शुक्लमाल्यांबरो गृही॥ स्थापयेद्व्रणांकं तं माल्य
वस्त्रविभूषितं॥ पंचरत्नसमायुक्तं घृतपात्रसमन्वितं॥ नानाभक्ष्यफलैर्युक्तं हुतपद्मवसंयुतं

अंगुष्ठमात्रं पुरुषं तथैव सौवर्णमित्यायतबाहुदंडं ॥ चतुर्भुजं कुंभमुखे निधाय धान्यानि सप्तांकु-
र संयुतानि ॥ कृत्वाऽगस्त्यसमर्पये घटं नीत्वा जलाशये ॥ अगस्त्यार्घः प्रदातव्यो रात्रौ संपूज्य भक्ति-
तः ॥ सकाशपुष्पाक्षतशुक्तियुक्तं मंत्रेण दद्याद्द्विजपुंगवाय ॥ उन्निद्रपल्लवोदरदीर्घबाहुम
नन्यचेतायमदिज्जुरवः सन ॥ अर्घमंत्रः ॥ काशपुष्पप्रतीकाश वह्निमारुतसंभव ॥ मित्रावरु-
णयोः पुत्र कुंभयोने नमोस्तु ते ॥ वातापिर्भक्षितो येन समुद्रः शोषितः पुरा ॥ लोपामुद्रापतिः श्रीमा-
न् योसौ तस्मै नमो नमः ॥ विंध्यवृद्धिक्षयकर मेघतोयविषापह ॥ रत्नवल्लभ देवर्षे लंकावास
नमोस्तु ते ॥ अनेन विधिना यस्तु पुमानर्घं निवेदयेत् ॥ स सर्वलोकानाप्नोति सप्ताघविय प्यच्छ-
ति ॥ यावदायुश्च यः कुर्यात्स परं ब्रह्म गच्छतीति ॥ ततः कुर्यात् गोदानहोमं ब्राह्मणभोजनं मि- ३१२
ति ॥ इत्यगस्त्यविकृते चलदेन ग्रंथे निर्णयः ॥ उपाकर्मादिचत्वारोऽतिर्णातानि निर्णयामृते ॥ पु-
ण्यदिनाद्यैः स्नानदानयोः अयनद्वयं ॥ मध्याह्नपूर्वरात्रसंक्रमणे तु पूर्वाह्ने ॥ उत्तरार्धे स्नानदा-

नादिकं कार्यं ॥ अर्धरात्रकालसंक्रमणे तु उत्तरादिवसस्य मध्यान्तपर्यंतं स्नानादिक्रिये ॥ यत्तु
वच्म ने विष्णुपद्यां ॥ धनुर्मीनमिथुनकन्यासु वैयदा ॥ पूर्वेत्तिरगतौ राम्नोमातो संक्रमयोस्त्वतः ॥ ए-
वं क्लिप्तं वनाड्यस्तु पुण्याः संक्रामनी षिणि ॥ अयनरात्रौ तु पंचैव श्रोतस्मार्तेचकर्मणि ॥ तुलु-
कमिथुनराशि रात्रैः पूर्वेत्तिरनागसंक्रमयोः पूर्वेत्तिरयोर्दिवसयोः पंचघटिका निधातव्यु-
पुण्यत्वा निर्णयपरं ॥ एवं च सर्वासु संक्रांतिषु अतीतानागतं त्वा वानादत्यय नदिनाद्वै आदिनारी-
न्यंत्यन्योगिनीवा संक्रांतिः संनिहितानवृत्ति ॥ तत्र स्नानदानादिकमिति सिद्धं ॥ इति दानखंडे
यदा निशीथे अर्धरात्रे संक्रांतिस्तदा वसिष्ठः ॥ संक्रमस्तु निशीथे स्याप दद्यामाः पूर्वमिष्यमा ॥
संक्रांतिकाले वित्तयास्तु तः स्नानादिकं चरेत् इति स्पष्टार्थ ॥ वृद्धवसिष्ठोपि ॥ पूर्णे चैवार्धरात्रे तु
यदा संक्रमते रविः ॥ प्राकुदिनद्वयं पुण्यं मुक्त्वा मकरकर्कटौ विति ॥ अत्र यद्यपि निशीथे मध्य-
रात्रिसंक्रमध्यरात्रिसंक्रांतेंतु दिनद्वयं पुण्यं स्नानादिकमणीति प्राप्तं ॥ तथापि संक्रांतिका

ले एवमिति षिद्धे तु पूर्वदिनं पुण्यं भिन्नायां तिथौ परदिनं तयोरुक्तः॥ आद्यो पुण्यं विजानीयात्त्य
घ भिन्ना तिथिर्भवेत्॥ अर्धरात्रे व्यतीते तु विसेयमपरेह्नि॥ अर्धरात्रे व्यतीते परदिनमेव॥
रात्रौ संक्रमणे पुण्यं दिनद्वयमिति॥ निश्चयो मकरककटव्यतिरिक्तसंक्रांतिविषयः॥ मकर
ककटयोर्विशेषः॥ तावत्कालादक्षाति॥ प्रत्यूषे वा निशायां वा मकरः संक्रमः परे॥ अहन्येव
नेन रह इति मवृविशेपिलक्षणं॥ भविष्योत्तरे॥ मिथुनात्कर्कसंक्रांतिर्यदि स्यादंशुमालिनः॥ प्र
भाते वा निशायां वा कुर्यादहनि पूर्वतः॥ पूर्वत्र॥ वृद्धगार्ग्योपि॥ अर्धरात्रे तदूर्ध्वं वा संक्रांतौ दक्षि
णायने॥ पूर्वमेव दिनं ग्राह्यं यावन्नोदयते रविरिति॥ मकरसंक्रमणे सएवाद्रुपद्यस्मैयव
त्याघां मकरयाति भास्कर॥ प्रदोषे चार्धरात्रे वा स्नानं दानं परेह्नि॥ प्रदोषे रजनीमुखे॥ ३१३
एवं पुराणेपि॥ कार्मुकं तु परित्यज्य झषं संक्रामेर विः॥ प्रदोषे चार्धरात्रे वा स्नानं दानं परेह्न
नि॥ कार्मुकं धनुर्झषं मकरं॥ अत्रोच्यते॥ अर्धरात्रे मकरककटसंक्रमेवस्तिक घटीप

विंशतिस्त्रिंशद्घटिकानां विद्यमानत्वात्॥ भवतु पराह्णवयोर्दिवसयोः पुण्यत्वं पप्यपित्वक्षषंक
र्कसंक्रमः प्रदोषे मकरसंक्रमः॥ तत्रा मकरककटयोर्विंशतित्रिंशद्घटिकातिरिक्तयोः पू
र्वापरयोरह्नोः कथं पुण्यत्वं शृणु मिथुनात्कर्कसंक्रांतिरित्यादिना वाक्येन पुण्यत्वं विधीयते सा
मान्यविशेषन्यायेन॥ आसन्नसंक्रमं पुण्यमित्यादि सर्वसंक्रांतिसामान्यं॥ मिथुनात्कर्क
संक्रांतिरित्यन्यत्र मांत्र विषयत्वाद्विशेषशास्त्रं॥ मैवं॥ न्यायादिसंकृष्टयोरह्नोः पुण्यकालताम
वेत॥ पुरं तु संन्निकृष्टस्नाग पुण्यकालतानिधायकैर्वक्ष्यमाणैरनंतरंदीयादिवचनैर्विरोधः
अयनसंक्रमे संन्निकृष्टभागस्त्वेव पुण्यत्वमुक्तं कालादर्शेपि पातयाति र्णयामृते विच॥ क
र्कमकरयोराशिसंक्रमणे सति विप्रकृष्टयोरपि पूर्वपरयोरह्नोः कृत्स्ने पुण्यत्वं सन्निकृष्टस्य रात्रिभा
गस्य पुण्यत्वं केमुत्यन्यायेन सिद्धं॥ अयनेरात्रावपि स्नानादिति पारिजातप्रकाशः॥ अंगीचकृ
तं दानरत्ने डोघपालिखितं॥ रात्रौ स्नानं न कुर्वीत दाने चैव विशेषत इति रात्रौ स्नानदानादि

ग्रनिषेधात्यसंक्रांतिविषयः॥ यत्तुमस्यपनेः॥ संक्रांत्यादिषुरात्रावपिस्नानदानादिकंकुर्यादिति
तं दक्षिणोत्तरायनपरं॥ अतएववाक्यं॥ मुक्त्वा मकरकर्कटाविति॥ तत्रमकरकर्कटयोरा
त्रावपिस्नानदानानुमदेयामा॥ संनिहितानाड्य इत्यवधेयमिति॥ दानखंडे॥ अतएवायन
संक्रमणाश्रितरात्रिभागाजहल्लक्षणयासंनिहितयोःपरएवदिनयोःपुण्यत्वं॥ एवंचदा
नखंडोक्तं मिथुनात्कर्कसंक्रांतिरित्यादितत्सर्वमनुगृहीतंभवति॥ अतअत्रविशेषः॥
अयनसंक्रामणसंनिहितरात्रिभागेस्नानादिविधानासंभवेसंनिहितदिनेकार्यमितिदुक्तं
कालनिर्णयदीपिकायां॥ अथायनमधःपश्चान्निशादक्षिणेपराससंक्रांतिदिनेशुभंतदूर्ध्वं
यच्चेति॥ इदमयनद्वयसाधारणं॥ अत्रैवमदेपुनर्विशेषः॥ धनुर्मीनावतिक्रम्य कन्यांचमिथु ३१४
नयोः॥ पूर्वेतिरविभागेतरावौसंक्रमतेरवि॥ अपराह्णेपंचनाड्यःपुण्याःसोत्कामतीषिभिःउदि
तेतुतथापंचदेवेपिश्चेचक्रमणेति॥ अस्यार्थः॥ धनुर्मीनातिक्रमेचमकरयोः॥ संक्रमसंभव

ति॥ कन्यामिथुनातिक्रमेतुलाकर्कटयोःसंक्रमणेमति॥ अत्र देअयनसंज्ञके द्वेविषवसंज्ञ
केच॥ आ सारात्रौःपूर्वभागसंक्रमणेअपराह्णपंचनाड्यःउत्तरभागसंक्रमणेउदितेपूर्वना
ड्यःपुण्याइति॥ अत्रपंचेतिभूयःपुण्यकालाभिप्रायेण॥ तत्त्वेवसंनिहितदिवसपुण्यत्वेस
तिमिथुनात्कर्कसंक्रांति॥ तथापद्मस्यामयावेलायांमित्यादिवाक्यान्यनर्थकानितिमाजीनी
हि॥ एवंवाक्यानामयनविषयेरात्रावपिस्नानदानादिविधायकत्वेनसामर्थ्यमितिमू
मे॥ अत्रदानखंडे कालादर्शपारिजातनिर्णयामृतादिग्रंथकर्तृभिर्मिथुनात्कर्कसंक्रांति
रित्यादिवचनगणायोजेवनयात्रोरोर्विष्वयनेपुण्यकालानामतिपादितास्तानथ्याद्यदिषु
क्वचनातिसंमुग्धकारेणलिखितात्ततिनंव्याख्यानातिरैत्रोपुण्यतारूपोर्थोरदीतइति॥
एषुग्रंथेषुअयनविषयेरात्रिभागपुण्यत्वाभिधायकानांविशेषवाक्यानांमदर्शनात॥ चेद
न्यत्रास्तिकाह्नानिरिति॥ एतद्वचनगणोत्रियेव्याख्यातःप्राक्॥ एवंचमुक्त्वामकरकर्क

ति.दि. टाविलस्याप्यमर्धः॥ मकरकर्कटयो रात्रौ दिवा च स्नानश्राद्धादिकं कार्यं॥ अन्यसंक्रांतौ दिवैव न
३१५ रात्राविति॥ संक्रांतिविषये रात्रौ स्नानादिविधायकानि वचनान्ययनविषयाणीति तेयं॥ तथा त्रि
शांत्कर्कटके नाड्यो मकरे विंशतिः परा॥ वर्त्तमाने तुलामेषे नाड्यस्तूभयतो दश॥ तिवेदिसिष्ठका
वाक्यवान्नमितेत्न यतइतितस्मादयनस्य रात्रिसंक्रमणे मतिरात्रावपि स्नानश्राद्धादिकं सं
तिविशेष॥ अन्ये संनिहितदिनपुण्यत्वादयो धर्माः सर्वसंक्रांतिधारणाः॥ अर्धरात्रादयस्त
स्मिन्न ध्याह्नस्योपरि क्रिया॥ ऊर्ध्वं संक्रमणे पुण्यमुदयात्प्रहरद्वयमित्यादिकाः अत अन्यथा
त्रत्सूषादिकालविशेषसंक्रमणे ग्रहणवदयनइति वचनात्॥ रात्रावपि संक्रमसंनिधानका
लमनपहाय संनिहितदिनभागयोः पुण्यत्वं॥ संनिहितदिनभागयोः पुण्यत्वं॥ संनिहितदि ३१५
नभागे स्नानश्राद्धादिकमिति च योग्यः मतिहितानाश्च यन संक्रमे स्मजहत्क्षणा निश्चये
णन विष्णोत्तरे ऽधिकः पुण्यकालो निहितः॥ यथा ग्रन्थषेककर्टवापि प्रदोषे मकरं यदि॥ सं

कमेषस्थिः नाग्रस्य पुण्याः प्रवेशिरः स्मरनाइत्ययनविषयो विशेष॥ अत्र त्रिंशत्कर्कटइ
त्यादिवचननाम्ना विशिष्टसंक्रमानुद्दिश्य स्नानादिकालं विदधाति॥ अर्धरात्रादधइत्यादि
तं वचनं तु कालतो विशिष्टाननुद्दिश्य स्नानादिकालं विदधाति॥ अथ संक्रांतिसाधारणं पुरा
णे॥ अतस्तत्र्यवलत्वादनयोर्वचनयोरेतद्विहितकालयोर्विकल्पः स्वीकार्यः॥ याया संनिहि
तानाड्यः स्ताः स्ता पुण्यतमाः स्मृता॥ संक्रांतौ पुण्यकालस्तु षोडशोभयतः कलाः॥ त्वत्रसर्पा
परागेतु यो वद्द्वृत्तिगोचर इति॥ मनुवचनं॥ अर्कश्चेच्चात्रिपुष्पे स्याद्रात्रौ चेद्दशसरद्वयं॥ सं
क्रांति॥ पक्षिणीस्ते या दाना ध्यापन कर्मस्विति॥ अयनत्र वाक्ये तिबंधांतरे वेदाध्ययनारंभे दाने
अध्यापनकर्मणि चादिनद्वयं मकरकर्कटयोः पुण्यइत्युक्तिधाय तदपि नयुक्तिसहमित्य
क्तं॥ यतः अयने विषुवे चैव शयने बोधने तथा॥ चातुर्मास्यद्वितीयासु वेदाध्यायं विवर्जयेत्॥
नित्यविहितेन ध्यायोन भवति॥ तदुक्तं स्मृत्यंतरे॥ वेदोपकरणे चैव स्वाध्याये चैव नैत्यिके॥ ना

नि॰दी॰ नुरोधोस्स्तनध्यायेदाममंत्रेषुचैवहि॥ इतिनिर्णय॥ अत्रकर्तव्यमुच्यते॥ स्नानंश्राद्धंदानं
३१६ चग्रहणेसममेषपिक्रयाति॥ याज्ञवल्क्यः॥ राहुदर्शनसंक्रांतिविवाहात्ययवृद्धिषु॥ स्नानदानादि
कंकुर्यान्निशिकाम्यव्रतेषुचेति॥ आदिशब्दादेवार्चनजपहोमादि॥ वसिष्ठः॥ उपोष्यैवतुसंक्रां
त्यांस्नातोयोभ्यर्चयेद्धरिं॥ प्रातःपंचोपचोपचारेणासकाम्यफलमश्नुते॥ अयनेविषुवेचैवदिनरात्रौ
पोषितोनरः॥ स्नात्वाचपूजयेदीशमवंतिकामाश्रममक्षयइति॥ स्नानादेःफलमाहवृद्धवसिष्ठः॥
अयनेकोटिगुणंस्याल्लक्षंचविषुवेफलं॥ षडशीत्यांसहस्रंतुफलंविष्णुपदीषुचेति॥ नारदः॥ ज
षडशीत्यांतुयद्दानंयद्दानंविषुवद्वये॥ दृश्यतेसागरस्यांतस्तस्यांतोनैवदृश्यते॥ शातातपः॥ कृषा
क्षदायनमध्येविष्णुपद्यांविषुवति॥ षडशीतिस्तस्यांतोनैवदृश्यते॥ मत्स्यनागेस्नानादिविधिरा ३१७
हइति॥ नकेवलमादित्यस्यैवसंक्रमणसमयेपुण्यकालः॥ किंतुसर्वेषामपिग्रहाणां॥ त
स्तत्रराशिसंक्रमणेपुण्यकालोभवतीति॥ तदुक्तंज्योतिःशास्त्रे॥ तदत्रार्थतोभिधीयते॥ सा

र्द्धास्याचाक्परतश्चषोडशनाड्यःपुण्याः॥ तथाचंद्रस्यापिराशिनक्षत्रगमनेघटिकैकापलानि
त्रयोदश॥ अर्वाक्परतश्चषोडशपुण्यकालः॥ एवमंगारस्यघटिकाश्चतस्रःपलमेकंपुण्यकालस्त
था॥ बुधस्यतिस्रोघटिकाश्चतुर्दशपलानि॥ बृहस्पतेरपि॥ सार्द्धचतस्रोघटिकाःसप्तपला
नि॥ शुक्रस्यचतस्रोघटिकापलमेकं॥ शनैश्चरस्यापिषोडशघटिकाःपलानिसप्तपुण्यका
लइति॥ एषुकालेषुआद्यंतमध्येजपदानहोमक्रियांवितन्वानोतिसुरेंद्रधामेति॥ इतिसंक्रांति
निर्णयः॥ कृतेचलिद्विवेदेनग्रंथेनिर्णयदीपके॥ स्नानादिकालस्त्वायत्तातःसंक्रांतिनिर्ण
यः॥ अथेदानीमधिमासोनिर्णीयते॥ तत्रतावत्तेमासास्तुचतुर्विधाइतिनिरुक्तं॥ दर्शावधिमा
समुशंतिचांद्रंसौरंतथाभास्कर राशिचारात्॥ नक्षत्रमिंदोर्भगणप्रचारात्त्रिंशद्दिनंसावनं
वदंति॥ एतेषांप्रमाणान्युक्तानिब्रह्मसिद्धांतेचांद्रःशुक्लादिदर्शांतःसावनःत्रिंशतादिनैः॥
एकराशौरविर्यावत्कालंमासःसभास्करः॥ सर्वर्क्षपरिवर्तैस्तुनाक्षत्रोमासउच्यतइति॥ शु

कृष्णपक्षाद्यारंभनेदं चांद्रस्यापि द्वैविध्यं वदंति॥ तदाह त्रिकांडमंडनः॥ चांद्रोपि शुक्लपक्षा
दिः कृष्णादिरितिद्विधा॥ कृष्णपक्षादिकंमासंनांगीकुर्वंतिकेचनेति॥ केचनविंध्याद्दक्षिण
तोवासिनः॥ तैः शुक्लप्रतिपदादिर्मासो गौणः क्रियते न कृष्णप्रतिपदादिः॥ शुक्लप्रतिपदादिर
मावास्यांतश्चांद्रोमासः॥ व्यवहारविज्ञोसंतिरविद्वितामवेति तदा अधिमासः स्यपोदर्शोमास
इतिकथ्यते॥ तत्तुल्यावृत्तावमासाः संवृत्तं रइतिश्रुतेः॥ काम्येत्र पोदर्शोमास इति सत्यं॥ अस्ति
त्रयोदशोमास इतिश्रुतावपि त्रयोदशेन मस्याभिधानमुक्तं॥ तस्मात्स एवात्र सोधिमाससाम
लपासोमलिम्लुचइतिपर्यायोरुच्यते॥ अयमधिमासागमेकालनियमो ज्योतिःसागरात्॥
त्रिंशत्षड्भिर्मासामास्यंतरेइत्यर्थः॥ वासिष्ठसिद्धांते तु विशेषः॥ द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षो
डशभिस्तथा॥ घटिकानां चतुष्केण पतत्यधिमासिकइति॥ अधिमासाहारस्येत्यर्थः॥ एवंस
तियत्क्षयेकैसंक्रांतिपर्यंत स्यात्स्तितासिते॥ अधिमासस्तदा ज्ञेयो निंदितः सर्वकर्मसु॥ ३७

अत्रवचनांतरं॥ अमावास्यामहोरात्रेयदा संक्रमते रविः॥ मनुमासः पवित्रः स्यात्ततोऽ
धिकोमवेदिति॥ अस्यार्थः अमावास्यां प्राप्य यदा अहनिवा रात्रौ वा रविः संक्रामति तदा सचा
न्द्रोमासः पवित्रः स्यात्॥ यदा पुनरमावास्यां प्राप्य यदा अहनि वा रात्रौ वा रविः संक्रामति त
दा सचांद्रोमासः पवित्रः स्यात्॥ यदा पुनरमावास्यां प्राप्ते अतीते मतिप्रतिपदि संक्रामते
तदा चांद्रोमासोऽधिमासः स्यादिति व्याख्यातं अनंतभट्टेपि॥ अधिमासोधिकोमासस्त्रयो
दशोमास सर्वकर्मविद्भिः कृतस्तदाहपेगनस्तिः॥ श्रौतस्मार्तक्रियाः सर्वाः द्वादशेमासि
कीर्तिता॥ त्रयोदशेतु सर्वास्तानिःफला इतिकीर्तिताः॥ तस्मात्त्रयोदशे मासि कुर्यात्तान्क
र्मवन॥ कर्वनेनधर्मविद्यायुक्तयत्किन्नविनाशनमिति॥ तद्गुणाफके॥ एकराशिस्थितेसू
र्येयदादर्शद्वयं भवेत्॥ हव्यकव्यक्रियाहंतात दन्तेयोधिमासिकइति॥ स एवायमलिम्लु
चः मलमासोऽपिच॥ तदुक्तं ग्रंथपरिशिष्टे॥ मलिम्लुचस्तमासोमलिकः पापसंभवः॥ग

दिति पितृदेवेभ्यः सकर्मसु संत्यजेत्॥ सोपि चांद्र एव॥ तदुक्तं ज्योतिःशास्त्रे तिथिय्यतावेकवारे
यस्मिन्नस्यादिनक्षये॥ चांद्रोमासोप्यसंक्रांतो मलमासः प्रकीर्तित इति तत्र॥ चंद्रःस्याद्रवि
संक्रमेणारहितो मासः सितादिः क्रिया इति दीपिका॥ गार्ग्यः॥ आमावास्याद्वयं यत्र रविसंक्रां
तिवर्जितं॥ मलमासः स विज्ञेयो मासः स विज्ञेयो मासः शुद्धाख्यमन्तरः॥ मैत्रेयसूत्रेपि॥ अमाव
स्याद्वये यप्येकराशिसंक्रमेतादित्यः तत्राद्यो मलिम्लुचः शुद्धोन्य इति॥ व्यासः॥ सिनीवालिम
तिक्रम्य यदा संक्रमते रविः॥ पूर्वमानं परित्यज्य कालस्तत्रोत्तरः स्मृतः॥ त्र्योधिमासः॥ अत्र
सिनीवालीति समयद्वयोपलक्षणा॥ यतदर्शस्य कलामात्रावशेषे रविसंक्रमणे सति असंक्रां
तो न भवति॥ तदुक्तं॥ दर्शेकलावशेषे तु यदा संक्रमते रविः॥ तदासंक्रांतमासोपि विद्वद्भिः परि ३१९
गीयते॥ इति॥ अनंतोक्तं॥ रविणा लंघितो मासश्चांद्रः ख्यातो मलिम्लुच॥ तत्र यद्विहितं
कर्म तत्तिरेमासि कारयेत्॥ एवं षष्टिदिनो मासस्तद्वत्तु मलिम्लुच॥ तस्कातदुत्तरेकुर्या

त्पितृदेवादिकाः क्रियाः॥ ज्योतिःपितामहोपि॥ षष्ठ्या तु दिवसैर्मासः कथितो बादरायणे॥ पूर्वा
र्द्धं तु परित्यज्य कर्तव्या उत्तरे क्रियाः॥ तथा ऋष्यशृंगः॥ संवत्सरातिरेको वै मासस्सैवत्र द्वा॥ असु
राणां तु मासोसौ तस्माद्देवविगर्हितः॥ तस्मात्प्रयोदश्येयाद्येनेक पन्नोपपति ष्टते॥ इत्यादि स्मृति
वाक्यैरधिमासे सर्वकर्मकर्त्ता निवृत्तिः प्राप्तो सत्याके षुचिदनुज्ञामनुदर्शयति॥ तावद्बृहस्पतिः॥
नित्यनैमित्तिके कुर्यात्प्रयतः सन्मलिम्लुचे॥ नित्यमावश्यकं यन्मासविशेषणामनिरपेक्षमेवव
हितं॥ यथाहरहः श्राद्धं पंचमहायज्ञदेवार्चनातिथिपूजादि॥ मत्स्यपुराणेप्युक्तं॥ दर्शेवाहर
हश्राद्धं हातं च प्रतिवासरं॥ गोभूतिलहिरण्यानां संध्योपासनयोः क्रिया॥ पर्वहोमश्चाग्रहणं
सोमैरिष्टिश्च पर्वणोः॥ नित्याग्निहोत्रहोमश्च देवतातिथिपूजनं॥ स्नानं च स्नानविधिनाप्यस्न
श्यापेयवर्जनं॥ तर्पणं च निमित्तस्य विहितत्वान्नित्यत्वं॥ तथा च गोभिलः॥ नित्यं नैमित्तिदानं
नरः कुर्यान्मलिम्लुचे॥ तीर्थस्नानं गजच्छायां श्राद्धं दैवनदिने चरेत्॥ आदिशब्दाद्ग्रहणादिम

दिप्रेतकार्यंकार्यं॥दाहादिप्रथमाब्दिकांतमखिलंप्रेतस्यकार्यंतिथावेतिदीपिका॥सत्यव्रतः॥म
लिम्लुचाख्येमासिविपद्येतयदिद्विजः॥तस्मिन्नपिचाकर्तव्याःपिंडदानोदकाःक्रियाइ
ति॥द्विजइतिवर्णमात्रोपलक्षणं॥कालादर्शे॥द्विजइतिवर्णमात्रेमरणादारभ्यदहनअस्थि
छादनतिलोदकपिंडदानंनवश्राद्धंद्वादशाहषोडशश्राद्धंसपिंडीकर्मकारणांतकमकार्यं॥
सत्यव्रतः॥अब्दमेकंघटंदद्यादन्नमान्नेनसंयुतं॥संवत्सरेप्रवृद्धेपिप्रतिमासंचमासिकमिति॥
मासिकंनैमित्तिकं॥अन्यदपिनैमित्तिकंमलमासेकार्यं॥तदुक्तंगर्गेनबिना॥नकुर्यान्मलमा
सेपिकाम्यंकर्मकियंचतं॥मुक्त्वानैमित्तिकंश्राद्धंतद्धिनैवकीर्तितं॥प्रेतश्राद्धंनैमित्तिकं॥अ
तश्चकदाचकरवपरिशिष्टे॥प्रेतसंवत्सरादिमारभ्यश्राद्धपिंडोदकक्रिया॥सपिंडीकरणात्प्राक्
यथाकालंप्रकीर्तिताइति॥यथाकालमितिपदेनतिमिन्नंतदैवेति॥तथाहारीतः॥असंक्र
मेतुकर्तव्यमाब्दिकंमासिकंतथा॥त्रावंस्यपिंडतांतच्चवत्सरोदघटादिकमिति॥संवत्सरे

प्रवृद्धेसंवत्सरमध्यपतितेमलिम्लुचेएकंमासिकंकृत्वाद्वितीयमासिमुख्येपिकल्प्यदधिकं
कुर्यात्॥तदाहवृद्धवसिष्ठः॥संवत्सरमध्येयद्यधिमासोभवेत्तदामासिकार्थंदिनमेकंवृ
द्धिनयेत्॥वृद्धवसिष्ठोपि॥श्राद्धीयंयानिसंभासेअधिमासोनवेद्यदि॥श्राद्धद्वयमकुर्वीतए
वंकुर्वन्नदुष्यतीति॥श्राद्धद्वयमकुर्वीतएवंकुर्वन्नदुष्यतीति॥श्राद्धद्वयमितिप्रेतश्राद्धेद्वये
पूर्वमासोत्तरमासयोरितिव्याख्यातमनंतभट्टैः॥अतःअब्दमासिकंतस्मिन्कृतमेव॥द्वि
तीयमासिकत्रिपक्षादिकयोर्मलमासप्राप्त्यानुरोधेनैवभवतिन्यायः॥भविष्यत्पुराणे॥आवर्ग
द्वादशमीतस्यपस्पमासास्यपोदशाश्राद्धंतस्यापिकर्तव्यंप्रतिमासंतुवत्सरं॥चक्रवत्परिवर्त
तेतसूर्यःकालवशाद्यतः॥अतःसांवत्सरंश्राद्धंकर्तव्यंमासवर्जितं॥कर्तव्यं॥पौषमाघमेवृद्ध
ति॥व्यासोपि॥अधिमासोपिन्यूनानांसौरमासंसमाश्रयेत्॥सएवतस्यमासोपिश्राद्धपिंडो
दनैरिति॥यदापुनस्तनमासात्त्रयोदशोएवाधिमासोभवति॥तदातस्मिन्नेवमलिम्लुच

चेत्सर्वं प्रेतश्राद्धं समाप्य प्रथमाब्दिकं कुर्यात्॥ तदप्युक्तं वृद्धवसिष्ठेन॥ असंक्रान्तेऽपि कर्तव्यमा
ब्दिकं प्रथमं द्विजैः॥ तथैव मासिकं श्राद्धं सपिंडीकरणं तथेति॥ द्वादशाहादौ सपिंडीकरणप
क्षे कृतं चेत् मलमासेऽपि कृत्वाब्दिकं कार्यं विषमिध्येऽधिमासागमे अर्वाक्चतुर्दशमासे प्रथमाब्दिकं॥
आब्दिकं प्रथमं यत्स्यात्तत्कुर्वीत मलिम्लुचे॥ त्रयोदशे तु संप्राप्ते कुर्वीत पुनराब्दिकं॥ तथा॥
मलमासमृतानां पुनर्गच्छता कालेन मासे प्राप्ते पुनः प्रतिसंवत्सरश्राद्धं मलमास एव कार्यं
न शुद्धमासे॥ तदाहतुः॥ मलमासमृतानां श्राद्धं यत्प्रतिवत्सरं॥ मलमासेऽपि कर्तव्यं नान्ये
षां तु कदाचनेति॥ अन्येषां मलमासादन्यमलमास एव न कार्यं किंतु अन्यपत्रापीति वक्ष्य
ते॥ मलमासमृतस्य प्रत्याब्दिकाभिप्रायेण॥ शातातपः॥ एकसंत्तौ यदा मासौ स्यातां संवत्स ३२१
रे क्वचित्॥ तत्राद्ये पितृकार्याणि दैवकार्याणि चोत्तरे॥ तथा सत्यतपाः॥ वर्षे वर्षे तु यच्छ्राद्धं मृ
ताहे तन्मलिम्लुचे॥ कुर्यात्तत्र प्रमीतानामन्येषामुत्तरत्र तु॥ अन्येषामिति मलमासादन्य

मृतानां शुद्धमास एव कार्यमित्यर्थः॥ अन्यान्यपि मलमासे प्रत्याब्दिकविधायकानि मलमास
मृतविषयाणीति ज्ञेयं॥ मलमासमृतस्य प्रतिसंवत्सरादौ मलमासाभावे शुद्धे मासि कुर्यादिति दाड
व्यासः॥ अधिमासे विपन्नानां सौरमानं समाश्रयेत्॥ स एव तस्य दिवसः श्राद्धपिंडोदकादिषु
तथा च स्मरणं॥ मासपक्षतिथिस्पृष्टे यस्मिन्कस्मिन्मृतेऽहनि॥ प्रत्यब्दं तु तथाभूतं क्षयाहं तस्य तं
स्मृतं विदुः॥ मलमासमृतव्यतिरिक्तानां प्रत्याब्दिके मलमासे सति विशेषः॥ सत्यव्रतवचने ध
र्षे वर्षे तु यच्छ्राद्धं मातापित्रोर्मृतेऽहनि॥ मलमासे न तत्कार्यं व्याघ्रस्य वचनं यथा॥ एतद्द्वितीया
द्याब्दिकपरं प्रथमाब्दिके मलमासे कुर्यात् मलमासे श्राद्धं मलमासेऽपि तत्स्मृता॥ अपि त्वाब्दाद
र्यमर्थः॥ न केवलं शुद्धे मासे मलमासेऽपि तत्कार्यं मृताहलक्षणस्य निमित्तस्योभयत्र विद्यमान
त्वेऽपि मलमासप्रमीतानां मलमास एवान्यमासप्रमीतानां शुद्ध एवेति कालादर्शे व्याख्यातं॥
कात्यायनोऽपि॥ गर्भे वार्धुषिके प्रेते त्यक्ते नित्ये तु मासिके आब्दिके च तथा श्राद्धे नाधिमासं वि

वर्जयेत्॥ व्यासः॥ षष्ट्या तु दिवसैर्मासः कथितो बादरायणिः॥ उत्तरे देवकार्याणि पितृकार्याणि
चोभयोरिति॥ यद्यपि पितृकार्यं श्राद्धमुभयत्रोक्तं॥ तथापि पूर्वमासे प्रतिसंबंधित्वेन क्षयस्य दि
नस्य शून्यता दोषनिरासार्थं श्रवणान्मोनयित्वा शुद्धे मासे शुद्धे मासे श्राद्धं किं यादित्यनंतभट्टाः॥ वृद्धै
क्तं॥ तथाच हृत्यासारे॥ पिंडवर्ज्यमसंक्रांतौ संक्रांतौ संक्रांतौ पिंडसंयुतं॥ प्रतिसंवत्सरश्राद्ध
मेवं मासद्वयेपि च॥ तथा क्षयाद व्यतिरिक्तेपि युगादौ मासद्वयेपि श्राद्धं कुर्यात्रिदुक्तं स्मृतिसंग्र
हे॥ यौगादिकं मासिकं श्राद्धं चापरपाक्षिकं॥ मन्वादिकं कृतैः पिकिं कुर्यान्मासद्वयेपि चेति॥ अ
त्र मलमासविषयोपरपक्षोऽग्रत्यतेमवेष्प्येवापरपक्षोऽग्रत्यते सर्वेष्प्येवापरपक्षस्याद्धः सुदत्तेपि
न्हत्त्रीणातीतिवचनेन॥ नमहालयापरपक्षः॥ महालयाष्टकेचेति न कुर्यात्रितु लंघितत्र ३२२
तिवचनात्॥ यत्र त्वष्टकायाः कर्तव्यत्वमुक्तं॥ तत्र तद्वादशाष्टकाः इति बलपायादि क्वाहन्नाष्ट
कः क्रियंते तदा मलमासे कार्या न त्वदा मरीचिः॥ प्रतिमासं मताहे च यश्राद्धं प्रतिवत्सरं

मन्वादौ च युगादौ च तन्मासोरुभयोरपीति॥ यत्तु जाबालिवचनं॥ एकराशौ स्थिते सूर्ये यदि
मासो धिको भवेत्॥ एकोद्दिष्टं तु पूर्वत्र न परत्र कदाचनेति॥ तस्याप्ययमर्थः॥ पूर्वमासनिमि
त्ताधीनमेकोद्दिष्टमन्यत्र न कुर्यादिति॥ उत्तरे देकार्याणि पवित्रारोपणदेवीनागपूजादिकृ
त्यधर्मशास्त्राप्तानियान्युत्तरे क्रियमाणानि न दुष्यंति॥ न मास्तु प्रवी धिकानि भवंति॥ रत्यप
रिशिष्टात्॥ मलवदंतिकालस्य मलमासविदोजनाः॥ न हि तत्र विशेषेण्यामन्यत्रावश्यका
धिधे॥ आवश्यकाश्व पौर्णमासादिविधेरन्यत्र विशेषेष्यां मलमासेनाचरेत्॥ यस्यामुत्त
रमासिक्रियामाणा यो नास्ति विधिलोपः॥ यथा वसंते विहितस्य ज्योतिष्टोमस्य द्वितीयचैत्रा
एव क्रियमाणस्य वसंत एव कृतत्वान्नास्ति विधिलोपः॥ तथाहारीत॥ उपाकर्मतयोत्सर्गको
ह्यमुक्तवमष्टकाः॥ मासवृद्धौ पराः कार्या वर्जयित्वा तु पैतृकं॥ इंदोनस्यव षिविद्धः यतः प
रिवर्त्तनं॥ दुर्गङ्का स्थापनोत्थाने वृजोपायांतं च वक्रिणः॥ पूर्वं च प्रतिपि पातिपरत्रात्वत्तु देवि

कमिति॥ दमनार्पणं सपवित्रं। अवरोहकर्म आग्रहायणीइति॥ तथा वाचस्पतिनोक्तं तदुच्य
तेपरिशिष्टात्॥ सोमयागादिकर्माणि नित्यान्यपि मलिम्लुचे॥ तथैवाग्रयणाधानचातुर्मास्या
दिकान्यपि॥ मलिम्लुचे वर्जयेदिति शेषः॥ तथा॥ उपाकर्म च हव्यकव्यं पर्वैश्चिवतिष्या॥ अन्त
रे नियतं कुर्याद्वेतन्निःफलं न वेत्॥ पराशरः॥ पक्षद्वयेर्कसंक्रांतिर्यदा न स्यात्क्षितौ स्थिते।
तदा तन्मासिकं कार्यमुत्तरमासि कारयेत्॥ तन्मासिकाशब्देन यन्मासविशेषताम संबंधेन
विहितं यथा वैशाखे अक्षय्यतृतीयादिव्रतं तस्मिन्मलमासे वैशाखे आरंभः॥ ज्येष्ठे सावि
त्रीव्रतस्य आषाढे चातुर्मास्यव्रतानां श्रावणे जन्माष्टमीव्रतस्येत्यादि नामरंभः॥ तथांत्यांतरे
ष्वष्टमासविशेषो दव्य विहितं वर्जयेन्मले इति॥ तथा आरब्धे कामेकर्मणि समाप्तिकाव्यात् ३२३
र्वक्रमध्यपतिते धिमासेपि काम्यं कार्मकार्यं। यथा चातुर्मास्यव्रतानां कार्तिकावधिकानां
संकल्पितानां मध्ये परित्यागस्य संकल्पविरोधेनाप्रयुक्तत्वादित्यनंतभट्टः॥ काम्यानामना

रंभसमाप्तिं च मलमासे न कुर्यात्॥ तत्र पुराणस्मरणं॥ आसुप्तिनामयेमामानतेषुमसं
मताः॥ व्रतानां चैव यत्तानामारंभश्च समापयइति॥ काचादशेपि॥ व्रतारंभसमाप्तीच क
र्मकाम्यं च पात्पन्ते॥ प्रायश्चित्तं यसर्वस्मिमलमासे विवर्जयेत्॥ प्राप्ततः प्रायश्चित्तस्य वर्ज
नमतिक्रांतं कुर्यात्॥ तदानीमुत्पन्नं कुर्यादेवज्योतिः॥ पराशरः॥ अग्न्याधानं प्रतिष्ठां च य
ज्ञदानव्रतानि च॥ देवव्रतवृषोत्सर्गचूडाकरणमेखलाः॥ मांगल्यमभिषेकं मलमासे विवर्ज
येत्॥ प्रतिष्ठादेवीरामतडागवापीकूपादिकाःयत्तः॥ दानाभिमहादानं तेनयातिशास्त्रे
प्रसिद्धानि षोडश॥ तथा॥ जलघृतदधिक्षीरादिधेनव॥ यातग्रहत्रयतो मुख्यादिग्रंथांत
रे॥ व्रतानि काम्यानि॥ तथा वेदव्रतानि च वृषोत्सर्गः काम्यान तु नैमित्तिका॥ तद्बौधायन॥
अयं च यस्योत्सर्जनं तद्बुद्धिधं काम्यं नैमित्तिकं च॥ एकादशाहे नैमित्तिकं॥ कार्तिक्यां वै
शाख्यां प्रकाशेणसंक्रमेपि चक्रिपमाप्य काम[illegible]कर्मप्रतिषेधं॥ मेखला मौंजीबंधनं

अभिषेकोराज्याभिषेकःप्रथमः।तानिवर्जयेत्॥वाताद्यावसिष्ठः॥वापीकूपतडादिप्रतिष्ठायत
कर्मच॥नकुर्यान्मलमासेतुमहादानव्रतानिच॥गार्ग्यः॥नामान्नप्राशनंचौलंविवाहंमौंजि
बंधनं॥कर्मजीतकर्मापिकाम्यंवृषविसर्जनं॥निष्क्रमंचतुर्थेमासिकुमारस्यामरादि
नदृष्टवेद्यागोदानस्थानाश्रममहोत्सवान्॥नकुर्यान्मलमासेपिगुरौशुक्रेतथास्तगे॥आ
श्रमोवानप्रस्थयागस्याश्रम॥देववह्न्यादतिक्रांतमहोत्सवंमलमासेनकुर्यात्॥अतिपन्नंह
वमहोत्सवमितिकाश्यादर्शविचनात्॥मत्स्यः॥आधानंयत्तकर्मापिप्रायश्चित्तंतोनिच॥न
कुर्यान्मलमासेपिसुकरावेकिपपल्लवे॥वपल्लव॥भस्तमयः॥गार्ग्यः॥आनादिदेवतावह
ह्नामुचसुनष्टिमार्गयि॥मलमासेप्यनावृत्ततीर्थयात्रांविवर्जयेत्॥भार्गवइलेतद्गुरोरप्युपलक्ष
णं॥तथाऽस्तंगुरौशुक्रेबालेमलिम्लुचे॥उद्यापनमुपारंभंव्रतानांनैवकारयेत्॥स्मृतिसं
ग्रहे॥आरंभंदर्शपूर्णेष्टयोरग्निहोत्रस्यचादिमं॥प्रतिष्ठःपंचरूमाघामलमासेविवर्जये

त्॥कुमतिजाप्रतिष्ठाद्याःपंचगार्ग्यः॥नामकर्मचजातेष्टिंयथाकालंसमाचरेत्॥एतिपातेतुक
वतिमलस्तेमासिपुण्यदइति॥स्त्रामाहात्म्यरतो॥राज्ञोभिषेक॥प्रथमःशुद्धकालेप्रतिष्ठते॥
प्रत्यादिकतुनित्यत्वात्कालमात्रपिवानवेत्॥अथकाम्यनित्यनैमित्तिकेषुविशेषमाह॥हा
रीतः॥अधिमासेनकर्त्तव्यंश्राद्धमाब्दिकंतथा॥यथोक्तयत्काम्यंकर्मवत्सरात्प्रथमाहते॥का
म्यंकर्ममलमासेनारंभेत्॥वत्सरात्प्रथमाहतेप्रथमसंवत्सरंविहायआब्दिकंश्राद्धंम
लमासेनकर्त्तव्यंप्रथमेसंवत्सरेमलमासेप्राप्तेसपिंडीकरणेविहितं॥तदुत्तरदिनेविहितमा
ब्दिकंमलमासेपिकार्यंतथाचोक्तं॥नानावाक्यात्पुत्रोवासपिंडःशिष्यएवच॥सहिपिं
डक्रियांकृत्वाकुर्यादब्दिकंततः॥अब्दिकयमाब्दिकंश्राद्धंविश्वरूपितमिति॥तथास
पिंडीकरणादूर्ध्वंयत्किंचिच्छ्राद्धिकंभवेत्॥इष्टवाप्ययवापूर्त्तंतत्कुर्यान्मलिम्लुचे॥त
थापिआमावास्याश्राद्धेमलमासेमृतस्याह्नदर्शाहेकृतसपिंडनेसतिमलमासेप्रमाता

स्यारंभः स्यात्॥ जातकर्मणि षष्ठ्यादिदशाहश्राद्धमिति व्यासवचनात्॥ एवमधिमासनिर्णयः॥ पुन
रत्रैव विशेषो ज्योतिःसिद्धांते॥ घटकन्यागते सूर्ये द्वित्रिकेप्यपधन्त्विति॥ मकरे वाथ कुंभे वा
धिमासो विधीयते॥ अस्यार्थः॥ घटस्तु लातुलादिराशिषु कुंभांतेषु स्थिते सूर्ये अधिमासः स्य
न्नावतो नास्ति॥ भाद्रपदामावास्यायां कन्यागतः सूर्यो भूत्वा अन्यामावास्याविद्धप्रतिपदि द्वि
तीयायां वा तुलां गच्छति॥ तदा आश्विनोधिमासो भवति॥ तदा कन्यागते सवितरि यात्यहानि तु
षोडशक्रतुभिस्तानि तुल्यानि पितृणां दत्तमक्षयमिति षोडशश्राद्धं पूरणमाश्विनप्रतिपदि भव
ति॥ तच्छ्राद्धं प्रतिपदि भवति॥ तच्छ्राद्धं प्रतिप्रतिपदि भवति॥ तच्छ्राद्धं प्रतिषिध्मानोपि मल
मासो नास्तीर्थसिं॥ कन्यासंक्रांतिनिमित्तानां षोडशदिवसेषु नैमित्तकत्वात्॥ निमित्तकस्य ३२५
श्राद्धस्य मलमासेपि न प्रतिषेधः॥ यथाह प्रजापतिः॥ नक्तं यदि धिके मासि काम्यं कर्मकृदा
चरन्न स्यात् नैमित्तिकं श्राद्धं तद्धि तत्रैव कीर्तितमिति॥ आद्यप्रतिपच्छ्राद्धं त्वाश्विनप्रतिपन्नि

मित्तत्वेन पूर्वमासे न स्यात्॥ पितृकार्यत्वो नोनयोवस्यात्॥ अस्मिन्वर्षे आश्विनोधिमासो भवति
तस्मिन्वर्षे द्विसंक्रांतमासः संभवेत्॥ स मलमास इति॥ क्षयाह्वय इति वक्ष्यते॥ ताव कुंभांतरे
संक्रांतिद्वययुग्मासो मलमासः क्षयस्तथा॥ संक्रांतिद्वयेन युक्तयोगोयस्येति विग्रहः॥ मासः सि
तादिश्चांद्र एव॥ यस्मिन्मासे रवी राशिद्वयपर्यायोगयुक्तो भवेत्स मलमास इति॥ तदुक्तं स्मृत्यन्त
रे॥ राशिद्वयपर्याये मासे संक्रमेत दिवाकरः॥ नाधिमासो भवेद्दोषः मलमासस्तु केवल इति॥
अस्य वधिमासो न भवेत्॥ केवलमलमासविते यो मासे त्रिंशत्तमे भवेत्॥ कश्चिन्तु मासस्या
नु तयोः क्षयाह इति पाठ॥ अथ द्विसंक्रांतमासः क्षयसंज्ञक इति तदुक्तं ज्योतिःसिद्धांते॥ असंक्रांत
मासः स्फुटः स्याद्द्विसंक्रांतमासः क्षयाख्यः कदाचित्॥ क्षयः कार्तिकादित्रये नान्यतः स्यात्तदाव
र्षमध्ये धिमासद्वयं च॥ द्विसंक्रांतमास इति यस्मिन्मासे रवेः॥ संक्रांतिद्वयं भवति स स कल्पध
र्महीनः॥ मलमासः क्षयाख्य इति च॥ स क्षयमासः कार्तिकादिषु त्रिष्वेव मासेषु भवेत्नान्य

त्र॥ यस्मिन्वर्षे क्षयमासो भवेत्तिन्तदा तस्मिन्नेव वर्षमध्ये क्षयमासात्पूर्वभागे च एकोधिमासः॥ उ
त्तरभागे च॥ एक एवमधिमासद्वयं भवतीत्यर्थः॥ एवं त्रयोदशमासात्मके वर्षे अधिमासद्वा
दः क्षयमासाद्रूर्ध्वमाविन्यसंक्रांतमासेष्व वर्त्तते न पूर्वमाविति॥ तदुक्तं तत्रैव॥ एकत्र मासद्वि
तये यदि स्याद्वर्षाधिकस्तत्र परोधिमासः॥ त्रयोदशांतश्च कृतिराद्भवेच्च चतुर्दशाः क्वापि न चा
स्ति इष्टइति॥ यदाप्यिनादिपक्के एव क्षयमासात्पूर्वमपि स्याद्वैवमधिमासद्वयमिति चोक्तं॥ तद्वा
प्यधिमाससंसर्पोपर इति चैत्रादिपक्षे धिमासद्वयं न भवत्येव॥ तस्य क्षयमासस्योन पृथापार्श्व
वर्त्तित्वात्॥ क्षयमासवर्षमध्ये तु सर्वमंगलादिषु द्वावसंक्रांतरूपावधिमासौ क्षयइति त्रयं
त्याज्यानद्रुक्तं ज्योतिःशास्त्रे॥ यद्वर्षमध्ये त्वाधिमासयुग्मं तत्कार्त्तिकादित्रितयेक्षयाख्ये॥ ३२६
मासत्रयं त्याज्यमिदं प्रयत्नाद्विवाहयज्ञोत्सवमंगलेष्विति॥ राबदीपिकापि तत्रद्वावधिमास
कौ क्षयइति त्याज्यं॥ त्रयं कमपि त्याह्येषु सर्वमंगलेषु चेति॥ तथा ग्रंथांतरे यस्मिन्मासे द्वि

संक्रांतिरधिकं मासद्वयं तदा॥ तद्विमासत्रयं दुष्टं सर्वेषु शुभकर्मसु॥ यस्मिन्वर्षे द्विसंक्रांतिमासस्त
स्मिन्नधिमासद्वयं भवेतित्रोषसुगमं॥ तथा यस्मिन्नब्दे असंक्रांतमासद्वयसंक्रांतिद्वययुक्त
एको मासस्तत्राद्यो असंक्रांतः संसर्पसंज्ञः द्विसंक्रांतः स्पतिसंज्ञोन्योधिमास इति कालनिर्ण
यकारिकाभिधान पूर्वप्रसिद्धवि॥ वाहादिकर्मसु तत्र योपि निंदित इति॥ तथा च बृहस्पतिज्योति
र्गर्गोपि॥ यस्मिन्मासे न संक्रांतिः संक्रांतिद्वयमेव वा॥ संसर्पांहस्पती मासावधिमासश्च निंदि
ता इति संसर्पांहस्पती संज्ञेव चनात्॥ दर्शद्वयेधिके यस्मिन्॥ सौरे संसर्पको भवेत्॥ अंहस्प
तिर्यदि कस्मिंश्चाब्दे द्वौ संक्रामौ तदा॥ अहमज्ञः तत्पतिरि॥ यत्र मासद्वयेब्दमध्ये तु संक्रांतिर्न
यदा भवेत्॥ प्राकृतस्तत्र पूर्वः स्याद्धिमासस्तथोत्तरः॥ यस्मिन्वर्षे द्विवसंतौ भवतस्तत्र तयोः पूर्वः
प्राकृतः शुद्धः तथा॥ संसर्पांहस्पतीचेति द्विविधावधिमासकौ॥ मासौ पूर्वापरौ दुष्टौ परश्चेवौ
शुभावहौ॥ इत्यंहस्पतेः पूर्वेरविमासः शुभावहइति॥ अत्रोच्यते॥ अत्र च ग्रंथांतरेषु चक्ष

पमासादिमस्यासंक्रांतस्य यत्शुभत्वाभिधानं तत्द्वात्रिंशन्मासोर्ध्वं तावन्मलमासकाजादर्वा
गन्तावित्येनतस्मिन्मलमासशब्दाप्रवृत्तिरित्येवंपरं॥ स्वकालागतस्याधिमासस्य मलत्वाभि
धानात् तथाचोक्तं परिशिष्टे॥ मलं वदंति कालज्ञाः मासं कालविदोधिकमिति॥ एतदपि न्याये
पजानात्॥ एकस्मिन्नपि वर्षे द्वौ मासावधिको यदि॥ पूर्वो मासः प्राक् तस्मादधिमासस्त
थोत्तरः॥ अधिमासादारभ्य द्वात्रिंशन्मासादूर्ध्वं योसंक्रांतस्ततोर्वाग्योसंक्रांतः सम्राकृतः शु
द्धो नाधिमास इतिकाजातिपद्धिकप्राव्यरिकाः तंच॥ यत्तु आचार्यवर्यैः छंदोविरोधात्स्वसिंक्रां
तोधिमासशब्दः प्रयुक्तः सत्वसंक्रांतवचन एव न मलमासवचन इति दीपिकाविवरणे॥ एवं
शुभत्वबुध्या द्वात्रिंशन्मासादूर्ध्वकालजीवी संनयेप। क्षयाख्यात्पूर्वसिंक्रांतः संसुद्धं इति मूलग्रं
थदर्शितादीपिकारेणाप्रमाणि॥ वद्धकालतोपि हि तवनपूर्वोधिमासः शुभः एवं पूर्वोदाहृ
तैर्वचनैः शुभकर्मसु निंदिते पि पूर्वासंक्रांते शुभत्वाबद्धप्रयुक्ता नानामयमाशयः॥ क्षयस्मा

न्नरीधिमासापेक्षया पूर्वासंक्रांतस्याशुद्धत्वमिति॥ सवंकिमदिशुद्धत्वाभिधानेतुमासत्रयंत्या
ज्यमिदं त्रयत्वादिवाहयत्तोमवमंगलेषित्यादिज्योतिःशास्त्रोक्तं विरुध्यत॥ किंच॥ मासस्क
न्यागतेस्मा वास्संक्रांतोमवेध्यदि॥ देवंपित्र्यंतथाकर्मतुलास्थेकतुरक्षयमिति॥ ज्योतिःपितामा
हस्मरणेतापि देवपित्र्य संबंधि कर्मत्वात्तत्र मास्यसिद्धिते॥ कन्यागतेमाताव संक्रांतश्चि
तएवेति॥ अश्विनस्य संक्रांतित्वं क्षयमासे भाविनि संभाव्यते॥ नान्यथा॥ यतः उक्तं ज्योतिः
सिद्धांते॥ घटकन्यागते सूर्ये द्वित्रिवाप्यधिकेमकरेवायकुंभेवाना धिमासोविधीयतइति
कन्यादिराशित्रिके स्वर्ये स्वभावतअधिमासस्यनिषेधात्॥ अनेनान्यमंदिरगतोरवलुजीवम
तु शुक्रो स्तगो मुरगुध्वतयाविवाहो॥ प्रारम्भते हि तविधानविधितयात्रा वेदांतनिर्णयिक
पानचमंत्रसिद्धिः॥ अनंतनकेनाप्याश्विनस्याधिमासतामभिधायतत्र काम्यनकुर्यादिति
कांग्रपसमापनसमये॥ कार्तिकाद्यसंक्रांतेप्येवंबोद्धव्यः॥ तत्रासंक्रांतेपिप्रतिपदि हि त

दीपोत्सवाख्यं कर्म भवति॥ शुद्धे मासि प्रारब्धं व्रतं प्रारंभान्नियम इति कात्यायनः॥ तथा॥ मलम
मेतत्कर्तव्यं दीपोत्सवाख्यं कर्म भवति॥ शुद्धे मासि प्रादि तत्रयं॥ विभेदं कुरुते पक्षे नरके प्रति
मक्रति तिदिनत्रयं च तुर्द्धियादी ति दीपोत्सवनिर्णयः॥ इति निर्णयः॥ क्षयमासादिकवसंक्रांत
विषयं॥ किंचिदुच्यते क्षयविषयमयातिधाने॥ द्विसंक्रांतेऽपि मलमासवद्वर्ज्यवर्ज्यविवेकः स्यात्
तदुक्तं मलमासे द्विसंक्रांतौ संक्रांतरहिते तथा॥ कार्यवर्ज्यविवेकः स्यादिति व्यासविदो विदुः
संक्रांतिरहिते मासे यथा कार्यविवर्ज्यविवेकः॥ तथैव द्विसंक्रांतौ संक्रांतिद्वययुक्तेऽपि मासे स्यादि
ति धर्मशास्त्रविदो विदुः काठकगृह्येऽपि॥ रविसंक्रमहीनो यो वर्ज्योऽवर्ज्यो विधिः स्मृतः॥ स एव
तु द्विसंक्रांतौ मलमासोऽप्युदाहृत इति॥ आनीमलमासोक्तं कर्तव्यविधानं सर्वमत्राप्यनुसंधे ३२८
यमिति॥ एवं कालादर्शाधिकं॥ यथामासाद्धिकं मलमासवदत्रापि भवति॥ द्वितीयाद्धिकादौ वि
शेषः स्मृत्यंतरात्॥ एक एव यदा मासः संक्रांतिद्वयसंयुतः॥ मासद्वयगतं श्राद्धं मलमासेऽपि

ह्यास्यतइति॥ द्विसंक्रांतिकृते अमुकैकत्वमासे इत्यभिधाय पश्चात्स्वमाससंबंधप्रयोगः॥ गा
लवोऽपि॥ वर्षे वर्षे तु पश्चाद्वं माध्याल्ये क्षयमासे इत्यर्थः॥ इति व्याख्यातं निबंधांतरे॥ अत्रैव वि
शेषः॥ क्षयमाससमध्ये मरणे सति प्रतिसांवत्सरिकादौ मरणमासज्ञानोपायः॥ क्षयमासस्य
तीयद्विधा विभज्य पूर्वार्द्धे मरणे त्वसौ वसिमास॥ द्वितीयार्द्धे च दुत्तरमासोऽस्तु यः॥ तथा चोक्तं॥ त
था ह्यैत्रियमेया मेघ पूर्वो द्वितीयेऽर्द्धे तु उत्तरः॥ मासावितिये ऽर्द्धे उत्तर॥ मासावितिबुधैर्ज्ञेयौ क्षय
मासस्य मध्यगाविति॥ एवं पक्षः॥ मुक्तेः मुक्तक्षणइति॥ तत्र जन्मतिथ्यादिव पंजन्मदिनो
त्सवेऽप्येवं॥ एवं दीपिकापि॥ नष्टानां क्षयमासागुप्तितिथिषु प्रागंत्ययोरर्धयोर्मासावस्तिय
क्षयाद्वविधयेन्यागरुद्धमासास्थिता॥ एवं तत्र वव द्वनेपीति॥ अत्र काम्यविधये विशेषः॥ का
म्यस्य कर्मणः क्षयमासे प्रथममासारंभं न कुर्यात्॥ द्वितीयारंभं कुर्यात्॥ आरब्धं च समापये
त्॥ तत्र कार्यके॥ प्रवृत्तं मलमासात्प्राक् यत्काम्यं समसमापितं॥ आनीयो मलमासेऽपि तत्स

माप्यमसंशयमिति॥अन्यथाकार्त्तिकस्यक्षयमासांतःपातेचातुर्मास्यव्रतानामसमाप्तिःप्रसज्येत
पौषस्यचक्षयेमासांतःपातेपूर्वविषेपौषेआरब्धस्यमाघस्त्वात्तन्नतस्यपुनरारंभःप्रसज्येत॥आरं
भसमाप्तियमोहिप्रथमासमाप्तौस्यादितिकात्यायन॥इतिक्षयमासनिर्णयः॥कृतेचलंघिवेदेनग्रं
थेनिर्णयदीपके॥निरूपितोनिर्णयोत्रक्षयमासाधिमासयोः॥अथगुरुशुक्रयोर्मौढ्यनिर्ण
यः॥मौढ्यंनामास्तःसूर्यमंडलप्रवेशात्॥तयोर्बिंबमंडलप्रवेशेबाल्येवृद्धत्वेचसमासमासोव
ज्यतिनोक्तौतिकामण्यत्रापिवर्ज्यदिति॥दामोदरीयेप्युक्तं॥पुरारवेर्मंडिमेतिकाव्योविनष्ट
तेजागुरुषष्ठ्यदिनं॥कालःसदीक्षाव्रततीर्थयात्राविवाहयज्ञोपवनादिहेतुः॥विनष्टतेजाइ
त्यनेनवृद्धत्वंबालत्वंचसूचितं॥तथाचब्रह्मसिद्धांते॥रविबिंबासन्निकर्षेषांग्रहाणामस्तमुच्य ३२०
ते॥ततोवर्णवार्द्धकंमौढ्यादूर्ध्वंबाल्यमकीर्तितं॥मौढ्यात्पूर्वंविस्तार्द्धकं॥ऊर्ध्वंविस्ताबाल्यमि
त्यर्थः॥बाल्यवार्द्धकयोःप्रमाणमुक्तं॥ब्रह्मसिद्धांते॥पक्षंप्राग्दिनंवृद्धत्वंपश्चात्तेचदिने

कवेः॥शैशवंप्राक्पंचाहंपश्चाद्दशाहदिनंस्मृतं॥प्राक्दिग्विषुवसौपक्षंवृद्धत्वं॥पश्चात्तु
वारुण्यांपंचदिनानिवृद्धत्वं॥तथाप्राग्दितेपंचादशशैशवंपश्चामुदितेदशाहदिने---वं॥
एतत्कालास्त्वयपगु---पश्चादायवजि------चपक्षमिति॥तदुक्तंतत्रैव॥शै
शवंवार्द्धकेपक्षंप्राक्पश्चाद्वृद्धस्यतेरिति॥अत्रपक्षांतंबार्हस्पत्ये॥प्राक्पश्चादुदितःशुक्रः
पंचसप्तदिनंशिशुः॥विपरीतंतुवृद्धत्वात्तद्वदेवगुरोरपीति॥दामोदरीयेतु॥प्राग्वाजोदिव
सत्रयंदशादिनंपश्चाज्जितोवृद्धतांपक्षेवासरपंचकेबजन्तेपक्षेगुरुःसर्वतः॥तत्पश्चादु
रुशुक्रयोर्विमजयोःकुर्याद्विवाहंसितेकृष्णेवासरपंचकंचविंशदंतस्यांहस्यल्पपरइति॥एवं
रत्नमालायां॥प्रागुदितःशिरःस्थितपंसितःस्यात्पश्चाद्दशमयपंचदिनानिवृद्धः॥प्रा
च्यांतुपक्षममरेज्यगुरुस्तोपक्षं॥प्रागथवाप्यपिवदंतिवसिष्ठमुख्याःइत्यादिवाक्येषुकाः
कालास्तेदेशभेदेनआपत्कालभेदेनेवालघुकालाश्रयाः॥तदुक्तंमिहिरेण॥बाकवे

नि॰दि॰
३३०

दर्शिताः काजाये बाल्ये वार्द्धके वा॥ अत्यासन्नयाधिकाः शेषादेशभेदाद्‌ दपदेतिदेशभेदेन विशेषमा
ह गार्ग्यः॥ शुक्रो गुरुः प्राक्‌परा क्व बालो विंध्ये दशो दंतिषु सप्तरात्रं॥ वंगेषु हूणेषु च षट्‌ पंचशेषेषु दे
शेषु त्रिदिनं वदंति॥ इदं त्वसमप्येतत्प्रमाणे॥ अतोधिकाः काजास्ते देशव्यवस्थिता इति॥ तथातीर्थकौ
लविशेषाभिप्रायं पक्षांतरं ज्योतिःशास्त्रे॥ पंच दिनानि वसिष्ठः॥ शौनक एकं दिनत्रयं गर्गः॥ य
वनमतेन च सुमुहूर्त्तानि मनुसुत इत्यादि॥ एवमुक्तप्रमाणेषु गुरुशुक्रमौढ्यबार्द्धकशैशवेषु अ
ग्न्याधानं प्रतिष्ठां चेति॥ नामान्नप्राशनं चेति अस्तगे च गुरौ शुक्रे इति मलमासनिषिद्धान्यत्रापि
वर्जयेत्॥ तथा च दीपिका॥ आद्या नाघुद्दितं च नैव तनुयाच्छुक्रस्य बाल्यादिक इति॥ एवं गुरुशुक्र
स्तादिवसिंहस्थे जीवे धनुर्मीनस्थे केचिद्विवाहादिशुभकर्म न कुर्यात्॥ तदुक्तं व्यवहारसारे॥ र
विक्षेत्रगते जीवे जीवक्षेत्रगते रवौ॥ उद्वा वैधव्यमाप्नोति व्रताक्स्यदुर्दिनायदिति॥ रविक्षेत्रं सिंहः॥ ३३०
जीवक्षेत्रं धनुर्मीनौ॥ न केवलं विवाहे तन्नैव व्रतबंधादावपि च न कुर्यात्॥ तदुक्तं लल्लेन॥

सिंहस्थिते देवगुरौ न कुर्याद्विवाहचौलव्रतदीक्षणादीन्॥ यात्राप्रतिष्ठाक्रतुवास्तुपूजा धनुः
स्थितेके झषके च तत्॥ तथाह गार्ग्यः॥ मीने धनुषि सिंहे वा स्थिते सप्ततुरंगमे॥ क्षौरं यत्नात्‌ न कुर्वी
त विवाहं गृहकर्म चेति॥ इत्यादिवचनैर्मीनस्थितेर्के कर्मणां निषेधात्तिधानेपि वैवारब्धकाजवि
शेषे तु पतनपतनस्यानुत्तान्वच नाति ज्योतिःशास्त्रात्॥ गोचराष्टकवर्गाभ्यां सुस्पष्टशुद्धिर्न जायते॥
तस्यापनयने कार्यं चिंत्यं मीनगते रवौ॥ अत्र यस्य शुद्धिर्न जायते इत्यभिधानात् शुद्धौ सत्यां गार्ग्यो
क्ते माघादिमासपंचके कार्यं॥ ते बृहस्पतावत्रेतिस्तेये॥ अशुद्ध्या कालातिक्रमणे तु॥ पुनस्तत्रैवोक्त
का॥ चैत्रे मासे भास्करे मीनसंस्थे कुर्यान्मौंजीबंधनं चाडवानां॥ शुक्रस्यास्तं वाकपतेर्नावलो
क्यनैव ग्राह्या चंद्रतारावलेस्मिन् शुद्धिरिति तेयं॥ एतदभिप्रायं॥ माघादिमासषट्के शुभेरवला
बंधनं॥ मतमिति ह्युगार्ग्येपि मासषट्के क्रमुक्तो॥ तथा कुलाचारश्च चूडाकर्माप्यत्र कार्यं तं
दुक्तं रत्नमालायां॥ क्षौरं क्षेष्वपुरवक्तजविधिताच्चौलमाकुः संज्ञाइति॥ आश्वनायन॥ तृतीये

वर्षे चौलं यथाकुलधर्मं वा । तथा मुक्तं मौंजीबंधनं चौलं च सिंहस्थिते देवगुरौ न कुर्यादिति वचनात् ॥ त-
था मकरस्थेऽपि गुरौ विवाहादि न कार्यमित्युक्तं ज्योतिषे ॥ सिंहस्थं मकरस्थं च गुरुं यत्नेन वर्ज-
येत् विवाहादाविति शेषः ॥ अत्र विशेषमाह यत्नुवरः जड्डौ ॥ गोदावर्युत्तरतो यावद्भागीरथी-
तटं याम्यं ॥ सिंहस्थिते देवगुरौ तत्र विवर्जयेद्विवाहादि ॥ आदिशब्दाद्व्रतबंधचौलादीनां ग्रहणं
अतः ॥ गंगाया उत्तरे कूले गोदावर्याश्च दक्षिणे ॥ गंडक्याः पश्चिमे पारे मकरस्थो न दोषकृ-
दिति ॥ यत्तु त्रिविक्रमवचनं ॥ स्थिते सिंहस्थेऽपि मघासंस्थं गुरुं यत्नेन वर्जयेत् ॥ अन्यत्र सिंहभागेऽनु
विवाहादि विधीयत इति ॥ एतच्च परंपरया नादृतं ॥ सिंहमात्रस्थिते गुरौ विवाहादिशुभकर्मसु
त्याज्यता मन्निबंधकानां बहूनां वचनानां दर्शनात् ॥ गयादिषु वायुपुराणे विशेषः ॥ गयायां सिं- ३३१
सर्वकालेषु पिंडं दद्याद्विचक्षणः ॥ अधिमासे -- दिने अस्ते च गुरुशुक्रयोः ॥ न त्यक्तव्यं
गयाश्राद्धं दिनमस्य बृहस्पतौ ॥ अत्र श्राद्धस्य यात्रा एव कालान्तरं ॥ गयां प्रति यात्रा अतिषिद्धे

त्यर्थे ॥ यत्तु वचनं ॥ नीचस्थे वक्रसंस्थे अतिचरणगते बालवृद्धास्तगे वा संन्यासो यजनयात्राव्र-
तनियमविधिर्विः कर्णवेधोऽपि दीक्षा मौंजीबंधो गतानां परिणयनविधिर्वास्तुदेवप्रतिष्ठा वर्ज्या सद्भि-
प्रतिष्ठासाक्षिः प्रयत्नात्त्रिदशपतिगुरौ सिंहराशिस्थिते च ॥ नीचस्थो मकरः ॥ अत्र सिंहस्थकंमे-
रस्थवाजद्वाद्वास्तविषयेषु गुरुः शुभकर्मसु त्याज्य इत्युक्तं निरूपितं च प्राक् ॥ वक्रातिचारयोर्य-
दितां विप्रतिपत्तिः ॥ अत्र केचिदाहुः ॥ सर्वराशिषु वक्रातिचारगते गुरौ शुभकर्म न कार्यं ॥ अप-
रे तु सिंहराशिस्थिते च देवगुरौ विवाहादिप्रयुक्तं शुभकर्म न कार्यमिति वदंति ॥ अत्र वि-
शेषो ज्योतिःशास्त्रे ॥ नायाति पूर्वराशिं चेदतिचारगतो गुरुः ॥ शुभकर्म तदा हंति सर्वमाहु-
र्मनीषिणः ॥ अतिचार इति वक्रस्याप्युपलक्षणं ॥ तथा च पालवचने ॥ यदा तेऽतिपुनस्तस्मि-
न्नलुप्तसंवत्सरस्तु सः ॥ तत्रोद्वाहादिकर्माणि न कुर्याच्छुभवांछकः ॥ स इति गुरुर्यदा वक्राति-
चारगतः पूर्वराशिमेति आगच्छति तदा वक्रातिचारगते पित्र्यश्राद्धादि कर्म कुर्यादिति ॥

नन्वेवं सिंहस्थेपि समानमिति चेन्नैवं॥ सिंहस्थिते जीवे शुभकर्मणां कृत्यत्वाभिधानादनस्तं तेसि
द्धात्॥ वक्रातिचारगतेपि गुरुविवाहादिशुभकर्माणि न कार्याणीति चिरंतनाज्योतिर्विद आहुरिति॥
येएवं च जीवस्य वक्रातिचारयोः कर्मणां विधायकानि प्रतिषेधकानि च वाक्यान्युक्तविषये व्याव
ख्यातानीति॥ यत्तु वचनं॥ वक्रातिचारगाश्चैव नो माघाः पंचरेखराः॥ पूर्वराशेः फलं दद्युर्वर्जयित्वा बृ
हस्पतिमित्यादि तत्॥ गोचरगताशुभादिफलावबोधपरं॥ इति गुरुशुक्रास्तनिर्णयः॥ अथो
पनयनकालो निर्णीयते॥ गर्भाधानाज्जन्मतो वा विप्राणां वत्सरेष्टमे॥ राज्ञामेकादशे विशां
द्वादशे तु यथाकुलं॥ आत्ममेधादिकामनया त्वाह गार्ग्यः॥ कालांतरमाह मेधाकाममपि चेमं
यकामाच सप्तमे॥ धनकामस्त्वष्टमे कुर्याद्विप्रादीनामुपायनं॥ मेधाकामी ब्राह्मणः पंचमे
वीर्यकामी क्षत्रियः सप्तमे॥ धनकामी वैश्योष्टमे इति॥ तथा निबंधांतरे॥ पंचमे वत्सरे ब्र
ब्राह्मणानां विशेषतः॥ सप्तमे चाष्टमे वापि क्षत्रियाणां विशां तथा॥ त्रिगुणे त्वपि कुर्वीत विप्रादि

नामुपायनमिति॥ त्रिगुणेष्वपीत्युक्ते ते न पंच त्रिगुणाः॥ पंचदशाब्दो विप्रस्य गौणः कालः॥ एवमे
कविंशत्यब्दः क्षत्रियस्य चतुर्विंशत्यब्दो वैश्यस्येति अत ऊर्ध्वमुपनयनादिकं यति॥ तदाह वसिष्ठः॥
आषोडशाद्ब्राह्मणस्यानतीतः आद्वाविंशात्विंशाद्वैश्यस्यात ऊर्ध्वं पतितसावित्रिका भवंति नै
मुपनयेयुरिति॥ गार्ग्येपि गरत्यात्॥ उपनयने व्याख्यास्यामो गर्भाष्टमेषु ब्राह्मणमुपनयीत गर्भै
कादशेषु राजन्यं गर्भद्वादशेषु वैश्यं वसंतो ग्रीष्मः शरदृतवो वर्णानामानुपूर्व्येणेति॥ तथा का
दर्शे॥ वसंतो ब्राह्मणानां स्याद्ग्रीष्मो विशां शरत्॥ उपनयनकाले स्यात्सर्वेषां चोत्तराय
णे॥ तथा विप्रस्य क्षत्रियस्यापि मौंजी स्यादुत्तरायणे॥ दक्षिणे तु विशां कुर्यान्नानध्याये न संक्र
मे॥ तथा गार्ग्यः॥ विप्रं वसंते क्षितिपं निदाघे वैश्यं घने व्रतिनं विदध्यात्॥ माघादि शुक्रादि पं
च मासाः स्युः साधारणा वा सकलद्विजानां॥ वृद्धगार्ग्यः॥ माघादिमासषट्केषु मेखलाबंधनं मतं
चूडाकरणमन्नं च श्रावणादौ विवर्जयेत्॥ श्रावणादौपि ह धनुर्मीनेषु चौलान्नप्राशनादि न

ति॰दि॰
३३३

कार्यं॥ मुख्यकालेपीति॥ ननूपनयने उत्तरायणस्य स्वतंत्रकालत्वं न संभवति॥ यथाऽमावास्यायां
पितृणां श्राद्धं कुर्यादित्यारभ्य पितृणां श्राद्धं कुर्यादिति कालद्वय। विधानेपि अमावास्याकालस्य
स्वावयवभूतापराह्णद्वारा साधनत्वे अमावास्याविधेः सार्थकत्वं तथैवोत्तरायणस्य स्वावयवभू-
तवसंतादिद्वारा साधनत्वे तु उत्तरायणविधेः सार्थकत्वमिति मिलितस्यैव साधनत्वं भवतीत्येवं अ-
पराह्णस्य बहुविधसंबंधित्वात्कर्मीयापराह्ण इत्यपेक्षायाममावास्याविधिः॥ अमावास्यासंबं-
धविषयः सार्थको भवतीत्येवं वसंतादिकालस्योत्तरायणानुत्तरायणसंबंधाभावान्न तथा मिलितस्य
साधनत्वं किंतु उदगयने विधिवत्वादेवोदगयनस्य स्वतंत्रस्यापि कालत्वं॥ अतो वसंतादिकालो
दगयनकालयोर्विकल्पः॥ उदगयनस्य रूपांतरस्य विधिः॥ तदुक्तं रत्नपरिशिष्टे॥ रूपांतराद्वि-
धिरवमुदित्याय न गोचरः॥ अनयोः कालयोस्तस्माद्विकल्पं मुनयो विदुरिति॥ सुप्रसिद्धो दृष्टबु- ३३३
लयत्प्रवर्त्तनमुदगयनस्य रूपं मीनमेषयोः संक्रमणं वसंतस्तु॥ आपवा वसंतस्त्वैत्रवैशाखौ

अतो रूपांतरं॥ तस्माद्विप्रादेर्वसंतादेरन्यत्र माघादिमासेषूपनयनमिति सिद्धं॥ तथापि श्रावण्यादी-
नां वसंतादिषु मुख्यं॥ वसंते ब्राह्मणामुपनयनं इत्यादि श्रुततत्वात् संभवे माघादिमासेष्विति ज्ञ-
ज्ञेयं॥ व्रतबंधे मासफलमाह सुरेश्वरः॥ माघेमासमहाधनो धनपतिः॥ प्राज्ञो धनं फाल्गुने मे-
धावी भवति व्रतोपनयने चैत्रे च वेदान्वितं॥ ज्ञो वैशाखे सुभगः सुखी पटुमतिर्ज्येष्ठे बलिष्ठो बुधाष्याषा-
ढेपि महाविपक्षविजयी ख्यातो महापंडितः॥ अत्रोपनयनप्रकरणे मासग्रहणं इति कालादर्शो॥
त्रिकांडिः॥ चांद्रो मासः श्रौतस्मार्तकर्मणामजिकादिके विवाहव्रतवृत्त्याविजयतरे परिकीर्त्ति-
ता इति॥ उपनयनं पूर्वाह्ने कुर्यात् तदुक्तं शुक्लपक्षे च पूर्वाह्ने ष्वेकं मुरुपायनं॥ संवेसरिस्वितः
पूर्वाह्ने उपाध्यायनं विना उपनयनं कुर्यादित्युक्तं॥ ग्रंथांतरे च कादशी द्वादशी गृहीता॥ यथा॥ तृ-
तीयैकादशीम्रीत्या पंचमीं च दशमीं तथा द्वितीयां च मेधाव्योरिक्तास्तिथयः स्नातस्तूपनयेन्नंद-
यति॥ गलग्रहेपि च॥ न कुर्यात्॥ त्रयोदशी प्रतिपच्च तथा सप्तम्यादि दिनत्रयं॥ चतुर्थी एकतः

श्रोक्ता अष्टावेतेऽनध्यायाइति ॥ तथा ॥ नसप्तम्यांनचाष्टम्यांनयोदश्यांनपर्वणि ॥ रिक्तासुनप्रतिप
दित्र्यहस्पृकदिवसेतथा ॥ अथावासारानाह गार्ग्यः ॥ बाह्वृचांतुगुरोर्वारोयजुर्वेदजुषांकवेः ॥ साम
गानांधरासुनोरथर्वविदुषांरवेः ॥ कविःशुक्रः ॥ धरासुनुर्मञ्जि ॥ वराहमिहिरोपि ॥ गुरोःकवेश्चोदि
तस्यमिहिरस्यचवासराः ॥ ऋक्यजुःसामाथर्वाणिपठतांस्फूर्तिकृन्मतः ॥ व्रतेऽपनयने ॥ सोदि
तोभौमः ॥ मिहिरःसूर्यः ॥ तथाबधन्नयंदुवाराणिशस्तानिव्रतबंधेइतिगार्ग्यः ॥ भौमेनवारौमुक्त्वा
न्येवाराग्राह्याः ॥ उपायने ॥ एतःशनैश्चरः ॥ सौम्यशनिवारौमुक्त्वान्येवाराग्राह्याः ॥ सौमोपिसाम
गानांशस्तइति ॥ अथनक्षत्राणि ॥ मौंजीबंधनमोक्षेचरेवत्यांश्रवणद्वये ॥ हस्तादित्रितयेश्विन्या
मृगेपुष्येपुनर्वसौ ॥ तथा ॥ हस्तत्रयश्रवणसार्पत्रिवित्रिवक्षदिवस्मिन्लेध्रुवदृक्चवक्रूपतनभूशस्ता ॥ ३३५
इत्यादिस्ववेदविषयोविज्ञेयोज्योतिःशास्त्रात् ॥ नयइति ॥ पनुष्टुद्धुवसिष्ठगार्ग्याभ्यांमुक्तं ॥ अ
नध्यायिकुर्वीतपस्तंनैमित्तिकोभवेत्सप्तमीशुक्लपक्षेतुतृतीयावाक्षयातयेति ॥ तप्रायश्चि

त्तार्थेपिनयविषयं ॥ यतस्तत्रैवोक्तं ॥ नैमित्तिकमनध्यायंकुर्यात्प्रतिपदादिने ॥ मेखलाबंध
नेप्रायश्चित्तार्थेमुनेर्योविदुः ॥ वृद्धगार्ग्येपि ॥ स्वप्नयुजोपध्रस्ताःकृष्णप्रतिपदादयः ॥ प्राय
श्चित्तनिमित्तेतुमेखलाबंधनेमता ॥ एतान्मौंजीबंधनद्वितीयंजन्मतदुक्तं ॥ तुयदिश्चेज्जाये
तेद्वितीयंमौंजिबंधनात्क्षत्रियविप्रास्तस्मादेतेद्विजास्मृत ॥ इति ॥ उपनयनानंतरंसरहस्यं
सांगमथर्वयिवापर्यंतंवेदमधीत्यसमावर्तनमाचरेत् ॥ तदपितद्गयनेआपूर्यमाणपक्षे
पुष्यनक्षत्रेकुर्यात् ॥ वेदमधीत्यापादित्यापस्तंबः ॥ इत्युपनयनादिकालनिर्णयः ॥ अथविवा
हकालस्ताकुजस्तावृकुमाजायो ॥ नावात्प्रभृतिचतुर्वयेविवाहोनोपौषेतत्रचमधुसंज्ञिते
विधेयः ॥ नैवास्तंगतवतिमासविनजाविरुद्धत्वोनखलुतपोनबजिस्तावे ॥ मधुश्चैत्रःसमीन
योगाद्वर्ज्यः ॥ पौषोधनुर्योगाद्वर्ज्यः ॥ तथावृद्धगार्ग्यः ॥ मीनेधनुषिसिंहेचस्थितेसप्तद्वंगमेः
क्षौरमन्नंकुर्वीतविवाहंगृहमेकंचेति ॥ मकरेमेषेवनमंद्धृष्टेतेपौषस्यापिभोरहंवि

नि॰ द्वि॰
३३५

वाहादौ विवर्जयेत्॥ कर्कसंक्रान्त्यप्रवृत्तौ दशमीपर्यंतमाषाढेपि विवाहादिः स्यात्॥ इत्यसंग्रहे॥
शुचेरपीतिवचनात्॥ मकरेर्केसतिपौषेपिस्यादिति॥ मदनपारिजाते ज्योतिषियदाहगार्ग्यः॥
सौरोमासो विवाहादौ यज्ञादौ सावनः स्मृतः॥ आब्दिके पितृकार्ये च चांद्रो मासः प्रशस्यते॥ पितृ
कार्येषाण्मासिकदौ॥ तथादशाचारस्तु कार्त्तिके माघपदे विहीदशपते॥ पुष्करे कार्त्तिकएव
तथा अब्दिके चेत्स्वृक्षे निरिवेत्स वदेत्यादि भुजबारमुहूर्त्तादिर्ज्योतिःशास्त्रात्ज्ञेयमिति॥ ए
तत्कालपरीक्षणं धर्म्येष्वेव विवाहेषु नाधर्म्येष्विति गदाधरपरिशिष्टात्॥ अधर्म्या विवाहा आसु
रगांधर्वराक्षसपैशाचाः गांधर्वासुरपैशाचिकनिषिद्धाः पानादिमासेष्वपि भवेत्॥ तेषां स्वरूपंतु॥ आसुरो
द्रविणादानाद्गांधर्वः समयान्मिथः॥ राक्षसो युद्धहरणात्पैशाचः कन्यकाछलात्॥ ब्राह्मदैव ३३५
आर्षप्राजापत्या धर्म्या विवाहा इति॥ तथा॥ ब्राह्मो विवाह आहूय दीयते शक्त्यलंकृता॥ तज्जः
पुनात्युभयतः पुरुषानेकविंशतिः॥ तथा॥ यज्ञस्थऋत्विजे दैवः आदायार्षस्तु गोद्वयं॥ च
तुर्दशप्रथमजः पुनात्युत्तरजश्च षट्॥ सहधर्मं चरतांप्राथितियादीयते स प्राजापत्यस्तज्जः षट्
पुरुषान्पुनातीति॥ अत्रविशेषः॥ आद्यगर्भेछियोः सुतदुहित्रोः ज्येष्ठमासि विवाहादि नकुर्या
त्॥ तदुक्तं रत्नमालायां॥ आद्यगर्भदुहितुः सुतस्य वा ज्येष्ठमासि नहि पाणिपीडनं॥ तथा॥ ज्ये
ष्ठपुत्रदुहित्रोः स्याज्ज्येष्ठे मासि न मिति ज्योतिःशास्त्रात्॥ अत्र प्रासंगिकं स्मृत्यर्थसारात्॥ वि
वाहे वितते तंत्रे होमकाले उपस्थिते कन्यामृतुमतीं दृष्ट्वा कथंकुर्वंति याज्ञिकाः॥ स्नापयित्वातु
तां कन्यामर्चयित्वा यथाविधि॥ युंजानमाहुतिं हुत्वा ततः कर्म प्रवर्तयेत्॥ स्मृतिचंद्रिकायां
विवाहहोमे प्रक्रांते यदि कन्या रजस्वला॥ त्रिरात्रं दंपतीस्याता पृथक्शय्यासनाशनौ॥ चतुर्थे
ह्नि संस्नातौ तस्मिन्नग्नौ यथाविधि॥ विवाहहोमं कुर्यातामित्यादिस्मृतिसंग्रहे इति॥ ऋतु
कालादर्वाग्विवाहो योग्यः॥ तथाप्यष्टवर्षाप्रशस्ता॥ तथाह संवर्त्तः॥ अष्टवर्षा भवेद्गौरी
दशवर्षातु कन्यका॥ प्राप्तेच द्वादशे वर्षे कुमारीत्यभिधीयते इति॥ ऊर्ध्वं दीनातु नग्निके

नि०दि० संगिराः॥ तस्मिकां विवाहयेत्तदूर्ध्वं भविष्यत्पुराणे॥ दद्याद्गुणवते कन्यां नग्निकां ब्रह्मचारिणी॥ अपि वा
गुणहीनाय नोपरुंध्याद्रजस्वलामिति॥ तथा॥ विवाहस्त्वष्टवर्षायाः कन्यायाः शस्यते बुधैः॥ चतुर्थ
१३८ मपि वर्णानां प्रशस्तो हि विवाहितात्॥ अविवाहितान्तु दहंति समीति॥ तथा॥ त्रिंशद्वर्षो वहेत्कन्यां कन्यां द्वाद
शवार्षिकीमिति वृद्धमनुः तदाहांगिराः॥ आ प्राप्ता रजसा गौरी प्राप्ते रजसि रोहिणी॥ त
स्माद्विवाहयेत्कन्यां यावन्नर्तुमती भवेदिति॥ यत्तु रजःप्रवृत्तावूढा यातस्वामी नास्ताहान्न
वेदितिस्मृत्यंतरं॥ इति कन्याया आदाने स्वामिनो दोषदर्शनात्स्वमीकारी प्रदद्यति॥ यस्तु वक्ष्यः
पिता पितामहो भ्राता सकुल्यो जननी तथा॥ कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः॥ नार
दः॥ पिता दद्यात्स्वयं कन्यां भ्राता वानुमतेः पितुः॥ मातामहो मातुलश्च सकुल्यो बांधवस्तथा॥ माता १३६
त्वभावे सर्वेषां प्रकृतिस्था यां मदद्यात्सजातय इति॥ अत्र विशेषः॥ पितरि प्रेतेप्यसंस्कृता
भ्रातरो मनिरुपस्त्वसंति॥ तत्संस्कारकर्मणि भ्राताधिकारी॥ तदुक्तं मिताक्षरायां॥ असंस्कृ

तास्तु संस्कार्या भ्रातृभिः पितृतुल्याधिकारित्वं॥ तथा च संस्कारार्थवृद्धिश्राद्धकर्मणि तस्य पितु
रभावे पितृक्रमादेये इत्यति निरूपितं वृद्धिश्राद्धाधिकारिनिर्णये॥ पितामहादेः कन्यादानाधि
कारित्वेपि पौत्रादीनां संस्कारार्थवृद्धिश्राद्धाधिकाराभावात्॥ यत्तु कन्यादाने वृद्धिश्राद्धमुक्तं॥
तत्कन्यालक्षणं लक्षणं संप्रदेयं वृद्धिश्राद्धं नासंस्कृतं न देयमिति ज्ञेयं॥ स्कंदपुराणे॥ ऋष्य
शृंगः॥ वरगोत्रं समुच्चार्य प्रपितामहपूर्वकं॥ नाम संकीर्तयेद्विद्वान्कन्यायाश्चैवमेव वदति
तथा देशं कालं च संकीर्त्य प्रदानस्य चात्मनः॥ संप्रयं प्रयंछति॥ कन्यादाने तु पुस्तयं॥ इद
दानवाक्यं॥ गौरीं कन्यामिमां विप्र यथाशक्ति विभूषितां॥ गोत्राय शर्मणे तुभ्यं दत्तां विप्र
समाश्रयेति दानखंडात्॥ अथ विवाहनक्षत्राणि॥ मूलमैत्रमृगरोहिणीकरैः पौष्णमारुत
मघोत्तरान्वितैः॥ विनिर्विधैः शशिनि मृगीदंपत्योः पाणिपीडनविधिर्विधीयते॥ इति लग्नादिकं तु
ज्योतिःशास्त्रात्ज्ञेयं॥ तथा परिणयार्थगमनादौ प्रतिशुक्रादिदोषो नास्ति॥ तदुक्तं सुरेश्वरेण

सनुवतपुरप्रवेशो देशातां विज्ञेवेतयोद्वाहे॥ नववधूगृहागमने प्रतिशुक्रविचारणनास्ति॥
तथा द्विरागमने विशेषस्तेनैवोक्तः॥ माघफाल्गुनवैशाखे शुक्लपक्षे शुभेदिने॥ गुर्वादित्यविशु
द्धौस्यात्तिसंपन्ना द्विरागमः॥ अत्र विशुद्धिवचनात् मतुः शोभने नंद्येशोभने हि वसेदापाव
ल्यादौ वा नेयेति॥ विवाहनिर्णयः॥ मासंत्रयदृष्टमिपुग्मवर्षेयुग्मेतुमासत्रयमेवयावत्॥ विवा
हशुद्धिमवदंति सेत॥ वृद्धादयः स्त्राजनिमासतस्य॥ ३॥ अथासोदरविषयो विवाहनिर्णयः॥
सहोदराणामेकवर्षे विवाहं न कुर्यात्॥ तदुक्तं मिहिरेण॥ एकोदरजयोस्त्वेकस्मिन्वत्स
रे विवाहो नैव कर्तव्यो गर्गस्य वचनं यथा॥ लल्लेनाप्युक्तं॥ सहोदराणांस्त्वान्तरेणांद्वमासांत
रेण तु॥ विवाहो नैव कर्तव्यः श्रेयःकामेन जातुचिदि॥ अत्र वचने पुंसां स्त्वान्तरणास्य दृष्टनिषे
धेपिस्त्वान्तरपुत्रौ स्वसृदुहितृस्यां इत्येकत्रोपेणस्त्वान्तरणामिति पुंल्लिंग निर्देशात्तु त्रयोश्चरपितृ
नवेदेकस्मीन्न वर्षे तयापि पुत्रीपरिणायनादूर्ध्वं तथा॥ तद्वास्य पुत्रीन पिता विदध्यादित्यादि ३३७

नापक्ष्यमाणेन पुत्रं तरस्य विवाहात् विविधानात् पुत्र्योरपि निषेधः प्रतिभाति॥ द्वयोः पुत्र्योर्वि
षयेतेनैव विशेष उक्तः॥ पुत्रीपरिणयादूर्ध्वं यावद्दिनचतुष्टये॥ पुत्रं तरस्य कुर्वीत नोद्वाहमिति
पुत्र्याः परिणयादूर्ध्वयादूर्ध्वं यावद्दिनचतुष्टयं चतुर्थदिनसमाप्तिपर्यंतं पुत्रं तरस्य अन्यस्याः पु
त्र्याः विवाहं कुर्वीतेति स्मरयो वदंतीति कालादर्शे व्याख्यातं॥ तथा त्रवराहमिहिरः॥ उद्वाह्य
पुत्रीं न पिता विदध्यात्पुत्रांतरस्योद्वाहनं कन्याकदाचित्॥ यावच्चतुर्थादिनमंगलस्य समा
प्तं तावदसौ विदध्यादिति॥ तथा पुत्रं विवाह्य पुत्रीं न विवाहयेत्॥ तथा चूडोपनयन विवा
हे षण्मासमांगल्यो विहितेषु पूर्वं न कुर्यादिति च॥ तदाह वराहमिहिरः॥ न पुंविवाहोर्ध्वमृतुत्रयेपि
विवाहकार्यं दुहितुः प्रकल्पयेत्॥ न मंडनं चापि हि मुंडनेस्यात्स्यान्मुंडनात्मंडनमत्रगेति॥
मुंडनं मंडनं चूडोपनयने॥ मंडनं विवाहः॥ मुंडनात् हत्वकमंडनमेति मंडनादत्र मुंडनैने
ल्पर्थः॥ अथ यस्मिन् ज्येष्ठे अपरिणीते अनुजोपदिणयेत्स परिवेत्तेत्युच्यते॥ तदाह मनुः॥ दाराग्नि

होत्रसंयोसंयोगंयःकरोत्यग्रजेस्थिते॥ परिवेत्तासविज्ञेयःपरिवित्तिस्तुपूर्वजः॥ परिवित्तिः
परिवेत्ताचययाचपरिविद्यते॥ सर्वेतेनरकंयांतिदातृयाजकपंचमाः॥ याज्ञवल्क्यः॥
नाग्नायःपरिवित्तीनांनवेदान्नतपांसिच॥ नवश्राद्धकृतिइत्यापेतेस्फःफलदानवेति॥ तथा
यजेत्क्लीबादिदोषाद्विवाहादावनधिकारिणीदोषाभाव॥ तदुक्तंक्लीबेदेशांतरस्थेप्रव्र
जितेपतितेतथा॥ वेदशास्त्रविवर्णेचनदोषःपरिवेदनेतथाउन्मत्तःकिल्बिषीकुष्ठीपतितः
क्लीबकुब्जकौ॥ राजयक्ष्मामयावीचनदोषःपरिविंदतः॥ स्मृत्यर्थसारेपि॥ षंढांधबधिरस्त
मूकजडगद्गदयेगुषु॥ कुब्जवामनरोगार्त्ताग्राष्ट्वांगिविविकजागिषु॥ ध्वस्तयुद्धेवमंत्रेचवश्याप्ययन
स्के निरिंद्रिये॥ म्लेच्छोन्मत्तेषुसर्वेषुनदोषःपरिवेदनेइतिसहोदरेधिकारिणिसतिपरिवेदनेन ३३८
दोषः॥ यथाहापरिवेदनदोषस्तुसोदर्येणात्नवेदिति॥ तथा॥ पितृपुत्राःसपत्नीअन्यजाताः
सुताश्चये॥ दाराग्निहोत्रसंयोगेनदोषःपरिवेदने॥ रावेंचस्मृत्यर्थसारे॥ पितृव्यपुत्रेसौ

पत्नेपरदारसुतादिषु॥ विवाहाधानयज्ञादौपरिवेदाघदूषणं॥ यत्तुयातेवल्क्येनदारग्रहण
मात्रएवपरिवेदनमुक्तंनाग्निहोत्रादौ॥ यथा॥ अग्रजातुमरनेक्तयदिग्निहोमंयथाविधि। दा
रैस्तुपरिविंदेतत॥ ग्निहोत्रेणनेत्यपेतितेजकेशानुमत्यानित्याग्निहोत्रविषयं॥ यावज्जीवमग्नि
होत्रंजुहुयादितिश्रुत्यनुमत॥ अनुमत्याप्यधिकारिण्यग्रजेकथमधिकारोनुजस्येति॥
स्मृत्यर्थसारे॥ अधिकारिणापितुरनुत्तानेपिनकार्यात्वत्वइति॥ यदाहुः॥ अग्निहोत्रंविवाहंच
प्रयोगेप्रथमेस्थिते॥ नकुर्यात्तिलकेज्योष्ठेसोदरेवायकुर्वति॥ अथावसथ्याधिवारीकालश्च
निरूप्यते॥ त्राखायनसूत्रे॥ यात्रात्यांसमिधमभ्यादध्यात्समग्निमिंधीत॥ अंत्यांसमिधञ्
निसनास्पमिनःसमावर्त्तनकर्मणीति॥ तमग्निमिंधीतेतिनस्याग्नेःधापनमात्रंतावसथ्यक
मी॥ अपत्नीकत्वात्॥ तथा॥ दायाधकालएकेदायाधकालेविभागकालेपित्र्येष्टमत्यनुजो
नुकुर्यात्॥ अपत्नीकोपिनकुर्यादावसथ्यमिति॥ तदुक्तंकारिकायां॥ कुर्याद्विभागका

लेवा विभागांतेऽग्निधारणं॥ रिक्थग्राहीयया ज्येष्ठः सपत्नीकोऽधिकारयन॥ तथा॥ अज्येष्ठो वा गृहपतौ
स्वयं ज्यायान् ज्येष्ठस्त्वेति सपिंडनानंतरमाधानं कुर्याति॥ एतदप्युक्तं तत्रैव॥ मृते पितरि
वा कुर्यात् ज्येष्ठः पुत्रोऽग्निधारणं॥ सपिंडपित्वा पितरमविभक्तोऽनुजैरपि॥ एते निमित्तेनः
काम्या॥ अमावास्यानिमित्ता अपि॥ तदुक्तं कार्ये॥ आमायामनिमित्तेऽपि कालः स्यादधिका
लः स्यादधिकारिणः॥ वैश्वानरो सगुणस्तत्र तिथिनक्षत्रयोगइती॥ तथाग्न्याधाने॥ वैश्वा
रव्याममावास्यायामन्यस्यां वा कामतोऽनक्षत्रएके॥ इत्यावसथ्याधिकारिणः॥ आधानाकारयो
कांस्त्रिजिनिः॥ कृतदारो गृहे ज्येष्ठो योनादध्यादुपासनं॥ चांद्रायणं चरेद्वर्षं प्रतिमास
—— इति॥ अथ परिवित्त्यादीनां प्रायश्चित्तं॥ कृच्छ्रातिकृच्छ्रौ इति वसिष्ठः॥ हारीतो नाधि ३३०
कमुक्तं॥ ज्येष्ठे सति दाराग्निहोत्रादिकर्वाणि॥ कनीयान् परिवेत्ता भवति॥ परिवित्तिर्ज्येष्ठः॥ प
रिवेदिनी कन्या परिदायी दाता॥ परियष्टा याजकः॥ ते सर्वे पतिताः॥ संवत्सरं प्राजापत्येन

कृच्छ्रेण पावयेयुरिति॥ शंखोपि॥ परिवित्तिः परिवेत्ता च संवत्सरं ब्राह्मणगृहेषु भैक्ष्यं च
रेयातामिति॥ इदं तु बुद्धिपूर्वत्वे तु त्वविषयं॥ प्रायश्चित्तस्य गुरुत्वात्॥ यमोपि॥ कृच्छ्रो द्वयोः
परिवेदे कन्यायाः कृच्छ्रं चरेद्दाता होता चांद्रायणं चरेदिति॥ एते प्रायश्चित्ती रघोन परिवि
त्त्यादयो ग्यास्ववेति॥ अधर्माचरणं स्थितमेव॥ तथा ज्येष्ठायां पुत्र्यामपरिणीतायां अनुजा
याः परिग्रहणेऽपि दोषः॥ तदुक्तं स्मृत्यंतरे॥ ज्येष्ठायां यद्यनूढायां कन्यायामुह्यतेऽनुजा॥ या सा
ग्रेदिधिषूर्ज्ञेया पूर्वा दिधिषूः स्मृता॥ अत्र विषये दिधिषुपतिदातृयाजकानां च गौतमेन सं
वत्सरं प्राकृतप्रायश्चित्तं स्योक्त्वा परिवित्त्यादिवद्दोष इति॥ वसिष्ठेन तु कृच्छ्रातिकृच्छ्रा
नुक्तौ यमोक्तं प्रायश्चित्तं च भवति॥ इति ज्येष्ठाधिकारिण्याः॥ तु जविषयो निर्णयः समाप्तः॥ के
तेन्व लब्धिवेदे न ग्रंथे निर्णयादिपके व्रतबंधादिविषये निर्णीति निर्णयः स्फुटः॥ अथ सर्वविधिः
पुराणं॥ प्रमादादरी छायावापि योमर्त्यः सपतितो ह्यतः॥ तस्य शुद्धिकरं कर्म सपरिपृच्छन्नमाचरे

त्॥ पक्षयोरुभयोर्नागांस्त्वंचमीषु प्रपूजयेत्॥ तस्य विधिः॥ पंचम्यां कृतस्नानोपजप्येत्॥ तस्य
विधिः॥ पंचम्यां शुक्ल मंगादितियेषु यमस्य रूप्यमयीं प्रतिमां कृत्वा हेममयीं नागप्रतिमां च का
लमोपस्थितयोः प्रतिष्ठाप्य कृत्वा गंधादि वस्त्रैर्नैवेद्यैरक्तसंपूज्य सप्तमिर्मंत्रैः क्षीरजलैः सर्वौष
धिसमन्वितैस्तर्पयंति कर्पयति॥ अत्र मंत्राः॥ कालिकोनाम सर्पा। नमोस्तु सर्पेभ्यः॥ प्राद्विषवसु
षेवामि॥ ४॥ सर्पसाम॥ ५॥ प्रसर्पसाम॥ ६॥ उत्सर्पमिः॥ ७॥ तिधनसाम॥ ॥ एभिर्मंत्रैरष्टौना
गान् अनंतादिनाम लिख्य तर्पयित्वा अष्टमि ब्राह्मणैः प्रधानमुख्यैः आदेशितवायापसर्गो घृतम
धुदधिमधुसंपृक्तान् अष्टौ पिंडान् अष्टाभ्यो नागेभ्यो दद्यात्॥ प्रथमपिंडे अनंत द्वितीये वा
सुकि॥ तृतीये तक्षक॥ चतुर्थे कर्कोटक॥ पंचमे पद्म॥ षष्ठे महापद्म॥ सप्तमे शंख॥ अ
ष्टमे कंबल॥ एवं पिंडं निर्वपेत् क्षीरजलैः सर्वौषधिसम। न्विते॥ शंखेन ताम्रपात्रेण
वा कालिकोनामेति मंत्रेण प्रथमपिंडे जलं धारां दद्यात्॥ द्वितीये नमोस्तु सर्पेभ्यो॥ तृती

ये प्राद्विषवः॥ चतुर्थे पिवामी॥ पंचमे सर्पस्यामो॥ षष्ठे प्रसर्पसाम॥ सप्तमे उत्सर्पसाम॥ अष्टमे
निधनसाम॥ ततो गंधादिभिरभ्यर्च्य मिष्टकं पायसैरिति विसर्जयेत्॥ ततः स्वगृह्योक्तविधि
ना पंचभूसंस्कारं कृत्वा अष्टनागान्स्थाप्य संचरं स्थापयित्वा ईशाने रुद्रकुंभे श्वेतवस्त्रेणावृ
तं स्थापयित्वा नागान् तत्रोपवेशयेत्॥ सौवर्णाश्च ततो नागाः स्वशक्त्या मणिविभूषिताः॥ अ
नंतो वासुकिश्चैव तक्षकः कर्कोटकस्तथा॥ पद्मश्चैव महापद्मः शंखः कंबल एव च॥ सर्वास्तथा
गंधपुष्पैर्धूपैश्चैव प्रपूजयेत्॥ पूजयित्वा विधानेन ततः स्थापकमंडिका॥ स्थापयित्वा च
रुश्चैव ततो होमं समाचरेत्॥ आघारावाज्यभागौ कृत्वा आज्यभागद्वयं तथा॥ पायसेन तु सा
ज्येन ततो होमं तु कारयेत्॥ कालिकादिभिर्मंत्रैराज्याहुतीर्हुत्वा च वह्निं तु जुहोति॥ ब्रह्म
लोके च ये सर्पा शेषनागपुरोगमाः॥ नमोस्तु तेभ्यः सर्पेभ्यः सुप्रीता मम सर्वदा॥ मलये
चैव ये सर्पाः कर्कोटकमुखास्तथा॥ नमोस्तु तेभ्यः सर्पेभ्यः सुप्रीता मम सर्वदा॥ ये सर्पाः प

र्वताग्रेषु येच सन्धिषु संस्थिताः॥ नमोस्तु तेभ्यः सर्वेभ्यः सुप्रीता मम सर्वदा॥५॥ पृथिव्यां चैव ये सर्पा ये
सर्पास्तु विरामाश्रताः॥ नमोस्तु तेभ्यः सर्वेभ्यः सुप्रीता मम सर्वदा॥६॥ ग्रामे वा यदि वारण्ये ये सर्पाः प्रच
रंति च॥ नमोस्तु तेभ्यः सर्वेभ्यः सुप्रीता मम सर्वदा॥७॥ समुद्रे चैव ये सर्पा ये सर्पा जलचारिणः॥ न
मो॥ नमोस्तु तेभ्यः सर्वेभ्यः सुप्रीता मम सर्वदा॥८॥ रसातले च ये सर्पा अनंताद्या महाबलाः॥ नमो
स्तु तेभ्यः सर्वेभ्यः सुप्रीता मम सर्वदा॥९॥ एतासामाहुतीनां च सर्पेभ्यस्त्वागराव च॥ वरोमश्च स्वि
ष्टकृतं हुत्वा प्रायश्चित्तं ततः परं॥१०॥ प्राजापत्यं चादातव्यं संस्रव प्राशनं ततः॥ एवं कृत्वा विधा
नेन ततः कामं समापयेत्॥ ततः संवत्सरे पूर्णे चांवर्णतागं कृत्वा गांतिलसंहितां च दद्यात्॥ स
र्पदंशान्मृतस्य एकादशेऽह्नि अनेन पक्षेण वक्ष्यमाणपक्षांतरेण वा सर्पबलिं कृत्वा क्रुद्धोद्दि ३४१
तां च दद्यात्॥ सर्पदंशान्मृतस्य एकादशेऽह्नि अनेन पक्षेण वक्ष्यमाणपक्षांतरेण वा सर्पबलिं
कृत्वा क्रुद्धोद्दिकां कुर्यात् सर्पबलिः कार्यः॥ अथ पक्षांतरं पंचम्यां शुक्लयोः पक्षयोः स्ममो नागे

पिष्टेन विलिख्य वा दारुमयं मृन्मयं वा पंचफणं कृत्वा गंधैः एकविंशतिपत्रैः जातीपुष्पैः धूपै
सिनतं दुग्धैः अनंतं वा सुकिं शंखं पद्मं कंबलकं कर्कोटकं अश्वतरं धृतराष्ट्रं शंखपालं कालियं
संपूज्य गव्यक्षीरमोदकैर्नमो निवेद्य पश्चाद् ब्राह्मणान् घृतपायसमोदकैः संभोज्य च नमोस्तु
सर्पेभ्य इत्यादिनोपस्थाय एवं वदेत्॥ मुंच मुंचामुकं नामेति॥ तद्दिने मधुरं भुंजीत॥ एवं अ
ब्दं संपूज्य पूर्णे संवत्सरे सौवर्णं नागं गां च दद्यात्॥ तत ऊर्ध्वं दैहिकमिति॥ स्मृत्यर्थसारे तु
मासं बलिः॥ पुराणात्तु नागबलिः॥ नमस्ये पंचमी शुक्ला मासि सर्पान्यपक्षयोः॥ नागानां पूजनं का
र्यमन्यां वा शुक्लपंचमीमिति॥ दारुमयं मृन्मयं वा पिष्टमयं वापि वा नागं कृत्वा पंचफणं गं
धपुष्पैः समर्चयेत्॥ संपूज्य भोजयेद्विप्रान्नागं दत्वा तथा च गां॥ उपस्थाय वदेदेवं मुंच मुंचामु
कं जनमिमिति॥ अनंताद्यान्समभ्यर्च्योपस्थानं ततः परं॥ नमोस्तु सर्पेभ्यो ये के च पृथिवीमनु
ये अंतरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः॥ ततः अनंतं वासुकिं शंखं पद्मं कंबलं कालियं॥ कर्कों

टकन्नोरवपात्राश्चतरधृतराष्ट्रकसर्पाणामधिपाः पंकुर्वे विज्ञापनामतः सुप्तकजनुवायेनके
नापि सर्पाद्विषिनः ॥ अन्तुकंप्यासुकंतत्तुर्मतादिसकलेऽज्ञवं ॥ तन्मुखाद्विषसंस्पर्शव्याकुलस्या
र्घ्यैर्वितसः वेराजीवः एय्यन्नतोमुञ्चामुकंजनमिति ॥ तद्दिने मधुरं भुंजीत सुमंतुः ॥ सुवर्णनार
निष्पन्नं नागं दत्वा तथैव गां ॥ विप्राय दत्वा दत्वा विधिवत्पितरानृण्यमाप्नुयादिति ॥ पितुरिति सं
पर्दिष्टमृतस्योपलक्षणं ॥ नागलक्षणं तु मत्स्यपुराणे ॥ नागाश्चैव प्रकर्तव्या खड्गखेटकधार
णः ॥ अधः सर्पासिपक्षिनिस्तेषांनाभेरूर्ध्वंतु पौरुषाः ॥ फणाश्च मस्तके कर्तव्या द्विजिह्वा बाहु
वो समाः ॥ शातातपः सर्पदष्टे नागं बलिं दद्यात् सर्पसर्पश्च कांचनं ॥ मिताक्षरायां तु पुराणोक्तवि
धिना नागपूजां कृत्वानंतरं विष्णुबलिक्रियादितिशेषः ॥ इति सर्पबलिः ॥ अथ विष्णुबलिरुच्यते ३४२
विष्णुबलिश्चांडालजहस्त्यादिनाहतमरणेन म्लेच्छस्य प्रेतस्य शुद्ध्युत्पादनद्वारेणाप्यादिसंप्रदा
नत्वयोग्यतां जपति ॥ सचैकं कर्तव्यः ॥ कस्याश्चित्पुस्तिकादन्यो विष्णुयमेनुचांघपुष्पान्निर्दि

संपूज्य तदग्रे एकादश्यां नारायणाद्येकादश विष्णुनामभिरेकोदिष्टविधानेन देवत्वाभावन् ब्रा
ह्मणपादप्रक्षालनादि अर्घ्यसिद्धिं तत्पित्रभ्यां तंत्रां द्रकृत्वा दक्षिणाग्रेषु दर्भेषु दक्षिणामुखो
मधुघृतप्लुतान्तिलमिश्रानेकादश पिंडान् दत्वा गंध्यादिभिरभ्यर्च्य स्वधाक्चत्वसमय
जानुभ्यामवनिगतो ध्यानसंयुक्तः शंखेन ताम्रपात्रेणवा सरुद्रीर्षेत्यैकाववाकुर्तिः मूलका
मेकादशपिंडेषु जलधारां दत्वा विप्रान्दक्षिणया संतोष्य ताम्प्रन्द्रकर्णेनिरि पिंडान्विस
ज्यनद्यादिमसिप्रक्षिपेदिति ॥ ततस्तस्यौ रात्र्यामुपोषित श्वोन्यते विष्णुराधनं कृत्वा पंचगु
कलत्रेषु पंचरत्नयज्ञोपवीतमुद्रापनालितेषु ब्रह्माणं विष्णुं रुद्रं सपरिवारं यमं प्रेतं च स्थाप्य
त्वा संपूज्य तदग्रे पंचदेवताकं एकोद्दिष्टविधिना ब्राह्मणान्ति मुखोर्घ्यपिंडसाद्दितं प्रेते विष्णुरू
पं संस्मरन्नाश्वंकर्यात् ॥ मंत्रा विष्णुरूपाय प्रेताय समः प्रेतस्य पंचमइति ॥ अत्र ब्राह्मणेवि
प्रनवैरूपापयामापत्पूर्वेक्ति विधिनाचतुरः पिंडान्दत्वानामगोत्रसंहितं प्रेतंसस्मरन्विष्णु

नि॰सि॰
३४३

नमिसंकीर्त्य पंचमं पिंडं दद्यात्॥ अत्रापि पूर्ववत् ब्राह्मणोस्य मुखमित्यादिना रुकपंचकेन पि-
डेषु जलधारां दद्यात्॥ पूर्ववद्विसर्जनं च॥ विप्रान् दक्षिणाभिस्तोषयित्वा तन्मध्ये एकं प्रेततनु-
ध्या संस्मरन् गोभूहिरण्यादि दद्यात्॥ नातिश्रमयेत् नोपयेत्॥ ततः स्वजनैः सार्द्धं भुंजीतेति॥ एकाद-
शाहे चेत्कुर्यात् तत्रापि विधिरयमेव॥ अत्र पुराणवचनानि॥ एकादशीं समासाद्य शुक्लपक्षस्य
काश्यपे॥ विष्णुं यमं च संपूज्य गंधपुष्पादिभिस्तथा॥ कृत्वा मेकादशे द्विश्रैविधिनाराणं क्रये॥ य-
जमानो वेन्नत्र शुचिर्बंधुसमन्वितः॥ मंत्रात्न प्रक्रवति श्राद्धान्येकादशैव तु॥ यज्ञोपवीती स-
तिलान् पिंडांस्तु दक्षिणामुखः॥ दद्यादिति विशेषः॥ ध्यानधारणसंयुक्तो जानुभ्यामवनिं गतः॥ तां-
रवे न्नाताम्रपात्रेण जालेन्येन निवेत्॥ कृत्वा वैदाप्यपेदंधे पिंडे चैव पृथक् पृथक्॥ अर्घं जलधा- ३४३
रे॥ नकं कर्णमिति च कुर्यात्पिंडविसर्जनं॥ उद्धृत्य पिंडान् पश्चात्तु तीर्थे वा सलिले क्षिपेत्॥
कलौ कादशदैवत्यं श्राद्धं कुर्यात्त्रिरेव हि॥ विप्रानावाहयेत्तत्र चतुर्थे हि विचारदान पंचस्या-

नीकवीतदेवतानां तथा विधिः॥ ब्रह्मा विष्णुस्तथा रुद्रो यमः प्रेतश्च पंचमः॥ पृथक् कुंभेषु संस्था-
प्यात ए श्रेष्ठाः समाचरेत्॥ विष्णुः स्वर्णमयः कार्यो रुद्रस्ताम्रमयस्तथा॥ ब्रह्मा रौप्यमयस्तत्र य-
मो दांशोमयो भवेत् गरुडपुराणे॥ विष्णुबलिविधाने पूर्वं विस्तुतर्पणमुक्तं॥ तागोब्दाद्वशनाडी-
भिर्दिक्पंचदशाभिस्तथा॥ मृतोष्टादशनाडीभिर्दूषयत्युत्तरां तिथिं॥ मितिस्कंदवचनेन दिक-
दशमीतया पंचदशघटिका विद्धायामेकादश्यां विष्णुबलिः प्रतिकर्मनि कार्यमिति निरूपि-
तं त्रिंशे॥ इति गरुडपुराणोक्त इति विष्णुबलिविधिः॥ धनिष्ठादिनक्षत्रके मृतस्य संस्क-
याप्रकारो विधिरुच्यते॥ तत्र गरुडपुराणे एतन्नानि॥ पंचकेषु मृतो योसौ न गतिं लभते नरः॥ आ-
दौ कृत्वा दं भितेन्न पक्षत्रपंचक॥ रेवत्यंते सदा रुद्र ममशुन संवृद्धो भवेत्॥ दाहस्तत्र न कर्तव्य
कर्तव्यो विघ्नाः सर्वे विनाति वा॥ दाहयेत् न जंतवे अशुभं जायते यतः॥ लोकपात्रावकतभ्योदः
खात् स्वजनोपदि॥ पंचकानंतरं तस्य संतापोप्य प्रजायते॥ पुत्राणां गोत्रिणां तस्य कार्ये मे

न्यथा॥ गर्भे हतानि भवंति तु षट्कर्मसे वेषु मृतस्मयः॥ अथ वा कुत्सर्मे ध्ये तु दाघस्य विधिपूर्वकं॥
क्रियते मातुषाणादिमघ आहुतिकारणात्॥ मघाहुतिकारणं तु॥ मघायां तिही मघस्तु
मं॥ विप्रैर्निपमतः कार्यो मंत्रैस्तु विधिपूर्वकं॥ नाबस्य च समीपे तु क्षेत्र ब्या पुत्र लास्ततः॥ ह
र्म्यमियाश्च चत्वारो निक्षामं त्रानि मंत्रिता॥ ततो दाघः प्रकर्तव्यस्ते स्तु पुत्रलके सुदृ॥ स्त
कांते तदा पुत्रकपछिंगति कमुत्तमं विप्राणां दीयते दानं सर्वेपि क्रवनाम्नाते॥ मुतकां तं च स
त्पुत्रैः संप्रेतो त्यमते गतिं॥ तिजागाश्व छिरणं पंच तस्योद्दे द्विघतं ददेत्॥ भोज नोपानहौ छत्रं
हैमसुत्रं च वाससी॥ दक्षिणा दीयते विप्रैः सर्वपातकमोचिनीति॥ बाज स्य द्वघ्न तो ह्द्रु
स्पपं यके पु मृतस्य हि॥ विधानं यो न कुर्वीत विघ्नं तस्य प्रजायत इति॥ विधानं नक्षत्राणां प्र
जपश्च॥ नक्षत्राणां पूजनं तत्र वनो प क्रमे पूर्वं दैवतं सवित्रैस्फ स्या तद्देवता पूर्वकं पूजनं॥ ध
निष्ठादि दित नक्षत्र देवतात्येता एता स्नि पंस्ता कर्मणि रात्रा स्निः कन नक्षत्राणां यजन कर्मणि

राता स्निः कर्म कार्यं॥ दैवतापंचके त्वेतत्कार्तव्ये दे — मसिंदि॥ ताम्रमये पुकुंभेषु वस्त्र
स्थापनादिषु॥ स्थापयित्वा विधानेन पूजनीयं सकुंभकं॥ जपे पुनाक्षिणा स्तत्र देवतानां
मंत्रकान्॥ अस्मावये न वविष्णा प्रेसप्रायोग मिदं च॥ अमुकानिघस्य प्रेत स्य पंके स्व
ति द्दोषतः॥ त्वं किं ना दुर्गति स्त स्य त्य क्रति स्याद्द्विजोत्तमा॥ जापांते दक्षिणा दद्यात् पादे
वाच येत्तता॥ पुत्रादि यजमानः इति शेषः॥ विधान विमेतत्कृत्वा तु कुर्यादिकादशाहादिकं॥ क
र्मकुर्यादिति॥ अत्रायं क्रमः॥ एकादशे द्वितीयजमानो मंत्रेणोमयादिस्नः स्नान॥ स्नात्वा प्राग्
अद्येति कालौ दिशं च संतीर्त्यअमुक प्रेतस्य पंचकामरणास्व्चितादुर्गत्क्षयमात्पयेतया
सपरिवारस्य मम मंड्कक रिष्ये इति संकल्पानि ष्टनिवृत्याम्क दर्भार्थं च पंचक विधानमहं क
रिष्ये इति संकल्प्य नद्यविघ्नु संपूज्य दक्षिणास्याद्दि शि स्थापितेषु पंचकलशेषु जलपूर्णे
षु पुनः पूर्णपात्र वस्त्र नालिकेर सर्वोषधि युतेषु सुवर्ण निर्मित वस्त्रादि देवतापंचक

सम्यगाचरणात्तिथेः पूर्वकं कृत्वापि पिनाकधृता रुद्रदेवताकमंत्रैर्जपं कुर्यात्॥ जपांते याजमानो ब्राह्मणा
न्दक्षिणादिभिः संतोष्य अमुकस्य पंचकमरणजनितदोषनिवृत्तिरस्त्विति ब्राह्मणेभ्यो यथापदं वा
पयेत्॥ तत एकादशाविधिं तं कर्म क्रियते॥ जपजद शोधनहोमः याज्ञिकः॥ येन सपत्नाः वरुणपाप्मा
विताः॥ शन्नो अज एकपात्॥ शन्नो अहिर्बुध्न्यः॥ सूक्ते ते अन्ये वइति कृत्वा रत्नौ मन्त्रः॥ इति पं
चकमरणविधिः॥ अथ नीलोत्सर्गकालनिर्णयः॥ तावत्फलमाह मत्स्ये गरुडस्यंति॥ शृणु सा
धो प्रवक्ष्यामि वृषोत्सर्गं तवानघ॥ नीलोत्सर्गविधिर्येन पितॄणां ततृप्ति वेत॥ गयाश्राद्धाश्वमेधाभ्यां
नीलोत्सर्गोधिकोमतः॥ ये गता रौरवे घोरे कुंभीपाके च ये गताः॥ ते सर्वे मुक्तिमायांति नीलो
त्सर्गे कृते सति॥ कृत्वा नानाद्वानमुहूर्ते दित्यादि फलमुक्तं॥ तस्य काला अभिधीयंते॥ कार्तिक्या ३४५
मयुवै शाख्यां फाल्गुन्यां माघाकामुत्र॥ आश्वयुज्यां तथा चैव चैत्र्यामाषाढ्यामथापि वा॥ अयने द्व
युगे चैव ग्रहणे चंद्रसूर्ययोः॥ वैधृते च व्यतीपाते मन्वादिषु युगादिषु॥ दिन क्षयेऽपि सुसंक्रां

तौ कार्तिसाम्येत थैव च॥ मातापित्रोः क्षयाहे तु विशेषेण प्रशस्यते॥ पदा चित्रं च वित्तं च तीर्थं पा
त्रं तथैव च॥ तदैव दानकालः स्यात्स्यात्किं विद्विचारयेत्॥ नास्तिका विकर्माणि: प्रेतयोनिं च
य गताः॥ ते सर्वे मुक्तिमायांति नीलोत्सर्गे कृते सतीति॥ जन्न तस्कं धकरुद्दमित्याद्दिष्टल
क्षणान्युक्तानि॥ तथा गरुडेऽपि एषेव च विस्तिनमः स्यात्रमल कृत्यप्रथमु ख्याध्यनस्त्रो वछतर्प
चतस्रणामभावे एकोपि न वेदित्या गरुडपुराणे॥ एक वर्णं द्विषेद्वे वसदम्ब छतरीरवग॥
न्त्या पष्पि त्वाततकुयास्त्र वलिंका रम्भा पिता॥ प्रतिष्ठाप्य वतं युग्मैश्रे तो मोक्षमवाप्नुयात्॥ पु
च्छे वत्सपर्णिकायं मुक्षितं मंत्रपूर्वकामिति॥ एकादशाहे प्रेतस्य यनोत्सृज्यते वृषः॥ प्रेतत्वसु
स्थिरं तस्य दत्तैः श्राद्धशतैरपीति॥ इति नीलवृषोत्सर्गकालनिर्णयः॥ कृतत्वलक्ष्विदेन संयो निर्णा
यपके॥ उक्ता नीलोत्सर्गकालास पर्णाद्दिमरणे विधिः॥ अथ रविवारे सिद्धविरुद्धानाये गेत्यभि
धीयते॥ सूर्यवारे द्वादशी चतुर्दशी सप्तमी विशाखादिषु विरुद्धयोगः॥ तदुक्तं॥ सूर्ये विशाखा

रथ्याद्वादश्यपथ्यचितुर्दशी॥मघानुराधाज्येष्ठाश्च वर्जनीयाः प्रयत्नत इति॥चौरविषादग्धयोगे॥
क्रौमयोग॥सप्तम्यां रविवारेण संवर्त्तश्चियोगः सोप्यशुभः सर्वकर्मसु त्याज्यः॥तदुक्तं रत्नमालायां॥
सप्तम्यां दिनकरवासरे यदि स्यात्संत्याज्यः शुभफलकांक्षिभिः प्रयत्नात्॥धर्म्येकिर्मणि तु॥
सोमवारेत्वमावास्या तस्मानुवारे च सप्तमी॥षष्ठिर्वर्षमिह स्नाकमिदस्नाकर्मदे सम्॥तथा॥म
त्रं मोनो विश्वा स्वाती तयं मघा वे नशो मनं॥अथ सिद्धियोगः॥रवौ॥आदित्यवारस्थ मीह स्तअश्वि
नी चोत्तरात्रयं॥मूलपुष्यं धनिष्ठा च सिद्धियोगाः प्रकीर्तिताः॥उत्तरात्रितयं मूलं हस्तपुष्या:
शुभप्रदा॥एतद्व्यतिरिक्तास्तिथिगणोनक्षत्रगणश्चभानुवारे समः॥तथा दिवसे अष्टौ अर्धप्र
हरा नवैतिभानुवारे चतुर्थेद्विप्रहरः शुभकर्मसु त्याज्यः॥तथा॥शुक्रार्कयोर्न प्रतीच्यामिति ३४६
भानुवारे पश्चिमायां दिशि दिक्शूलं तत्र गमनं न कुर्यात्॥तथा॥तिथिविषये षष्ठीचतुर्थ्यौ
पश्चिमायां योगिनी॥चतुर्थ्यादिद्वादश्यां नैरृत्या॥सप्तमीपूर्णिमास्योर्वायव्यां॥योगिन्यो वसं

ति तत्र यात्रां न कुर्यात्॥द्वादश्यां चतुर्दश्यां भानुवारे पि धर्म्यकर्माणि प्रशस्ते॥भानुवारे चतुर्दश्यां
मुहूर्तं कुलिकं॥तत्र मंगलकर्माणि त्याज्यं॥रात्रौ त्रयोदशमुहूर्तं कुलिकं॥अथ सोमवारे सिद्ध
विरुद्धानि॥नवमी सोमवारेण सिद्धा॥तदुक्तं॥सोमे तु नवमी पुष्य श्रवणरोहिणीमृग॥एता
नि सर्वदा वक्ष्ये सिद्धिदानि सर्वकर्मसु॥सोमे॥अनुराधापि प्रशस्ते॥पुष्यानुराधा श्रवणा त्रिसिद्ध
ये॥रोहिणीद्वयं॥अथ सोमे विरुद्धा॥शीतगौपुनुराषाढे विश्वा रवाभि जितस्त्यनेत॥आषाढे॥ए
वंषा नंत्या पाद॥श्रवणस्य अयाश्वतस्त्रः घटिका अभिजिन्नाम नक्षत्रं॥एतानि सोमे विरुद्धा
नि॥अन्यासु तिथिषु सोमवारो न सिद्धो न विरुद्धः॥अन्यानि नक्षत्राणि सोमे समानि॥तथा॥
शशि सोमयोः प्राच्यां गच्छेदिति वचनात्॥सोमे पूर्वस्यां दिशि॥तिथिविषये प्रतिपन्नवम्योः पू
र्वस्यां तृतीयैकादश्योराग्नेय्यां अष्टम्यमावास्ययोरैशान्यां योगिन्यः प्रतिवसंति॥रिक्तत्वेन
शनिवारेपि नवमी सिद्धा॥शनौ रिक्ता सिद्धियोग इति॥यात्रायां सन्मुखा योगिनी त्याज्या॥

तथा॥ सोमवारे सप्तमी दूष्या श्रीधरः शुभकार्ये त्याज्या॥ त्रयोदशी एकादशी च सोमवारे विरुद्धा॥ त
दुक्तं॥ चंद्रे चित्रोत्तराषाढा पूर्वाषाढा विशाखिकं॥ एकादशी त्रयोदश्यौ नष्टयोगाः प्रकीर्तिताः॥ सा
तुर्त्री नगोपुत॥ सोमवारे द्वादश्यां मुहूर्त्तं क्रिलिकं मंगलेत्याज्यं॥ रात्रौ एकादशी मुहूर्त्तं॥ अथ सो
मवारे सिद्धिविरुद्धादिकमुच्यते॥ सोमवारे तृतीयाष्टमीत्रयोदश्यः सिद्धाः॥ षष्ठी च॥ तदुक्तं॥ सोमे ष
ष्ठी तृतीया स्यादष्टमी च त्रयोदशी॥ मूलाश्विनीमृगश्लेषाः सिद्धाः॥ तत्र राजाद्युपात्॥ अपरे तु॥ श्र
वणमैत्रे सोमे कृत्तिकापि प्रशस्ता॥ उक्तं॥ अश्विनी कृत्तिकाश्लेषोत्तरस्याद्युपदा॥ सोमे प्रतिपत्दश
मी च विरुद्धा॥ तदुक्तं॥ कुजे तु वैश्वदेवाद्य प्रतिपत्पूर्वामिंद्रपात॥ वरुणं वा सुदेवं च पूर्णयासह दश
मेति॥ वैश्वदेवं उत्तराषाढा वरुणं॥ शतभिषाक्॥ वसुदेवं॥ धनिष्ठा॥ अत्र पूर्णा दशमी॥ दशम्यां
सोमवारेण ककचयोगो भवति॥ तदभिप्रायेण सोमे दशमी वर्जिता॥ मंगलकर्मणि॥ न तु ध ३५७
र्मकर्मणि॥ नूनं दैवधनिष्ठादित्रयमाद्यविवर्जिता॥ अत्र पूर्णयेति॥ वदतुरयमभिप्रायः॥ प

ञ्चस्वपि पंचदशतिथय पुनरावृत्ता॥ नंदा भद्रा जया रिक्ता पूर्णा इति॥ तथाहि॥ प्रतिपत्षष्ठी
एकादश्यः नंदातिथयः द्वितीयासप्तमीद्वादश्यः भद्रातिथयः॥ तृतीयाष्टमीत्रयोदश्यो ज
याः॥ चतुर्थीनवमीचतुर्दश्यो रिक्ताः॥ पंचदशीमिपूर्णिमा पूर्णातिथय इति॥ तत्र कुजे ज
यासिद्धियोगः॥ अन्यास्तिथिषु सौम्यसमः सिद्धव्यतिरिक्तानि नक्षत्राणि सोमे समानि॥ त
थानोदीच्यां बुधसौम्ययोरीतिवचनात्॥ सौमेन्द्रीच्यांत्तरस्यां दिशि विदिक्शूलानि॥ तत्र यात्रां
न कुर्यात्॥ तिथिविषये तु द्वितीयादशम्योरुत्तरस्यां योगिन्योऽवसंति॥ तत्र गमनं न कुर्यात्॥
तथा सोमे श्रीधरः मंगलकर्मणि त्याज्य॥ सोमे दशमी संमुहूर्त्तं क्रिलिकं शुभकर्मणि त्याज्यं॥
रात्रौ नवमं मुहूर्त्तं क्रिलिकं॥ अथ बुधवारे सिद्धविरुद्धतिथ्यादिकमाह॥ द्वितीयाद्वादशी
सप्तम्यो बुधवारेण सिद्धाः॥ तदुक्तं॥ बुधवारो द्वितीयां च द्वादशी सप्तमापुतः॥ मृगानुराधाह
स्तीश्च कृत्तिका सिद्धिदायिकेति॥ पुनरेतानि रूक्षाणि बुधे सिद्धिदायिकानि॥ बुधवारम

धिक स्याकृत्रिकात्रितयं पुष्यानुराधाश्चयसिद्धयेमवंतीतिदोषः॥ अथबुधेतृतीयातवमी प्रति
पत्॥ दिविरुद्धयोगः॥ तदुक्तं॥ बुधेधनिष्टाभरणिदस्रमूलसमन्विता॥ तृतीयानवमी प्रतिप
त्रेवतीश्रविकन्यैतविरुद्धयोगः॥ दस्रअश्विनी॥ तथा॥ बुधेत्रीणित्वरेवत्यामूजंपरियेत्॥ रेव
त्यारेवतीभत्रतित्रीणि॥ अन्यास्तिथयोन्यानिनक्षत्राणितसिद्धानिनाविरुद्धानि॥ बुधेचकासि॰
द्धियोगः॥ बुधवारेचत्ररस्यां दिक्शूला द्वितीयाद्वादस्योरुत्तरस्यांतत्रगमनंनकुर्यात्॥ तथा॥ बु
धवारेपंचमोर्द्धप्रहरः शुभकर्मसुत्याज्यः॥ अष्टमेमूहूर्त्तेकुलिकेतत्शुभकर्मसुत्याज्यं॥ रात्रौ
सप्तमेमुहूर्त्तेकुलिकं॥ अथगुरुवारेसिद्धविरुद्धयोगःकथ्यते॥ गुरुवारेपंचमीदशमीपौर्णमा
स्यासिद्धा गुरौपूर्णासिद्धियोगः॥ तदुक्तं गुरौदशमीपंचम्यौपौर्णमासीविशाखके॥ नाम्या
नुराधेमिथास्कत्तयापुष्यपुनर्वसुश्रुति॥ नामपूर्वफाल्गुनी॥ विशाखकं विशाखात्रिविक्र   ३४७
मे॥ पुनर्वसुत्वरेवत्याद्ध्ययेराधायासिधये॥ पुनर्वसुरूपंरवतीदीपंराधानुराधासिद्धियोगः॥

तदुक्तं जीवेष्टमीचतुर्थीचआकृचितक्षकिर्त्तिके॥ रोहिणीचमृगन्नितिरोविधास्य प्रकीर्त्तिता॥ त
थाजीवेतुत्रीणिरोहिण्याद्रयेदचात क्षर्त्तिको॥ त्रातक्षवात त्रिधाकृत घ्नरितिरिक्त नक्षत्रगुणोत्र
तिथिश्चगुरुवारेसमस्तपानयाम्यायांगुरौगुष्ठेदितिवाचनातगुरुवारेदक्षिणस्यां दिक्शि॰
कश्मूलं॥ तिथिविषयेपंचमीत्रयोदशपौर्णिमास्यां योगिन्यावसंतितत्रयात्रांनकुर्यात्॥ त
थागुरुवारेअष्टमोर्द्धप्रहरः शुभकर्मसुत्याज्या॥ षष्टेमूहूर्त्तेकुलिक॥ मंगलेवर्जनीयंरा
त्रौपंचमंमुहूर्त्तेकुलिकं॥ अथशुक्रवारे॥ सिद्धिविरुद्धयोगःप्रदस्यते॥ प्रतिपत्षष्टीए
कादश्यः नंदातिथयस्ता शुक्रवारेयासिधा॥ तदाशुक्रेसिद्धियोगः॥ त्रयोदशीचशुक्रेसि
द्धा॥ तदुक्तं॥ शुक्रेणप्रतिपत्षष्टीएकादशीत्रयोदशी॥ सिद्धानामयोद योत्तराषाढा हस्त॰
श्रवणरेवती॥ नाम्यपूर्वाषाढा॥ शुक्रमाधिकृत्य॥ पुनर्वसुस्कातिसिद्धयेराधायोरेवतीद्विपंचक
तीश्रवणं॥ एते सिद्धियोगः अथविरुद्धयोगः॥ नागवेत्रितयेपुष्यात्रोहिणीरोहिणीवि

दु॥ त्रितयंपुष्यअश्लेषामघाः नंदनपतेः अन्यानि नक्षत्राणि शुक्रे समानि॥ तथा शुक्रवारस्य तृ
तीयेऽर्द्धप्रहरः शुभकर्मसु वर्जयेत्॥ तथा शुक्रार्कयोर्नप्रतीच्यामिति वचनात् शुक्रवारे पश्चिमा
यांदिशि संतितन्न प्रयाणंकुर्यात्॥ तिथिविषये षष्ठीचतुर्दश्योः पश्चिमायांयोगिनीति॥ तथा शुक्र
वारेद्वितीयासप्तमीविरुद्धा॥ ज्योतिषार्णवेप्युक्तं॥ भार्गवेरोहिणीज्येष्ठा द्वितीयासप्तमीपुनः॥ पुष्योम
घा तथाश्लेषा सर्वकार्येषुवर्जयेत्॥ शुक्रवारस्य तुर्यमुहूर्तंकौलिकं मंगलेतुवर्ज्यं॥ रात्रौतृती
यंमुहूर्तंकौलिकं॥ अथशनिवारे सिद्धविरुद्धयोगा निरूप्यन्ते॥ चतुर्थीनवमीचतुर्दश्यपि रिक्ता
स्तिथयस्ताश्च शनैश्चरेवारे सिद्धा॥ शनौ रिक्ता सिद्धियोगः॥ रोहिण्यादिचाप्युक्तं॥ शनौचतु
र्थीनवमीचतुर्दश्यपिरोहिणी॥ श्रवणाश्वादितिमघाभाग्यंचैव तु सिद्धयइति॥ तथाच
शनिवारे लल्लः॥ स्वातिश्रवणरोहिण्यः सकलाभीष्टसिद्धये॥ भवंतीति शेषः॥ अथ शनिवारे
विरुद्धानि॥ सौरे हस्तोत्तराषाढारेवतीचित्रयासह॥ पंचमीचैवषष्ठीच अर्यम्णासहवर्जितो

अर्यमित्युत्तराफाल्गुनी सुराचौ देववर्जयेः षष्ठे बाह ग्रा॥ त्रयंपुत्तराफाल्गुनीत्रितयेत्तरा
फाल्गुनीहस्तचित्राशतैर्विरुद्धयोग॥ उक्तादन्येन नक्षत्रगणाश्च शनैःसमः॥ तत्प्राच्यां शनि
सोमयोरिति वचनात् शनिवारे पूर्वदिशि तिथिविषये प्रतिपन्नवम्योः एकादश्यांयोगिनीवसति॥
तत्रगमनंत्याज्यं॥ तथाशनिवारे षष्ठोऽर्द्धप्रहरः शुभकर्म सुत्याज्यः॥ शनौद्वितीयंमुहूर्तंकौलिकं
शुभकर्माणिविवर्जयेत्॥ रात्रौप्रथमंमुहूर्तंकौलिकं॥ अथप्रयाणेयोगिनीसन्मुखावर्जनीया॥ स
न्मुखत्वानोपायमाह॥ कर्हमिरी षट्शापंचनाडीनक्षत्रदग्धस्तदनुक्रमेण॥ दक्षोव बाम्य
दक्षादक्षादक्षिणच स्याद्दिक्षु सन्मुखावर्जनीया॥ अद्दितअधिकादग्धा॥ पंचदग्धादुल्लभाति
तिथ्यारत्या पंचदग्धाघटिकासन्मुखानि तिथिनक्षत्रवारैर्यत्रिसिद्धं हंदिनंभवेत्॥ मंगलेकर्म
णित्याज्यं धर्मकर्मनत्यजेत्॥ ग्राम्यांतके नवाद्युल्लंघतु॥ विरुद्धयोगास्तिथिवारजातान नक्षत्र
वारप्रभावाश्चयेत्॥ कृष्णेषु वंगेषु खसेषु वर्ज्यास्त्वशेषमुदेशेषु नते निषिद्धा॥ तथाअयोगसि

३४९

नि०सि० दृष्टयोगस्य प्रावेनोल्लवनीयदि ॥ अयोगेऽन्यतेतत्र सिद्धियोगः प्रवर्तते ॥ अथ देवानां वाप्या-
३५० दीनां च प्रतिष्ठाकालनिर्णयः ॥ भविष्ये सौवर्णी राजती ताम्री मृन्मयी च तथा भवेत् ॥ पाषा-
णधातुयुक्ता वा रीतिकांस्यमयी तथा ॥ रीतिपित्तलं ॥ शुभदारुमयी वापि देवतावृत्र शस्यते
अंगुष्ठपर्वादारभ्य वितस्तिं यावदेव तु ॥ गृहे तु प्रतिमा कार्या नाधिका शस्यते बुधैः ॥ सुदिने
शुभनक्षत्रे मुहूर्ते तु भवेद्यदा ॥ वापीकूपतडागानां तस्मिन्काले विधिः स्मृतः ॥ संक्रांतिवि-
शेषफलं विशेषमाह ॥ कर्कटे पुत्रलाभस्तु सौख्यं तु मकरे भवेत् ॥ मीने पद्मोगयलाभस्तु कुंभे
च सुबहूदकं ॥ वृषभे च मिथुने हर्षिर्वृश्चिके निर्जलं भवेत् ॥ पित्तलं सिंहकन्यायां तुलायां वा प्रा-
तमाप्ति ॥ सिंहे मेषे धनुषि च जलस्य प्रद्धि जयच्छतीति ॥ अत्र प्रदक्षिणायनेतवा यादिप्रतिष्ठा- ३५०
विधानवत कालनियमस्तत्र प्रमाणं स्रजिं लभ्यत इति ॥ भविष्योत्तरे उक्तां सितां मेयाप्रति-
ष्ठां मुहूर्त्तं यतेक्रुयति ॥ देवतातदा ह गार्ग्यः ॥ देवतारामवाप्यादि प्रतिष्ठामुत्तरायणे ॥ मा-

घादिपंचके शुक्ले कृष्णे या पंचमी दिने ॥ दक्षिणे त्वयने कुर्वन् न तत्फलमवाप्नुयात् ॥ तथाम-
त्स्यपुराणे तंत्रे प्राप्य पक्षं तु शुक्लं अतीते दक्षिणायने ॥ विना चैत्रेण मासा ह्यत्रेति समासये
चके ॥ केचिदागामिकास्वत्र नागीकुर्वते ॥ अत्र कालादर्शवचनं ॥ देवारामतडागादिप्रतिष्ठा-
मुत्तरायणे ॥ माघादिपंचमासेषु शुक्लपक्षे समाचरत् ॥ कृष्णेपि पंचमीयावत् केचिदेवं न
मन्वत इति ॥ अत्रादिशब्दाद्वापिकूपौ ॥ आरामो वचनं ॥ कृष्णपक्षे दशमीपर्यंतं कुर्यात् ॥
तदुक्तं विष्णुधर्मोत्तरे ॥ कृष्णपक्षे त्रिभागे तु त्रयमे स्यात्शुभावहा ॥ मध्या द्वितीयास्ते गे
तु तृतीये कर्त्तनाश्नातीति ॥ कर्तुश्चंद्रबलयत्रे दिने इतिशेषः ॥ तथा तिथिषु रिक्तां विना त्यास्तु
भाः ॥ दुक्तं कालादर्शे रिक्तां रितिथिं विनेति ॥ कन्ने शेषाः शुभाः पूर्णा जयावराः ॥ नंदा शुभमध्यमा
नंदा कनिष्ठाः स्फृऽकीर्तिता ॥ चतुर्थी नवमी चतुर्दशी पः रिक्ताः ॥ तां विना शेषाः शुभाः ॥ तत्रा-
पि पूर्णाः पंचमी पौर्णमास्यः वराः श्रेष्ठा जया तिथयः तृतीया अष्टमी त्रयोदश्यः वराः ॥ भद्रा

तिथयः द्वितीयासप्तमीद्वादश्यः मध्यमाः॥ नंदातिथयः प्रतिपत्षष्ठ्येकादश्यः कनिष्ठाः॥ तदुक्तं
कारणतंत्रे॥ जयाः पूर्णाः प्रशस्ताः स्युः मध्यमा नंदसंज्ञिता॥ कनिष्ठा नंदसंज्ञास्युः प्रतिष्ठायां सुरेश्व
कर्मणि॥ देवकार्ये प्रतिष्ठा॥ अत्र मध्यमकनिष्ठत्वं संभवविषये॥ रिक्तां विना सर्वाः शुभा इति वि
ष्णुधर्मोत्तरे निर्दिष्टं॥ वारेषु॥ भौमवारं विनान्ये वाराः शुभाः कराः स्मृताः॥ अत्र विशेषः कारणतं
त्रे॥ रविरुक्मप्रतिष्ठायां गुरुश्च जायारिष्यते॥ नौ वर्जं स्थिरायां स्युः॥ शनिशुक्रबुधे देवा॥ रवेर्वारे उ
ग्रासु प्रतिष्ठासु विदारणं तस्माद् रविरुन्नं भैरवादि प्रतिष्ठासु संमतं॥ गुरोर्वारे च जप्रतिष्ठासु संम
तं॥ इतरे शनिशुक्रबुधसोमवाराः स्थिराः सुप्रतिष्ठा संमताः॥ योगेषु॥ विना शूलादिकान्योगान्न्
वशेषाः शुभावहा॥ तथा सनत्कुमारः॥ व्याघातशूलगंडेषु व्यतीपातातिगंडयोः॥ विष्कंभवज्रपरि
घा वैधृतौ षुन कारयेत्॥ करणेषु॥ प्रशस्तानि प्रतिष्ठासु त्रीणि पादोकरणानि च॥ आद्यौ त्रीणि बव
बालवकौलवानि॥ विष्टिं विना सर्वाणीत्यन्ये आहुः॥ नक्षत्रेषु कारणतंत्रे॥ पौत्रकार्यम॥

योमार्यपीस्याग्नेयद्विदैवते॥ चित्रां विना प्रतिष्ठासु शेषऋक्षाणि शुभानि तु॥ एतानि परिहाप्यत्रोष्म
यो कथितानि तत्राणि प्रतिष्ठासु शुभानि॥ तदुक्तं मत्स्येन॥ आषाढे यो द्वमुजर्क्षमुत्तरात्रयमात्मे
ज्येष्ठाश्रवणरोहिण्यैपौष्णं धनिष्ठाश्विवासवं॥ अश्विन्यादित्यहस्ताश्च पुष्यमृगशिरो जितं॥ अनुरा
धा तथा स्वाति प्रतिष्ठासु प्रशस्यते॥ अत्रोत्तराफाल्गुनीनक्षत्रं निषिद्धमपि गृहीतं॥ उत्तराषाढाया
पादः श्रावणस्याद्यास्तत्सो घटिका अभिजित्॥ तदाह गार्ग्यः॥ वैश्वदेवांतिमः पादः श्रवणस्या
दिनाडिका॥ चतस्रश्चाभिजिन्नाम नक्षत्रं समुदाहृतमिति॥ एषु नक्षत्रेषु स्थिराणि मानि रो‑
णिमानि रोहिण्युत्तराषाढोत्तरभद्रपदाख्यानि स्थिरप्रतिष्ठासु शुभान्याहुः॥ अस्थिराणि तु श्र
वणधनिष्ठाशततारकपुनर्वसुस्वात्याख्यानि अस्थिरासु शुभानि॥ तिर्यङ्गानतानितु ज्येष्ठापु
नर्वसुहस्ताश्विनीमृगशिरोरेवत्यनुराधास्वात्याख्यानि॥ ऊर्ध्वाननानि च पुष्या श्रवणा
त्तराफाल्गुन्युत्तराषाढोत्तराभाद्रपदशतभिषग्रोहिणीधनिष्ठाख्यानि तानि च स्थिरास्वच

ति॥ मंत्रं वदद् दक्षिणतः॥ धन्वनागा॥ देवीं वाचमजनयंत॥ जातवेदसे सुनवाम॥ वाजिन्छायर्वता
नां॥ ब्रह्मा देवानां॥ त्यमूषु वाजिनं॥ ताद मिंद्राणि॥ तुंजे तुंजे य उत्तरे॥ येना पावक चक्षसा॥ त्र्यया
जान्मे॥ भवेत॥ इति ऋग्वेद मंत्राः॥ वरुणस्योत्तंभनमसि॥ त्रातारमिंद्रं॥ प्रपर्वतस्य॥ सवितान्त्वा॥ इदं
देवा॥ इमं मे वरुण॥ उदुत्तमं॥ लोकं पृण॥ अग्नेसदक्ष॥ दिवो मूर्द्धा॥ पयः पृथिव्यां॥ यातुयधीः
पूर्वाः॥ अन्नपतेन्नस्य॥ तं पं विष्टं॥ अग्निः प्रियेषु॥ प्रजापते न त्वत्॥ त्रीणि पदा विचक्रमे॥ इदं
विष्णुः॥ घृतवती॥ कृतव स्था॥ इति यजुर्वेद मंत्राः॥ अग्निं दूतं॥ संते पयांसि॥ पृथिव्या अंतरिक्षा॥
इंदुरिंद्राय॥ शुक्रं शुक्रं॥ अतो देवा॥ वरुणस्याम॥ देवव्रतं॥ मुक्तो नर॥ इति सामवेद मंत्राः॥ अ
ग्नेर्मन्वे प्रथमस्य॥ त्र्यकमयं॥ नक्षत्राणि॥ पृथिव्याम अग्नये॥ सहस्र बाहुः॥ यस्मात् मदाव जत॥
अस्मिन् वसुव सर्वे॥ पुनरेहि वाचस्पते॥ यः केतु देवा॥ शं नो मित्रः॥ शं नो मित्रः॥ शं नो वात॥ शं
दे नो वीतं॥ इति अथर्ववेद मंत्राः॥ सूर्य पाणिर्गिरसि निधाय सिंत्रि योगा यत्न संप्रदक्षिणा॥ चतुष्टयं कु

र्वति॥ नानादिक्पालानां बलिदानं॥ ततो राजोपचारेण देवतायाः वाहनयनं॥ ततः संक्षेपपूजां कृ
त्वा॥ कलशोदकेन पूर्वोक्तैः मंत्रैरधिवासनं जलाधिक॥ प्राणः प्रतिष्ठा॥ ऋचा घोरेति साधार
णो मंत्रः॥ इति देवत्रलमंत्रा असाधारणाः॥ सुगंधपुष्पाद्यर्चितस्य हृदये करं दत्वा जपाशेत्र
रं ज्ञातं॥ ततः षोडशो निरुपचारैः पूजा॥ शिवस्य पंचवक्त्र पूजनं॥ विष्णोः पुरुषसूक्तेन॥ दे
व्याः श्रीसूक्तेन॥ यज्ञा आपो देवी॥ देवीपरं॥ घृतवती॥ अग्निं दूते॥ मनसः काम॥ सकुमिव
जातवेदसे॥ कामं कामदुघे॥ आनो यज्ञं॥ पाषधीः सरस्वती योन्यं॥ तजम्हतं॥ देवं वाचे तिस्र
स्मिन्नग्निर्मन्तुष्यः योमे धाम॥ इमं मे च॥ इति षोडशमंत्राः सूर्यस्य॥ विभ्राट्॥ उदुत्यं॥ येना पावक
दैव्याव ध्वर्यू॥ तेज्ञलया॥ अयंवेन॥ चित्रं देवानां॥ आ नः इलाभिः॥ यदद्यकच्चरणि॥ तस्संवीत
न्मित्रस्य॥ वयं महान्त॥ बाट् सूर्य॥ श्रायंत॥ आद्यादेवा॥ अद्धा देने ति च॥ इति मंत्राः गणेशस्य॥
गणानां त्वेति॥ अन्यदेवानां तत्र तत्र विधिषु विलोक्य॥ आसादं प्रतिष्ठा सवनानां न्यासः पूजा च॥

कलशारोहणं ध्वजारोहणं च॥ सावदिविकपं॥ विजोक्तं विस्तृतं॥ स्वस्तिवाचनं॥ सांगत्यकरणं॥
दक्षिणा॥ गौर्वा हिरण्यं वा सांमि यथाविभवमात्मनः॥ इति पौराणिकी प्रतिष्ठापद्धतिः॥ अथ तडा
गाद्युत्सर्गे विधिः कथ्यते॥ वह्निपुराणे॥ सुदिने शुभनक्षत्रे॥ वापीकूपतडागानां तस्मिन् काले
विधिः स्मृतः॥ संपूर्णे तु कृते कर्तुः संपूर्णास्युर्मनोरथाः॥ मत्स्यपुराणे॥ तडागादिप्रतिष्ठायां प्राक्
पुण्याहादिना मंडपः॥ प्रागुदक्प्रवणे देशे तडागस्य समीपत इति॥ मंड तत्र कारस्तु दातखंडेति
हिमेत॥ षोडश वा हस्तः षोडशहस्तं न्यून्यितं नववेधात्मकं चतुर्द्वारं तोरणध्वजपताकाद्यलंकृतं मंड
पं कुर्यात्॥ सविस्तरं कर्णवेदोक्तमण्डपारुक्तविधानेन मया सूचितं इति॥ तत्र मध्ये वेदिं परिमितां चतु
रस्रां इष्टकाभिः स्थितां चतुर्यष्टिशोभितां शुभां वेदिकां मध्ये कुर्यात्॥ वेदाग्रजसा मंडपे कुर्यात्पंच ३५४
वर्णैस्तत्र विदे॥ षोडशारं ततश्चक्रं पद्मगर्भं चतुर्मुखं॥ चतुरस्रं तु परितो वृतं मध्ये तु सोमनं
मंडपे आयाम॥ वेदिमध्ये लिखेत्स्यानं कर्पत्सिवमुपार्श्वेत॥ मध्ये वलयाष्टपत्रं कि माषि त्र्यंगुलो

त्मितं॥ द्वादशांगुलं द्वितीये विन्नांगुलं तृतीयकं॥ चतुर्विंशांगुलं तु पंक्तिर्यात्रिस्त्यामपांततः॥ कु
र्यादृत्तानि च त्वामध्ये छेदनतो न्समानतः॥ मध्ये वृत्ते तु नाभिः स्याद्दलपत्रं द्वितीयकं॥ षोडशारं
तृतीयं स्यात्तुर्यं च चतुरारं कं तिस्रो रेखाश्च परितश्चतुरस्राश्चतुर्मुखा॥ वारुणं मंडलं ह्येतद्विस्ता
रेण द्विहस्तकं॥ एकपार्श्वे द्वयं मिश्रामयी॥ पद्मार्द्धनं वृत्तिः प्रोक्ता नाभिस्तत्त्रित्रिरंगुलैः॥ अष्टा
भिः पत्रवरं कुर्यात्त्रिभिः स्याच्चतुरंगुला॥ इति केन विद्युक्तं॥ मंडले रजस्थानमला॥ पद्मं पीतं सितं
नाभिरारकाः पंचवर्णकाः॥ चतुर्वर्णा भवेन्नेमिस्तोरे रेखा स्त्रिवर्णिका॥ वेघाश्चोपरितः कृ
त्वा पंचरत्नपंचपल्लवान्विता॥ सजलं कुंभं स्थापयेदिति शेषः॥ तत्र वरुणादीन्पूजयेदिति च
रजःसार्तदुलचूर्णं त्रिकारेण वक्ष्यते॥ तथा॥ वरुणस्य तुरखादीनां च स्वरूपं तन्निर्माणं च व्यच
वक्ष्यते॥ उपादाय पंचरत्नगर्भां मिसुवर्णपात्रां निक्षिप्य स्थापयेत्॥ वेद्याः सपाद करं स्थू
लकापरितश्च तस्रश्चुद्विहस्तयोनिमेखलासहितानि च त्वारि कुंडानि इशान्यां पंचम सामान्यं कुं

डंग्रहपीठान्वितमितिपंचकुंडानिकल्पयेत्॥तथाहि॥ईशान्याग्नाहमीवंतुआग्नेय्योर्मातपीठ॥
कं॥नैर्ऋत्यांवास्तुपीठंतुवायव्यांमंगलंभवेत्॥मंगलमन्तिरवकं॥वास्तुप्रधानात्रकर्त्तव्या॥
तदकारणोमत्स्यपुराणेदोषः॥अग्नेयतोदोषोनभवेदानिरिति॥कुंडानिसर्वाणि॥चतुरस्राणि॥ना
नाकृतीनिवा॥तदर्कसंख्यवेरुद्धिलानिवा॥प्रतिद्वारंपंचरत्नपंचपल्लवाफलवस्त्रयुक्त
लशद्वयंच॥एवमन्यदपियत्नोपकारणंस्रोक्षणीपात्रस्थाजीभणीतास्रुवसमिदाज्यप्रभृ
तीनी॥तथापंचपल्लवसर्वौषधिनाजिकेरनानावर्णगंधधूपदीपमाल्यातिक्षीरदक्षमिति
तयुपजलाध्यायवेष्टनार्थसूत्रंचअन्यमुपयोगिसंभारंचतुपकल्पयेत्॥यूपस्वरूपंचवक्ष्यते
ततउत्तमगतस्निर्वर्दिवंमेश्वस्तडागाद्युत्सर्गंकरिष्येइतिविहितसंकल्पोयजमानःवृद्धिश्राद्धंकु ३५५
र्यात्॥ततःऋत्विकवरणंतत्रआचार्यप्रमुखानांचविंशतिब्राह्मणानांवरणंयाति॥मुख्यास्तत्रषड्हो
तारोद्वारपलास्तथाष्टवे॥अष्टौतुजापकाःकार्याब्राह्मणावेदपारगा॥कुलशीलसमायुक्तं

स्थापकस्यादिहोत्तम॥स्थापकआचार्यइति॥पादप्रक्षालनपूर्वकंअमुकोस्मागयितेनाहंय
क्ष्ये॥तत्रमेत्वमाचार्योभव॥ऋत्विकजापकइत्यादिरेतान्मधुपर्केणार्चयेत्॥ततःकुंडजा
तिचहेमातिकेपूरकटकानिच॥तथागुजापरित्राणिवासांसिविविधानिच॥पूजयेत्पूर्व
मेपर्वनानाचार्येद्विगुणंपुनः॥आघ्यांच॥स्वस्तिवाचनवरणानंतरंयजमानःसपत्नीकःपुत्रपौ
त्रसमन्वितः॥पश्चिमद्वारमाश्रित्यविशेद्यागमंडपं॥ततोमंगलशब्देनभेरीयांनितन्वे
ति॥ततःआचार्यःपूर्वतःकुंडेबह्वृचोहोतारोस्थापयेत्॥एवंदक्षिणादिकुंडेषुयथावेदंहोन्तृ
पवेशयेत्॥जापकद्वारपालानामपिएषएवक्रमोवेदितव्यः॥तदनुखोदक्षिणातोयजमा॥
नउपाविशेदिति॥जुहुयुर्वारुणैर्मंत्रैराज्यंचाससमिधस्तथा॥होतारइतिशेषः॥वारुणमंत्रा
त्वायामितिपंच॥त्वंनोअग्नेवरुणस्येतिद्वे॥इ॥मंमेवरुणश्रुधीतिच॥होमसंख्यासंख्या
समिदाज्ययोरष्टोत्तरशतंविधेया॥ततःआचार्यःसजध्वंइतिहोतृकानब्रूयात्॥ततःआ

नि०दि० वायस्विकुंडे अग्निंप्रयुज्यमंत्रवतग्रहशांतिंकुर्यात्॥अग्न्युत्तारणपूर्वकंवरुणमन्नंतिकमाहि
३५६ नजलस्वरजीवातवेदिकायांस्थाप्यपूजयेत्॥पूजाविधिर्वक्ष्यते॥ग्रहान्आदिनदेवताधिदेव
तासहितान्पूजयेत्॥तथा॥इंद्रप्रभृतिजातकपालादिकपालान्ग्रहदेयन्तोक्तदेवतासहितान्पू
जयेत्॥ग्रहादिभ्यः प्रत्येकं अष्टाविंशतिराहुतयोतव्याइति॥अथाजपसूक्तानि॥रात्रिसूक्तं
चरौद्रंचपावमानंसुमंगलं॥जपेरत्॥पौरुषंसूक्तंपूर्वतोबह्वृचाःपृथक्॥सुमंगलंकनिक्र
दजनुषमिति॥शाक्तरौद्रंचसौम्यंचकूष्मांडंजातवेदसं॥सौरंसूक्तंजपेयुस्तेदक्षिणेनयजुर्वि
दः॥शाक्तंसूक्तंईशानोविश्वतस्पतीत्यनुवाकः॥रौद्रंसूक्तंइमारुद्रायस्थिरधन्वनइति॥सौम्यंसू
क्तंसोमोधेनुमिति॥कूष्मांडंयद्देवादेवहेडनमिति॥जातवेदसंयस्त्वाहृदाकीरिणेत्यनुवाकः॥सौ ३५६
रंसूक्तंसूर्योदिवमिति॥वैराजंपौरुषंसूक्तंसौपर्णंरुद्रसंहितां॥शौरावेपंचनिधनंगायत्रंज्ये
ष्ठसामगानातपश्चिमद्वारमाश्रिताः॥वैराजंपिबासोममिंद्रेति॥सौपर्णानितेदेदनिष्क्रता

मघत्रिणिसामानि॥रुद्रसंहिताआवोराजानमिति॥शौरावंत्वामतेजातमेधसइति॥पंचनिध
नंवामदेव्यंकयानश्चित्रेति॥गायत्रं॥ज्येष्ठसामानित्रीणिआज्यदोहानि॥बृहत्त्वामित्वामिद्धि
हवामहइति॥सोमंपवंतेपयांसीति॥रौरवंपुनानःसोमधारया॥रथंतरंअभित्वाशूरनोनुमइ
ति॥गवांव्रतंतेज्मन्वतश्रयसमिति॥विकर्णविभ्राडिति॥राक्षोघ्नं॥यज्ञासामबृहदिंद्रायगाय
ताः सान्तवेदिकावमेवसुइतियतेति॥आथर्वणाश्चात्ररतःशांतिकंपौष्टिकंतथा॥जपेरन्मन
सादेवमाश्रितावरुणंप्रत्यनुमिति॥पूर्वेद्युरग्नितोरात्रौवेदिकसाधिवासनं॥एवंक्षयोस्समतिवास
विधियुक्तेनकर्मणेति॥ततःप्रभातेविमलेगोतारणपूर्णपारीपुष्पजलाक्षतगोदिकाःपदार्थाः॥ते
चस्वग्रहयोक्तवारुणाचरुविधानेनरक्ताजंकियंते॥तद्विधानंवक्ष्यते॥अत्रायथोक्तमंडप
करणासमवेप्राकृतंकुंडमंडपंकुर्यात्॥बहुकृतिकूवरणासमर्थश्चेत्स्वल्पेनापिकुर्यात्॥
तदुक्तंदानखंडे॥अपंत्वाशांकावर्तेनविधिदृष्टःस्वयंनुवा॥स्वल्पेप्रेकाग्निवत्कार्यंविप्रवा

व्यादतेन्वनि॥ एकाग्निवात एकाग्राविव॥ तत्रतस्येवेतिसत्तम्पर्थेवेति॥ एतेनअसमर्थस्यैवै
कुत्विग्निः एकस्मिन् कुंडे जलोत्सर्गविधानंभवतिइतिसूचितं॥ स्वल्पे धुपे च कृतणात्तृष्टु
पात॥ तदुक्तं तडागादि प्रतिष्ठोपक्रमे हृदत्सरसरे॥ तद्विधित्तः श्रुचिःन्नातो ब्राह्मणो धर्मवित्तम
तत्कृत्यर्थेवरेण्यसौ चतुर्भिर्ब्राह्मणैः सह॥ असौ आचार्यः विरणीयइति॥ जलोत्सर्गाकिरणेदोष
दर्शनादिति॥ पूजयित्वा सदस्यांस्तु वजिंदद्याद्ममंत्रतः॥ स्त्ताभावदवत्पथेनात्रमायसिद्धं तैहते॥
भृदद्याक्षिणा तेभ्यायथात्राक्रूपातयावगं॥ तथा॥ कृत्वातुयत्तपात्राणियत्तोपकारणानिच॥ कृ
तिभ्यस्तु समेदत्वा मंडपं विसृजेत्पुनः॥ हेमपात्रीशय्यां च स्थापकाय निवेदयेत्॥ गवांशतं च
दातव्यमुत्तमश्रेष्ठ्यवापुनः॥ पंचाशद्वाथ पत्ज्ञिंशत्पंचविंशतिवापुनः॥ ब्राह्मणेभ्यः शक्तितोषा ३५७
त्ययं विधिः कूपवापीषु अन्यासु प्रतिष्ठासु साधारणं॥ तदुक्तं॥ एषएव विधिर्दृष्टः प्रतिष्ठासुत
थैव च॥ मंत्रतस्तु विशेषः स्यात्प्रासादोद्यानभूमिषु॥ वरुणाच रो विरुद्ध धर्मसिद्धं घेस्वशाखो

क्तमनुष्ठेयमिति॥ इतिश्रास्तु अधिवासनविधिः॥ अथ अधिवासनानंतरं वक्ष्यमाणत्वोत्सर्गावारुणं
चगोतारणागोपुच्छतर्पणादि वारुणेषिपदार्थजातमनिधीयते॥ अथसरस्त्रोत्सर्गो वाप्याद्युत्सर्गवि
धि॥ तत्र कारिका॥ ब्रह्माणं विष्णुमीशानं नगपालांश्चतथाबिकां॥ तलाकारोमिगच्छे काङ्बाप्याद्युत्स
र्गपद्धतिं॥ वह्निपुराणे॥ सुदिने शुभनक्षत्रेषु कुर्यात्तु सर्वदा॥ वापीकूपतडागानां तस्मिन्त्र्को
लेविधिः स्मृतः॥ तथा सर्वोषिधुदकस्नातः शुक्लगंधानुलेपनः॥ यजमानः सपत्नीकः पुत्रपौत्र
समन्वितः॥ करिष्यइतिसंकल्प्य वाप्याद्युत्सर्जनं ततः॥ मातृयोगं वास्तुदयिकं कुर्यात्स्वस्तिवा
चनं॥ आचार्यादीनां वरणं मधुपर्कादि पूजनं॥ ततः जलाशयानुवारणादिकृत्वतेमंडपेस्थितं
गरत्वोक्तविधिनाचार्यः स्थापयेदग्निमुत्तमं॥ पुराणे॥ सर्वस्त्रिनोपकारणाय यत्रां तिकृत्वाद्विजोत्त
मः॥ चरुं तु श्रपयेत्स्नौ वारुणं सर्वकामदं॥ इति वचनात् सर्वगृहशांति॥ तत्राविधिक मन्दिरविषेते
मन्त्रेण विशेषहोमः॥ वारुणैर्मंत्रैः समिदाज्यतिलैर्होमइति॥ शांतिंसमाप्यनंतरंततः प्राच्यां

चरुं पवमयेत्तत्र वारुणं पयसाश्रयेत॥ वरुणं पूजयेत्तत्र संस्थाप्य विधिपूर्वकं॥ परिशिष्टे॥ सो
वरुणः कार्यस्मिक रस्कंद मा श्रित॥ चतुर्हस्तः पद्मपाशाकर आह्लादिनीयुत॥ तस्याः पृष्ठे करस्थ
कोपरे मकरवालध्वक॥ सौवर्णादि सपौर्युग्मं चक्रवाकद्वयं तथा॥ सौवर्णः कूर्मः॥ ऐप्योवकः॥
ताम्रमयी जलौका॥ अन्यद्वरौप्यकं॥ जलचराः सर्वे मिंडूकादय॥ तथा॥ मत्स्यकूर्मी जलौकाच
दुर्दुरीजलगोधिका॥ सवारितु दुकीत्रोक्ता सर्पै तास्तज्ज मातरः॥ धातुजेषु युनारणौशुद्धिर्गव्यस्म
गव्यकैः पंचामृतेन स्नपनं प्रतिष्ठाप्याधिवासयेत॥ तथा॥ धातुमयेसन्निवेवाम्बुमेकुंडे प्रपूः
रिते॥ सर्वौषधी हिरण्यं च रत्नं सपल्लवं॥ क्षिप्तोपरिन्यसेत्यात्रं सवस्त्रेनं दुजोजितिं॥ कुंभं स्थाप्य
स्थंडिलोपर्य्यष्टदलेवारुणे मंडलेपिवा॥ वरुणादीस्तु पंचरत्नगर्भपात्राणि निक्षिप्य स्थापयेत्कुं
भोपरि॥ तथा॥ वरुणस्येति मंत्रेण एवं पात्रोपरिन्यसेत॥ नजमानः प्रतिष्ठाप्य पूजयेत्वरुणांज
जं॥ तथा चोक्तं॥ वरुणं विन्यसेत्तत्र पुष्पाद्यैभिः समन्वितं॥ एवं मत्स्यदयिष्वक्ततोपयोगि कर्माणि ३५८

नात्पूर्वं विवासादयेत॥ पाद्यादिकं॥ वरुणस्य पूजाविधिः॥ वरुणस्योत्तंभनमिति वरुणस्यावाह
नं॥ तत्वायास्यास नैपाद्ये त्वन्नो अग्ने तथाचमे॥ स त्वन्न इति स्नाने स्याद्यायोदेवीति वाससि॥ उ
दुत्तमं वरुणस्योत्तंभनं गंधपुष्पयो॥ वारुणाय नमः॥ प्रचेतसे नमः॥ प्रतीच्याधिपतये नमः
यादोधिपतये॥ पाशपाणये॥ कमलहस्ताय॥ आह्लादिन्त्रियायै इति नामभिः पूजा॥ देवीरापइतिधू
पो दे वी ःमुद्धास्तुदीपके॥ आपोदेवीति नैवेद्ये आरात्रिके॥ उदुत्तमं॥ तत्वायामीति अर्घः स्यात्पूज
नेयं विधिः स्मृतः॥ गृह्योक्तहोमः कर्त्तव्यः समस्तस्तु पयसा विधि॥ तत्रोदङ्मुखोदक्षिणतो य
जमानउपविशेदिति॥ स्विष्टकृत्वततोदत्वा माजनीतोकुशांदिकां॥ कृत्वा यूपं निखनोदिति॥
तथा॥ होमस्थानादिशिप्राच्यामीशानेवा जलाशयात॥ दक्षिणतः ततस्थाने यूपं तं निखनेत्क्र
तः॥ परिशिष्टे॥ तत्रस्तम्भयूपः स्यात्साध्यो कल्पत भागयो॥ खदिरस्यैव वैकंतौदुंबरमथवैल्व
निर स्कंधोरोनानीपुष्पमाणं ब्राह्मणादिषु॥ दातखंडे॥ अरत्निमात्रोयूपः स्यात्क्षीरवृक्षाद्वि

विंतिर्मितिः॥ यत्नमात्रप्रमाणो वा संस्थाप्योऽरत्निमितस्तथा॥ यूपलक्षणं तु॥ यूपो वृक्षाद्दृढः कार्यश्च
तुरस्रस्तृतीयकं॥ मध्ये चाष्टास्रकश्चान्ते तु वर्तुलः॥ पंचमस्तु धः॥ यूपे पदायाः॥ स पिता प्रथा
ममंत्रेण यूपस्यास्य द्रुतिं मतं॥ समुद्रज्येष्ठा इति मंत्रेण स्थापयेद्द्वाकुंभके॥ अंजंति त्वे ति मंत्रे
णाघृतेनाभ्यज्य तं पुनः॥ युंजंति ब्रध्नमं मंत्रेण गंधपुष्पैस्तु मर्द्दयेत्॥ गत्तेपिं चास्य तेरुत्वा अग्रपेश्वस्यैदि
वेतया॥ यूपव्रस्का इति मंत्रेण स्थापयेत् जलमध्यतः॥ पुव वस्त्राणि मंत्रेण छादयेद्वाससा पितं॥
संस्थाप्य वित्यसेत्तस्मिन् मंत्रात् वरुणदैवतात्॥ इति। वेदं वाद्यादिघोषेण ततो गत्वा जलाशये
जलमध्ये पूजास्यात्स्नात्वा जलमात्रेण जलस्य च॥ जलपूजा॥ समुद्रज्येष्ठा इति॥ जलाशयाद्बहिः परि
तो दिक्पतीन् द्रष्टितः॥ यादोभिः सह वरुणस्य जले प्रक्षेपणं॥ पात्रीमादौ यसौ वर्णपिंचरत्न ३५९
समन्विता॥ पात्रीं वरुण्या युतां कुंभतोयसमन्वितां॥ धृता चतुर्भिर्विप्रैस्तु दध्यक्षतसमन्विता
न्न रात्रिमुखो न्युब्जां जलमध्ये तु कारयेत्॥ अथ वर्णेन साम्ना तु पुनर्मामेत चेति च॥ आ

पो हि ष्ठेति मंत्रेण क्षिप्त्वा स्नापयिते पुनः॥ आयवर्णः साम शं नो देवीरभिष्टय इति॥ जले प्रक्षिप्य
वरुणं पुनः कुर्याद्विपूजनं॥ वरुणस्योत्तंभनमिति पूर्वोक्तैर्मंत्रैः॥ ततः प्रार्थना॥ जलाधिप
यो वरुणं त्वं तु देवैर्विनिर्मित॥ जलाशयेऽस्मिन् देवेश संनिधानं सदा कुरु॥ पुष्करादीनि गं
गाद्याः सरितस्तथा॥ आगच्छंतु जलेऽस्मिन्या छिनानीष्टसिद्धये॥ मत्स्यादयो जलचराज
लक्रीडासमन्विता॥ विचरंतु स्वभावेन कारितेऽस्मिन् जलाशये॥ यत्किंचेदमिति मंत्रेण त
क्त्वा तिलतर्पणं॥ ब्रह्मा विष्णुः रुद्रः प्रजापतिः॥ कर्पीछंदांसि देवा देवाश्च पूर्वाचार्याश्च पैव
च॥ गंधर्वा नितराच्चायति संवत्सरा तस्य होत्राकाव॥ देवा तप्सरसो नागा तत्सतीयाविसाग
रांस्तथा॥ पर्वतान् सरितश्चैव मनुष्यान्यन्त्रगास्तथा॥ रक्षांसि चापि वांश्चांश्च सुपर्णीः पक्षि
स्तथा॥ स्ता त्विच पश्च स्रवंत्वि तस्य त्योषधीस्तथा॥ वाप्यामस्यां तर्पयामि जलेन शुभदेन वा
स्तत्रामाश्चतुर्विधास्तृप्यंतु जलदानतः॥ दिकपाला जो कपाश्च तर्पि संतोन वंश्विह॥ वा

ष्यां हितपणि सर्वेभ्यः प्रयच्छंतु सुखं मम॥ सततं पणि देवास्त्वं प्यंतु पितृदेवताः॥ ततः दानखंडात्॥ क
नकालंकृतां कृत्वा तत्र गामवतारयेत्॥ सामगाय च सा देया ब्राह्मणाय निवेदयेत्॥ अयं वा तुमं
त्रपणमंत्रः॥ इदं सलिलं पवित्रं कुरु शुद्धाः पूताः अमृताः संतु नित्यं॥ मां तारयंति कुरुतां पापि
षेकं जोकाद्यो कंतरते नीपतिं च॥ पुच्छमानाय ध्वजन्नारा निसु खेन गच्छेत् तटं प्राप्य आपो अ
स्मान् मातरः इति मज्जनं॥ पुच्छेन पुनः च॥ नयापूजितायास्वगोः पुच्छे स्वयमेवावलंबित॥ उत्त
राभिमुखो भूत्वा आगच्छेत् तटं प्रति॥ सुरभेत्वं जगन्मातः पापविनाशिनी॥ नीत्वा पापघरं पु
ण्यं वृद्धिं कुरु सदा मम॥ इति जलाशयं च त्रिवृता सूत्रेण परिवेष्टयेत्॥ सुकुंभाज्यावरं धु
रो धूपमभ्यर्चयित्वा तत॥ परिवध्याच वस्त्रेण यूपमाजिगयेत्तत॥ यूपवापापवतत्त्रिपुरादेवे
विति स्मृति॥ सर्वग्रहाणामेषा पजलरोधप्रभावतः॥ कीर्तिश्चिक्रस्थितो भवतु नित्यशः॥ यू
पस्याधो जलमात्रं वरुणादिकान् तीर्थान्॥ पूजयित्वा॥ अयमेडपमागत्य तत्रोनसंकल्प

३६०

त॥ सर्वे पि मुक्तये॥ गृहीत्वाक्षतदर्भांश्चिदेवकाजे प्रयोजनं॥ संकीर्त्यैवं वदेत्तत्र सर्वमेतत् भ
एव च॥ इमं सर्वोपयोगि वेतान् जाम्निजाला शायं इति त्यागं कुर्यात्॥ मया तुभ्यं त्यज्यते अयं ज
लाशय इति वा॥ अतेतोधगपि तोन प्रीयंतां पितरो मम॥ देवाश्चैव मनुष्याश्च तथा सर्वे वज
नव॥ ततः कनकालंकृतां गां ब्राह्मणाय निवेदयेत्॥ सचैलकं तां वृषप्रत्तां कास्यदोहिनी सु
वर्णशृंगां॥ अन्यांश्च दक्षिणां दद्यात् ब्राह्मणात् भोजयेत्तत॥ ततः संकल्पं वीआपामयवाष्टरांतपु
नः॥ भोजयेद्ब्यथाशक्ता पंचाशदायविंशति॥ ततः प्रार्थना॥ द्विपदांश्चतुष्पदांश्च आपदपाद
पंकुर्यो॥ मम पुण्यस्य वृद्ध्यर्थं निवेशाधायोयप॥ ततः शांतिपाति पाठ पस्तु मं गजं ध्वष
वात॥ जलं च दक्षिणां कृत्वा निर्विघ्न देवत्यजं॥ जलाश्रये स्मिन्वरुणं आनीतो विधिपूर्वकं॥
इमम घर्गह्मणेन्नाम मद्दत्राः प्रदक्षिणा॥ नमस्कृत्य हृष्टचित्तो भूत्वा गत्वा च मंडपं॥ अतिषे
कादिमांगल्यं संपूर्णं प्रार्थयेत्ततः॥ एवं यः कुरुते रात तु वारुणेष्टिप्रयत्नतः॥ पूर्वपीतृनि

युक्तिः परं ब्रह्माधिगच्छति॥ परिशिष्टे॥ पुण्ये तिथिकरणे शुभे नक्षत्रे वा प्राचीं दिशमास्थायोदक
श्रवणे प्राक् श्रवणे वा उदकसमीपे वारुणं चरुं श्रपयेत्॥ मातृपूजापूर्वकं वृद्धिश्राद्धं कृत्वा॥
आश्वलायनगृह्ये॥ अथ पुष्करिणीकूपतडागानां शुक्लपक्षे पुण्ये वापि योपयसायावमयं चरुं श्रप
यित्वा॥ तन्नो अग्न इति द्वाभ्यामव ते हेड इमं मे वरुणोदुत्तमं वरुणेमा धियं शिक्षमाणस्येति द्वाभ्याम्
अथ वारुण्यादि भूम्नतिरिक्षअष्टासु प्रतिपदं चतुर्थ्यंतैः स्वाहाकारान्तैरष्टावाज्याहुतीर्जुहुया
त् प्रदक्षिणं॥ गत्वापगत्वोम यो न्हरा रवरोति रवरोति सरोति कामः सपत्नदूषण इति॥ अग्नेः
मध्ये पयसा जुहोति विष्णुतन्मक्षुरिदं विष्णुरिति॥ स्विष्टकृत्प्रभृति मार्जनान्तं कृत्वा॥ यत्किंचेद
मितिमन्त्रं जपित्वा धेनुं दक्षिणां वस्त्रयुग्मं चातो ब्राह्मणान् भोजनमिति॥ नारदस्तु॥ मार्जनान्ते धे ३६१
नुं तारयेत्॥ पुच्छाग्रे स्वयं अन्वारब्धोनुमंत्रयेत॥ इदं सलिलमित्यादिना॥ ततं प्राप्य यत्कि
चेदमिति मन्त्रं तं ब्राह्मणाय वितर्पणं॥ आपो अस्मान्मातर इति॥ इन्द्रागत्या मुच्छायपयेत॥ स्वय

वसाङ्गवतीति॥ हिङ्कृता चेतं हिङ्कृण्वती वसुपत्नीति॥ सालंकृतां तां गां ब्राह्मणाय दद्यात्॥
अन्यां दक्षिणां च॥ उद्गंकिपद्दिवपितृमनुष्याः प्रीयंतामिति॥ पयस्वान्ओ स्नाप्यते॥ ब्राह्मणान्
भोजयित्वा स्वस्त्ययनं वाचयीतेत्याह शौनक इति व्याख्यातं॥ गत्यानुक्रमपि स्मात्यमविरोधि
त्वसंमतं॥ अतो यूपादिकं सर्वं कात्यायिं फलगौरवात्॥ कर्तव्यानुकमाज्ञा नतिमिराश्रितमा
नसाः॥ तेषां प्रदर्शितार्थ्यिक्लापद्धती दीपिका॥ इति वारुणेष्टिः॥ परिशिष्टे॥ अथातो वारु
णविधिं वापीयत्रं व्याख्यास्यामः॥ पुण्ये तिथिकरणे शुभे नक्षत्र इत्यादि॥ वारुणं चरुं श्रपयि
त्वा॥ आज्यभागान्तं कृत्वा च तस्मिन्नाज्याहुतीर्जुहुयात्॥ समुद्रज्येष्ठा इति चतस्रः चैतन्तोदविषाअ
ष्टानि जुहुयात्॥ तत्त्वा यामि ब्रह्मणा वन्दमान इति पंच॥ त्वंनो अग्ने वरुणस्य विद्वानिति द्वे॥ इमं
मे वरुण श्रुधीति च स्विष्टकृन्तवर्वै प्राणाः प्राणाश्वापस्तस्मादापो नवशिर्जुहोति॥ मार्जनां
ते धेनुं तारयेद्वतार्यमाणामनुमंत्रयेत्॥ इदं सलिलमिति॥ इति नारखान्तरीयां॥ यंते॥ अनि

शाविस्तरोक्तेयोदानखंडादिकेषुद्धि॥मंडपेवेदिकातत्त्ववारुणंमंडलंन्यसेत्॥वारुणमंडल
प्रकारस्तुअधिवासनेसिद्धितः॥षोडशारंततश्चक्रमित्युक्तेनरजसामंडलंकुर्यात्सिंचवर्णेन
तत्वविदित्यत्र पंचवर्णरजःकर्तव्येविशेषःपंचरात्रे॥रजांसिपंचवर्णानिमंडलार्थंहिकारये
त्॥शालितंदुलचूर्णेनशुक्लंवायवसंभवं॥रक्तंकुंकुमसिंदूरगैरिकादिसमुद्भवं॥हरिताले
नवंपीतरजनीसंभवंक्वचित्॥कृष्णंदग्धयवैर्वापिपीतंकृष्णविमिश्रितं॥रजनी॥हरि॥कृ
ष्णपीतवीमिश्रितंपुंचमंडलतिरजसामुत्पादनप्रकार॥अथसर्वतोभद्रमंडलप्रकारः॥परि
शिष्टे॥एकविंशतिरेखाभिर्मिश्रविपदावापीपरिधिर्विंशतिःपदेःषोडशायतानिमध्येस्थु:
कमलेनप्रकारयेत्॥तथारक्तेनकृष्णेसितावापीपरिधिःपीतवर्णकैः॥सितेदुःश्यंखजाकृ
ष्णावृक्षानीलेनपूरयेत्॥इतिप्रकार॥कृतेचलक्षिवेदेनग्रंथेनिर्णयदीपके॥जातोदेव
तडागादिप्रतिष्ठाविधिनिर्णयः॥अथअनेकभार्यःपुरुषःधर्मकार्येसवर्णान्विष्टांमुक्त्वा ३६२

अन्यांकनिष्टानतियोजयेत्॥तदुक्तंमिताक्षरायां॥सत्यामन्यांसवर्णायांधर्मकार्यंनकारये
त्॥सवर्णासुविधौधर्म्येज्येष्ठयानविनेतरा॥सवर्णासुसत्यांअन्यांअसवर्णामिति॥बह्वी
षुसवर्णासुमध्येज्येष्ठयाविनान्येष्टांत्याक्का इतरामध्याकनिष्टावाधर्मकर्मणिननियोक्तव्या
तासामपियथाज्येष्ठंप्रकृतं॥अयमतत्तार्येनिर्णयः॥दाहयित्वाग्निहोत्रेणस्त्रियंवृत्तवतींपति
आहरेद्विधिवद्दारानग्नींश्चैवाविलंबयन्॥वृत्तवतीमितिआचारवतीं॥श्रौतेनाग्निनातदभावे
स्मार्तेनवादाहयित्वाविलंबयन्त्त॥पुनर्वदारपरिग्रहंचविधिवत्कुर्यादिति॥अनाश्रमीनति
ष्ठेतदिनमेकमपिद्विज॥इतिदक्ष॥आधानेज्येष्ठयासदाधिकृतायांसत्याअन्यांमध्यमां
कनिष्ठांवाअग्निहोत्रेणानदहेत्॥तदुक्तंतत्रैवद्वितीयांचैवयोभार्यांदहेद्वैतानिकाग्निभिः॥
जीवंत्यांप्रथमायांतुसुरापानसमंहितदिति॥तथाम्रतायांतुद्वितीयायांयोग्निहोत्रंसमुत्सृजे
त्॥ब्रह्मोज्झंतंविजानीयाद्यश्चकामात्समुत्सृजेत्॥एतच्चआदौतआधानेसहाधिकृत॥

नि॰ दी॰ या॥ अग्निदा वै नैव दिव्यं॥ सद्योऽधिकं तां दहेदिति गम्यते इति निर्णयः॥ अथ पुत्रेषु गौणमुख्यपुत्र
३६३ निर्णयः॥ औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः॥ क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा॥ तथा गू॰
ढजः॥ कानीनः॥ कृत्रिमः॥ दत्तकः॥ पौनर्भवः॥ अपविद्धः॥ क्रीतः॥ सहोढः॥ इत्यादिद्वादश पुत्राः॥
एषां लक्षणानि मिताक्षरादौ ज्ञेयानि॥ एष मुख्य औरसः॥ इतरेषां तु पुत्रकार्यकरत्वं न मुख्यपुत्र
त्वं॥ यथाह मनुः॥ क्षेत्रजादीन्सुतानेतानेकादश यथोदितान्॥ पुत्रप्रतिनिधी
नाहुः क्रियालोपान्मनीषिणः इति॥ इति संक्षेपतो निर्णयः पुत्रवर्त्तमानानां पुंसां सर्वकार्येषु मंगलं॰
स्यादिति मया॥ पूर्णोऽपि ग्रन्थः॥ नानानिबन्धसंपन्नः कृतो निर्णयदीपकः॥ श्रुतो नायं प्रवृत्तायेन
द्विवेदेनावृजेन चेति॥ ऋग्वेदोक्तमहारुद्रविधानस्य सहोदरः॥ शुद्धाध्वदर्शिता याय कृतो निर्ण ३६३
यदीपकः॥ दैवे वेदविदुषां प्रधानमनवच्छ्री वत्सराजो द्विजस्तत्सूनुः सकलद्विजोत्किरजसामंश॰
कृतीयोऽचलः॥ तेनायं विदुषां प्रियाय रचितः सन्निर्णयाकांक्षिणां ग्रन्थो निर्णयदीपकोऽधिवस

नाम्नी प्रवहिंडं पुरं॥ वसंति ये तत्र पुरे द्विजास्ते विबुधोऽयमा॥ तथापि सद्दिवेकाय मयोन्नवये स्तन॥
पंचसप्ततिमे वर्षे संवत्सेंचदशान्यरे॥ शुक्रस्य कृष्णपादश्यां ग्रंथः पूर्णत्वमीयिवान्॥ ॥ ॥
इति श्री निर्णयदीपकः समाप्तः॥ माघे शुध्ये च मदिषा श्रावणे वृद्धवादिवा॥ सिंहे गावः प्रसूता
नाश्च स्वामिनां मृत्युदायकाः॥ १॥ माघे प्रसूता महिषी विधा सिंहे च गावोपडवादिवाच॥ स्त्रियं
श्च पौषे त्रयमामृताः देया द्विजेभ्यश्च सदक्षिणास्तौ॥ २॥ ॥ समाप्तं॥ श्रीरस्तु॥ ॥